CC-0. In Public Domain. Digitization by eGangotri

आचार्य दण्डी

काव्यादर्श:

(अनेक टीकाओं सहित)

• रत्नश्री • हृदयङ्गमा
• प्रभा • विवृति

प्रो० योगेश्वरदत्तशर्मा (पाराशरः)

NAG PUBLISHERS

नाग पब्लिशर्स

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आचार्य दण्डी

काव्यादर्श

(अनेक टीकाओं सहित)

• रत्नश्री • हृदयङ्गमा
• प्रभा • विवृति

प्रो० योगेश्वरदत्तशर्मा (पाराशरः)

नाग प्रकाशक

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सं. 3066

आचार्य दण्डी-काव्यादर्श

(अनेक टीकाओं सहित)

तृतीय खण्ड

१ रत्नश्री २. हृदयङ्गमा

३. प्रभा ४. विवृति

सम्पादकः

प्रो० योगेश्वरदत्तशर्मा (पाराशरः)

हिन्दू कालेज, दिल्ली विश्वविद्यालय

दिल्ली-११०००७

NAG PUBLISHERS

नाग पब्लिशर्स

११ ए / यू० ए०, जवाहर नगर, दिल्ली-११०००७

(भारत)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

This Publication has been brought out with the financial assistance from Rashtriya Sanskrit Sansthan, New Delhi.

© लेखक

नाग पब्लिशर्स
(१) ११ए/यू. ए. जवाहर नगर, दिल्ली-११०००७
(२) जलालपुर माफी (चुनार-मिर्जापुर) उ० प्र०
दूरभाष-2915883, 3967975, 3957440

ISBN :81-7081-500-2 (Set)
ISBN : 81-7081-504-5 (Vol III)

Acc 39980
31160

प्रथम संस्करण : १९९९

मूल्य : ४००।-

NEPAL SANSKRIT UNIVERSITY
पुस्तकालय

श्री सुरेन्द्र प्रताप द्वारा नाग पब्लिशर्स ११ ए०/यू० ए०, जवाहर नगर, दिल्ली ११०००७ द्वारा प्रकाशित तथा जी. आफसैट प्रिंटर्स ३०८/२ शहजादा बाग, दयाबस्ती दिल्ली ११००३५ द्वारा मुद्रित। अक्षरयोजक ए० आर० प्रिंटर्स, डी-१०२ न्यू सीलमपुर, दिल्ली-११००५३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सा. ३०६६.

पुस्तकालय

विषयानुक्रमणिका

तृतीय खण्ड

विषयः पत्राङ्कः

द्वितीये परिच्छेदे

विभावनाचक्रम्	८९७
समासोक्तिचक्रम्	९१५-९३९
तल्लक्षणम्	९१५
तदुदाहरणम्	९१६
तद्भेदाः	९२७
तुल्याकारविशेषणा	९३०
भिन्नाभिन्नविशेषणा	९३५
अपूर्वसमासोक्तिः	९३९
अतिशयोक्तिचक्रम्	९४४-९५९
तल्लक्षणम्	९४४
संशयातिशयोक्तिः	९५२
निश्चयातिशयोक्तिः	९५५
यशोऽतिशयोक्तिः	९५९
उत्प्रेक्षाचक्रम्	९६२-९९७
तल्लक्षणम्	९६२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विषयः

	पत्राङ्कः
तदुदाहरणानि	९६४
लिम्पतीव तमोऽङ्गानि इत्यत्रालङ्कारचर्चा	९७६
उल्प्रेक्षावाचकाः	९९७
हेतुसूक्ष्मलेशोद्देशः	१००४
हेतुलक्षणम्	१००७
तद्भेदाः	१०११
सूक्ष्मलक्षणं तद्भेदाश्च	१०७७
लेशचक्रम्	१०८८
प्रेयोरसवदूर्जस्विलक्षणानि	१११४–११७०
प्रेयोदाहरणे	१११६
रसबदुदाहरणानि	११३५
ऊर्जस्विनिदर्शनम्	११७०
पर्यायोक्तम्	११८१
समाहितम्	११८८
उदात्तम्	११९२
अपह्नुतिः	१२०३
श्लेषचक्रम्	१२२०–१२५६
अभिन्नपदश्लेषः	१२२०
भिन्नपदश्लेषः	१२३१
अलङ्कारान्तरगोचरश्लेषाः	१२३४
अभिन्नक्रियश्लेषः	१२४०
अविरुद्धक्रियश्लेषः	१२४२
विरुद्धकर्मा श्लेषः	१२४४
नियमवान् श्लेषः	१२४७
नियमाक्षेपरूपोक्तिश्लेषः	१२५०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विषयः	पत्राङ्कः
अविरोधी श्लेषः	१२५२
विरोधी श्लेषः	१२५६
विशेषोक्तिचक्रम्	१२५९-१२७८
हेतुविशेषोक्तिः	१२७७
तुल्ययोगिता	१२७८
विरोधचक्रम्	१२८८
अप्रस्तुतप्रशंसा	१३०६
व्याजस्तुतिः	१३१७
निदर्शनम्	१३३१
सहोक्तिः	१३३९
परिवृतिः	१३५२
आशीः	१३५७
अनन्वयससन्देहोपमारूपकोत्प्रेक्षावयवाना-मुक्तान्तर्भावप्रदर्शनम्	१३६०
संसृष्टिः	१३६४
श्लेषस्य सर्ववक्रोक्तिसाधारण्यम्	१३८१
भाविकम्	१३८४
सन्ध्यङ्गवृत्त्यङ्गलक्षणादीना-मुक्तान्तर्भावः	१३९२
अर्थालङ्कारचर्चोपसंहारः	१३९६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रसिद्धहेतुव्यावृत्या यत्किञ्चित् कारणान्तरम्।
यत्र स्वाभाविकत्वं वा विभाव्यं सा विभावना॥१९७॥

रत्नश्री

यथोक्तौ प्रसिद्धस्य लोकप्रतीतस्य साक्षाद्दर्शनात् किञ्चित्कार्यं प्रति हेतोः कारणस्य कस्यचिद् व्यावृत्या निरासेनापक्षेपात्। कथं तर्हि कार्यसम्भव इत्याहयत्किञ्चिदनुरूपं तत्र कारणान्तरं प्रसिद्धात् कारणादन्यन्निमित्तं विभाव्यम् अवगम्यते। यत्र कारणान्तरमपि नापेक्ष्यते तत्र का गतिरित्याह-स्वाभाविकत्वं वेति। स्वाभाविकं नैसर्गिकं वस्तुधर्मसिद्धं तस्य भावः तत्त्वम्। स्वाभाविकं वा। न केवलं कारणान्तरं कार्यस्योत्प्रेक्ष्यते। विभाव्यं [चिन्तनीयं] सा तादृशी तल्लक्षणा विभावना ज्ञेया। विभाव्यते प्रकाश्यते कारणान्तरं स्वाभाविकत्वं वा अनया अस्यामिति वा विभावना तथाविधोक्तिरिति॥

तमुदारहरन्नाह-

हृदयङ्गमा

सजातिव्यतिरेकं दर्शयति, अरत्नेति। -यूनां यौवनप्रभवं, तमः मोहः, अन्धकारश्च, अरत्नालोकसंहार्य्यं रत्नानाम् आलोकेन हर्त्तुमशक्यं, सूर्य्यरश्मिभिः, अवार्य्यम् अनाश्यं, तथा दृष्टिः चक्षुः ज्ञानञ्च, तस्या, रोधः आवरणं, तत्करम्। (अत्र श्लिष्टेन तमः पदेनान्धकारमोहयोर्बोधादन्धकारमोहयोरुपमानोपमेयत्वं विवक्षितं, दृष्टिरोधकरमिति तद्विशेषणपदस्योभयवृत्तित्वेन च दृष्टिरोधित्वरूप-साधारणधर्म्मावगतेः सादृश्यञ्च शब्दोपात्तमेव, अरत्नालोकेत्याद्यु-पमेयमात्रवृत्तिधर्म्मप्रदर्शनेन भेदप्रकटनात् भेदस्य समानजाति-सम्बन्धित्वाच्चायं सजातिव्यतिरेकः॥१९७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रभा

सजातिव्यतिरेकमुदाहरति—**अरत्नेति।** रत्नालोकैः मणिकिरणैः संहार्यं न भवतीति अरत्नालोकसंहार्यम्। सूर्यरश्मिभिः। भानुगभस्तिभिरहार्यम् अनिवार्यम् यूनां तरुणानां दृष्टिरोधकरं दर्शनसामर्थ्यनिरोधकं एतादृशं यौवनप्रभवं तारुण्यमदोत्पन्नं तमोस्ति। प्रसिद्धं तमस्तु रत्नज्योतिषा सूर्यप्रकाशेन च विनिवार्यमस्ति। तथा आबालस्थविराणां दृष्टिरोधकं भवति। अत्र दृष्टिशब्देन ज्ञानं तमः शब्देन मोहोपि सूच्यते। श्लेषवशादेव तमःशब्देन उपमानोपमेयभूततमोद्वयप्रतिपादनाद् व्यतिरेकसामान्यलक्षणं संगतं भवति। अत्र दृष्टिरोधकत्वेन साम्यम्। तच्च धर्मस्य शब्दप्रतिपाद्यत्वात् शाब्दम्। रत्नसूर्यादिभिरविनाश्यत्वं च असाधारणधर्मतया उपमेयमात्रवृत्ति। तदेव भेदकम्। उपमेयस्योत्कर्षाधायकं चेति ज्ञेयम्।।१९७।।

विवृति

तदेवं भिन्नजातीनां व्यतिरेकमभिधाय स्व(स)-जातिव्यतिरेकमुदाहरति

रत्नानां वैर(?)वैडूर्यवज्रपद्मरागादीनामालोकः प्रभा रत्नालोकः तेन संह्रियत इति रत्नालोकसंहार्यम्। अरत्ना(रत्ना)लोकसंहार्यं न, रत्नादि(त्नदीधि) त्यापनेतुमशक्यं तथाऽहार्यं आह(ह)र्तुमशक्यं सूर्यरश्मिभिः दृष्टिरोधकंर रो(लो)चनान्ध्यकरणशीलं यूनां यौवनमदोद्धतानां यौवनात्प्रभवति यौवनप्रभवं तमो रागविशेषः।।१९७।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अपीतक्षीबकादम्बमसंमृष्टामलाम्बरम्।
अप्रसादितसूक्ष्माम्बु जगदासीन्मनोहरम्॥१९८॥

रत्नश्री

पीताः पीतवन्तः। बहुलवचनात् कर्तरि क्तः। आरम्भे वा। अथवा वनाय पीतप्रतिबद्धवत्साम्

[रघुवंशे २. १]

इतिवत्। न तथा अपीता अकृतमधुपानाः सन्तः क्षीबाः मत्ताः कादम्बाः कलहंसाः असंमृष्टम् अपरिशोधितम् सत् अमलम् अनाविलम् अम्बरम् आकाशम्, कतकादिभिः अप्रसादितम् अनपनीतकालुष्यं सत् सूक्ष्मम् अच्छम अम्बु च यत्र जगति तन्मनोहरं सुभगमासीत् अभूदिति।

हृदयङ्गमा

सजातिव्यतिरेकं घटयति, सजातीति।–यत् यस्मात्, इदं तमः मोहरूपम्, उपमेयभूतं यौवनप्रभवमित्यर्थः, दृष्टिरोधितया दृष्टिरोधकरत्वरूपसाधारणधर्म्मेण, तमोजातेः तमस्त्वधर्म्मवतः, उपमानत्वेनाप्रस्तुतस्यान्धकारसामान्यस्येत्यर्थः, तुल्यं सदृशं, तथा अन्यैः अरत्नालोकेत्यादिविशेषणद्वयघटितैरसाधारणधर्म्मैः, भिन्नं प्रथमं तुल्यधर्म्मप्रदर्शनेन सदृशमपि पुनर्विरुद्धधर्म्माध्यासेन भेदविशिष्टं कृत्वा, अदर्शि प्रदर्शितम्, अतः अयं सजातिव्यतिरेकः। (अत्र विशेषणद्वयेन धर्म्मद्वयस्योक्तेरन्यैरिति बहुवचनेन अप्रदीपप्रभापणेयत्वादीनां परिग्रहः। तथा "तमोजातेः" इति पदं, तुल्यमित्यनेनान्वये षष्ठान्तं भिन्नम् इत्यनेन सम्बन्धाच्च पञ्चम्यन्तमिति बोध्यम्। नव्यास्तु श्लिष्टरूपकमिदं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अरत्नालोकहार्य्यत्वेन अभानुभेद्यत्वेन च अधिकारुढ़वैशिष्टमिति मन्यन्ते)।।१९८।।

प्रभा

उदाहरणं व्याख्याय अलंकारं संगमयति–**सजातीति।** दृष्टिरोधितया दृष्टेरावरणतया इदं यौवनप्रभवं तमः तमोजातेः तुल्यम्। तद् अन्यैररत्नालोकसंहार्यादिभिः असाधारणधर्मैर्भिन्नम्। यत् यस्माद् अदर्शि अतः अयं सजातिव्यतिरेकः। अन्यैरिति बहुवचनेन दीपशिखादिभिरनपनेयत्वादयो साधारणधर्माः संग्राह्याः। तेन असाधारणधर्मद्वयस्यैवोपन्यासे कथं बहुवचनमिति शङ्का परास्ता।।१९८।।

विवृति

स्वयं व्याचष्टे–

स्व(स)जातिव्यतिरेकोऽयं तमोजातेरिदं यौवनप्रभवं रागाख्यं तमः दृष्टिरोधितया तुल्यं दर्शनवा(व्या)घातकहे(त्वे)न समं भिन्नमन्यैः रत्नालोकसंहार्यं सूर्यरश्मिभिश्च हार्यमपरं तमः नेदमिति अन्यैः तमोधर्मैर्भिन्नमदर्श(र्शि) यत्।।

सजातिव्यतिरेकं दर्शयति–**अरत्नेति।** यूनां तमः अज्ञानरूपं दृष्टिरोधकरं यौवनप्रभवत्वारत्नालोकसंहार्यत्वसूर्यरश्म्यहार्यत्वैः। बाह्यतमोजातेः भिन्नम् इति सजातीयव्यतिरेकः।।

अरत्नेति। दृष्टिरोधितया तमोजातितुल्यस्य यौवनप्रभवस्य तमसः रत्नालोकसंहार्यत्वाद्यभावात् भेदः प्रतिपादित इति सजातिव्यतिरेकः ।।१९८।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनञ्जितासिता दृष्टिर्भ्रूरनावर्जिता नता।
अरञ्जितोऽरुणश्चायमधरस्तव सुन्दरि॥१९९॥

रत्नश्री

[64a] सुन्दरि! तव दृष्टिः अनञ्जिताअञ्जनशलाकया यथास्थानमस्पृष्टा सती असिता कृष्णा। भ्रूश्च अनावर्जिता प्रयत्नेन केनचित् अनामिता सती नता वक्रा। अरञ्जितो[ऽपि] लाक्षारसरागादिना अरुणो लोहितः अधरश्चायं [दृश्यमानः। एतत्] सर्वम् अलौकिकं तवेति॥

नन्वेतन्मदादिकं मधुपानादिहेतुकम्, तत्कथं तेन विभावयितुमुत्सहते? हेतुफलभावस्य सर्वत्र प्रतिनियमदर्शनात्। तदेतद् व्याहतमुच्यते। न च काव्येऽपि तादृशात्प्रकरणादन्यत्र विरुद्धमाद्रियते। यद् वक्ष्यति दोषपरिसंख्याने देशकालकलालोक-न्यायागमविरोधे [३.३१८] एतदाशङ्क्य ब्रवीति-

हृदयङ्गमा

विभावनां निरूपयति, प्रसिद्धेति।-यत्र कार्य्योत्पत्तौ, प्रसिद्धस्य सामान्यतया लोकविख्यातस्य, हेतोः कारणस्य, (न तु प्रकृतहेतोः, तथात्वे कार्य्यानुत्पत्तेरिति भावः) व्यावृत्त्या अभावप्रदर्शनेन, यत् किञ्चित् कारणान्तरम् अन्यत् तात्तिकमतिगूढं कारणमित्यर्थः, तथा स्वाभाविकत्वं वा विशेषाभिनिवेशेनापि हेत्वन्तरादर्शनेन कार्य्यस्य स्वतः सिद्धत्वं वा, विभाव्यं कार्य्योत्पत्त्यनुपपत्त्या विशेषाभिनिवेशेन चिन्तनीयं, सा कारणाभावेन कार्य्योत्पत्तिवर्णनरूपा, कारणान्तरपर्य्यवसिता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वभावपर्य्यवसिता च द्विविधा विभावनेति योजना; विशिष्टा कारणनिरपेक्षा भावना यत्र इति व्युत्पत्तेरिति भावः। (इत्थञ्च कारणाभावे कार्य्योत्पत्तेरसम्भवात् सर्वत्र तात्त्विकं कारणं गूढ़तया अस्तीति मन्तव्यम्। अप्रस्तुतमेव यत्किञ्चित् कारणान्तरं लोकेषु कारणतया प्रतिभाति तदन्तरेण चेत् कार्य्योत्पत्तिरूपनिबध्यते तदा विभावनायाविषयः इत्यभिप्रायः। तात्त्विककारणञ्च यदुक्तं,–"यो हि येन विना नास्ति यस्मिश्च सति विक्रिया। तदेव कारणं तस्य नान्यत्कारणमुच्यते।।" ततश्च यत्र लोकप्रसिद्धहेतुमन्तरेण समुत्पन्नस्य कार्य्यस्य अनुपपत्तिभावनया विशेषाभिनिवेशवशात् कारणान्तरं प्रतीयते, सा कारणान्तरविभावना। यत्र च निपुणानुसन्धानेनापि कारणान्तरं न प्रतीयते, तत्र स्वाभाविकत्वविभावनेति लक्षणम्। तत्र च प्रसिद्धहेत्वभावः क्वचिच्छाब्दः, यथा,–"अपीतक्षीव" इत्यादि वक्ष्यमाणोक्तम्। क्वचिञ्चार्थो यथा,–"वक्रं निसर्ग" इत्यादि २०३ संख्यकश्लोकोक्तम्। कारणान्तरमपि तथा, तत्र शाब्दः, यथा,–"अनायासकृशं मध्यमशङ्कतरले दृशौ। अभूषणमनोहारि वपुर्वयसि सुभ्रवः।।" इति, वयोरूपकारणान्तरस्योक्तत्वात्। आर्थः यथा,–"अपीतक्षीव" इत्यादि वक्ष्यमाणोक्तं, शरत्कालरूप-कारणान्तरस्यानुक्तत्वात्। स्वाभाविकत्वञ्च तथा द्विविधं, तत्र शाब्दं यथा,–"वक्रं निसर्गसुरभि" इत्यादि, निसर्गादिपदस्य शब्दप्रतिपाद्यत्वात्। आर्थं यथा,–"अनञ्जिताऽसिता दृष्टिः" इत्यादि, २०१ संख्यकश्लोकोक्तम्। अत्र हि विधिनिर्म्मितत्वरूपं स्वाभाविकत्वं नोक्तम्। केचित्तु "विभाव्यते कारणान्तरं स्वाभाविकत्वं वा अस्यामिति अधिकरणप्रत्ययान्तोऽयं विभावनाशब्दः" इति व्याख्याय नवीनोक्तविभावनायां संज्ञाया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नान्वर्थतेति तत्र सम्यक् इत्याहुः। नव्यास्तु कारणाभावे कार्य्योत्पत्तिवर्णनं विभावनेति लक्षणयन्ति। यदाह दर्पणकारः,–"विभावना विना हेतुं कार्य्योत्पत्तिर्यदुच्यते")। इति।।१९९।।

प्रभा

अथ क्रमप्राप्तां विभावनामाह–**प्रसिद्धेति।** यत्र वैचित्र्ये प्रसिद्धो लोकप्रसिद्धो यो हेतुः कारणं तस्य व्यावृत्त्या अभावप्रदर्शनेन यत्किंचित् किमपि अतिगूढं कविकल्पितं वा कारणान्तरम् विभाव्यं फलोपत्यनुपपत्त्या सूक्ष्मेक्षिकया अनुसंधानीयम् वा। अथवा स्वाभाविकत्वं कृतेपि विमर्शे कारणान्तराप्राप्तौ फलस्य वस्तुस्वभावेनैव संपद्यमानत्वं विभाव्यं चिन्तनीयं सा विभावना। एवं च प्रसिद्धहेतुव्यतिरेक-सामानाधिकरण्येन अप्रसिद्धकारणस्वभावान्यतरप्रतीयमान-फलोत्पत्तिर्विभावनेति लक्षणं संपन्नम्। विभाव्यते फलोत्पत्त्यनुपपत्त्या विचार्यते कारणान्तरं फलोत्पत्तिस्वाभाविकत्वं वा यस्यां सा विभावना। प्रकाशकारादयस्तु–क्रियायाः प्रतिषेधेपि फलव्यक्तिर्विभावना इति कारणाभावे फलोत्पत्तिवर्णनं विभावनामाहुः। तत्र तु विभावनासंज्ञाया अन्वर्थता न संभवति। कारणाभावश्च क्वचिन् नञादिना साक्षात् क्वचिच्च कारणविरोधिन उक्त्या परंपरया प्रतिपाद्यते। विभावितं कारणान्तरं क्वचित् शाब्दं क्वचिदार्थं च भवति। एवमेव स्वाभाविकत्वस्य शाब्दार्थप्रभेदौ उदाहरणेषु तत्र तत्रानुसर्तव्यौ। ननु कारणाभावे कार्योत्पत्तौ स्फुरितस्य विरोधस्य प्रसिद्धातिरिक्तेन कारणेन परिहाराद् विरोधाभास एवायमिति चेन्न। समबलयोः परस्परविरोधे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्स्वीकारात्। इह हि कारणविरहेण कार्यमेव बाध्यत्वेन गम्यते न तु तेन कारणविरह इति विशेषात्।।१९९।।

विवृति

इति व्यतिरेकचक्रम्।

विभावनामाह–

यो यत्कार्यकरणे प्रसिद्धो हेतुः तस्य व्यावृत्त्या अभावेन यत्किञ्चित् अन्यत्कारणान्तरं यत्र कार्ये विभाव्यते निश्चीयते सा विभावनोच्यते। तथा स्वाभाविकत्वं वा नैसर्गिकत्वं वा यत्र विभाव्यं सा च विभावना।।

विभावनां लक्षयति–**प्रसिद्धेति**।।

विभावनालङ्कारमाह–**प्रसिद्धेति**। प्रसिद्धस्य, जनकतया प्रसिद्धस्य वा व्यापकभूतस्य वा, हेतोर्निवर्तनेऽपि, तत्कार्यस्य यत्र यत्किञ्चित् कारणान्तरं विभाव्यते–सा एका विभावना। यत्र च प्रसिद्धहेतोः व्यावृत्त्या तत्कार्यस्य व्वाभाविकत्वं विभाव्यते–सा चैका विभावना। सा चतुर्धाकालकृता, नियतद्रव्यकृता, अनियतद्रव्यकृता, नियतानियतद्रव्यकृता चेति।।१९९।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यदपीतादिजन्म स्यात् क्षीबत्वाद्यन्यहेतुजम्।
अहेतुकं च तस्येह विवक्षेत्यविरुद्धता॥२००॥

रत्नश्री

क्षीबत्वमादिर्यस्यामलत्वादेः श्लोकद्वयनिर्दिष्टस्य कार्यस्य तत्तथा यत् क्षीबत्वादिकायं पीतादेरपरः शरदागमयौवनोदयलक्षणो हेतुर्यस्येत्यन्यहेतुकं स्याद् भवेत्, अत एव नास्य पीतादेर्जन्मोत्पत्तिरित्यपीतादिजन्म, तदतद्धेतुत्वयोरेकत्र विरोधात्। आदिशब्देन संसृष्टादिकारणं वाक्यद्वयोपात्तं गृह्यते। अत एव [अनय]हेतुकं च, प्रसिद्धहेतुव्यावृत्तेन अस्य हेतुरस्तीति। न चैवं शङ्कनीयम्, अन्यहेतुकं हि सहेतुकम्। तत्कथमहेतुकं स्यात्? सहेतुकत्वाहेतुकत्वयोरेकत्र समावेशायोगादिति। नहि येन सहेतुकं तैनेवाहेतुकमुच्यते, यतो विरोधः स्यात्। प्रसिद्धकारण-व्यावृत्तेरहेतुकम्। अन्यहेतुकत्वात्तु सहेतुकमिति पर्यायेणाविरोधः। यथा पादवानेवापादश्च, कस्यचित्पादस्याभावात्। तस्य तादृशस्य कार्यस्येह प्रयोगविवक्षा प्रतिपादनाभिलाषः। साक्षात्तथानुक्तस्यापि सामर्थ्यात् प्रसिद्धस्येतरस्यैवाहेतोरभावेऽनुपपत्तेरवगमः। स्वाभावि-कत्वं तु इह न विवक्षितम्। वक्ष्यमाणैव सा विभावना। न च काव्ये सर्वत्र शाब्द्येव प्रतिपत्तिः। सामर्थ्यभाविन्या अपि तस्या दर्शनादिति विस्तरेण प्रथमे परिच्छेदे प्रतिपादितम्। या पुनः शब्दं न्यायं च तादृशं ना[पे]क्षते [सा] सुदुर्लभा। यदुक्तं नहि प्रतीतिः सुलभा शब्दन्यायविलङ्घिनीति [१.७५]। यत एवमिति तस्मादविरुद्धता दृष्टिविरोधः प्राग्भावितो नास्ति अपीतक्षीबेत्यादाविति॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हृदयङ्गमा

कारणान्तरविभावनामाह, अपीतेति।–जगत्, अपीताः अकृतमधुपानाः, (अपीत इत्यत्र कर्त्तरि क्तप्रत्ययस्य साधुत्वात् कादम्बविशेषणं युक्तं,) अथ च क्षीवाः मत्ताः, कादम्बा हंसविशेषा यस्मिन् तत्, असंसृष्टं मार्जन्या अपरिष्कृतम्, अथ च अमलं निर्मलम्, अम्बरम् आकाशं, यस्मिन् तत्, तथा अप्रसादितं केनाप्यपरिष्कृतम्, अथ च शुद्धम् अम्बु जलं, यस्मिन् तथाभूतम्, अत एव अतिमनोहरम् आसीदित्यन्वयः। (अत्र प्रसिद्धस्य क्षीवत्वकारणस्य पानस्य, अमलत्वकारणस्य मार्जनस्य, शुद्धिकारणस्य प्रसादनस्य असद्भावेऽपि तत्तत्फलोत्पत्तिः इति तत्तत्कारणाभावश्च शब्दीपात्तः एव, ततश्च कथमिदं जातमिति पर्य्यालोचनया शरत्कालरूपं कारणान्तरं विभावयतीति कारणान्तरविभावना। तच्च कारणान्तरं शब्देनाप्रतिपाद्यमानमिति आर्थं, क्वचिच्च शाब्दमपि तद्भवति यथा,–"अनायासकृशम्" इत्यादौ वयोरूपं कारणान्तरं शाब्दम्। केचिदत्र निमित्तस्योक्तानुक्तत्वेन द्वैविध्यमाहुः, तेषां मते अनायासेत्याद्युदाहरणे वयोरूपस्य निमित्तस्योक्त्या इयमुक्तनिमित्ता विभावना, अपीतक्षीवेत्यादौ शरत्कालरूपनिमित्तस्यानुक्त्या अनुक्तनिमित्तता इति)॥२००॥

प्रभा

कारणान्तरविभावनामुदाहरति–**अपीतेति।** अपीता मदिरापानमकुर्वन्तोपि क्षीबाः मत्ताः कादम्बाः हंसविशेषा यस्मिन् तत्। असंमृष्टमपि अमार्जितमपि अमलं निर्मलम् अम्बरं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यस्मिन्। अप्रसादितं कतकादिभिरशोधितमपि शुद्धं निर्मलम् अम्बु यस्मिन् एतादृशं मनोहरं जगदासिद् इत्यन्वयः। अत्र क्षीबत्वामलत्वशुद्धत्वानां पानसंमार्जनप्रसादनादीनि प्रसिद्धानि कारणानि। तेषामभावेपि तादृशफलोत्पत्तिर्वर्ण्यमाना प्रस्खलद्रूपतया कारणान्तरं अपेक्षमाणा शरत्कालरूपं कारणान्तरं विभावयति। तस्य चात्र शब्दाप्रतिपाद्यत्वादार्थत्वं बोध्यम्। प्रसिद्धकारणाभावस्तु शाब्दः।।२००।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वक्त्रं निसर्गसुरभि वपुरव्याजसुन्दरम्।
अकारणरिपुश्चन्द्रो निर्निमित्तं सुहृत्पुमान्॥२०१॥

रत्नश्री

सुन्दरि! [64b] वक्त्रं तव निसर्गेण स्वभावादेव सुरभि सुगन्धि, न मुखवासादिना। वपुश्चाव्याजे[न] प्रयत्नेन तादृशेन विना सुन्दरम् अभिरूपम्। अकारणेन विनापकारेण केनचित् चन्द्रो रिपुः वर्तते, व्यथाहेतुत्वाद् विरहिणाम्। स विवक्षितः कश्चित् पुमान् निर्निमित्तं सुहृत् मित्रं वर्तते, तथाविधसम्भवोपकारकभावाद् इति॥

कतमेयं विभावनेति विवृणोति–

हृदयङ्गमा

स्वाभाविकत्वविभावनामाह, अनञ्जितेति।–हे सुन्दरि! तव दृष्टिः अनञ्जिता अञ्जनेन अननुलिप्तापि असिता श्यामला, भ्रूः अनावर्जिता अनाकृष्टापि नता वक्रीकृता, अयमधरश्च अरञ्जितोऽपि अरुणः। (अत्र प्रसिद्धमसितत्वकारणम् अञ्जनं, वक्रताकारणमावर्जनम्, अरुणताकारणं रञ्जनं, तदभावेऽपि तत्तत्फलोत्पत्तिः इति प्रसिद्धकारणाभावेनोपजायमानमसितत्वादिकार्य्यं, कारणान्तरस्यापि निर्णेतुमशक्यतया विधिनिर्म्मितत्वरूपं स्वाभाविकत्वमेव भावयतीति स्वाभाविकत्वविभावना; तच्च स्वाभाविकत्वमिह शब्दप्रतिपाद्यत्वाभावाद्रम्यं, प्रसिद्धकारणाभावश्च शाब्द इत्यवधेयम्)॥२०१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रभा

स्वाभाविकविभावनां निर्दिशति–**अनञ्जितेति।** हे सुन्दरि तव दृष्टिरञ्जनेन कज्जलेन अनञ्जिता अलिप्तापि असिता नीला। भ्रूः अनावर्जिता अनाकृष्टापि नता वक्रीकृता। अयमधरश्च अरञ्जितोपि लाक्षया अनक्तोपि अरुणःरक्तच्छविः। अत्र असितनतारुणरूपाणि कार्याणि अञ्जनावर्जनरञ्जनस्वरूपैः प्रसिद्धैः करणैर्विना दर्शितानि। तानि च अनुपपद्यमानानि कारणान्तरमप्रतिपद्यमानानि स्वाभाविकत्वमेव विभावयन्ति। इति स्वाभाविकविभावनात्र।।२०१।।

विवृति

तामुदाहरणे स्पष्टयति–

पानं पीतं नपुंसकभावे क्तः। न विद्यते पीतं येषां ते अपीताः। अथ वा पीतं पानं तदस्ति येषां ते पीताः अर्शआदिषु पाठात् अच्। न पीता अपीताः क्षीबा मत्ताः कादम्बा हंसा यत्र तदपीतक्षीबकादम्बम्। असंमृष्टामलाम्बरं अ(न)संमृज्यते .... (स्म)तथाप्यमलमम्बरमाकाशं यत्र न प्रसादिकं(तं) कतकफलादिना प्रसादनीयेन द्रव्येणाप्रसादितं तथाऽपि सूक्ष्मं स्वच्छं (अ)पङ्कमम्बु यत्र तदप्रसादितसूक्ष्माम्बु। क्षीबत्वे हेतुः प्रसिद्धः सुरापानं अमलत्वे हेतुः सम्मार्जनमम्बुनः स्वच्छत्वे प्रसादनद्रव्यं हेतुः। स च अपीतादिपदैर्व्यावर्तितः क्षीबत्वादिकार्यं चान्यक(ा)रणपूर्वमुक्तं यतो जगदासीन्मनोहरम्। अत्र च जगतो मनोहरत्वे कारणान्तरं शरत्समयः। स इह विभाव्यत इति विभावना।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनञ्जिताऽपि (?)कज्जलेन तथाऽपि (प्य) सित(ऽ)-धावल्याऽक्षिगोलको(के) दृष्टिर्नयनयुगलम्। भ्रूरनावर्जिताप्युभय-कोट्योरनम्रीकृताप्यनमता(प्यानता)। मध्ये उन्नता कोट्योर्नता। तथाऽरञ्जितोरुणश्चायमधरः (?) अरञ्जितोऽलक्तकादिना पाटलद्रव्येण तथाऽप्यरुणो लोहितः मधुर(अधर)स्तव सुन्दरि। अत्र दृष्टेस्सि(रसि)तत्वे प्रसिद्धो हेतुरञ्जनं तदभावप्रदर्शना(द्) विभावना। एवमितरत्र योज्यम्।।

विभावनामुदाहरति—**अपीतेति** द्वयेन।

कालकृतस्य उदाहरणमाह—**अपीतेति**। अत्र कादम्बाद्याश्रितस्य क्षीबत्वादेः प्रसिद्धहेतुः पीतत्वादिर्व्यावर्त्यते; हेत्वन्तरञ्च शरत्प्रभावः विभाव्यते। इत्यसौ कालकृता कारणान्तरविभावना। **अनञ्जितेति**—अत्र दृष्ट्याद्याश्रयस्य असितत्वादेः अञ्जितत्वादिः प्रसिद्धो हेतुः व्यावर्तितः ; स्वभावसिद्धं च असितत्वादि दृष्ट्यादेः विभाव्यते। इति स्वाभाविकविभावना।।२००—२०१।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निसर्गादिपदैरत्र हेतुः साक्षान्निवर्तितः।
उक्तं च सुरभित्वादिफलं तत् सा विभावना॥२०२॥

रत्नश्री

निसर्गादिभिः पदैः शब्दैः कर्तृभूतैः करणैर्वा। आदिशब्देनाव्याजादिपरिग्रहः। हेतुः कारणं सुरभित्वादिः मुखवासादिलक्षणः साक्षाद्वाचकव्यापारेण, न सामर्थ्यात्। निवर्तितो निषिद्धः फलं च तस्य सुरभिसुन्दरत्वादिग्रहणेनोपादीयते। उक्तं साक्षादेव। ततः किमित्याह–तत् सा विभावनेति। यत एवं ततस्तस्मात् स्वाभाविकफला विभावना ज्ञातव्या। या परैः

हेतोर्निषेधनात् तस्य यत् फलस्य विभावनम्।
ज्ञेया विभावनेनैवासावेवं कथ्यते यथा॥

इत्युक्ता। न तु पूर्वं कारण विना विभावनैव सा कथितेन विधिना। ननु सर्वथा हेतुनिषेधे कथं फलस्योदयः? स्वभावादिति चेत्–कोऽयं स्वभावः, फलस्य तस्यान्यस्य वा? न तावदस्य स्वयमेव निषेधात्। स्वाभाविकफलाभ्युदयात्। फलस्यापि स्वभावः सतोऽसतो वा? सतस्तावत् स्वभावो न हेतुः। स्वभाववत् तदव्यतिरेकात् फलस्यापि सिद्धत्वात्। स्वभावात् फलं ज्ञायत इति रिक्ता वाचोयुक्तिः। न च भावस्वभावयोर्भेदः। तत्त्वग्रहणान्निःस्वभावत्वप्रसङ्गात्। तस्येति सम्बन्धायोगाच्च। विकल्पनिर्मितस्त्वपरीक्षाक्षमो न निषिध्यते। भेदः फलस्य स्वभाव इति। असतोऽपि सुतरां न हेतुः। तदव्यतिरेकेण तद्वत्स्वभावस्यास्याप्यसत्त्वात्। कथं स्वभावात् फलं भवति? न ह्यसतो जनकत्वमतिप्रसङ्गात्। तत्कथं स्वाभाविकविभावनेयं न

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विरुद्ध्यते। काव्यं च तथाविधप्रस्तावव्यतिरेकेण विरुद्धं नाद्रियत इति उक्तम्। उच्यते। इहाप्यदृष्टादिकं निमित्तं तथाविधमस्त्येव वस्तुनः। तथापि लोकस्तदुपेक्षमाणः प्रसिद्धं च कारणम् तादृशम्अपश्यन् स्वाभाविकं फलमिति व्यवहरति। लोकव्यवहारान्न विरोधि [65a] च काव्यमिति। तदनुसारेण स्वाभाविकं फलं विभाव्यते। शास्त्रीयोऽपि चायं स्वाभाविकफलवादः यदाहुः-

कः पद्मनालदलकेशरकर्णिकानां
संस्थानवर्णरचनामृदुतादिहेतुः।
पत्राणि केऽत्र रचयन्ति पतत्त्रिणां वा
स्वाभाविकं जगदिदं नियतं तथैव।। इति।

तस्माल्लोकशास्त्रानुरोधेनैतदुक्तं तत्परायणत्वात् काव्यस्येति। अलमतिगहनेन।।

।। इति विभावनाचक्रम् ।।

समासोक्तिं व्यक्तीकुर्वन्नाह-

हृदयङ्गमा

उक्तयोरुदाहरणयोर्लक्षणं सङ्गमयन् विरोधं परिहरति, यदिति। -पूर्वोदाहरणे अपीतादिजन्यं पानाद्यजन्यमित्यर्थः, किन्तु यत् अन्यहेतुजं शरत्कालरूपकारणान्तरजन्यं, क्षीवत्वादि, स्यात् भवेत्। (आदिना उत्तरश्लोकगतानामसितत्वादीनां परिग्रहः, तेन च द्वितीयोदाहरणे अञ्जितत्वाद्यजन्यं यत् असितत्वादि च, इत्यर्थो लभ्यते) अहेतुकं लोकप्रसिद्धकारणाभावोपनिबद्धं स्वाभाविकत्वेन प्रतीयमानमित्यर्थः. निपुणानुसन्धानेनापि हेत्वन्तराप्रतीतेरिति भावः। इह उदाहरणद्वये, तस्य अन्यहेतुजत्वस्य अहेतुकस्य च, विवक्षा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वक्तुमिच्छा, इत्यतः अविरुद्धता विरोधाभावः। (अयं भावः,–कारणान्वयव्यतिरेकानुविधानात् कारणमन्तरेण कार्य्योत्पत्तिर्नहि सम्भवति, इह तु तदङ्गीकारे विरोध एव स्यात्, वस्तुतः अप्रस्तुतं कारणमस्तीति विरोधपरिहारः। विरोधे हि कार्य्यं कारणञ्च बाध्यमानत्वेन प्रतीयेते, इह तु कारणाभावेनोपक्रान्तत्वात् कार्य्यमेव बाध्यत्वेन प्रतीयते, इत्यनयोर्भेद इत्यभिप्रायः। तथा हि,–"स एकस्त्रीणि जयति जगन्ति कुसुमायुधः। हरतापि तनुं यस्य शम्भुना न हृतं बलम्।।" इत्यादौ बलाहरणेन कार्य्यभावेन तनुहरणरूपं कारणं न बाध्यते अपि तु सत्यपि तनुहरणाख्ये सामग्रे कथं न बलं हृतमिति कार्य्याभावस्यैव बाध्यत्वेन प्रतीतिः। यदुक्तं,–"कारणस्य निषेधेन बाध्यमानः फलोदयः। विभावनायामाभाति विरोधोऽन्योऽन्यबाधनम्। अतो दूरविभेदोऽस्या विरोधेन व्यवस्थितः।।" इति। एवं विशेषोक्तौ च कार्य्याभावेन कारणसत्तायाः बाध्यमानत्वमवगन्तव्यम्। राजानकतिलकेनाप्युक्तं,–"कारणसामग्रामिह बाधकत्वेनैव प्रतीयते कार्य्यानुत्पत्तिस्तु बाध्यत्वेन।।" इति। केचित्तु तृणारणिन्यायेन प्रत्येकपर्य्याप्तकारणतायां व्यभिचारापत्त्या कार्य्यगतं वैजात्यमङ्गीकृत्य पानादिजन्यं क्षीवत्वादिकमन्यत् शरत्कालजन्यमन्यदिति पानादिकारणाभावेऽपि शरज्जन्यं विजातीयमिदं क्षीवत्वादिकमिति विरोधं दूरीकृतवन्तः। ततश्च कारणान्तरस्य स्वभावरूपालौकिककारणस्य चानुसन्धानादहोऽविद्यमानेऽपि कारणे कार्य्योत्पत्तिरिति वैचित्राजनकत्वादेवायमलङ्कार इति सुधीभिर्विवेच्यम्।।२०२।।

प्रभा

उक्तोदाहरणद्वये विभावनालक्षणस्य संगति दर्शयति विरोधं च परिहरति–**यदिति।** प्रथमोदाहरणेन यद् वर्ण्यमानं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मदिरापानाद्यजन्यम्। आदिना उत्तरश्लोकस्थानञ्जितादीनां संग्रहः। क्षीबत्वादि यत्। अत्र आदिशब्देन उत्तरश्लोकस्थासितादयो ग्राह्याः। अन्यहेतुजं कारणान्तरजन्यम्। तच्च कारणं शरदादिकम्। अहेतुकं च कारणं विना स्वतः सिद्धं स्याद् भवेत्। इह उदाहरणद्वये तस्य विवक्षा प्रतिपिपादयिषा अस्तीति एवं प्रकारेण अविरुद्धता विरोधाभावः। अस्मिन्नलंकारे सर्वत्रापि कार्यांशे अभेदाध्यवसानरूपातिशयोक्तिरनुप्राणताया स्थिता। तस्मात् कारणाभावे कथं कार्योत्पत्तिरिति शङ्काया नोत्थितिः।।२०२।।

विवृति

स्वयमेतव्द्याचष्टे–

यत्र क्षीबत्वादि स्यात् भवेत् कथंभूतं (तम। अ)पीतादिजन्म न विद्यते पीतादिभ्यो मधुपानादिभ्यो जन्म प्रादुर्भावो यस्य तदपीतादिजन्म। किंत्वन्यहेतुजं अन्य(:) प्रसिद्धाद्धेतोर्हेतुरन्यहेतु-(स्तस्मा जायत इत्यन्य) हेतु जं अविद्यमानो हेतुरस्येत्यन्य(त्य)हेतुकं तस्योभयस्यान्यहेतु(जस्याहेतु)- कस्य च विप(व)क्षेभ्य (त्यविरुद्धता) विरोधाभावः।।

यदिति। क्षीबत्वादिहेतोः असितत्वादिहेतोश्च इयान् भेदः– पीतादिकारणरहितं क्षीबत्वादि शरत्प्रभावजम्; अञ्जितत्वादि-कारणहितम् असितत्वादि कारणान्तररहितम्; अत एव अहेतुजं स्वाभाविकं च। यत् यस्मात्, तस्य कारणन्रतस्य स्वाभाविकत्वस्य च विवक्षा, इति न विरोधः।।

व्याख्यातार्थमाह–**यदिति।** इमे शुद्धे।।२०२।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वस्तु किञ्चिदभिप्रेत्य तत्तुल्यस्यान्यवस्तुनः।
उक्तिः संक्षिप्तरूपत्वात् सा समासोक्तिरिष्यते॥२०३॥

रत्नश्री

किञ्चिदिष्टं वस्त्वभिप्रेत्य मनसिकृत्य तेन अभिप्रेतेन वस्तुना तुल्यस्य सदृशस्य अन्यस्य वस्तुनः कस्यचिन्न विसदृशस्य। ततस्तत्प्रतीत्यसम्भवात्। सदृशेनैव तु तदुपलक्षणा उक्तिरन्यपरा या अन्यस्यैव तन्त्रा, अ[न्य]स्य प्रतीतेः। सा तल्लक्षणा समासोक्तिः इष्यते तज्ज्ञैः। कुतः? सक्षिप्तं विवक्षितवस्त्वपेक्षया स्वल्पं रूपं स्वभावो यस्याः तद्भावः तत्त्वम् तस्मात्। ततोऽन्वर्थेयं संज्ञा संक्षेपोक्तिः समासोक्तिरिति कृत्वा। तस्मादियं गुणीभता अर्थान्तरं [स्फुटयति] न तु स्वार्थतन्त्रा। इयमेव चान्यैः ध्वनिरिति व्यवह्रियते। यदाहुः–

यत्रार्थः शब्दो वा तमथमुपसर्जनीकृतस्वाथौ।
व्यङ्क्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः। इति॥
[ध्वनिकारिकायाम् १.१३]

तामुदाहरन्नाह–

प्रभा

शाब्दं स्वाभाविकत्वमुदाहरति–**वक्त्रमिति।** वदनं निसर्गसुरभि स्वभावसुगन्धि। न तु कर्पूरादिद्रव्यैरिति भावः। वपुरव्याजेन अकृत्रिमतया सुन्दरं मनोहरम्। न तु भूषावस्त्रादिभिरिति भावः। अकारणरिपुः विरहिणां सहजशत्रुश्चन्द्रः। तथा निर्निमित्तासुहृद् अकारणशत्रुः स्मरो मदनः॥२०३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पिबन्मधु यथाकामं भ्रमरः फुल्लपङ्कजे।
अप्यसन्नद्धसौरभ्यं पश्य चुम्बति कुड्मलम्॥२०४॥

रत्नश्री

फुल्ले प्रबुद्धे पङ्कजे स्थितं मधु मकरन्दं यथाकामम् इच्छानुरूपं पिबन् भ्रमरः। असन्नद्धं सौरभ्यमस्मिन्निति असन्नद्धसौरभ्यम् अनुपजाततादृशगुणं कुड्मलं चुम्बति। पश्य यथा अस्यातिलोलता। इत्यामुखयति कञ्चित्। शब्दार्थस्तावदयमीदृशः प्रतिभाति॥

भावार्थमत्र दर्शयन्नाह–

हृदयङ्गमा

पूर्वमार्थं स्वाभाविकत्वमुक्तं सम्प्रति शाब्दं स्वाभाविकत्वमुदाहरति, वक्रमित्यादि। –वक्रं मुखं, निसर्गेण स्वभावेन, सुरभि सुगन्धि, न तु केनापि गन्धवस्तुनेति भावः ; वपुः शरीरम्, अव्याजेन अकपटेन, सुन्दरं स्वभावसुन्दरं, न तु आहार्य्यशोभयेत्यर्थः, चन्द्रः अकारणरिपुः अहेतुकशत्रुः, तथा स्मरः कामः, निर्निमित्तासुहृद् अकारणशत्रुः। निसर्गादिपदैः सुरभित्वादीनां स्वाभाविकत्वमेव बुध्यते इति तस्य शाब्दत्वम् इत्यभिप्रायः। हेतुनिषेधात्मकस्य प्रोक्तलक्षणस्य सङ्गतिं प्रतिपादयन्नाह निसर्गेत्यादि। –निसर्गादिपदैः निसर्गाव्याजाकारण–

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निर्निमित्तशब्दैरित्यर्थः, हेतुः लोकप्रसिद्धकारणम्, अत्र साक्षात् निषेधवाचकनञादिपदवत्, निवर्त्तितः निवारितः, किमपि गन्धद्रव्यमेव सुरभित्वस्य कारणं भवति, निसर्गपदेन तत्प्रतिषेधः प्रतीयत एवेति भावः। सुरभित्वादिरूपं फलञ्च, उक्तं वर्णितं, तत् तस्मात्, कारणाभावेऽपि फलस्योदयात्, तस्य स्वाभाविकत्वावबोधाच्च सा प्रसिद्धा शब्दगतस्वाभाविकत्वलक्षणा विभावना इति। (एवमस्यां क्वचित् कारणाभावः कारणविरुद्धमुखेन प्रतिपाद्यते। यथा,–"यः कौमारहरः स एव हि वरस्ता एव चैत्रक्षपाः। ते चोन्मीलितमालतीसुरभयः प्रौढाः कदम्बानिलाः।। सा चैवास्मि तथापि चौर्य्यसुरतव्यापारलीलाविधौ। रेवारोधसि वेतसीतरुतले चेतः समुत्कण्ठते।।" इति। अत्र कौमारहरवराद्यसन्निधानरूपं कारणं विना उत्कण्ठाया उत्पत्तेर्विभावना; तथा कौमारहरवरादिसन्निधानरूपकारणे सत्यपि अनुत्कण्ठारूपकार्य्यस्याभाव इति विशेषोक्तिरपि, एवञ्च सर्वत्रैव विभावनाविशेषोक्त्योः सन्देहसङ्कर इति केषाञ्चिन्मतम्। तथा हि यत्र कारणाभावे कार्य्योत्पत्तिस्तत्र कारणाभावरूपकारणसत्वेऽपि कार्य्याभावरूपकार्य्यानुपत्तेः अलङ्कारद्वयमेव सम्भवति। कौस्तुभकारस्तु तन्नाङ्गी करोति। तन्मते यत्र कारणाभावरूपकारणसत्त्वे कार्य्याभावरूपकार्य्योत्पत्तिस्तत्र न विभावना, अतस्तेनोक्तं,–"यत्र कारणानधिकरणक्षणोत्तरक्षणस्य कार्य्याधिकरणत्वमुच्यते सा विभावना, कारणाधिकरण-क्षणोत्तरक्षणस्य च यत्र कार्य्यानधिकरणत्वमुच्यते सा विशेषोक्तिः"। इति)।।२०३।।२०४।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रभा

उदाहरणं विशदयति–**निसर्गेति।** अत्र सुरभ्यादयो धर्माः स्वाभाविका इति ते शाब्दाः। अतः शब्दस्वाभाविकेयं विभावना। लक्षणोक्तं प्रसिद्धहेतुव्यावृत्तित्वमुदाहरणे दर्शयति–**निसर्गादि इति।** अत्र उदाहरणे निसर्गादिपदैर्निसर्गाव्याजाकारणनिर्निमित्तशब्दैः। हेतुः जात्यैकवचनम्। हेतवः। कर्पूरभूषणमात्सर्यादयः। साक्षात् नञादिवाचकशब्दवत् स्वार्थेनैव। निवर्तितः अपसारितः। सुरभित्वादि सुरभिसौन्दर्यरिप्वसुहृदिति। फलं कार्यम्। उक्तं तैर्निसर्गादिपदैः स्वाभाविकत्वेन कथितम्। तत् तस्माद् हेतुव्यावृत्तिपूर्वकस्वाभाविकत्वेन फलोत्पत्तेः प्रतीतेः विभावना सुसंगतेति शेषः।।२०४।।

विवृति

जातीमुखा (?) दिमुखवासरहितमपि मुखं निसर्गेण स्वभावेनैव सुरभि। वपुराभरणादिना व्याजेन विनाऽपि रम्यम्। चन्द्रो दयितजनवियोगव्यथापीडना(डिता)नां सञ्जातमनोज्ञवस्तु(स्त्व) रोचकानामनिमित्तवैरि(री)। निर्निमित्त उपकारनिरपेक्षस्सुहृन्मित्रम्।।

निसर्गादिपदैरत्र हेतुः साक्षान्निवर्तितः। हेत्वभावे फलं कार्यं सुरभित्वाद्युक्तमतो विभावनेत्युपसंहृतम्।।

वक्त्रमिति। तस्याः वक्त्रं निसर्गसुरभि स्वभावसुरभि; वपुः अव्याजसुन्दरं स्वभावरमणीयम्; अपि च चन्द्रः अकारणरिपुः विरोधाभावेऽपि रिपुः भवति; स्मरः निर्निमित्तासुहृच्च भवति। अत्र अपीतत्वादिवत् अनञ्जितत्वादिवत् च प्रसिद्धहेतुः न व्यावर्तितः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कथं तर्हि विभावनात्वम् इति चेत्, तत्राह–**निसर्गादिपदैरिति।** साक्षात् हेतुः प्रसिद्धहेतुः कर्पूरभक्षणादिः व्यावर्त्यत इति विभावनैव इयम्। अत्र पूर्वार्धे स्वाभविकविभावने उत्तरार्धे कारणान्तरे विरहः समागमश्च।।

मिश्रामाह–**वक्त्रमिति।** अत्र उत्तरयोः विरहसमागमादि-कारणान्तरविभावनयोः स्वाभाविकीभ्यां प्राग्विभावनाभ्यां अयथासंख्येन तद्गतो विशेष उक्तः। सेयं विभावनयैव विभावनायाः उपकृतत्वात् मिश्रा भवति।।२०४।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इति प्रौढाङ्गनावद्धरतिलीलस्य रागिणः।
कस्याञ्चिदपि बालायामिच्छावृत्तिर्विभाव्यते॥२०५॥

रत्नश्री

इति इह वाक्ये प्रयुक्ते प्रौढ़ायाम् आरूढ़मन्मथविभ्रमविमर्दभूमौ अङ्गनायां बद्धा निवेशिता रतिः सम्भोग एव लीला विभ्रमो येन यस्य वा तस्य रागिणः। कस्याञ्चित् बालायाम् प्रथमवयोवर्तिन्याम् अप्रौढ़ायां कस्याञ्चिद्विषये इच्छाया रागस्य वृत्तिः प्रसरो विभाव्यते प्रतीयते। न तु साक्षादुच्यते। ततोऽयमेवार्थो विधेयत्वात् प्रधानम्। शब्दार्थस्तूपसर्जनीभूतस्तत्परत्वाभावाद्वाक्यस्येति॥

समासोक्तेः प्रभेदं दर्शयन्नाह–

हृदयङ्गमा

समासोक्तिमाह, वस्तु इति।–किञ्चित् किमपि प्रस्तुतं, वस्तु, अभिप्रेत्य संकल्पा, तत्तुल्यस्य तत्सदृशस्य, अन्यस्य उपमानस्याप्रस्तुतस्य वस्तुनः, उक्तिः शब्देन कथनं, (प्रस्तुताप्रस्तुतयोः शब्देन प्रतिपादने भूयान् विस्तारः, शक्त्या तत्प्रतिपादनापेक्षया व्यञ्जनया तस्य प्रस्तुतार्थस्य बोधनमतीव चमत्कारपदवीमारोहतीति तथा कथनम्। उक्तञ्च ध्वनिकृता, –"वाच्योऽर्थो न तथा स्वदते प्रतीयमानः स एव यथा" इति)। संज्ञावीजमाह संक्षेपरूपत्वादिति। –एकस्य प्रयोगेणोभयार्थस्य बोधनादित्यर्थः, समासेन संक्षेपेण, अर्थद्वयस्य उक्तिः प्रत्यायनं, समासोक्तिरिति व्युत्पत्तेरिति भावः, सा प्रसिद्धा, समासोक्तिः इष्यते मुधीभिरभिलष्यते इत्यर्थः। (इत्थञ्च प्रस्तुताप्रस्तुतयोर्द्वयोरेकस्या–

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रस्तुतस्य प्रयोगेण सादृश्यात् प्रस्तुतस्यापि प्रत्यायनं समासोक्तिरिति लक्षणमायातम्। केचित्तु उपमानादुपमेयस्य प्रतीतिः समासोक्तिरित्याहुः, तदुक्तंभोजराजेन,–''यत्रोपमानादेवैतत् उपमेयं प्रतीयते। अतिप्रसिद्धेस्तामाहुः समासोक्तिं मनीषिणः।।'' इति। सादृश्यञ्चात्र कार्य्यलिङ्गविशेषणानामन्यतमेन सम्भवति, कार्य्यादिसादृश्यादन्यवस्तुन उक्तिश्च व्यवहारसमारोपेणैवेति सुधीभिः विभाव्यम्। उक्तञ्च विश्वनाथेनापि,–''समासोक्तिः समैर्यत्र कार्य्यलिङ्गविशेषणैः। व्यवहारसमारोपः प्रस्तुतेऽन्यस्य वस्तुनः।।'' इति। अन्ये तु यदप्रकृते प्रसिद्धधर्म्मस्य प्रकृते समारोपात्तद्व्यवहारावच्छेदकतया तत्प्रतियोगिनोऽप्रकृतार्थस्य प्रतीतिः समासोक्तिः इत्याहुः। यत्र अप्रकृतेन प्रकृतार्थबोधनं तत्राप्रस्तुतप्रशंसा, प्रकृतेन अप्रकृतार्थबोधनन्तु समासोक्तिरिति तेषा माशयः)।।२०५।।

प्रभा

अथ क्रमप्राप्तां समासोक्तिं निर्वक्ति–**वस्तु किंचिदिति।** किंचित् किमपि वस्तु प्रस्तुतं अप्रस्तुतं वा अभिप्रेत्य चमत्कारसौभाग्यादिदिदर्शयिषया व्यञ्जनया प्रतिपादयितुमभिलष्य तत्तुल्यस्य वर्णनाभिप्रेतसदृशस्य वस्तुनः कस्यचिद् अप्रस्तुतस्य प्रस्तुतस्य वा उक्तिः कथनं समासोक्तिः। समासेन संक्षेपेण अर्थद्वयकथनाद् उक्तिः समासोक्तिः। संक्षेपश्च एकस्य प्रयोगेणोभयार्थप्रतिपादनात् ज्ञेयः। तथाच प्रकृते प्रस्तुताप्रस्तुतयोरन्यतरस्य प्रयोगेण तदन्यस्य प्रतीतिः समासोक्तिरिति समासोक्तिलक्षणम्। एकस्य शब्देन प्रतिपादनेन्यस्य व्यञ्जनया बोधश्चमत्कारविशेषमादधाति इति तदेवास्या अलंकारबीजं यदुक्तं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ध्वनिकृता-वाच्यार्थो न तथा स्वदते प्रतीयमानः स एव यथा इति। भोजराज उपमानाच्छाब्दादतिप्रसिद्धेरुपमेयस्य प्रतीतिरित्याह।। तथा च–

यत्रोपमानादेवैतद् उपमेयं प्रतीयते।
अतिप्रसिद्धेस्तामाहुः समासोक्तिं मनीषिणः।। (४.४६.) इति।

दण्डिनापि समासोक्तेः सर्वाण्यपि उदाहरणानि अप्रस्तुतवर्णनेन (उपमानवर्णनेन) प्रस्तुतार्थावबोधकान्येव दर्शितानि। तथापि उपमानवर्णनेनोपमेयार्थावगतौ यद्वैचित्र्यं प्रतीयते न ततो न्यूनं उपमेयवर्णनेनोपमानार्थावगतौ वैचित्र्यं भवति इति वस्तुशब्देनास्माभिर्द्वयोः संग्रहः कृतः। केचित्तु प्रस्तुतादप्रस्तुतावगतौ समासोक्तिः, अप्रस्तुतात् प्रस्तुतावगतौ च अप्रस्तुतप्रशंसा इति एकस्यैव वैचित्र्यस्य उपन्यासप्रकारभेदेन अलंकारद्वयमाहुः। परं तन्न रुचिरम्। वैचित्र्यविशेषाभावे ईदृशभेदकरणेलंकाराणामनन्त्यापत्तेः। नापि दण्डिना एवंविधा अप्रस्तुतप्रशंसा स्वीकृता। स तु ताम्-अप्रस्तुतप्रशंसा स्यादप्रक्रान्तेषु या स्तुतिः। इति लक्षयति। न तत्राप्रस्तुतात् प्रस्तुतावगतेः कोपि संबन्धोस्ति। ततश्च एकतरस्य वर्णने शब्दोपात्ते तदन्यप्रतीतिचमत्कारस्वरूपे प्रस्तुनेनाप्रस्तुतावगत्या अप्रस्तुतेन प्रस्तुतावगत्या वा दर्शिते तत्र सर्वत्र समासोक्तिरेव दण्ड्याचार्यस्य अभिप्रेतास्तीति ज्ञेयम्। नैवं हि कल्पयितुं शक्यते यदुपमेयादुपमानप्रतीतौ न चारुतातिशय इति। यतः–

व्याधूय यद्वसनमम्बुजलोचनाया,
वक्षोजयोः कनककुम्भविलास भाजोः।
आलिङ्गसि प्रसभमङ्गमशेषमस्माद्धन्यस्त्वमेव,
मलयाचल- गन्धवाह।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इत्याद्युदाहरणेषु चमत्कृतेः स्पष्टत्वात्। काव्यप्रकाशकारादयस्तु प्रस्तुते वाच्ये अप्रस्तुतव्यवहारसमारोपः समासोक्तिरिति। मन्यते। अप्रस्तुतात् प्रस्तुतावगतौ च अप्रस्तुतप्रशंसाम्। श्लेषालंकारे उपमाध्वनौ च विशेष्यास्यापि उभयार्थवाचकता। अस्यास्तु केवलविशेषणानामेव तथात्वमिति ततो भेद इति च तेषां विवेकः। एतदर्वाचीनसंमतसमासोक्तिवैचित्र्यविषये अप्पय्यदीक्षितैः सुगमपद्धत्या कुवलयानन्दे विवेचनं कृतमस्ति तदुपयुक्तमिति बुद्ध्या तदक्षरैरेवात्र निवेश्यते। अत्र (समासोक्तौ) प्रस्तुताप्रस्तुतसाधारणविशेषणबलात्सारूप्यबलाद्वा अप्रस्तुतस्य वृत्तान्तस्य प्रत्यायनं तत्प्रस्तुते विशेष्ये तत्समारोपार्थम्। सर्वथैव प्रस्तुतानन्वयिनः कविसंरम्भगोचरत्वायोगात्। ततश्च समासोक्तौ अप्रस्तुतव्यवहारसमारोपश्चारुताहेतुर्न तु रूपक इव प्रस्तुते अप्रस्तुतरूपसमारोपोस्ति। मुखं चन्द्र इत्यत्र मुखे चन्द्रत्वारोपहेतुचन्द्रपदसमभिव्याहारवद् रक्तश्चुम्बति चन्द्रमा इति समासोक्त्युदाहरणे चन्द्रादौ जारत्वाद्यारोपहेतोस्तद्वाचक-पदसमभिव्याहारस्य अभावात्।

निरीक्ष्य विद्युन्नयनैः पयोदो मुखं निशायामभिसारिकायाः।
धारानिपातैः सह किं नु वान्तश्चन्द्रोयमित्यार्ततरं ररासे।।

इत्येकदेशविवर्तिरूपकोदाहरण इव प्रस्तुते अप्रस्तुतरूप-समारोपगमकस्याप्यभावात्। तत्र हि विद्युन्नयनैरित्यत्र निरीक्षणानुगुण्याद् उत्तरपदप्रधानमयूरव्यंसकादिसमासव्यवस्थिताद् उत्तरपदार्थभूतनयानान्वयानुरोधात् पयोदे अनुक्तमपि द्रष्टृपुरुषरूपणं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गम्यमुपगम्यते। न चेह तथा निरीक्षणवत् त्वय्यागते किमपि वेपत एष सिन्धुः इति श्लोके सेतुकृत्वादिवच्च अप्रस्तुतासाधारणवृत्तान्त उपात्तोस्ति। नापि श्लिष्टसाधारणादिविशेषणसमर्पितयोः प्रस्तुताप्रस्तुतवृत्तान्तयोरप्रस्तुतवृत्तान्तस्य विद्युन्नयनवत्प्राधान्यमस्ति। येन तदनुरोधात् त्वं सेतुमन्थनकृदित्यत्रैव प्रस्तुतनुक्तमपि अप्रस्तुतसमारोपमभ्युपगच्छेम। तस्माद्विशेषणसमर्पिताप्रस्तुत-व्यवहारसमारोपमात्रमिह चारुताहेतुः। यद्यपि प्रस्तुताप्रस्तुत-वृत्तान्तयोरिह श्लिष्टसाधारणविशेषणसमर्पितयोर्भिन्नपदोपात्त-विशेषणयोरिव विशेष्येणेव साक्षादन्वयाद् अस्ति समप्राधान्यम्। तथापि अप्रस्तुतवृत्तान्तान्वयानुरोधान्न प्रस्तुते अप्रस्तुतसमारोपोङ्गीकार्यः। तथा हि यथा (अयमैन्द्रीमुखं पश्येत्यत्र) प्रस्तुतविशेष्ये अप्रस्तुतवृत्तान्तस्यान्वययोग्यता। तथैव अप्रस्तुतेपि जारादौ नास्ति प्रस्तुतवृत्तान्तस्यान्वययोग्यता। एवं च समप्रधानयोः प्रस्तुताप्रस्तुतवृत्तान्तयोरन्यतरस्यावश्यमारोपेभ्यु-पगन्तव्ये श्रुत एव प्रस्तुतेप्रस्तुतस्यारोपश्चारुताहेतुरिति युक्तम्। नन्वेवं सति–

विशेषणानां साम्येन यत्र प्रस्तुतवर्तिनाम्।
अप्रस्तुतस्य गम्यत्वं सा समासोक्तिरिष्यते।।

इत्यादीनि प्राचीनानां समासोक्तिलक्षणानि न संगच्छेरन्। प्रस्तुते श्लिष्टसाधारणादिविशेषणसमर्पितानुरागपूर्वकवदनचुम्बनाद्यप्रस्तुत-वृत्तान्तसमारोपमात्रस्य चारुताहेतुत्वाभ्युपगमेन विशेषण-साम्यकृतकामुकाद्यप्रस्तुतधर्मिव्यञ्जनानपेक्षणादिति चेदुच्यते।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वरूपतोप्रस्तुतवृत्तान्तस्यारोपो न चारुताहेतुः किंतु अप्रस्तुतकामुकत्वादिसंबन्धित्वेन अगम्यमानस्य तस्यारोपः। तथाभूतस्यैव रसानुगुणत्वात्। न च तावदवगमने विशेषणपदानां सामर्थ्यमस्ति। अतः श्लेषादिमहिम्ना विशेषणपदैः स्वरूपतः समर्पितेन वदनचुम्बनादिना तत्संबधिनि कामुकादावभिव्यक्ते पुनस्तदीयत्वानुसंधानं तत्र भवति। यथा स्वरूपतो दृष्टेन राजाश्वादिना तत्संबन्धिनि राजादौ स्मारिते पुनरश्वादौ तदीयत्वानुसंधानमिति विशेषणसाम्येन. वाच्योपस्कारकस्य अप्रस्तुतव्यञ्जनस्यास्त्यपेक्षा। अत एव श्लिष्टविशेषणायामिव साधारणविशेषणायामपि अप्रस्तुतव्यवहारसमारोप इत्येव प्राचीनानां प्रवादः। (व्यावल्गत्कुचभारमित्यादौ) कन्दुके व्यावल्गत्कुच-भारत्वादिविशिष्टवनितासेव्यत्वस्य कामुकसंबन्धित्वेनैव समारोपणीयत्वात्। स्वरूपतः कन्दुकेपि तस्य सत्त्वेनासमारोपणीयत्वात्। किं च सारूप्यनिबन्धनत्वेनोक्तायां समासोक्तौ अप्रस्तुतवृत्तान्तस्याशब्दार्थस्याप्रस्तुतवृत्तान्तरूपेणैव गम्यतया तेन रूपेण तत्र समारोपसिद्धेरन्यत्रापि तथैव युक्तमिति युक्तमेव प्राचीनानां लक्षणमिति विभावनीयम्।।२०५।।

विवृति

इति विभावनाचक्रम्।

समासोक्तिलक्षणमाह–

वस्तु किञ्चिदनिष्टनामधेयं चेतनमचेतनं वाऽभिप्रेत्य मनसि निधाय तत्तुल्यस्याभिप्रेतवस्तुसदृशस्य वस्तुनो यदभिधानमुक्तिः सा समासोक्तिरिष्यते। कुतः पुनरेवंविधोक्ति (: समा) सोक्तिसंज्ञां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लभत इत्याह–संक्षिप्तरूपत्वात् संक्षिप्तं रूपं यस्याः सा संक्षिप्तरूपा तद्भावात्।।

समासोक्तिं लक्षयति–**वस्त्विति।** कञ्चिदर्थं हृदये निधाय तत्तुल्यस्य अन्यस्य वस्तुनः कथनं समासोक्तिः। निर्वचनं करोति–संक्षिप्तरूपत्वादिति। उभयार्थद्योतकत्वात् इत्यर्थः।।

समासालङ्कारमाह–**वस्त्विति**।।२०५।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विशेष्यमात्रभिन्नापि तुल्याकारविशेषणा।
अस्त्यसावपराप्यस्ति भिन्नाभिन्नविशेषणा॥२०६॥

रत्नश्री

[65b] यत्किञ्चिद् वस्तु सामान्याकारप्रतीतमीदृशमिदं नान्यथेति कुतश्चिद् व्यवच्छिद्य केनचिद् गुणादिना व्यवस्थाप्यते तद्विशेष्यम्। तदेव तन्मात्रमुपाधिभेदव्यवच्छेदात् भिन्नमतुल्यं यस्यां सा तथा विशेष्यमात्रेण वा भिन्ना अवयवधर्मस्य समदाये न्यासात्। विजातीयविशेष्यापि सती तुल्याकारमभिन्नं विशेषणमुपाधिरस्यामिति तुल्याकारविशेषणा या सापीयं समासोक्तिरस्ति। न केवलम् अन्या। यदाहअपराप्यस्ति न केवलमेषा। कीदृशी? भिन्नं किञ्चिदभिन्नं च विशेषणमुपाधिरस्यामिति भिन्नाभिन्नविशेषणा। विशेष्यं तु उभयत्राभिन्नमिति॥

तदुभयमुदाहरति–

प्रभा

वाच्याद् व्यङ्ग्यप्रतीतौ कार्यलिङ्गविशेषणानामन्यतमस्य साम्यं हेतुरिति प्रथमं कार्यसाम्यघटितां। समासोक्तिमुदाहरति–**पिबन्निति।** भ्रमरः फुल्लपङ्कजे मधु पुष्परसं यथाकामं पर्याप्तं पिबन् असंनद्धसौरभ्यं अपरिपक्वमधुसौगन्धं कुड्मलं कलिकां चुम्बति पश्य॥२०६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रूढ़मूलः फलभरैः पुष्णन्ननिशमर्थिनः।
सान्द्रच्छायो महावृक्षः सोऽयमासादितो मया॥२०७॥

रत्नश्री

योऽयं महान् वृक्षः कालमियन्तं प्रार्थितः, स आसादितः प्राप्तः प्रसन्नेन विधिनोपानीतः। रूढं परिणतं मूललं जटालक्षणं यस्यमहावृक्षस्य, रूढ़मविकलं निजप्रकृतिलक्षणं बलम् मूलम् [तस्य] राज्यमूलत्वात्। यस्य पुंसः। फलानां वृक्षोचितानां च कालानां च सम्पदां भरैः सन्दोहैरर्थिनः फलं काङ्क्षिणः पुष्णन्नुपकुर्वन महावृक्षः पुरुषश्च यथाक्रमम् सान्द्रा निरन्तरा छाया आतपच्छेदलक्षणा यस्य सान्द्रा पर्याप्ता देहप्रभास्वभावा अङ्गरूपा कीर्तिलक्षणा वा यस्य पुंसः सोऽयमासादित इति। इयं विशेष्यमात्रभिन्ना तुल्याकारविशेषणा। विशेष्यवृक्षस्य विवक्षितात् पुरुषात् भिन्नत्वात् रूढ़मूलत्वादेश्च विशेषणस्योक्तेन प्रकारेणाभिन्नत्वादिति॥

हृदयङ्गमा

समासोक्तेः कार्य्यलिङ्गविशेषणघटितत्वात् प्रथमं कार्य्यघटितासमासोक्तिमुदाहरति, पिबन्नित्यादि।—भ्रमरः फुल्लपङ्कजे विकसितारविन्दे, यथाकामं, मधु पिबन्, असन्नद्धसौरभ्यम् अजातमधुगन्धम्, अपि कुद्मलं, चुम्बति पश्य। इत्यत्र, प्रौढ़ायाम् अङ्गनायाम् आबद्धा रतिलीला येन तादृशस्य, रागिणः अनुरागवतः कामिनः, कस्याञ्चित् बालायां मुग्धायाम्, इच्छावृत्तिः अभिलाषोदयः, विभाव्यते ध्वन्यते इति। (अत्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अप्रस्तुतात् भ्रमरकार्य्यात् प्रस्तुतकामुककार्य्यस्य प्रतीतेः कार्य्यघटितेयं समासोक्तिः)।।२०६।।२०७।।

प्रभा

इतीति। इति पूर्वोक्तवर्णितप्रकारेण इह श्लोके प्रौढा यौवनसंपन्ना या अङ्गना तस्यां बद्धा दृढा रतिरनुरागो येन तादृशस्य रागिणो विलासेनुरागिणः कस्यांचिद् बालायाम् इच्छावृत्तिः सुरताभिलाषप्रवृत्तिर्विभाव्यते व्यापारसाम्येन ध्वन्यते। अत्र अप्रस्तुतभ्रमरव्यापारः फुलपङ्कजरसास्वादानन्तरं पङ्कज-कोरकानुधावनं प्रौढाङ्गनाज्ञातास्वादस्य कामुकस्य अनुत्पन्नसंभोगाभिलाषाया बालाया अनुसरणं ध्वनयति इति समासोक्तिः।।२०७।।

विवृति

तदुदाहरणैः स्पष्टयति–

सुगमम्।।

समासोक्तिः तुल्यसंविधाना, तुल्यविशेषणा, तुल्यातुल्यविशेषणा चेति त्रिविधा। तत्र तुल्यसंविधानाम् उदाहरति–**पिबन्निति।** एतद्व्याचष्टे–**इतीति**।।२०६–२०७।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनल्पविटपाभोगः फलपुष्पसमृद्धिमान्।
सच्छायः स्थैर्यवान् दैवादेष लब्धो मया द्रुमः॥२०८॥

रत्नश्री

एषोऽभिलषिऽतोऽर्थः। दैवात् कुतश्चित् भागधेयात् लब्धः प्राप्तो मया। विटपानां विटपरूपोवा आभोगः प्रसारोऽनल्पो महान् यस्य द्रुमस्य। फलानि पुष्पाणि च समृद्धयः श्रियः वृक्षोचिताः [यस्य]। सहाच्छायया चन्द्रा र्कालोकविलोकरूपया वर्तते सच्छायो द्रुमः। पुरुषस्तु पूर्वोक्तया कान्त्यादिरूपच्छायया युक्त इति सच्छायाः। स्थैर्यवान् द्रुमो वातादिभिरनुत्पाट्यत्वात्। पुरुषस्तु विपक्षैर्दुर्द्धर्षत्वात्। एषा विशेष्यमात्रभिन्ना भिन्नविशेषणा, विवक्षितात् पुरुषाद्विशेष्यात् द्रुमस्य विशेषस्य भिन्नत्वात अनल्प विटपाभोगत्वस्य फलपुष्पसमृद्धिमत्त्वस्य च द्रुम एव सम्भवात्। सच्छायतायाः स्थैर्यस्य चोभयत्रापि भावादुक्तेन विधिनेति॥

तदुभयं विवृणोति–

हृदयङ्गमा

समासोक्तेः विशेषणघटितभेदं दर्शयन् अभिन्नविशेषणत्वेन भिन्नाभिन्नविशेषणत्वेन च द्विविधं भेदं दर्शयति, विशेष्येति। –विशेष्यमात्रं विशेष्यपदमात्रं, भिन्नं श्लेषाभावात् एकमात्रबोधकं, यत्र सा, विशेष्यपदस्य श्लिष्टत्वे तूभयोः प्रस्तुतत्वेन श्लेषालङ्काराङ्गीकारादिति भावः। तुल्याकारविशेषणा तुल्याकारं श्लेषवशात् वाच्यव्यङ्ग्योभयधर्मबोधकं, विशेषणं यत्र सा इत्येकविधा अस्ति, अधरा च भिन्नञ्च श्लेषाभावादेकमात्रबोधकम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अभिन्नञ्च श्लेषादुभयबोधकञ्च विशेषणं यत्र तादृशी, श्लिष्टाश्लिष्टविशेषणेत्यर्थः। इति द्वितीयाऽपि अस्ति। (इत्थञ्च श्लिष्टविशेषणा श्लिष्टाश्लिष्टविशेषणेति भेदद्वयं बोध्यम्। श्नेषश्चात्र शब्दार्थगतः द्विविध एव। तुल्याकारविशेषणे एकरूपशब्दप्रतिपाद्यत्वेन श्लेषवशात् विशेषणधर्म्माणां साम्यं, भिन्नविशेषणस्थले तु व्यङ्ग्यधर्मेण विम्बप्रतिविम्बतया साम्यमवगन्तव्यम्। केचिदत्र विशेषणसाम्यं श्लिष्टतया साधारण्येन, औपम्यगभत्वेन च भावात् त्रिधा सम्भवतीत्याहुः। तेषां मते औपम्यगर्भसमासोक्तेः उदाहरणं यथा,–"दन्तप्रभापुष्पचिता पाणिपल्लवशोभिनी। केशपाशालिवृन्देन सुवेशा हरिणेक्षणा।।" इति। अत्र दन्तप्रभा पुष्पाणि इव इति सुवेशत्ववशादुपमागर्भत्वेन कृते समासे नायिकाया बोधः पश्चात् दन्तप्रभासदृशैः पुष्पैश्चितेति समासान्तराश्रयणेन समानविशेषणमाहात्मयात् हरिणेक्षणायां लताव्यवहारप्रतीतिः। "सुवेशा" इत्यत्र "परीता" इति पाठे उपमारूपकसाधकबाधकाभावात् सङ्करगर्भत्वञ्च सम्भवति, औपम्यगर्भस्यापि विशेषणसाम्यस्य उपमारूपकसङ्करगर्भत्वेन त्रिविधत्वस्यैवाङ्गीकारात्। अन्ये तु औपम्यगर्भविशेषणस्थले उपमारूपकयोरेकदेशविवर्त्तितामेवाङ्गीकुर्वन्ति, न तु समासोक्तिम्; अत एव ग्रन्थकारोऽपि विशेषणपदानां द्वैविध्यमेवाह। तथा हि,– "ऐन्द्रं धनुः पाण्डुपयोधरेण शरद्दधानाद्रनखक्षताभम्। प्रसादयन्ती सकलङ्कमिन्दुं तापं रवेरभ्यधिकं चकार।।" इत्यादौ आर्द्रनखक्षताभैन्द्रधनुर्धारणरूपविशेषणस्य नायिकाया असम्भवेन साम्याभावात् शरदि नायिकाप्रतीतिः कथमिति एकदेशविवर्त्तिन्युपमैव भवितुं युक्ता, यत्सामर्थ्यात् रविशशिनोर्नायकत्वप्रतीतिः स्यादिति तेषामाशयः, तदन्ये न

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मन्यन्ते, प्रसादयन्ती सकलङ्कमिन्दुमिति विशषणसाम्याच्छरदो नायिकात्वप्रतीतौ तदानुगुण्यात् रविशशिनोः समासोक्त्या नायकत्वप्रतीतिः, किमेकदेशविवर्त्तिन्या उपमायाः अङ्गीकारेण? इत्यभिप्रायः। पक्षान्तरे तु अत्र नोपमानत्वेन नायकः स्वरूपेण प्रतीयते तथाऽपि रविशशिनोरेव नायकव्यवहारप्रतीतिस्तयोरत्र नायकत्वात्। आर्द्रनखक्षताभमैन्द्रं धनुर्दधाना इत्येतद्विशेषणं साम्येन कथं निर्दिष्टमिति चेत् आर्द्रनखक्षताभमित्यत्र स्थितमप्युपमानत्वं वस्तुपर्य्यालोचनया ऐन्द्रे धनुषि सञ्चारणीयम्, इन्द्रचापाभं नखक्षतं दधानेति प्रतीतेः ; यथा "दध्ना जुहोति" इत्यादौ दध्नि सञ्चार्य्यते विधिरिति। एवमियमुपमानुप्राणिता समासोक्तिरेव न तु एकदेशविवर्त्तिन्युपमां तदत्रौपम्यगर्भविशेषणमपि युज्यते इति समाधानम्)।।२०८।।

प्रभा

विशेषणसाम्यघटितभेदां दर्शयति—**विशेष्येति।** विशेष्यमात्रं विशेष्यपदमात्रं भिन्नं श्लेषाभावात् केवलमेकार्थबोधकं यत्र सा। तुल्यः समानः आकारः स्वरूपं येषां तानि तुल्याकाराणि श्लेषादिना प्रस्तुताप्रस्तुतार्थसंपादकानि विशेषणानि यस्यां सा एतादृशी। असौ समासोक्तिरस्ति। अत्र श्लेषवशेन विशेषधर्माणां साम्यम्। भिन्नाभिन्नविशेषणा भिन्नानि एकमात्रानुसंबन्धीनि अभिन्नानि उभयानुसंबन्धीनि एवं विशेषणानि यस्यां सा अपरा समासोक्तिरस्ति। अत्रापि विशेष्यमात्रभिन्नेत्यनुषज्यते। तच्च विशेष्यं प्रस्तुतमप्रस्तुतं वा भिन्नेदिति पूर्वं प्रपञ्चितमत्रानुसंधेयम् विशेष्यपदस्य श्लिष्टत्व. द्वयोः प्रस्तुतत्वे श्लेषालंकारः। द्वयोरेकतरस्य प्रस्तुतत्वे शब्दशक्तिमूल उपमाध्वनिरिति ज्ञेयम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भिन्नविशेषणानां व्यङ्ग्यधर्मेण सह बिम्बप्रतिबिम्बतया साम्यम्। श्लेषश्चात्र शब्दगतोर्थगत इति गृह्यते। तेन परैरङ्गीकृतं विशेषणसाधारण्यगर्भभेदान्तरं संगृहीतं भवति। तत्र अर्थश्लेषावष्टब्धस्य विशेषणस्यै साधारण्यात्। यथा–

विलखति कुचावुच्चैर्गाढं करोति कचग्रहं
लिखति ललिते वक्त्रे पत्रावलीमसमञ्जसाम्।
क्षितिप खदिरः श्रोणीबिम्बाद्विकर्षति चांशुकं
मरुभुवि हटान्नश्यन्तीनां तवारिमृगीदृशाम्।। इति।

अत्र कुचविलेखनकचग्रहणादिविशेषणानामर्थश्लेषेण उभयार्थसाधारण्यात् साधर्म्यम्। तेन च हठनायकप्रतीतिरस्तीति समासोक्तिः। तुल्याकारविशेषणत्वं औपम्यगर्भत्वे सारूप्ये च संभवति। अतस्तत्रापि समासोक्तिः। तत्रोपम्यगर्भत्वे यथा–

दन्तप्रभापुष्पचिता पाणिपल्लवशोभिनी।
केशपाशालिवृन्देन सुवेशा हरिणेक्षणा।। इति।

अत्र प्रस्तुतार्थविशेषणे दन्तप्रभा पुष्पाणीव इत्यादय उपमितसमासाः। अप्रस्तुतार्थे दन्तप्रभासदृशैः पुष्पैरित्यादयः समासाः। तेन च लतावृत्तान्तस्य परिस्फूर्तेः समासोक्तिः। सारूप्ये यथा–

पुरा यत्र स्त्रोतः पुलिनमधुना तत्र सरितां
विपर्यासं यातो घनविरलभावः क्षितिरुहाम्।
बहोर्दृष्टं कालादपरमिव मन्ये वनमिदं
निवासः शैलानां तदिदमिति बुद्धिं द्रढयति।। इति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत्र वनसारूप्यात् कुटुम्बिषु धनसंतानादिसमृद्ध्य-समृद्धिविपर्यासं प्राप्तस्य ग्रामनगरादेर्वृत्तान्तस्य प्रतीतेः समासोक्तिः।।२०८।।

विवृति

विशेष्यमात्रभिन्ना विशेष्यमेव केवलं भिन्नं यस्याः सा विशेष्यमात्रमिन्ना। तुल्याकाराणि विशेषणानि यस्यास्सा तुल्याकारविशेषणा सा तावदेव(का) समासोक्तिरस्ति। तथाऽपराप्यस्ति। भिन्नानि च विसदृशानि अभिन्नानि चोभयसाधारणानि विशेषणानि यस्यास्सा वि(?)भिन्नाभिन्नविशेषणा।।

अपरे विभजते–**विशेष्येति**।।

समासालङ्कारस्य भेदं दर्शयति–**विशेष्येति**।।२०८।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उभयत्र पुमान् कश्चिद्वृक्षत्वेनोपवर्णितः।
सर्वे साधारणा धर्माः पूर्वत्रान्यत्र तु द्वयम्॥२०९॥

रत्नश्री

उभयत्र उभयो रूढ़मूल इत्यादौ अनल्पविटपाभोग इत्यादौ च प्रयोगयोः पुमान् पुरुषः कश्चित् अभिमतः वृक्षत्वेन वृक्षगुणसाम्यात् द्रुमरूपेणोपवर्णितः संकीर्तितः तत्परत्वात् अनपेक्षितस्वार्थवृत्तेर्वृक्षादिशब्दस्य पुरुषविशेषप्रत्यायकत्वम्। भेदस्त्वियान्। पूर्वत्र रूढमूलमित्यादौ सर्वे ये केचित् तत्रोपात्ताः रूढ़मूलमित्यादयः साधारणास्तुल्या धर्मा विशेषणानि उभयत्रापि सम्भवात्। अन्यत्र तु अनन्तरोक्ते अनल्पविटपाभोग इत्यादौ पुनर्द्वयं साधारणमसाधारणं सच्छायत्वस्य स्थैर्यवत्तायाश्च उभयत्रापि सम्भवात्। अनल्पविटपाभोगत्वस्य पुष्पफलसमृद्धिमत्तायाश्च वृक्ष एव सम्भवादिति॥

हृदयङ्गमा

यथाक्रममुदाहरणे दर्शयति, रूढ़ेति। –रूढ़ं प्रवृद्धं, मूलं शिफा मूलधनञ्च यस्य सः, फलानां भरैः समूहैः बहुभिर्धनैश्च, अनिशम् अर्थिनः पुष्णन् प्रतिपालयन्, तथा सान्द्रा घना, छाया अनातपप्रदेशः कान्तिश्च यस्य तादृशः, सः प्रसिद्धः, अयं महान् वृक्षः मया आसादितः। प्राप्तः॥२०९॥

प्रभा

तुल्याकारविशेषणां समासोक्तिं दर्शयति–**रूढमूल इति।** रूढं प्रवृद्धं मूलं शिफा मूलधनं च यस्य सः। अनिशं अर्थिनो याचकान्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

फलभरैर्विविधफलैः। तथा फलैः लाभैर्वाञ्छितार्थलाभैः पुष्णन्। सान्द्रा बहुला छाया अनातपः तथा वदनकान्तिर्यस्य सः। सोयं प्रसिद्धो महावृक्षो मया आसादितः प्राप्तः। महावृक्ष इति विशेष्यपदं एकार्थमेव प्रस्तुतार्थानुसंबन्धि। अत्र सर्वाण्यपि विशेषणानि तुल्याकाराणि। तेन चाप्रस्तुतस्य वदान्यस्य पुंसः प्रतीतिः। इति समासोक्तिः।।२०९।।

विवृति

एवं द्विप्रकारां तां यथाक्रममुदाहरति–

रूढं मूलं यस्य सः रूढमूलः पुरुषश्च कोऽप्यभिप्रेतोऽभिधातुं(तुः ?) यः स रूढमूलः रूढं मन्त्रिपुरोहितादि मूलं बलं यस्य फलभरैः पुष्णन्ननिशमर्थिनः। वृक्षस्य फलानि प्रतीतानि। पुरुषश्च फलभरैः समीहितार्थसिद्धिभिरर्थिनो याच्ञावतः पुष्णन्। सान्द्रा छाया यस्य स सान्द्रच्छायो बहुलच्छायः। कान्तिमान् छाया कान्तिरुच्यते। लावण्यमित्यपरे। महावृक्षस्सोऽयमासादितो मया लब्ध इत्याद्या।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निवृत्तव्यालसंसर्गो निसर्गमधुराशयः।
अयमम्भोनिधिः कष्टं कालेन परिशोष्यते॥२१०॥

रत्नश्री

अयम् अपरोक्षवृत्तिः अम्भोनिधिः सागरः कालेन संवर्तसमयेन परिशोष्यते विलयं नीयते। कष्टं बत इति खेदे। पुरुषः कालेन मृत्युना परिशोष्यते परासुः क्रियते। अम्भोनिधिः व्यालैः सर्पैः संसृष्टः। पुरुषस्तु, निवृत्तो व्यालैः दुष्टैः संसर्गोऽस्येति निवृत्तव्यालसंसर्गः। अम्भोनिधिः स्वभावलवणजल-लक्षणाशययुक्तः। पुरुषस्तु निसर्गेण स्वभावेन मधुरः सुरसः प्रीतिकरः आशयः चित्तं यस्येति निसर्गमधुराशयः। गाम्भीर्यादयस्तु गुणाः साधारणाः प्रतीयन्त एव। अन्यथा कथमम्भोनिधित्वेन पुरुषो वर्ण्यते ततश्चापूर्वोऽयमम्भोनिधिरिति॥

तद् व्याचष्टे–

हृदयङ्गमा

अनल्पेति।–अनल्पः बहुलः, विटपानां शाखानाम्, आभोगः विस्तारः यस्य सः, फलानां पुष्पाणाञ्च समृद्धिः विद्यते अस्य सः, सुशोभना, छाया अनातपप्रदेशः कान्तिश्च यस्य सः, तथा स्थैर्य्यवान् स्थैर्य्यं सारवत्त्वं तद्वान् दृढप्रतिज्ञश्च, (उक्तञ्च,–"व्यवसायादचलनं स्थैर्य्यं विघ्ने महत्यपि" इति) एवम्भूतः एषः द्रुमः मया दैवात् लब्धः॥२१०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रभा

भिन्नाभिन्नविशेषणामेनामुदाहरति–**अनल्पेति।** अनल्पः बहुलः विटपानां शाखानाम् आभोगो विस्तारो यस्य। फलानां पुष्पाणां च समृद्धिर्वैपुल्यमस्यास्तीति फलपुष्पसमृद्धिमान्। उच्छ्रायः उन्नतत्वं विभूतिमत्त्वं च तेन सहितः सोच्छ्रायः। सुच्छाय इति पाठे सुष्ठु शोभना छाया आतपाभावः प्रभा च यस्य स इत्यर्थः। स्थैर्यं दृढमूलत्वम् अन्यत्र निश्चयादचलनं तदस्यास्तीति स्थैर्यवान्। दैवाद् भाग्याद् एष द्रुमो मया लब्धः। अत्र स्थैर्यमूलादिधर्मौ श्लेषभित्तिकयाभेदेनाध्यवसितौ इति समानौ। विटपफलादयश्च केवलं वृक्षमात्रानुगामिनोपि प्रतीयमानपुरुषगततत्सजातीय-बहुपुत्रत्वधनधान्यसमृद्धित्वादिभिर्बिम्बप्रतिबिम्बभावेन एकार्थता-मापन्नाः साधर्म्यं भजन्ते। तथा च सर्वैरपि विशेषणैरप्रस्तुतः पुरुषः प्रतीयत इति समासोक्तिः।।२१०।।

विवृति

अनल्पो विटपानामाभोगो यस्यानल्पशाखाटोपः। फलपुष्पस-(मृद्धिमान्) सुच्छायः स्थैर्यवान् स्थावरत्वादेव स्थैर्यवशात् अचप(ञ्च)लः वृक्ष एव(ष) भयाद्दै(मया दै)वात् पुण्यादासादित इति द्वितीय(या)।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इत्यपूर्वसमासोक्तिः पूर्वधर्मनिवर्तनात्।
समुद्रेण समानस्य पुंसो व्यावृत्तिसूचने॥२११॥

रत्नश्री

इति ईदृक् अपूर्वसमासोक्तिः इष्यते। व्यावृत्तिसूचनेऽपरिशेषेण प्रतीतौ विषये। तेन समुद्रेण समानस्य पुंसः उभयोरपि शोषणलक्षणस्य विनाशस्य वृत्तेरुपात्तापेक्षया एमदुक्तम्। गाम्भीर्यादावपि समानस्येति गम्यत एव। समुद्रे अपूर्वस्य प्रसिद्धस्य धर्मस्य व्यालसंसर्गादेः निवर्तनात् निषेधात् निवृत्तव्याल इत्यादिना। अपूर्वसमासोक्तिरिति प्रकृतम्॥

॥ इति समासोक्तिचक्रम् ॥

अतिशयोक्तिमादर्शयन्नाह–

हृदयङ्गमा

उभयत्र लक्षणं सङ्गमयति, उभयत्रेति। –उभयत्र पद्ययोः, कश्चित् पुमान् वृक्षत्वेन उपमानधर्म्मिणः वृक्षस्योपमेयत्वेन इत्यर्थः, उपवर्णितः व्यञ्जनया प्रतिपादितः, पूर्वत्र उदाहरणे, सर्वे धर्माः रूढ़मूलादिविशेषणपदप्रतिपाद्यस्वरूपा इत्यर्थः, साधारणाः श्लेषमूलत्वात् प्रस्तुताप्रस्तुतयोरन्वयित्वेनाभिन्नाः। (विशेष्यपदमात्रं श्लेषस्पर्शाभावात् भिन्नमिति प्रथमोक्तायाः तुल्याकारविशेषणाया उदाहरणमिदमित्यभिप्रायः)। अन्यत्र उदाहरणे, तु द्वयं भिन्नमभिन्नञ्च इति धर्म्मद्वितयं, प्रदर्शितमिति शेषः। (आद्यद्वितीये विशेषणे श्लेषाभावात् भिन्ने, तृतीयचतुर्थे श्लेषोपष्टम्भात् अभिन्ने इति भिन्नाभिन्नविशेषणत्वम्)॥२११॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रभा

उभयत्र लक्षणं संगमयति—**उभयत्रेति।** उभयत्र पद्ययोः कश्चित् पुमान् वृक्षत्वेन वृक्षगतसाधारणविशेषणैरुत्थापितया व्यञ्जनया बोधितत्वाद् वृक्षोपमानतया वर्णितः। पूर्वश्लोके सर्वे धर्मा रूढमूलादयो विशेषणभूताः साधारणाः श्लिष्टत्वेन एकरूपेणैव उभयान्वयिनः। अन्यत्र उत्तरश्लोके तु द्वयं विशेषणद्वयमेव। सोच्छ्रायत्वस्थैर्यवत्त्वरूपं साधारणम् पूर्ववत् श्लिष्टत्वादभिन्नं विटपादीनां साधारण्यं पुरुषगततत्स-जातीयधर्मैर्बिम्बप्रतिबिम्बभावेन इति ज्ञेयम्। अन्यथा सादृश्यभावाद् व्यञ्जनया अप्रस्तुतार्थानवगमने अपुष्टत्वदोषापत्तिः स्यात्। ततश्च समासोक्तिरपि सुसंगता न भवेत्।।२११।।

विवृति

उभयत्रोभय्यां उभयत्र त्रतसाविति पुंवद् भावात् स्त्रीप्रत्ययनिवृत्तिः। पुमान् कश्चित् वृक्षत्वेनोपवर्णितः। सर्वे साधारणा धर्मा रूढमूल(: फल) भरैरित्यादयो वृक्षस्य पुरुषस्य चेति। विशेष्यमात्रं भिन्नं एकत्र पुमानन्यत्र वृक्षः। अन्यत्र(उभयत्र)विशेषणानीति तुल्याकारविशेषणा। अन्यत्र तु द्वितीयस्यां द्वयमेव द्वितीया(तुल्या)कारं सुच्छायः स्थैर्यवानिति (न) सर्वाण्यनल्पविटपादि(?)भोगप्रभृतीनीति भिन्नाभिन्न-विशेषणा।।

तुल्यविशेषणामुदाहरति—**रूढमूल इति।** रूढमूलः क्षेत्रादिमान्; फलभरैः अभीप्सितैः अर्थैः ; सान्द्रच्छायः विशालनिवासः ; एवं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महापुरुषः अभिप्रेतः। वृक्षविशेषणानि हि प्रकटानि। तुल्यातुल्यविशेषणामुदाहरति– अनल्पेति। अनल्पविटपाभोगः इत्यनेन पुत्रादिसम्पत्तिः द्योतिता; फलषुष्पसमृद्धिमानिति अर्थायतिः द्योतिता; न तु अभिहिता। सुच्छायः स्थैर्यवान् इति द्वयम् उभयविशेषणम्। पूर्वश्लोकौ व्याचष्टे–**उभयत्रेति॥**

उदाहरणे–रूढेति अनल्पेति च। सुच्छायः स्थैर्यवान् इति धर्मद्वयस्यैव साधारण्यम्॥२११॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विवक्षया विशेषस्य लोकसीमातिवर्तिनः।
असावतिशयोक्तिः स्यादलङ्कारोत्तमा यथा॥२१२॥

रत्नश्री

विशेषस्य वस्तुगतस्य प्रकर्षस्य अतिमात्रस्य [66b] कस्यचिद्विवक्षया प्रतिपादनाभिप्रायेण हेतुना लोकस्य जगतः सीमा स्थितिः। तामतिवतितुं लंघयितुं शीलं यस्याः सा लोकसीमातिवर्तिनी। या इत्यनूद्य असौ सा तल्लक्षणा अतिशयोक्तिः स्यादिति विधीयते। विवक्ष या इति पाठे अतिशयस्य लोकसीमातिवर्तिनी या विवक्षा असौ अतिशयाक्तिरिति योजनीयम्! अतिशयस्य यथास्थिताद् वस्तुनः अविकलस्य उत्कर्षस्य प्रतिपादिका इति अतिशयोक्तिः। सा च इयमलङ्काराणामन्येषाम् उत्तमा प्रधाना, अत्यन्तमनोहरत्वात्। यथाहि वस्तुनो मनोज्ञस्य प्रकृत्या ततोऽपि अतिरिक्ता काप्यवस्था प्रतिसंस्क्रियते, सा नितरामनुरागमातनोतीति अलङ्काराधिराजत्वेनैषा अभिषिच्यते कविभिरिति॥

एवं लक्षणतः प्रदर्श्य अतिशयोक्तिं लक्ष्यतः परिस्फुटयन्नाह–

प्रभा

अपूर्वसमासोक्तिमुदाहरति–**निवृत्त इति।** निवृत्तः अपगतो व्यालानां एकत्र सर्पाणां अन्यत्र खलानां च संसर्गो यस्मात्सः। निसर्गेण स्वभावत एव मधुराणां सुमिष्टानां जलानां आशयः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आधारः, अन्यत्र स्वभावत एव मधुरः मनोहरः आशयः चित्तवृत्तिर्यस्य सः। एतादृशोयं अपूर्वः अम्भोनिधिः कालेन समयेन यमेन च परिशुष्यति शोषं यास्यति विनाशं च गमिष्यति। कष्टं अतीव दुःखास्पदमेतत्। पूर्वोदाहृताभिन्नविशेषणसमासोक्तौ रूढमूलादीनि विशेषणानि वास्तवानि। इह तु वास्तवगुणनिरोधपूर्वककल्पितानीति उभयोर्भेदः।।२१२।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मल्लिकामालभारिण्यः सर्वाङ्गीणार्द्रचन्द्रनाः।
क्षौमवत्यो न लक्ष्यन्ते ज्योत्स्नायामभिसारिकाः॥२१३॥

रत्नश्री

मल्लिकानां मालाः स्त्रजो बिभ्रतीति मल्लिकामालभारिण्यः। इष्टकेत्यादिना ह्रस्वः। अनेनोत्तमाङ्गशौक्ल्यमाहार्यं दर्शयति। सर्वम् अङ्गं व्याप्नोति सर्वाङ्गीणमार्द्रम् अश्यानं चन्दनं यासां तास्तथा। क्षौमवत्यः सितसूक्ष्माम्बरधारिण्यः। एतेन शेषाङ्गश्वैत्यमाहृतम्। अभिसारिका मदनशरताददह्यमानमनसः स्वयमेव कान्तान्तिकम् उपयान्त्यः स्त्रियः। ताश्च दुर्दिनाभिसारिकाः शरदभिसारिका इत्यादयो ह्य[न्य]त्रोक्ताः। इह शरदभिसारिकाः विवक्षिताः। यथाह—ज्योत्स्नायां न लक्ष्यन्त इति। नेपथ्यं च तदनुरूपं दर्शितम्। ज्योत्स्नायां चन्द्रिकायां न लक्ष्यन्ते, न निर्धार्यन्ते, एता अभिसारिकाश्चन्द्रिकेयमिति। एवमतिसान्द्रा चन्द्रिका यतस्तत्र वस्त्वन्तरं तादृशं न विभाव्यत इति। वस्तुतः तथात्वाभावेऽपि विशेषस्तादृशः कल्प्यते। यथा यथावस्थितवस्त्वतिवृत्ति-सन्दर्शितेदृशातिशयालोकवेलाविलङ्घिनी इयमतिमनोहरा जायते तद्विदामिति॥

कस्यात्र विशेषो विवक्षित इति विवृण्वन्नाह—

हृदयङ्गमा

अपूर्वसमासोक्तिमुदाहरति, निवृत्तेत्यादि।—निवृत्तः व्यालानां सर्पाणां खलानाञ्च, संसर्गः यस्मात् सः, निसर्गेण स्वभावतः,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मधुराणां सुमिष्टजलानाम् इति यावत्, आशयः आधारः, अन्यत्र, –मधुरः मनोरमः, आशयो यस्य सः सहृदय इत्यर्थः, अयम् अम्भोनिधिः, कालेन समयेन यमेन च, परिशुष्यते शोषं नीयते विनाश्यते च, कष्टं कष्टकरमेतदित्यर्थः। इत्यत्र, पूर्वधर्म्मयोः व्यालसंसर्गित्वलवणजलत्वयोः, निवर्त्तनात् अनुपादानेन तद्वैपरीत्यधर्मयोः कीर्त्तनादित्यर्थः, समुद्रेण समानस्य पुंसः व्यापत्तिसूचनात् विनाशद्योतनात्, अपूर्वा पूर्वविपरीता, समासोक्तिरियम्। (नवीनोक्तेषु कार्य्यलिङ्गविशेषणेषु कार्य्यविशेषणयोः सादृश्ये समासोक्तिरनेन दर्शिता, लिङ्गसाम्ये तु यथा, –"असमाप्तजिगीषस्य स्त्रीचिन्ता का मनस्विनः?। अनाक्रम्य जगत् कृत्स्नं नो सन्ध्यां भजते रविः।।" इति। अत्रोत्तरार्द्धे स्त्रीपुंलिङ्गसाम्यात् नायकनायिकाव्यवहारप्रतीतिः। एवम् अस्यालङ्कारस्य व्यवहारसमारोप एव जीवितमिति बहुप्रकारा समासोक्तिरिति नव्याः। तत्र लौकिके वस्तुनि लौकिकवस्तुव्यवहारसमारोपः, शास्त्रीये वस्तुनि शास्त्रीय-वस्तुव्यवहारसमारोपः, शास्त्रीये वा लौकिकवस्तुव्यवहारसमारोपः, लौकिके वा शास्त्रीयवस्तुव्यवहारसमारोपः इति चतुर्द्धा व्यवहारसमारोपः सम्भवति। तत्र शास्त्रीये वस्तुनि शास्त्रीयवस्तुव्यवहारसमारोपे उदाहरणं यथा,–"यैरेकरूप-मखिलास्वपि वृत्तिषु त्वां पश्यद्भिरव्ययमसङ्गतया प्रवृत्तम्। लोपः कृतः किल परत्वजुषो विभक्तेस्तैर्लक्षणं तव कृतं ध्रुवमेव मन्ये।।" इति, अत्रागमशास्त्रप्रसिद्धै वस्तुनि व्याकरणशास्त्रप्रसिद्ध-वस्तुसमारोपः। एवमन्यदप्युदाहरणं ज्ञेयम्) ।।२१२।।२१३।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रभा

उदाहरणं विशदयति–**इतीति।** इति एतादृशी अपूर्वसमासोक्तिः। कथमिति चेत् पूर्वधर्मनिवर्तनात् पूर्वौ जगति समुद्रधर्मत्वेन प्रसिद्धौ धर्मौ व्यालसंसर्गलवणजलरूपौ तयोर्निवर्तनात् तद्विपरीतनिवृत्तव्यालसंसर्गत्वनिसर्गमधुराशयत्व-रूपधर्मस्य वाच्ये अम्भोनिधौ निवेशनादिति भावः। तेन च प्रस्तुतपुरुषस्य प्रतीतिरिति समासोक्तिः। समासोक्तिहेतुं दर्शयति–**समुद्रेणेति।** समुद्रेण समानस्य निवृत्तव्यालत्वादिगुणैरिति भावः। पुंसो व्यापत्तिः नाशस्तस्य सूचनाद् इयमपूर्वसमासोक्तिः। अपूर्वाः पूर्वधर्मनिवर्तकाः कल्पिता धर्मा यस्यां सा अपूर्वसमासोक्तिः। एवं ग्रन्थकर्त्रा कार्यसाम्येन विशेषणसाम्येन समासोक्तिर्दर्शिता। लिङ्गसाम्योदाहरणं तु न प्रदर्शितम्। तत्तु निशामुखं चुम्बति चन्द्र एष इति। अत्र स्त्रीलिङ्गपुल्लिङ्गाभ्यां मुखचुम्बनरूपार्थसचिवाभ्यां नायिकात्वं च व्यज्यत एव। अन्यथा निशामुखं चुम्बति चन्द्रिकैषा। अथवा अहर्मुखं चुम्बति भानुबिम्बं इत्यनेनापि प्रस्तुतार्थप्रतीतिः स्यात्। केवलं चुम्बतिपदोपादानेन समासोक्तिर्न संभवति। पुत्रादीनामपि चुम्बनसंभवात्। तस्मादत्र केवललिङ्गेनैव समासोक्तिः।।२१३।।

विवृति

निवृत्तो व्यालदुर्जनैः संसर्गो यस्य तथा व्यालैः क्रूरनक्रैः निसर्गेण मधुर आशयो मनः पुंसः समुद्रस्य चाशयो जलं यस्यासौ निसर्गमधुराशयः अयं इत्थंभूतोऽ(म्भो)निधिः कष्टं कालेन परिशोष(ष्य) ते इत्यपूर्वसमासोक्तिरियमुच्यते। कुतः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पूर्वधर्मनिवर्तनात् पूर्वधर्मावम्भोनिधेर्व्यालसंसर्गः तथा क्षाराशयत्वं तयोर्निवर्तनात् निवृत्तव्यालसंसर्गो निसर्गमधुराशय इति वचनात् समुद्रेणेत्थंभूतेन समानस्य पुसा व्यावृत्तिः (पत्तेः)सूचना(द्) भावाभिधानात्।।

निवृत्तेति। निवृत्तव्यालसंसर्गः दुर्जनसम्बन्धरहितः। पूर्वं व्याचष्टे–**इत्यपूर्वेति।।**

निवृत्तेति। आंशरते अस्मिन् मत्स्यादय इति आशयः जलम्। समुद्रस्य व्यालसंसर्गः भुजङ्गसंसर्गः लवणाशयत्वं च प्रसिद्धो धर्मः। तस्य तौ नित्यौ व्यालसंसर्गराहित्यं मधुराशयत्वं च धर्मौ आरोप्य, तत्समानस्य पुंसो विपत्तिसूचनात्, इयम् अपूर्व-समासोक्तिः।।२१२–२१३।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चन्द्रातपस्य बाहुल्यमुक्तमुत्कर्षवत्तथा।
संशयातिशयादीनां व्यक्तौ किञ्चिन्निदर्श्यते॥२१४॥

रत्नश्री

चन्द्रस्य आतपो ज्योत्स्ना तस्य बाहुल्यं घनत्वम् तच्च उत्कर्षस्यास्तीति उत्कर्षमतिमात्रम् उक्तम् उद्भावितम् यतः तत्राभिसारिकाः कल्पितमल्लिकादिसिताकल्पाः। क्षीरसागरे तरन्त्यो [67a] हंससंहत्य इव न विभाव्यन्ते। यथेयमतिशयोक्तिः तथा एवं संशये संशयस्य वा अतिशयो विशेषः। संशयातिशयोक्तिः एकदेशेन समुदायोपलक्षणादिः यस्याम्। निश्चयातिशयोक्त्यादीनां तासाम् व्यक्तौ विशेषावगमनिमित्तं व्यक्त्यै वा व्यक्त्यर्थं किञ्चित् कियन्मात्रं लक्ष्यं निदर्श्यते उदाह्रियत इति॥

हृदयङ्गमा

अतिशयोक्तिमाह, विवक्षेति। –विशेषस्य प्रस्तुतवस्तुगतस्य उत्कर्षस्य, लोकसीमा लोकमर्य्यादा, तस्याः अतिवर्त्तिनी अतिरिक्ता, अत्यधिका इत्यर्थः, या विवक्षा उक्तिः, अध्यवसायादिना भङ्गान्तरेण वा उपमेयस्य उपमानत्वरूपेण प्रतिपादनमित्यर्थः, (अत्र स्वार्थे सन्प्रत्ययो बोद्धव्यः) असौ अलङ्कारेषु उत्तमा सर्वालङ्कारश्रेष्ठा इत्यर्थः अतिशयोक्तिः अतिशयस्य उत्कर्षातिशयस्य, उक्तिः कथनमिति व्युत्पत्तेस्तन्नामालङ्कारभेदः, स्यात्। (इत्थञ्च प्रस्तुतस्य उत्कर्षातिशयप्रतिपादनार्थम उपमेये उपमानस्यानाहार्य्याभेदबुद्धिः अतिशयोक्तिरिति लक्षणम्; रूपके तु आहार्य्याभेद-प्रतीतिरित्यनयोर्भेदः। एवञ्च मुखादीनां चन्द्राभिन्नत्वेनोपस्थितौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रूपकं, चन्द्रत्वेनोपस्थितौ त्वतिशयोक्तिरिति निष्कर्षः। अन्ये च प्रस्तुतवस्तुनोऽत्युत्कर्षोक्तिरतिशयोक्तिरित्येवं लक्षणमाहुः। उक्तञ्चाग्निपुराणे,–''लोकसीमातिवृत्तस्य वस्तुधर्म्मस्य कीर्त्तनम्। भवेदतिशयो नाम सम्भवोऽसम्भवो द्विधा।।'' इति। अत्र लोकसीमातिवृत्तस्य वस्तुधर्म्मस्य इत्यनेन उत्प्रेक्ष्यधर्म्मत्वं बोध्यम्; तदुक्तं वामनेनापि, –''सम्भाव्यधर्म्मस्य तदुत्कर्षकल्पना-ऽतिशयोक्तिः'' (४ अधि० ३ य अ० १०सू०) इति। एवञ्च नवीनैरुक्तानां चतुर्विधानामेव भेदानां लोकसीमातिवर्त्तित्वेन लाभ इत्यवधेयं, तथाविधत्वेनैव तादृशोत्कर्षातिशयसम्भवात्। चतुर्विधत्वमुक्तञ्चास्याः प्रकाशकृता यथा,–''निगीर्य्याध्यवसानन्तु प्रकृतस्य परेण यत्। प्रस्तुतस्य यदन्यत्वं यद्यर्थोक्तौ च कल्पनम्।। कार्य्यकारणयोर्यश्च पौर्व्वापर्य्यविपर्य्ययः। विज्ञेयातिशयोक्तिः सा।।'' इति)।।२१४।।

प्रभा

अथ अतिशयोक्तिं लक्षयति–**विवक्षेति।** विशेषस्यै प्रस्तुतवस्तुगतस्य लोकसीमा लोकमर्यादा तां अतिवर्तते अलौकिकवर्णनेन अतिशेते सा अत्यद्भुतवर्णनानुगा इत्यर्थः। या विवक्षा विवक्षया वर्णनम्। हेतुहेतुमतोरभेदबुद्ध्या प्रयोगः असौ अतिशयोक्तिः। विवक्षाया लोकसीमातिवर्तित्वं च परंपरया विशेष्यस्यैव। तद्वर्णनेनैव चमत्कारस्योदयात्। एवं च प्रस्तुतस्य विशेषस्य अत्युत्कर्षस्य वर्णनं अतिशयोक्तिः। ननु एवं सति काव्यात्मभूतदशगुणान्तर्वर्तिकान्तिगुणस्य अस्यां असंभवः स्यात्। यतः स लौकिकार्थानतिक्रमत्वेन वर्णन एव भवति। तदुक्तं पूर्वं–कान्तं सर्वजगत्कान्तं लौकिकार्थानतिक्रमाद् इति। सत्यम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्य वार्ताभिधानेष्वेव नियमेन सद्भावे नियमनाद् अन्यत्र अतिशयोक्तौ तदभावेपि न दोषः। अपरं च इयमतिशयोक्तिर्विशेषो धर्मविशेस्तस्यैव आधिक्येन वर्णने भवति न तु धर्मिणः। कान्तिगुणस्तु लौकिकार्थानतिक्रमेण वर्णनं धर्मिण एवापेक्ष्यते इति उभयोर्विषयभेदः। अनयैव दिशा वक्ष्यमाणोदात्तालंकारस्यापि विषयभेदो बोद्धव्यः। अत्र प्रस्तुतोत्कर्षवर्णनं अप्रस्तुतेन अभेदाध्यवसानादिना ज्ञेयम्। असौ अतिशयोक्तिरलंकारेषु उत्तमा। यतः अलंकारो वैचित्र्याधीनः। तच्च वैचित्र्यं प्रायोतिशयवर्णनाधीनम्। अतः सर्वालंकारजीवितेश्वरी इयम् इति भावः। वामनः संभाव्यधर्मतदुत्कर्षकल्पनातिशयोक्तिरित्याह। उभौ यदि व्योम्नि इत्युदाहरति च। विस्तरस्तु तत एवाधिगन्तव्यः। प्रकाशकारस्तु–

निगीर्याध्यवसानं तु प्रकृतस्य परेण यत्।
प्रस्तुतस्य यदन्यत्वं यद्यर्थोक्तौ च कल्पनम्।।

कार्यकारणयोश्चैव पौर्वापर्यविपर्ययः।

विज्ञेयातिशयोक्तिः सा

इति चतुर्विधां भिन्नस्वरूपामेव अतिशयोक्तिं वर्णयति। अर्वाञ्चस्तु सर्वे तमेवानुसरन्ति।।२१४।।

विवृति

इति समासोक्तिचक्रम्।

अतिशयोक्तिलक्षणमाह–

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लोकसीमातिवर्तिविशेषो यत्र (वि)वक्ष्यते साऽतिशयोक्तिरलङ्कारेषु स्वभावाख्यानादिषूत्तमा। यथेत्यादिना तामुदाहरति।।

अतिशयोक्तिं लक्षयति–**विवक्षेति।** कस्यचित् पदार्थस्य गुणप्रकर्षविवक्षा लोकातिशायिनी अतिशयोक्तिः।।

अतिशयालङ्कारमाह–**विवक्षेति।** लावण्यादेः विशेषस्य लोकसीमातिलङ्घिनीं विवक्षाम् अतिशयोक्तिं विदुः।।२१४।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्तनयोर्जघनस्यापि मध्ये मध्यं प्रिये तव।
अस्ति नास्तीति सन्देहो न मेऽद्यापि निवर्तते॥२१५॥

रत्नश्री

प्रिये! तव स्तनयोः पयोधरद्वयस्य जघनस्यापि नितम्बस्य मध्ये स्थाने मध्यं मूर्त्तं देहावयवभूतमस्ति किं वा नास्तीत्युभयपक्षपाती सन्देहः संशयः। तत्परं चिरमारभ्य पश्यतो मे मम अद्यापि न निवर्तते। मध्यं तव नितम्बिनि इत्यपि पठ्यते। सुगमम्। तनीयसोऽपि तत्र मध्यस्य सूपलक्ष्यत्वात् संशयो जातु जायते तथाप्येवमतिभूमिमतिरोपितः कविना, यतः तद्विदः प्रमदमया जायन्ते। तदीदृशी संशयोक्तिरिति रमणीयेति॥

हृदयङ्गमा

अतिशयोक्तिमुदाहरति, मल्लिकेति। –अभिसारिकाः कान्तार्थिन्यः, ("कान्तार्थिनी तु या याति सङ्केतं साऽभिसारिका" इत्यमरः) मल्लिकानां माला मल्लिकामाला, तां बिभ्रतीति मल्लिकामालभारिण्यः, ("इष्टकेषीकामालानां चिततूलभारिषु" (६/३/६५ पा०) इति मालाशब्दस्य हस्वत्वम्) सर्वाङ्गीणं सर्वाङ्गव्याप्तम्, आर्द्रं चन्दनं यासां ताः, तथा क्षौमं पट्टवसनं विद्यते यासां ताः, परिहितश्वेतपट्टवसना इत्यर्थः, अत एव ज्योत्स्नायां न लक्ष्यन्ते। (अत्र ज्योत्स्नावर्णनस्य प्रस्तुतत्वात् तस्याः श्वेतत्वं मल्लिकामालादिकृतनायिकाश्वेतत्वाभिन्नतया वर्णनात् समधिकत्वेन प्रतीयते, अथवा तादृशरजन्याम् अभिसारिकाणाम-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लक्ष्यत्वासम्भवेऽपि अलक्ष्यत्वकथनात् प्रस्तुतायाः ज्योत्स्नायाः श्वेतत्वस्य सम्यगुत्कर्षः प्रतीयते)।।२१५।।

प्रभा

उदाहरणमाह–**मल्लिकेति।** मल्लिकानां माधवीपुष्पाणां माला ता बिभ्रति तच्छीला मल्लिकामालभारिण्यः। इष्टकेषिकामालानां चिततूलभारिषु इति मालाशब्दस्य ह्रस्वः। सर्वाङ्गं व्याप्नोतीति सर्वाङ्गीणम्। तत्सर्वादेः पथ्यङ्गकर्मपत्रपात्रं व्याप्नोति इति खः। सर्वाङ्गीणं आर्द्रं चन्दनं यासां ताः। क्षौमवत्यः सितदुकूलधारिण्योभिसारिकाः कान्ताभिसरणशीलाः। तदुक्तं दशरूपके–कामार्ताभिसरेत्कान्तं सारयेद्वाभिसारिका। इति। ज्योत्स्नायां न लक्ष्यन्ते स्फुटं न ज्ञायन्ते। अत्र प्रस्तुता ज्योत्स्ना तस्याः श्वेतत्वं मल्लिकादिश्वेताभिन्नतयाः वर्ण्यमानं समधिकं प्रतीयते। अथवा तादृशज्योत्स्नावत्यां रजन्यां तादृशनायिकाया अलक्ष्यत्वासंभवेपि तत्कथनात् प्रस्तुतज्योत्स्नाया उत्कर्षः प्रतीयते इति अतिशयोक्तिः। अत्र प्रकाशकारादयः मीलिताभिधमलंकार मन्यन्ते–

समेन लक्ष्मणा वस्तु वस्तुना यन्निगूह्यते।
निजेनागन्तुना वापि तन्मीलितमिति स्मृतम्।।

इति हि तल्लक्षणम्।।२१५।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विवृति

मल्लिकानां माला स्त्रक् तां बिभ्रतीति मल्लिकामालभारिण्यः इष्टकेषीकामालानां चिततूलभारिषु' इति ह्रस्वत्वम्। सर्वाङ्गीणमार्द्रं चन्दनं यासां ताः सर्वाङ्गीणार्द्रचन्दनाः। क्षौमं शुक्लं श्लक्ष्णं वस्त्रं यासामस्ति ताः क्षौमवत्यः न लक्ष्यन्ते ज्योत्स्नायां अभिसारिकाः पुंश्चल्यः।।

मल्लिकेति। मालाभारिण्यः इत्यत्र 'इष्टकेषीकामालानां चिततूलभारिषु' इति मालाशब्दस्य ह्रस्वः। अतिशयोक्तयः स्पष्टाः।।

उदाहरति **मल्लिकेति**।।२१५।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निर्णेतुं शक्यमस्तीति मध्यं तव नितम्बिनि।
अन्यथा नोपपद्येत पयोधरभरस्थितिः॥२१६॥

रत्नश्री

नितम्बिनि! तव मध्यं स्तनजघनयोरन्तरमस्तीति निर्णेतुं निश्चेतुं शक्यम् पार्यते। कथम्? पयोधरयोः पयोधरलक्षणस्य भरस्य स्थितेरवस्थानस्य तदाधारमध्यव्यतिरेकेण अन्यथा प्रकारान्तरेण अनुपपत्तेरयोगात्। पयोधरभरः तावत् अवतिष्ठमानोऽतिस्थूलत्वात् साक्षादपेक्षते [मध्यरूपमाश्रयम्। तत्र] मध्ये सन्देहः। तदप्ययमेव निश्चाययति। विना तेनानुप[पद्य]मानावस्थान[त्वात्] काममतिक्षामम् मध्यं तत्रापि [उन्नेयम्] एव। अत्र निश्चयो जगतः। नैवमन्यथानुपपत्तिमृते लभ्यतेः। तथापीयमतिगतिरीदृशी युक्ततया नीता कविनेति निश्चयातिशयोक्तिरीदृशी प्रीतिसर्वस्वं रसिकानामिति॥

हृदयङ्गमा

उक्तोदाहरणे लक्षणं योजयति, चन्द्रातपस्येति।—अत्र चन्द्रातपस्य ज्योत्स्नायाः, उत्कर्षवत्तया गुणाधिक्यप्रतिपादनार्थं, बाहुल्यं गाढ़त्वम्, उक्तम्; (ततश्च मल्लिकामालाधारणादि-विशेषणविशिष्टानामभिसारिकाणां ज्योत्स्नायां लक्ष्यत्वेऽप्यलक्ष्य-त्वप्रतिपादनेन प्रकृतायाः ज्योत्स्नायाः श्वेतिमोत्कर्षः प्रतीयत इति लक्षणसङ्गतिः)। अन्यानपि भेदान् प्रदर्शयितुमाह, संशयेत्यादि।—इदानीं संशयातिशयादीनां संशयेन सन्देहेन, अतिशयः उत्कर्षाधिक्यं यत्र तदादीनां संशयातिशयोक्ति-प्रभृतीनामित्यर्थः, (आदिना वक्ष्यमाणनिर्णयातिशयादीनां परिग्रहः)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्यक्तौ व्यक्तीकरणे, किञ्चित् भेदान्तरं, न तु बहुलमिति भावः, निदर्श्यते उदाह्रियते।।२१६।।

प्रभा

उदाहरणे लक्षणं योजयति–**चन्द्रातपस्येति** पूर्वोदाहरणे चन्द्रातपस्य ज्योत्स्नायाः श्वेतिम्नो बाहुल्यं वैपुल्यं उत्कर्षवत्तया मल्लिकादीनां श्वेतिम्नोभिन्नतया उक्तम्। तेन सा अतिशयोक्तिरिति शेषः। भेदान्तरं दर्शयति–**संशयेति।** संशयेन अतिशयः संशयातिशयः। संशयेन प्रस्तुतोत्कर्षवर्णनमित्यर्थः। आदिना निर्णयादीनां संग्रहः। व्यक्त्यै स्पष्टीकरणाय। किंचित्संक्षेपेण निदर्श्यते उदाह्रियते।।२१६।।

विवृति

कथमियमतिशयोक्तिरिति स्वयमाह–

चन्द्रातपस्य चनद्रतेजसो बाहुल्यं बहुलत्वं उक्तमुत्कर्षवत्। तथा संशयातिशयादीनां रूपं संशयातिशयोक्तिनिर्णयातिशय(योक्त्या)-दीनां रूपं व्यक्त्यै निर्दिश्य(दर्श्य)ते उदाह्रियते।।२१६।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अहो विशालं भूपाल! भुवनत्रितयोदरम्।
माति मातुमशक्योऽपि यशोराशिर्यदत्र ते॥२१७॥

रत्नश्री

भुवनानां स्वर्गादीनां त्रितयं त्रयोऽवयवा अस्येति तस्योदरं मध्यं विशालम् अतिविस्तीर्णम् अहो विस्मयनीयम्! कथम्? यत् यस्मात् भूपाल! तव यशसां राशिः कीर्तिसन्दोहो मातुं परिच्छेतुम् इयत्तया अशक्योऽपि अत्र भुवनत्रितयोदरे माति पर्याप्तः तिष्ठति नातिरिच्यते। तस्मात् अतिप्रकाण्डमिदमिदानीं प्रतीयते सयुक्तिकमेवम् अस्माभिः। लोकस्तु प्रसिद्ध[67b]मात्रमनुधावति। बहुगुणसंकीर्तनं यशः। तच्च क्वचित् किञ्चित्। यदपि सर्वत्र तदपि न तथा जगत्त्रये माति, यथा [य]त्किञ्चिन्मूर्त्त[व]स्तु क्वचिदवकाशे। तथाप्येवं विशालं यशो विवक्षितं यत् तन्मानाद् भुवनोदरं साध्यते इति यशोऽतिशयोक्तिरेवंविधा विदग्धेति॥

अतिंशयोक्तिप्रशं[सा]मुखेन निगमयन्नाह–

हृदयङ्गमा

संशयातिशयोक्तिमुदाहरति, स्तनयोरिति। –हे प्रिये। तव मध्यं स्तनयोः, विपुलयोरिति भावः, जघनस्यापि, विपुलस्येति भावः, मध्ये अस्ति वा नास्ति इति सन्देहः मे मम, अद्यापि अस्तीति ज्ञाने सत्यपीत्यर्थः, न निवर्त्तते। (अत्र मध्यस्याति कृशत्वेन संशयस्य कल्पना कविना कृता, तेन च तस्य कृशत्वातिशयः प्रतिपादितः, तथाविधसंशयस्य असम्बन्धत्वेऽपि कल्पनया तदुक्तेरियं संशयमूलातिशयोक्तिरिति ध्येयम्)॥२१७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रभा

उदाहरति–**स्तनयोरिति।** हे प्रिये तव स्तनयोः तुङ्गोन्नतकुचयोः। जघनस्य रथाङ्गसदृशविपुलस्य। मध्ये अन्तराले। मध्यं अवलग्नम् अस्ति नास्तीति में संदेहोद्यापि न निवर्तते। तस्यातिसूक्ष्मत्वादिति भावः। अत्र एतादृशसंशयस्य असंभवेपि तत्कल्पनान् मध्यकृशत्ववर्णनस्य अतिशयो भवति इति संशयातिशयोक्तिः।।२१७।।

विवृति

तत्र संशयातिशयोक्तिं तावदुदाहरति–

स्तनयोर्जघनस्यापि मध्ये उभयस्यान्तराले मध्यं हे नितम्बिनि किमस्त्युत नास्तीति सन्देहो न मेऽद्यापि निवर्तत इत्येषा संशयोक्तिः। मध्यस्य कृशत्वातिशयव्यावर्त(र्ण)नात्।।

स्तनयोरिति। अस्ति नास्तीति सन्देहास्पदत्वकथनेन प्रियायाः मध्यतानवस्य लोकसीमातिलङ्घित्वं विवक्षितम्। इति सन्देहमुखेन अतिशयकथनात् अयं संशयातिशयः।।२१७।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अलङ्कारान्तराणामप्याहुरेकं परायणम्।
वागीशमहितामुक्तिमिमामतिशयाह्वयाम्॥२१८॥

रत्नश्री

इमामनन्तरोक्तामुक्तिमतिशय इत्याह्वयः संज्ञा यस्या इत्यतिशयाह्वयामतिशयोक्तिमिति यावत्। वागीशानां कवीनामुत्कर्षयोगात्। महितां पूजितामत्यन्तवल्लभाम्। अलङ्काराणां शेषाणामलङ्काराणामपि न केवलं काव्यस्य धर्मिणः। अतिशये वापिशब्दः। परायणमाश्रयमेकं प्रधानमाहुः कथयन्ति कवयः। तथाहि स्वभावोक्तिरपि विशेषोक्त्यनुगामिनी शोभते या यथावस्थितवस्तुस्वरूपपरिदीपनी। अन्यथा कथञ्चिदपि अतिशयाशंसनेन तन्मात्रकथने निर्जीव[:] कीदृशः काव्यालङ्कारः? विशेषलक्षणत्वात्तस्य। किं पुनर्वक्रोक्तयस्तत्तद्विशेषरूपाः उपमारूपकादयः? तस्मादलङ्काराणामपीयमलंक्रियाऽतिशयोक्तिरिति सूक्तमेतत् अलङ्कारा[न्तरा]णामप्येकं परायणमिति। आदिशब्द[१.२१४]संगृहीताः अतिशयोक्तिविकल्पाः केचिदुदाह्रियन्ते–

परिरम्भेषु रम्भोरु! पयोधरपराकृतम्।

नास्ति मध्यं तवेत्येतत् विपर्यस्यति मे मनः॥

विपर्यासातिशयोक्तिः।

नीला नेत्रद्युतिः शुद्धा सुदत्या दन्तदीधितिः।

तस्याः संभिन्नयोर्दत्तो गङ्गायमुनयोः श्रियम्॥

उपमानुगतातिशयोक्तिः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मुखेन्दुहसितज्योत्स्नासङ्गतास्तव सुन्दरि।

निशाः प्रकाशमायान्ति निमग्नशशिमण्डलाः।।

रूपकानुगतातिशयोक्तिः।

नीलया तव लोलाक्षि! लोलया लोचनत्विषा।

आपूरिता दिशो भान्ति निशापरिगता इव।।

उत्प्रेक्षानुगतातिशयोक्तिः।

एवमन्येऽप्यतिशयोक्तिविकल्पा अनुगन्तव्या इति।।

।। इत्यतिशयोक्तिचक्रम् ।।

उत्प्रेक्षामालक्षयन्नाह–

हृदयङ्गमा

निर्णयातिशयोक्तिमुदाहरति, निर्णेतुमिति। –हे नितम्बिनि! तव मध्यम् अस्ति इति निर्णेतुं शक्यम्, अन्यथा पयोधरयोः स्तनयोः, भरस्य स्थितिः न उपपद्येत मध्यं नास्ति चेत् कथं पयोधरौ तदुपरि वर्त्तेताम्? (अत्र पयोधरयोर्निरवलम्बनस्थित्यनुपपत्तेः मध्यदेशस्य अस्तित्वनिर्णयासम्बन्धेऽपि तत्कल्पनेन अतिक्षीणत्वनिर्णयात् निर्णयातिशयोक्तिरियम्)।।२१८।।

प्रभा

निर्णयातिशयोक्तिमुदाहरति–**निर्णेतुमिति।** हे नितम्बिनि प्रशस्तनितम्बशालिनि। पयोधरभरस्य कुचविस्तारस्य स्थितिरवस्थानं तस्याः। अन्यथानुपपत्त्यैव विनाश्रयं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अवस्थानासंभवादेव। तव मध्यम् अलग्नम् अस्तीति निर्णेतुं शक्यम्। अत्र विसतृतपयोधराणां निरवलम्बनस्थिरत्यनुपपत्त्या मध्यकल्पनाया असंभवितत्वेन तत्कल्पना। तया च मध्यस्य कृशत्वं सविशेषं वर्णितं भवति इति अतिशयोक्तिरियम्।।२१८।।

विवृति

निर्णयातिशयोक्तिमुदाहरति–

कुतः पुनस्तयोर्जघनस्यापि मध्ये मध्यमस्तीति निर्णेतुं शक्यमित्यर्थापत्तिं प्रमाणमुपन्यस्यति–

यदि स्तनयोर्जघनस्य चान्तराले मध्यं न स्यात्तदा पयोधरभरस्यावस्थानमेव न स्यादित्यर्थापत्तेः प्रमाणं (णात्) मध्यास्तित्व(निर्णयात्) निर्णयातिशयोक्तिः।।

निर्णेतुमिति। वर्णनीयजघनादूर्ध्वं मध्यं नाम किञ्चिदस्तीति पयोधरस्थितिमूलया अर्थापत्त्या निर्णीयत इति लोकसीमातिगस्य मध्यतानवस्य विवाक्षितस्य निर्णयमुखेन अभिधानात् अयं निर्णयातिशयः।।२१८।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अन्यथैव स्थिता वृत्तिश्चेतनस्येतरस्य वा।
अन्यथोत्प्रेक्ष्यते यत्र तामुत्प्रेक्षां विदुर्यथा॥२१९॥

रत्नश्री

चेतनस्य सजीवस्य अचेतनस्य निर्जीवस्य वस्तुनः वृत्तिः अवस्था अन्यथैव विवक्षितप्रकारापेक्षया अन्येनैव रूपेण यथा भवति [तथा] स्थिता वर्तमाना सती यथावस्थानादन्येन प्रकारेण अन्यथा उत्प्रेक्ष्यते परिकल्प्यते [68a] यत्र उक्तौ तामेवंलक्षणामुत्प्रेक्षां विदुः विदन्ति कथयन्ति कवयः। उत्प्रेक्ष्यते अन्यथाक्रियते वस्तुस्थितिः अस्याम् अनया इति वा उत्प्रेक्षा। यथेत्युदाहरति॥

हृदयङ्गमा

आश्रयाधिक्ये अतिशयोक्तिं दर्शयति, अहो इति।–हे भूपाल! भुवनत्रितयोदरं त्रिभुवनाभोग इत्यर्थः, विशालम् अहो! इति आश्चर्य्यसूचकमव्ययम्; त्रिभुवनस्य विशालत्वमत्याश्चर्य्यमित्यर्थः, यत् यस्मात्, अत्र त्रिभुवनोदरे, मातुमशक्योऽपि ते यशोराशिः माति पर्य्याप्ततां गच्छति। (अत्र आश्रयस्य त्रिभुवनोदरस्य विशालत्वप्रतिपादनेन आश्रितस्य यशोराशेराधिक्यवर्णनात् आश्रयाधिक्यातिशयोक्तिः)॥२१९॥

प्रभा

आश्रयाधिक्ये अतिशयोक्तिं दर्शयति–**अहो इति।** हे भूपाल भुवनत्रितयोदरं भुवनत्रितयाभोगो विशालं विस्तृतः। अहो इति आश्चर्ये। कुत एवं विस्तृतमिति चेत्तद्दर्शयति–**मातीति।** यद्यस्माद्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत्र भुवनत्रितयोदरे मातुं निवेशयितुम् अशक्योपि ते यशोराशिर्माति साकल्येन प्रविष्टो भवति। अत्र आश्रयीभूतस्य त्रिभुवनोदरस्य विशालताप्रतिपादनेन तत्स्थस्य यशोराशेरपि आधिक्यद्योतनादाधिक्यातिशयोक्तिरियम्। नव्यास्तु–

महतो यन्महीयांसावाश्रिताश्रययोः क्रमात्।
आश्रयाश्रयिणौ स्यातां तनुत्वेप्यधिकं तु तत्।।

इत्यत्र अधिकालंकारं मन्यन्ते। विषयस्य निगरणपूर्वकं विषयिणोध्यवसानाच्चमत्कृतिविशेषेपि इमां अर्वाचीनाः स्वीकुर्वन्ति। यथा–

वापी कापि स्फुरति गगने तत्परं सूक्ष्मपद्या
सोपानालीमधिगतवती काञ्चनीमैन्द्रनीलीम्।
अग्रे शैलो सुकृतिसुगमौ चन्दनच्छन्नदेशौ
तत्रत्यानां सुलभममृतं संनिधानात् सुधांशोः।। इति।

अत्र वाप्यादिशब्दैर्नाभिप्रभृतयो निगीर्णाः। विशेषप्रपञ्चस्तु प्रकाशे कुवलयानन्दे च द्रष्टव्यः। विस्तरभयादस्माभिर्विरम्यते।।२१९।।

विवृति

अहो विशालमित्यादिका विस्मयातिशयोक्तिः यशोराशेर्मह(त्त्व) व्या(ख्या) पनात्।।

अहो इति। अत्र यशोराशेः अशक्यमानस्य अतिशयोक्त्या विशेषविवक्षया, तेन भुवनं आकीर्णमिति आशङ्क्यते। सोऽयं महत्त्वातिशय उच्यते।।२१९।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मध्यन्दिनार्कसन्तप्तः सरसीं गाहते गजः।
मन्ये मार्तण्डगृह्याणि पद्मान्युद्धर्तुमुत्सुकः॥२२०॥

रत्नश्री

मध्यन्दिने मध्याह्ने अर्कः मार्तण्डः अतिप्रचण्डः। तेन सन्तप्तः दग्धो गजः तत्प्रतीकारकाङ्क्षी सरसीं जलाशयं गाहते प्रविशति इति यथावस्थितेयं चेतनस्य गजलक्षणस्य वस्तुनो वृत्तिरुक्ता। सेयमन्यथा स्थितस्य अन्यथा उत्प्रेक्षा। मार्त्तण्डस्य येन सन्तप्तः [तस्य] गृह्याणि पक्षाणि तत्पादोपजीवित्वात् पद्मानि उद्धर्तुम् उन्मूलयितुम् उत्सुकः समीहते गजः। यतः साक्षादपकर्तुम् अशक्तौ तदाश्रितापकारद्वारेणापि स एव प्रत्यपकृतः स्यात्। कृतसंतापसंपर्कः सुतरा[म]र्क इति॥

तद् व्याचष्टे–

हृदयङ्गमा

अस्या अलङ्कारोत्तमत्वं दर्शयति, अलङ्कारेति।–वागीशमहितां वाक्पतिपूजिताम्, इमाम् अतिशयाह्वयाम् अतिशयाख्याम्, उक्तिम् अतिशयोक्तिमित्यर्थः, अलङ्कारान्तराणाम् अन्येषाम् अलङ्काराणाम् अपि, एकं परायणं परमाश्रयम्, आहुः, कवय इति शेषः, अस्या एव वैचित्रातिशयंमहिम्ना सर्वेषामलङ्काराणां प्रादुर्भावादिति भावः। (वैचित्रातिशयाभावे विद्यमानानामपि उपमादीनां नालङ्कारता, यथा,–गौरिव गवय इत्यादि। उक्तञ्च,– "कस्याप्यतिशयस्योक्तिरित्यन्वर्थविचारणात्। प्रायेणामी अलङ्कारा भिन्ना नातिशयोक्तितः॥" इति; ततश्च तत्तद्वैचित्रा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विशेषेणालङ्कारान्तरत्वं, वैचित्रान्तराभावे तु अतिशयोक्तिरिति ध्येयम्। प्रोक्तोदाहरणेषु च अलङ्कारान्तरसद्भावत्वं कथञ्चित् बोध्यम्। तथा हि "मल्लिकामालभारिण्यः" इत्यादौ सामान्यं, "स्तनयोर्जघनस्यापि" इत्यादौ सन्देहः, "निर्णेतुम्" इत्यादौ च निश्चयः, "अहो विशालम्" इत्यादौ च अधिकालङ्कारः, इति अन्यैरुक्ता अपि अङ्गी कार्य्याः)।।२२०।।

प्रभा

अतिशयोक्तिं प्रशंसन्नुपसंहरति–**अलंकारान्तराणामिति।** वागीशः वाचस्पतिस्तेन महितां पूजितां परमश्रेष्ठामिति भावः। अतिशयाह्वयां अतिशयोक्तिम्। इमां अलंकारान्तराणां न केवलं लोकसीमातिवर्तिनो विशेषस्य वर्णने एवेयम् मता। अपि तु विविधालंकाराणामपि। एकं परायणम् परमाश्रयम्। आहुः। तदुक्तं भामहेन–

इत्येवमादिरुदिता गुणातिशययोगतः।
सर्वैवातिशयोक्तिस्तु तर्कयेत् यथागमम्।।

सैषा सर्वैव वक्रोक्तिरनयार्थो विभाव्यते।
यत्नोस्यां कविना कार्यः कोलंकारोनया विना।। इति।

अलंकारो नाम शब्दार्थयोर्वैचित्र्यम्। तच्च अतिशयोक्त्यधीनम्। अतः सर्वालंकारेषु समान्यतोतिशयोक्तिर्वर्तत एव। परं तत्तद्वैचित्र्यवैशिष्ट्येन तत्तदलंकारव्यपदेशः। यत्र व्यपदेशो नास्ति तत्र सामान्यवैचित्र्यस्य सद्भावादतिशयोक्त्यलंकृतिरस्त्येव। एवं च अतिशयोक्तिः सर्वालंकारबीजभूता इति सिद्धान्तः। तदुक्तम्–

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कस्याप्यतिशयस्योक्तिरित्यन्वर्थविचारणात्।
प्रायेणामी अलंकारा भिन्ना नातिशयोक्तितः।। इति।

अलंकारान्तराणामपि इत्यत्र अपिशब्देन अतिशयोक्त्युदाहरणेषु अलंकारान्तराणा समुच्चयः सूचितः। तथा हि मल्लिका इत्यादौ सामान्यं स्तनयोर्जघनस्यापि इत्यादौ संदेहो निर्णेतुं शक्यमित्यादौ निश्चयः अहो विशालमित्यादौ अधिकम् एते अलंकारा अन्यैरुक्ता ज्ञातव्या इति प्रेमचन्द्रशर्माणः। परमत्र आचार्यदण्डिना असंगृहीतानां सामान्यनिश्चयाधिकाद्यलंकाराणां संग्राहकः अपिशब्दः कथं स्यादिति न जानीमः। अतोयमपिशब्दः सामान्यतः अलंकारान्तरसूचक इति भाति।।२२०।।

विवृति

अलङ्कारान्तराणामपि स्वभावाख्यानादीनामाहुरेकं परायणं वागीशेन महितामुक्तिमिमामतिशयाह्वयाम्। अतिशयोक्तियुक्त एव शोभां लभत इत्यतिशयोक्तिं सर्वोऽप्यलङ्कारोऽनुवर्तत इत्यर्थः।।

अलङ्कारेति। अलङ्कारान्तराणामपि एष उपकारी भवति। अतिशयजननत्वं (?) विना भूषणता न स्यादित्यभिप्रायः।।२२०।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्नातुं पातुं बिसान्यत्तुं करिणो जलगाहनम्।
तद्वैरनिष्क्रयायेति कविनोत्प्रेक्ष्य वर्ण्यते॥२२१॥

रत्नश्री

स्नातुममन्दबहिस्तापशान्तये। पातुम् उदकम्। बिसान्यत्तं मृणालानि कषयितुम् अन्तस्तप्तेः क्षुत्तर्षलक्षणायाः परिक्षयार्थम्। करिणो मध्यन्दिनार्कसन्तप्तस्य जले जलस्य वा गाहनं सरःप्रवेशो वर्तते। यथास्थितेयं वस्तुनश्चेतनस्य वृत्तिः कीर्त्तिता। तत् तादृशं जलगाहनं वैरस्य सूर्यसन्तापकारिण्यपकाराशयस्य निष्क्रयाय तत्पक्षपद्मोद्धरणद्वारेण प्रतिकरणार्थम् इति एवम् अन्यथोत्प्रेक्ष्य अध्यारोप्य वर्ण्यते कथ्यते कविना यथा रसावहं भवतीति॥

हृदयङ्गमा

अथोत्प्रेक्षां निरूपयति, अन्यथेति। –चेतनस्य इतरस्य अचेतनस्य वा, प्रस्तुतस्य इति भावः, अन्यथैव स्वाभाविकत्वेनैव, स्थिता वृत्तिः गुणक्रियादिवर्त्तनं यथावत्स्वरूपञ्च इत्यर्थः, यत्र वैचित्रो, अन्यथा अन्यप्रकारेण, अप्रस्तुतस्वरूपत्वेन इति यावत्, उत्प्रेक्ष्यते साम्यप्रतियोगिना सह सम्भावनाविषयीक्रियते, तामुत्प्रेक्षां विदुः तादृशवैचित्रारूपां सम्भावनामुत्प्रेक्षां जानन्ति इत्यर्थः। (उत् उत्कटा, प्र प्रकृष्टस्य उपमानस्य, ईक्षा ज्ञानं यत्र सा उत्प्रेक्षा इति उत्प्रेक्षापदस्य व्युत्पत्त्याऽपि सम्भावनम् इत्यर्थ एव लभ्यते, सम्भावनञ्च साधारणधर्मदर्शननिमित्तकं प्रकृतविशेष्यकं तादात्मासंसर्गात्मकमप्रकृतप्रकारकं निश्चयानात्मकं ज्ञानम्, इत्थञ्च उपमेये उत्कटोपमानकोटिकः संशय उत्प्रेक्षेति लक्षणम्। संशये हि विषयद्वयस्य समकक्षत्वम्, इह तु न तथा इत्यनयोर्भेदः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उपमायामुपमानत्वमुपमेयत्वञ्च तत्त्वेन लोकप्रसिद्धम्, इह तु उपमानतावच्छेदकविशिष्टमुपमानमप्रसिद्धमिति द्वयोर्भेदः। तदुक्तं चक्रवर्त्तिना, –"यदायमुपमानांशो लोकतः सिद्धिमृच्छति। तदोपमैव येनेवशब्दः सादृश्यवाचकः।। यदा पुनरयं लोकादसिद्धः कविकल्पितः। तदोत्प्रेक्षैव येनेवशब्दः सम्भावनापरः।।" इति। एतेन प्रस्तुतवस्तुनोऽप्रस्तुतरूपत्वेन सम्भावनमुत्प्रेक्षेति सर्वालङ्कारिकानुमोदितः पन्थाः। उक्तञ्च प्रकाशकारेण, –"सम्भावनमथोत्प्रेक्षा" इति। तच्च प्रस्तुतस्य निगरणेन भवति, निगरणञ्च क्वचित् प्रस्तुतस्य अनुपादानं क्वचिदुपात्तस्यापि अधः करणम्। यथा,–"विषयस्यानुपादानेऽप्युपादानेऽपि सूरयः। अधःकरणमात्रेण निगीर्णत्वं प्रचक्षते।।" इति। दर्पणकारस्तु, –"भवेत् सम्भावनोत्प्रेक्षा प्रकृतस्य परात्मना। वाच्या प्रतीयमाना सा" इति लक्षणं कृत्वा जातिक्रियागुणद्रव्यगततया चास्या विविधभेदानाह। "यत्र" इत्यत्र "यत्तु" इति पाठे, –क्रियाविशेषणम्; यत् उत्प्रेक्षणमित्यर्थः, भावसाधनोऽयं प्रयोगः इत्यभिप्रायः)।।२२१।।

प्रभा

अथ उत्प्रेक्षां लक्षयति–**अन्यथैवेति।** चेतनस्य अथवा इतरस्य अचेतनस्य प्रसतुतस्य। अन्यथैव अन्येनैव प्रकारेण उत्प्रेक्ष्यमाणप्रकारादन्यप्रकारेण स्वाभाविकत्वेन। स्थिता वृत्तिः विद्यमाना गुणक्रियास्वरूपा वृत्तिर्यत्र वैचित्र्ये अन्यथा अन्यस्वरूपेण वास्तवरूपमपहाय अप्रस्तुतस्वरूपेण उत्प्रेक्ष्यते संभाव्यते तां उत्प्रेक्षां विदुः। उत्कटा प्रकृष्टा प्रस्तुतस्य ईक्षा उत्प्रेक्षा इति योगार्थः। उक्तं हि प्रकाशे–संभावनमथोत्प्रेक्षा प्रकृतस्य समेन यत् (१०.१३७)। इति। उत्कटैककोटिकः संशयः संभावनम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अप्रस्तुतकोटेरुत्कटत्वं च प्रस्तुतकोटिनिगरणेन। निगरणं हि क्वचित् प्रस्तुतस्यानुपादानेन क्वचिच्च तस्य तिरस्करणेन। तदुक्तम्–

विषयस्यानुपादानेप्युपादानेपि सूरयः।
अधःकरणमात्रेण निगीर्णत्वं प्रचक्षते।। इति।

अत्र आहार्यसंभावनमपेक्ष्यते तेन–

रांम स्त्रिग्धघनश्यामं विलोक्य वनमण्डले।
प्रायो धाराधरोयं स्यादिति नृत्यन्ति केकिनः।

इत्यादौ नोत्प्रेक्षा। रूपके निश्चयेनावधारणात् संभावना नास्ति। अतो न तत्रोत्प्रेक्षा। संदेहे समकोटिकः संशयो वर्तते। अत्र तु अप्रस्तुतकोटिक इति ततो भेदः। अत्र अलंकारसामान्यं वैचित्र्यमपेक्ष्यत एव। तेन नूनं अनेन स्थाणुना भाव्यम् इत्यत्र नायमलंकारः। यत्र उत्प्रेक्षाकारणं न विन्यस्यते तत्र सत्यामपि संभावनायामुत्प्रेक्षां न मन्यन्ते। यथा–लोकोत्तरप्रभावं त्वां मन्ये नारायणं परम् इति। अत्र लोकोत्तरप्रभावस्य नारायणत्वव्याप्यताया असंभवः। अनेन प्रायो नरायणेन भवितव्यम् इति केवलसंभावनायां नामलंकारो भवति। इयं च उत्प्रेक्षा मन्ये शङ्के इत्यादिबोधकपदानां सद्भावे वाच्या। अन्यथा व्यङ्ग्या इति बोध्यम्। इयं च अर्वाचीनैर्बहुप्रकारत्वेन वर्णिता। परं गौरवभयादस्माभिस्ततो विरम्यते।।२२१।।

विवृति

इत्यतिशयोक्तिचक्रम्।।

उत्प्रेक्षालक्षणमाह–

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अन्येनैव प्रकारेणान्यथा (ण स्थिता) वृत्तिर्वर्तनं प्रवृत्तिः स्वभावो वा चेतनस्य आत्माधिष्ठितस्य बुद्ध्याद्याचा(धा)रस्या-चेतनस्य वा तद्विपरीतस्य वस्तुनः अन्येनैव प्रकारेणान्यथा (स्थिता) यत्रोत्प्रेक्ष्यते विकल्प्यतें तमुत्प्रेक्षालङ्कारं प्रचक्षते। यथेत्यादिना तमुदाहरति।।

उत्प्रेक्षां लक्षयति–**अन्यथैवेति।** चेतनस्य अचेतनस्य वा प्रकारान्तरेण जाता वृत्तिः प्रकारान्तरेण यत्कविना कथ्यते सा उत्प्रेक्षा।।

उत्प्रेक्षालङ्कारमाह–**अन्यथैवेति।** इतरस्य अचेतनस्य; अन्यथा पूर्वावस्थावैपरीत्येन। स्वप्रतिभासो यत्र वस्तुनि स्वाभाविकत्वेन आरोप्यते सा उत्प्रेक्षा।।२२१।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कर्णस्य भूषणमिदं ममायतिनिरोधिनः।
इति कर्णोत्पलं प्रायस्तव दृष्ट्या विलङ्घ्यते॥२२२॥

रत्नश्री

आयताक्षि! तव दृष्ट्या लोललोचनेन कर्णोपान्तपातिन्या विजृम्भमाणकान्तिद्वारेण कर्णोत्पलं श्रवणावतंसकुवलयं विलङ्घ्यते तिरस्क्रियते, तत्कान्त्या लङ्घनसम्भावनया तथेत्युक्तम्। यद् वक्ष्यति। दृष्टेरंशुभिः स्पृश्येत न वेति [२.२२३]। किमित्येवं क्रियते? ममायतिः विजृम्भणं तत्प्रसरं निरुन्धानस्य विघ्नयतः कर्णस्यापकारिणो भूषणं शोभाकरमिदमुत्पलं तन्मया लङ्घनीयम् इति कृत्वा। प्रायःशब्द इत्युत्प्रेक्षां सूचयति। अत्राचेतनस्य नयनांशुलक्षणस्य वस्तुनोऽन्यथास्थिता वृत्तिरन्यथोत्प्रेक्ष्य वर्ण्यत इति॥

नन्वत्र न तव दृष्ट्या कर्णोत्पलं स्पृश्यते नापि तत्कान्त्या, तथाप्यदर्शनात्। तत्कथमुत्प्रेक्ष्यते? पूर्वत्र तु तथा जलगाहनदर्शनात् [68b]तादृगुत्प्रेक्षा सम्भवति। इह तु न किञ्चिद् बीजं तथोत्प्रेक्षायाः, सर्वथा दृष्टिकर्णोत्पलयोः संसर्गाभावादित्याह–

हृदयङ्गमा

चेतनागतामुत्प्रेक्षामुदाहरति, मध्यन्दिनेति।–मध्यन्दिनार्केण मध्यान्हसूर्य्येण, सन्तप्तः गजः सरसीं गाहते अवतरति। अत्रोत्प्रेक्ष्यते, मन्ये इति।–मार्त्तण्डगृह्याणि सूर्य्यपक्षान्, पद्मानि उद्धर्त्तुम् उन्मूलयितुम्, उद्यतः इति मन्ये सम्भावयामीत्यर्थः। (अत्र सन्तप्तस्य चेतनस्य गजस्य स्नानपानाद्यर्थकतया स्थितं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सरोऽवगाहनं सूर्य्यपक्षपद्मोद्धरणार्थत्वेनोत्प्रेक्षितम्; मन्ये इति पदमुत्प्रेक्षाव्यञ्जकम्। कैश्चित्तु सन्तापकप्रतीकाराक्षमेण गजेन तत्पक्षस्योद्धरणात् अत्र प्रत्यनीकालङ्कारश्च। तदुक्तं, –"प्रत्यनीकमशक्तेन प्रतीकारे रिपोर्यदि। तदीयस्य तिरस्कारस्तस्यैवोत्कर्षसाधकः।।" इति, तदनयोः सङ्कर इति उक्तं, तन्न मनोरमं, तत्पक्षोद्धरणस्य सम्भावनामात्रविषयत्वेन अतात्त्विकत्वात्, तदुत्कर्षसाधकत्वाविवक्षणाच्च)।।२२२।।

प्रभा

सामान्यलक्षणे चेतनस्येतरस्य वा इत्युक्तम्। तत्र चेतनगतां उत्प्रेक्षामुदाहरति–**मध्यंदिनेति।** दिनस्य मध्यं मध्यंदिनं तत्संबन्धी योर्कस्तेन संतप्तो मध्याह्नसूर्यकिरणसंत्रस्त इति यावत्। गजः सरसीं गाहते अवतरति। स मार्तण्डगृह्याणि सूर्यपक्षाश्रितानि। पदास्वैरिबाह्यापक्षेषु च इति ग्रहेः क्यप्। पद्मानि उद्धर्तुं उन्मूलयितुम्। उद्यतः संनद्ध इति मन्ये शङ्के। अत्र सचेतनस्य गजस्य स्नानपानाद्यर्थं सरोवतरणं सूर्यवैरनिर्यातनार्थमिति कविना संभाव्यते। अत उत्प्रेक्षा। अत्र केचित् प्रत्यनीकालंकारमुद्भाव्य संकरं ब्रुवते। प्रत्यनीकालंकारलक्षणं तु–

प्रत्यनीकमशक्तेन प्रतीकारे रिपोर्यदि।
तदीयस्य तिरस्कारस्तस्यैवोत्कर्षसाधकः।। इति।

परं नैतत् समञ्जसम्। आचार्यदण्डिना तस्यास्वीकारात्। अपरं च तत्र कविना तत्पक्षोद्धरणस्य संभावनामात्रेण कल्पितत्वेन प्रतीकारस्य तात्त्विकवर्णनं कवेर्नाभिप्रेतम्। यत्र तु तत्पक्षापकारो वास्तवः कवेरभिप्रेतस्तत्रैव सोलंकार इति विचार्यम्।।२२२।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विवृति

मध्याह्नसमयवर्तिभास्करस्तेन(रतेजः)सन्तप्त(प्तो) गजः सरसीं गाहत इति स्थिता वृत्तिः। तां वृत्तिमन्यथा कश्चित् कविरुत्प्रेक्षते–

मन्ये मार्ताण्डगृह्याणि रविपक्षपात(भाञ्जि)-पद्मान्युद्धर्तुमुन्मूलयितुमुत्सुको गज इति। येनादित्येन अहं तापितः तस्योदये यानि विकसन्ति तदस्तमये च निमीलन्ति तानि तावदुन्मीला(न्मूलया)मीति–निरसितुमिच्छोर्ये तदीयाश्रयेण श्रियमधिगतवन्तः तेऽपि हन्तव्यपक्षे–हत्यहं मन्ये ।।२२२।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अपाङ्गभागपातिन्या दृष्टेरंशुभिरुत्पलम्।
स्पृश्येत वा न वैवं तु कविनोत्प्रेक्ष्य कथ्यते।।२२३।।

रत्नश्री

अपाङ्गभागः लोचनोपान्तदेशः तत्र पतन्त्या अवलोकयन्त्या दृष्टेरंशुभिः किरणैः उत्पलं श्रुतिवतंसं स्पृश्येत संसृज्येत। कस्याश्चिदुत्पलं स्पृश्यते। नापि तत्कान्त्या तथाप्यदर्शनात्। तत्कथमेवमुत्प्रेक्ष्यते? पूर्वत्र तु तथा जलगाहनदर्शनात् तादृगुत्प्रेक्षासम्भावना। अङ्गनायाः सम्भाव्यमेतत्। अथ कथञ्चित् नेति निर्बन्धः, तदा न वा स्पृश्येत। नात्रास्माकमभिनिवेशः। कथं तर्हि तथौत्प्रेक्ष्यत इत्याह—एवं त्वित्यादि। तुशब्दोऽर्थान्तरविवक्षायाम्। एवमतिशयोक्त्या नयनांशुभिः स्पर्शं कर्णोत्पलसिद्धं कृत्वा अर्थान्तरं यथोक्तमुत्प्रेक्ष्यमनिमित्तं परिकल्प्य कविना कथ्यते प्रयुज्यते। ततश्चातिशयोक्तिप्रभावितेयमुत्प्रेक्षा कल्प्यते। अत एवोक्तम्—

अलङ्कारान्तराणामप्याहुरेकं परायणम्।

वागीशमहितामुक्तिमिमामतिशयाह्वयाम्।। इति।।

[२.२१८]

हृदयङ्गमा

लक्षणं घटयति, स्त्रातुमिति। —करिणः स्नातुं, पातुं, विसानि च अत्तुं भक्षयितुं, जलगाहनं कविना तस्य वैरनिष्क्रयाय इति उक्तरूपम्, उत्प्रेक्ष्य सम्भाव्य, वर्ण्यते।।२२३।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रभा

उदाहरणे उत्प्रेक्षां योजयति–**स्नातुमिति।** स्नातुं पातुं बिसानि अत्तुम्। सर्वत्र तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम् इति तुमुन्। स्नानाय पानाय बिसभक्षणाय करिणो जलगाहनं जलावगाहः। तस्य सूर्यस्य यद्वैरं तस्य निष्क्रियाय निर्यातनाय कविना उत्प्रेक्ष्य संभाव्य वर्ण्यते। अयमत्राशयः। अस्मिन्द्ये गजस्य स्नानपानाद्यर्थमवतरणं कविना सूर्यपक्षीयपद्मोद्धरणाय संभावितम्। तत्कारणं मध्यंदिनार्कसंतापः सोपि उपन्यस्तः। उत्प्रेक्षावाचको मन्ये इति शब्दः प्रयुक्तः। उत्प्रेक्षाविषयश्च सरोवगाहनं तदपि वर्णितम्। इति संपूर्णा उत्प्रेक्षासामग्री वर्तते।।२२३।।

विवृति

स्वयं व्याचष्टे–

गजः सरसीं गाहते स्नातुं पातुं पयः बिसानि पद्मदलाङ्कुरा(णि) अत्तुं नान्यथेति। कविना पुनरियं गजस्य स्थिता वृत्तिः अन्यथोत्प्रेक्ष्यते। तद्वैरनिष्क्रियाय तेन तापकारिणा सह यद्वैरं दो(द्वे)षस्तं नि(स्तन्नि)ष्क्रयायेयुत्प्रेक्षणादुत्प्रेक्षा।।

मध्यन्दिनेत्यादिना उत्प्रेक्षितविषयस्य उत्प्रेक्षात्वं दर्शयति–**स्त्रातुमिति।।**

उदाहरणमाह–**मध्यन्दिनेति।** पूर्वस्य व्याख्या उत्तरश्लोकः। इदं चेतनोदाहरणम्।।२२३।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः।
इतीदमपि भूयिष्ठमुत्प्रेक्षालक्षणान्वितम्॥२२४॥

रत्नश्री

तमः कर्तृ अङ्गानि वपूंषि लिम्पतीव, यथा कश्चिच्चन्दनादिना लिम्पति। नभः कर्तृ अञ्जनं वर्षतीव यथा देवो जलं वर्षति। इत्येवंरूपमिदमपि लक्ष्यं न केवलं पूर्वोक्तम्। उत्प्रेक्षाया लक्षणेन अन्यस्थिताया वस्तुवृत्तेरन्यथापरिकल्पनरूपेण अन्वितम् उपेतम् भूयिष्ठमत्यर्थम्। उत्प्रेक्षैव इयं न उपमा इति यावत्॥

अन्ये तूपमात्मतां मन्यन्ते इत्युद्भाव्य निराकुर्वन्नाह–

हृदयङ्गमा

अचेतनगतामुत्प्रेक्षामुदाहरति, कर्णस्येत्यादि।–इदं कर्णोत्पलं, मम आयतिः दैर्घ्यं, तस्य विरोधिनः बाधकस्य, कर्णस्य भूषणम्, इति अस्माद्धेतोः, तव दृष्ट्या विलङ्घ्यते प्रायः निजांशुभिः ताड्यते इव, प्राय इति उत्प्रेक्षाव्यञ्जकम्॥२२४॥

प्रभा

अचेतनगतामुत्प्रेक्षामुदाहरति–**कर्णस्येति।** इदं कर्णोत्पलं मम नेत्रस्य आयतिः विस्तारस्तस्य विरोधिनः प्रतिरोधकस्य। कर्णस्य भूषणं इति हेतोः। कर्णोत्पलं तव दृष्ट्या त्वन्नयनेन। विलङ्घ्यते स्वतेजसा अतिशय्यते। अत्र प्रायः–पदम् उत्प्रेक्षावाचकम्। आकर्णायताया दृष्टेः सौन्दर्यप्रभाभिः कमलव्यापनं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वविरोधिकर्णभूषणस्य उत्सारणे कल्पितमिति उत्प्रेक्षा। विरोधकारिणं स्वायतिविरोधकारिणमिति ज्ञेयम्।।२२४।।

विवृति

इति चेतनस्य गजस्यान्यथा स्थितां वृत्तिमन्यथोदाहृत्याचेतन-स्योदाहरति–

कर्णस्य भूषणमिदं नीलोत्पलमवतंसीकृतम्। कथंभूतस्येत्याह– मदायतिविरोधिनः ममायतिरायामो दैर्ध्यं आज्ञा च मदायतिस्तां निरुणद्धीत्येवंशीलं भदायतिनिरोधि तस्य। इति कर्णोत्पलं प्रायस्तव दृष्ट्या विलोचनेन विलंध्यते अतिक्रम्यते(ऽ)हि(भि)भूयते।।२२४।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

केषाञ्चिदुपमाभ्रान्तिरिवश्रुत्येह जन्यते।
नोपमानं तिङन्तेनेतित्यक्रम्याप्तभाषितम्॥२२५॥

रत्नश्री

केषाञ्चिद् वादिनामिहोत्प्रेक्षायामुपमा इयमिति उपमाभ्रान्ति[:] विपर्यासो जन्यते। इवश्रुत्या इवशब्देन। इवशब्दोऽयमुपमासूचक इह उच्यते। तस्मादियमुपमेति भ्राम्यन्ति केचित्। इयं च कल्पना तावदागमविरुद्धेत्याह,-नेत्यादि। तिङन्तेन आख्यातेन क्रियाप्रधानेन सह कस्यचित् उपमानं सादृश्यप्रतीतिर्नास्तीति यदाप्तानां यथा[र्थ]दर्शिना[२]भाषितं वचनम् आगमः तल्लक्षणत्वादागमस्य। आप्तो[प]देशः प्रमाणमागम इति। तदतिक्रम्याप्रमाणीकृत्य इवशब्ददर्शनात् तैराप्तवचनमतिक्रान्त-मुपमेति च भ्रान्तमिति। इवशब्दस्य आप्तवचनातिक्रमं भ्रान्तिजननं [69a] च प्रति कर्तृत्वं विवक्षितमिति॥

नन्वाप्तवचनं न्यायसंवादि प्रमाणम्। न पुनराप्तभाषितमिति विभीषिकामात्रेण। न चात्र काचिद् युक्तिः। केवलं श्रद्धामात्रमिति। युक्तिसंवादितामाप्तवादस्य दर्शयन्नाह

हृदयङ्गमा

लक्षणं सङ्गमयति, अपाङ्गेति। –अपाङ्गभागपातिन्याः आकर्णायतायाः, दृष्टेः अंशुभिः उत्पलं कर्णोत्पलं, स्पृश्यते वा न वा न स्पृश्यते इत्यर्थः, इत्येवम् असन्नपि विषयश्चमत्कारजनकत्वेन, कविना उत्प्रेक्ष्य सम्भाव्य, वर्ण्यते। (अत्र अचेतनस्य प्रस्तुतस्य विषयस्य उत्प्रेक्षणादचेतनगतत्वं, पूर्वत्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विषयस्य चेतनत्वेन चेतनगतत्वम् इति भेदद्वयं बोध्यम्। नवीनैरुक्ता गुणक्रियादिभेदाश्च सम्भवन्ति, तथा हि मध्यन्दिनेत्यादि-प्रागुक्तोदाहरणे अवगाहनक्रियायाः सूर्य्यपक्षीयपद्मोद्धरण-त्वेनोत्प्रेक्षणात् क्रियागतोत्प्रेक्षा, इह तु सपर्शाख्यगुणस्य कर्णोत्पलोत्सारणत्वेन इति गुणगतत्वम्। द्रव्योत्प्रेक्षाया उदाहरणं यथा,–"पातालमेतन्नयनोत्सवेन विलोक्य शून्यं शशलाञ्छनेन। इहाङ्गनाभिः स्वमुखछलेन कृताऽम्बरे चन्द्रमयीव सृष्टिः।।" अत्र हि एकवस्तुवाचिनः द्रव्यस्य चन्द्रस्य स्वरूपेणोत्प्रेक्षणम् इति द्रव्यगतत्वम्। जात्युत्प्रेक्षायाः उदाहरणं यथा, –"ऊरुः कुरङ्गकदृशश्चञ्चलचेलाञ्चलो भाति। सपताकः कनकमयो विजयस्तम्भः स्मरस्येव।।" इति। अत्र विजयस्तम्भस्य बहुवाचकत्वात् जात्युत्प्रेक्षा। तथा उत्प्रेक्षाद्योतकेवादि-प्रयोगाभावेऽपि क्वचित् प्रतीयमानोत्प्रेक्षा भवतीत्युक्तं दर्पणकारेण, उदाहृतञ्च तेनैव यथा,–"तन्वङ्ग्याः स्तनयुग्मेन मुखं न प्रकटीकृतम्। ङ्गाराय गुणिने स्थानं न दत्तमिति लज्जया।।" इति। अत्र स्तनयोरचेतनत्वेन लज्जाया असम्भवात् लज्जयेवेत्युत्प्रेक्षा)।।२२५।।

प्रभा

उदाहरणं व्याख्याति–**अपाङ्गेति।** अपाङ्गभागपातिन्याः नेत्रप्रान्तगामिन्या दृष्टेः चक्षुषः। अंशुभिः नीलकिरणैः। उत्पलं कर्णनीलोत्पलम्। स्पृश्यते वा न वा स्पृष्टं भवेन्न वा। कर्णस्य विदूरत्वाद् दृष्टेश्च नेत्रप्रान्तगामित्वादिति दृष्टिकिरणसंपर्कोसंभवी अपि कविना केवलं स्वकल्पनया तद्विषयत्वेन स्थिरीकृत्य चमत्कारप्रतिपिपादयिषया उत्प्रेक्षितः। पूर्वश्लोके चेतनस्य क्रिया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उत्प्रेक्षाविषयीकृता अत्र तु अचेतनस्य गुणः उत्प्रेक्षाविषयीकृतः। प्रस्तुतस्वरूपस्य विषयत्वं यथा–

बालेन्दुवक्राण्यविकासभावाद्बभुः पलाशान्यतिलोहितानि।
सद्यो वसन्तेन समागतानां नखक्षतानीव वनस्थलीनाम्।।

अत्र पलाशकुमुमानां वक्रलोहितत्वेन संबन्धेन निमित्तेन सद्यः कृतनखक्षततादात्म्यसंभावना उक्तविषया स्वरूपोत्प्रेक्षा। इवादीनामप्रयोगे गम्योत्प्रेक्षा यथा–त्वत् कीर्तिर्भ्रमणश्रान्ता विवेश स्वर्गनिम्नगामिति। विस्तरस्तु दर्पणादौ द्रष्टव्यः।।२२५।।

विवृति

स्वयमेतव्द्याचष्टे–

कर्णावतंसतामुपनीतं च (उत्प) लं दृष्टर्लोचनस्य किरणैः स्पृश्यते वा न वा स्पृश्यते। कविना पुनरित्थमुत्प्रेक्ष्य कथ्यते। इति सुबोधम्।।

अचेतनोदाहरणमाह–**कर्णस्येति**। आयतिः वृद्धिः। अस्योत्प्रेक्षालक्षणोपेतत्वं दर्शयति–**अपाङ्गेति**।।२२५।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उपमानोपमेयत्वं तुल्यधर्मव्यपेक्षया।
लिम्पतेस्तमसश्चासौ धर्मः को नु समीक्ष्यते॥२२६॥

रत्नश्री

इदं तावदविवादास्पदमुपमानत्वं कस्यचिदुपमेयत्वं चा[न्यस्य] वस्तुनः तयोर्द्वयोस्तुल्यः साधारणो यो धर्मः क्रियालक्षणो गुणरूपो वा तस्य व्यपेक्षया समाश्रयेण हेतुना भवेत्, नान्यथा। यथेन्दुवदनयोः कान्त्यादितुल्यधर्मपरिग्रहेण। सा चेयं नीतिरिह नास्तीत्याह-लिम्पतेरिति लिम्पतिरिह त्रिधैव सम्भवति, शब्दात्मकः क्रियास्वभावः कर्तृरूपश्चेति। शब्दस्तावन्नोपमानं तमसः, तयोस्तुल्यधर्मादर्शनात्। न हि लिम्पतिशब्दस्य तमसश्च क्रियारूपो गुणलक्षणो वा कश्चित् तुल्यो धर्मः प्रतिभाति, येनोपमानापमेयभावः स्यात् चन्द्रमुखयोरिव। ततः क्रियारूपो लिम्पतिरुपमानं भवतु। तस्यापि तमसा तुल्यो न कश्चिद् धर्मोऽस्ति येनोपमा स्यादिति पश्यन् पृच्छति-लिम्पतेरुपमानस्य तमसश्चोपमेयस्य असौ तुल्यो धर्मः गुणः कः कीदृशः समीक्ष्यते दृश्यते? न कश्चिन्निरूप्यमाणस्तादृशो धर्मो लभ्यत इत्यर्थः। नु इति वितर्के, अनुसमीक्ष्यत इति वैकं पदम्॥

अत्र पराभिप्रायमाशङ्कते-

हृदयङ्गमा

लिम्पतीति।-श्लोकार्द्धमिदम्, "असत्पुरुषसेवेव दृष्टिर्विफलतां गता" इत्यपरार्द्धं मृच्छकटिके वर्षावर्णनप्रकरणोक्तम्। तमः अन्धकारम्, अङ्गानि शरीराणि, लिम्पतीव, नभः आकाशम्,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अञ्जनं वर्षतीव। इतीदमपि पद्यार्द्धं, भूयिष्ठं सम्यक्, उत्प्रेक्षाया लक्षणेन अन्वितं युक्तम्। (अत्र अचेतनस्य तमसः व्यापनरूपो धर्मः लेपनत्वेन, तथा तादृशस्य तमसः सम्पातरूपो धर्मो नभः कर्त्तृकाञ्जनवर्षणरूपत्वेन सम्भावित इति उभयत्रैव विषयस्यानुपादानम्)।।२२६।।

प्रभा

मन्ये शङ्के ध्रुवं प्रायः इत्यादयः शब्दा उत्प्रेक्षावाचकाः। इवशब्द उपमावाचकः। अतस्तत्प्रयोगे सर्वत्र उपमैव। तथैव उपमेय एव उपमानस्य उत्कटकोटिकसंशये उत्प्रेक्षा इत्युभयमपि पक्षं दुदूषयिषुराह—**लिम्पतीति।** वर्षाकालीनकृष्णपक्षीयनिशामुख-वर्णनमेतत्। तमः अङ्गानि लिम्पतीव। नभः अञ्जनं कज्जलम् वर्षतीव। इतीदमपि एतत् प्राचीनपद्यार्धम् भूयिष्ठं वैपुल्येन उत्प्रेक्षाया लक्षणेन अन्वितं युक्तम्। अत्र अचेतनस्य तमसो व्यापनरूपो धर्मो लेपनेन संभावितः। तथा तस्यैव तमसोंधः प्रसरणरूपो धर्मो नभः कर्तृकाञ्चजनवर्षणसंभावितः। उभयत्रापि विषयस्य व्यापनाधः प्रसरणरूपस्य अनुपादानं समानम्। इयांस्तु भेदः। प्रथमोदाहरणे तमः कर्तृकाङ्गव्यापनं स्वतः संभवि। द्वितीये नभः कर्तृकाञ्जनकर्मकाधः प्रसरणं कविकल्पितम्। इवशब्दः—दूरे वसन् देवदत्त इव भाति अयम् इत्यादौ संभावनायां प्रसिद्धः। तथा च इयमुत्प्रेक्षैव नोपमा। अत्र प्राचीनाः—लिम्पतिपदेन गौरयमितिवत् साध्यवसानलक्षणया उपमेयभूतं व्यापनं उपस्थितं भवति। एवं वर्षतिपदेन उपमेयभूताधः प्रसरणमिति। तच्च व्यापनमधः प्रसरणं च मलिनीकरणादिसादृश्यनिमित्तेन लेपनवर्षणरूपेण संभावितम् इति उपात्तविषया क्रियास्वरूपोत्प्रेक्षा।। परे तु तमसो व्यापनरूपो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विषयो लेपनत्वेन संभावितोधः प्रसरणविषयश्च नभः कर्तृकवर्षणेन इति उभयत्रापि विषयस्य अनुपादानमेव। तथा चेयं अनुपादानविषया स्वरूपोत्प्रेक्षा। उभयमतेपि उपमानेन उपमेयस्य संभावनं उत्प्रेक्षा इति सादृश्यमूलिकोत्प्रेक्षा इति निश्चयः। तथा च एते

वदनकमलेन बाले स्मितसुषमालेशमावहसि यदा।
जगदिह तदैव जाने दशार्धबाणेन विजितमिति।।

इत्यत्र उत्प्रेक्षां न स्वीकुर्वन्ति। अत्र हि स्मितस्य संभावनोत्थापकत्वेंपि जगद्विजयरूपविषयविषयिसाधारणत्वाभावः। आचार्यदण्डिनस्तु औपम्यमूलिकैवउत्प्रेक्षा इति न कथयन्ति न वा तत् सूचयन्ति इति तेषां मतेन उपरिदर्शितोदाहरणे उत्प्रेक्षैव। एवमेव–

पिनष्टीव तरङ्गाग्रैः समुद्रः फेनचन्दनम्।
तदादाय करैरिन्दुर्लिम्पतीव दिगङ्गनाः।।

इत्यत्र स्वरूपोत्प्रेक्षैव। तथाहि अत्र तरङ्गाग्रैः फेनचन्दनस्य संचारणं पेषणेन उत्प्रेक्षितम्। समुद्रोत्थितस्य चन्दनस्य समूद्रपूरे प्रसृतानां कराणां दिक्षु व्यापनं च समुद्रोपान्तफेनचन्दनकृतलेपनत्वेंन उत्प्रेक्ष्यते। उभयत्र क्रमेण समुद्रोपान्तगतफेनचन्दनपुञ्जीभवनं दिशां धवलीकरणं च निमित्तम् इति उत्प्रेक्षा। इत्यलं पल्लवितेन।।२२६।।

विवृति

इतीदमपि इत्यादिकमपि भूयिष्ठं सुष्ठु महत् उत्प्रेक्षा(ल)क्षणान्वितं को(नो)पमालक्षणान्वितमित्यर्थः।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लिम्पतीवेति। गाढं तमः यदा शरीरेण श्लिष्यति, तदा तत् तमः अङ्गानि लिम्पतीव इत्युत्प्रेक्ष्यते। नीलं तमो यदा विश्वं व्याप्नोति, तदा नभः अञ्जनं वर्षतीव इत्युत्प्रेक्ष्यते।।

उत्प्रेक्षालक्षणसहितं उपमाभ्रान्तिकरं उदाहरणद्वयं दर्शयति– लिम्पतीवेति। भूयिष्ठं–नैतत् द्वितयमेव, ईदृशमनेकमस्ति इत्यभिप्रायः ।।२२६।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यदि लेपनमेवेष्टं लिम्पतिर्नाम कोऽपरः।
स एव धर्मो धर्मी चेत्यनुन्मत्तो न भाषते॥२२७॥

रत्नश्री

लेपनमेव क्रियारूपमिष्टमिष्यते तुल्यो धर्मस्तयोरस्माभिरिति यदि मन्यसे तदा लेपनव्यतिरेकेण लिम्पतिर्नाम कोऽपरोऽवशिष्यते धर्मी, यस्यासौ धर्मः स्यात्? न तावत् शब्दस्य लेपनस्यातदाश्रितत्वेनातद्धर्मत्वात् तदर्थस्तु स्यात्। न चार्थ एव धर्मः वाच्यवाचकभावविलक्षणत्वाद् धर्मधर्मिभावस्य सर्ववादिनाम्। तदिदमापन्नं लेपनमेव धर्मो धर्मी चेति। तच्च विप्रतिषिद्धम् अस्वस्थभाषितमिहापनयन्नाह-स इत्यादि। स एव धर्म आश्रितो लेपनं नाम येनोपमीयते, स एव धर्मी च आश्रयो लेपनमेव यदुपमानीस्यात्। इत्येवं व्याहतमनुन्मत्तः स्वस्थचित्तो [69b] न भाषते न वक्ति। किंतु उन्मत्त एव विप्रतिषिद्धमभिधत्ते। तथाहि धर्मधर्मिणोराश्रिताश्रयलक्षणयोरभेदे तद्विरोधाद् भेदो लोकशास्त्रप्रसिद्धः कथमतिवर्तितुमनुसंधत्ते? न शक्यते। अन्योऽप्युन्मत्तो लोकशास्त्रविरुद्धाभिधायी भवन्भवेत्। नहि तस्य शृङ्गमस्ति। कथं नोन्मत्तः। एवं तावल्लिम्पतितमसोरुप-मानोपमेयभावो न घटत इति॥

यदि लिम्पतिः क्रियारूपो नोपमानं शब्दात्मकस्तु दूरोत्सारित एव कारकार्थः, तर्हि कर्तृलक्षणो लिम्पतिरुपमानं भवेत्। नायं पक्षो विरुद्ध्यत इति परमतमुद्भाव्य निरस्यन्नाह-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हृदयङ्गमा

मन्ये शङ्के इत्यादिपदप्रयोगे एवोत्प्रेक्षा, इवप्रयोगे तूपमैवेति केषाञ्चिन्मतं दूषयति, केषाञ्चिदिति।–इह लिम्पतीति पद्ये, इवश्रुत्या इवशब्दप्रयोगेण, तिङन्तेन उपमानं न इति आप्तानां प्रामाणिकानां सुधियां, भाषितं वचनम्, अतिक्रम्य अनादृत्य, केषाञ्चित् अज्ञानामित्यर्थः, उपमाभ्रान्तिः उपमालङ्कार एवात्रेति भ्रमः, जायते इत्यन्वयः। (अयं भावः, –भाष्यकारादयः हि प्रामाणिकाः, ते च "अश्वा लुलुठिषते" "कुलं पिपतिषति" इत्यादौ अचेतनस्य पाषाणादेरिच्छाया असम्भवात् कथं सन्- प्रत्यय इति विचारे लुलुठिषते इव लुलुठिषते इत्येवं स्यादित्याशङ्क्याब्रुवन्, –"न वै तिङन्तेनोपमानमस्ति" इति। व्याख्यातञ्च कैयटेन, –"तिङन्तेनेति तिङन्तार्थेनेत्यर्थः।" तिङन्तपदोपस्वाप्यायाः क्रियायाः साध्यरूपत्वादिति भावः, उक्तञ्च भट्टैः, –"यादृशी भावनाऽऽख्याते धात्वर्थश्चापि यादृशः। नासौ तेनैव रूपेण कथ्यतेऽन्यैः पदैः सह।।" इति। क्रिया च फलानुकूलव्यापारसमूहः; तदाह, –"गुणभूतैरवयवैः समूहः क्रमजन्मनाम्। बुद्ध्या प्रकल्पिताभेदः क्रियेति व्यपदेशभाक्।।" इति। ननु तथाऽपि कथं क्रियाया नोपमानत्वमिति चेत्, प्रसिद्धेन वस्तुना न्यूनस्योपमा भवति, क्रियायाः न च सिद्धत्वमिति दर्शितमेव, तेन च क्रिया नोपमानं भवितुमर्हति, तस्याः साध्यत्वात्; उक्तञ्च, –"सिद्धमेव समानार्थमुपमानं विधीयते। तिङन्तार्थस्तु साध्यत्वादुपमानं न जायते।।" इति। अत्र तु प्रस्तुतस्यापि व्यापनस्य शब्दोपात्तत्वाभावात् तमस एव उपमेयत्वस्य वक्तव्यतया तस्य लिम्पतीति तिङन्तार्थस्योपमानत्वं न युक्तम्; किञ्च, क्रियाया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उपमेयत्वमपि नैव, यतः सा क्रियान्तरापेक्षया न्यूनत्वविरहविशिष्टैव; तदुक्तं भर्तृहरिणा– "येनैव हेतुना हंसः पततीत्यभिधीयते। आतौ तस्य समाप्तत्वादुपमार्थो न विद्यते।।" इति। ननु भिन्नजातीयानां तदस्तु इत्यपि नाशङ्कनीयम्; तथा च उक्तं, –"भिन्नजातीयानाञ्च क्रियाणां सादृश्यं नास्ति भुङ्क्ते इव गच्छति" इति। तस्माद्भाष्यकाराद्युक्तिविरोधात् तिङन्तस्योपमानोपमेयभावो न युक्तः इति दण्डिनोऽभिप्रायः)।।२२७।।

प्रभा

इतः परं अस्मिन् श्लोके उपमावादिनः खण्डनं सप्रपञ्चं निरूपयति–**केषांचिदिति।** केषांचिद् इवशब्दः संभावनायामपि वर्तते तथा नोपमानं तिडन्तेन इति तिडन्तस्य उपमानत्वनिषेधोस्ति इति अजानताम्। अत्र लिम्पतीतिश्लोके इवश्रुत्या इवशब्दश्रवणेन उपमाभ्रान्तिर्यथा कमलमिव मुखम् इत्यादौ उपमा तद्वदत्रापि उपमा इति भ्रमो जायते। भ्रान्तिमुपपादयति **नोपमानमिति।** तिडन्तेन तिङन्तशब्दप्रतिपाद्येन न उपमानम् उपमानबोधो नास्ति। तिङन्तप्रतिपाद्यस्य साध्यत्वात् सिद्धस्यैव उपमानत्वादिति भावः। तदुक्तं–

सिद्धमेव समानार्थमुपमानं विधीयते।
तिडन्तार्थस्तु साध्यत्वादुपमानं न जायते।। इति।

तिडन्तार्थस्य तु उपमेयत्वम् अस्त्येव क्वचित्। यथा–ब्राह्मणवदधीते क्षत्रिय इत्यादौ। तिडन्तसमभिव्याहृतस्य इवशब्दस्य संभावनाबोधकत्वमेव। रोदतीव पठति नृत्यतीव गच्छति इत्यादौ नोपमा किंतु उत्प्रेक्षैव। आप्तभाषितम् आप्तो भगवान्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पतञ्जलिस्तस्य भाषितम्। तदुक्तं भगवता पतञ्जलिना धातोः कर्मणः इत्यादिसूत्रे (३.१.७)–न तिङन्तेन उपमानमस्तीति। अत्र कैयटः–किंतु तत्र संभावनार्थक इवशब्द इति। अयं भावः। यत्परा इवादिशब्दास्तदेव उपमानम् इति आलंकारिकसिद्धान्तादत्रोपमा-स्वीकारे लिम्पतिर्वर्षतिश्च उपमाने स्यातां न तु तमो नभो वा। लिम्पतीत्यादेस्तिङन्तस्य तु उपमानत्वं भाष्यकारैर्निषिद्धम्। तच्च प्रमाणसिद्धमिव युक्तिसिद्धमपि तथा हि–वाक्ये तिङन्तप्रतिपाद्यस्य साध्यत्वमिति सर्वसंमतम्। सिद्धस्यैव च उपमानत्वम् इत्यपि निर्विवादम्। अतः साध्यस्य उपमानत्वासंभवात् लिम्पतीत्यादीनि तिनन्तानि उपमानानि भवितुं नैवार्हन्ति। तथा च तत्पर इवशब्दो नोपमावाचकः किंतु संभावनावाचक इति अत्रोत्प्रेक्षैव युक्ता। इति प्रमाणयुक्तिपरिगृहीतेयमुत्प्रेक्षा इति ज्ञेयम्।।२२७।।

विवृति

इयमुपमा नोत्प्रेक्षेति कुतो भ्रान्तिरित्यत आह–

केषांचिदुपमाभ्रान्तिः अनुपमायामुपमेत्ति प्रतीतिर्मिथ्याज्ञानं भ्रान्तिः इवश्रुत्या लिम्पतीव पिनष्टीवेत्यादौ या इवश्रुतिरिवशब्दस्तया जन्यते किल। इववद्वेत्यादयः शब्दा उपमाद्योतकाः। लिम्पतीत्यादिषु चै(चे)वशब्दमाकर्ण्य उपमां मन्यन्ते केचित्।

किं कृत्वा मन्यन्त इत्याह–

आख्यातपदेन क्रियावाचिना उपमानोपमेयभावो नास्तीति यदाप्तैरुक्तं तदुल्लंध्य।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

केचित् इदं उदाहरणद्वयं उपमेति मन्यन्ते। ते–'न वै तिङन्तेनोपमानमस्ति' इति भाष्यकारवचनमपि अतिलंघ्य इवशब्देन भ्रमन्तीत्याह–**केषां चिदिति।** तिङन्तवाच्योऽर्थः साध्यतया प्रतीयते। सिद्धयोः द्वयोः उपमानोपमेयभाव इत्यर्थः।।

केषांचिदित्यादिना उत्प्रेक्ष्यते इत्यन्तेन ग्रन्थेन उपमाभ्रान्तिं निराकरोति। नोपमानं तिङन्तेन इति भाष्यकारोदितं लक्षणम्।।२२७।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कर्ता यद्युपमानं स्यान्न्यग्भूतौऽसौ क्रियापदे।
स्वक्रियासाधनव्यग्रो नालमन्यदपेक्षितुम्॥२२८॥

रत्नश्री

कर्ता लेपनक्रियां प्रति स्वतन्त्रः कारकविशेषः उपमानं तमसः स्यात् इति यदि मनुषे, नैषोऽपि पक्षोऽपरिहृतः। यत्रासौ कर्ता य उपमानीक्रियते स्वस्याः स्वस्य वा क्रियाया लेपनस्य साधने निर्वर्तने व्यग्रो व्यापृतः तत्रोपक्षीणसामर्थ्यः। अत एव क्रियापदे लिम्पतीत्यस्मिन् भावप्रधाने तिङन्त इत्यतः क्रियाङ्गत्वेनाप्रधानं क्रियाया एव साध्यत्वेन प्राधान्यम्। कारकार्थस्तु तदुपकरणं तत्सिद्धौ हेयत्वादप्रधानम्। सर्वत्रैव हि फलाभिसन्धिना प्रवृत्तेन पुरुषेणैतदन्यथानुपपत्त्या तदंशभावेनादेयः परिगृह्यते। फलनिष्पत्तौ तु न किञ्चित्। तेन फलमेव तु उपादीयते। तदुक्तम्–

उपायाद्वापि येऽहेयास्तानुपायान् प्रचक्षते।
उपेयं तन्मतं यस्य सिद्धये तत्परिग्रहः॥

इति। अत एव भावाख्यातं कारकतिङन्तं वा सर्वं क्रियाप्रधानं गीयते। तव्याद्यन्तं तु कारकावाचकं भावार्थं च सर्वमेव स्वभावतः सिद्धावस्थाप्रतीतेर्द्रव्यस्य प्रधान–भावपरम्। अत एव सर्वत्र गम्यमानत्वाद् एतदपि गीयते–यत्र क्रियापदं न श्रयते तत्रास्तिर्भवतिपरः प्रयुज्यते इति। एतच्च विस्तरेण शब्दार्थचिन्ताविवृतौ चिन्तितमिति ततोऽवधार्यम्। सर्वमेतत् समभिसन्धायन्यग्भूतोऽसौ क्रियापद इत्युक्तम्। कथमतोऽन्यथैतत् कल्प्येत? यत एवं तस्मादन्यदुपमेयाभिमतं तमो व्यपेक्षितुमुपमानभावेनाश्रयितुं नालं शन्कोति। कथमेका स्थाली

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पाकमेकं साधयन्ती तदैव पाकान्तरं साधयितुमीहते। उपमानं च प्रसिद्धसाधर्म्येण साध्यसाधनमुच्यते। यथा कान्तत्वेन प्रसिद्धेन चन्द्रेण मुखं कान्तं साध्यते, चन्द्र इव मुखं कान्तमिति। तद्वदिह लेपनक्रियासाधनपरायणः कर्ता न तमस्तथा साधयितुमुत्सहते, असम्भवात्। स्वक्रियापरित्यागेन तु उपमानं भवद् भवेत्। तदा लिम्पतीव तम इति संगच्छते। नहि लेपनक्रियामकुर्वन् लिम्पति नाम। तन्निमित्तत्वादस्य व्यपदेशस्य। अतिप्रसङ्गाच्च। ततश्च यदि लिम्पति कथं तमस उपमानम्, अथोपमानं कथं लिम्पति इति व्याहतमेतत्।।

स्यादेतत्। यथा स्वक्रिया न विरुद्ध्यते, उपमानं च तमसः स्यात् तथोच्यते-यो लेपनं करोति तेन तुल्यं तम इति सर्वं सुस्थम्। तदेतदुद्भाव्य निराकुर्वन्नाह–

हृदयङ्गमा

उपमाशङ्कानिराशाय युक्तिमपि दर्शयति, उपमानोपमेयत्वमिति।–तुल्यधर्म्मस्य समानगुणादिरूपसाधारणधर्म्मस्य, व्यपेक्षया सापेक्षतया, उपमानोपमेयत्वं, भवतीति शेषः, तदुभयगतधर्म्माभावात् कथमुपमाभ्रान्तेराशङ्केति भावः। इह धर्म्माभावं दर्शयति, लिम्पतेरिति। –अत्र लिम्पतेः लिम्पतीति तिङन्तार्थस्य पदस्य, (नामत्वानुकरणात् षष्ठीति बोध्यम्) तमसश्च असौ धर्म्मः साधारण इत्यर्थः, कः समीक्ष्यते लक्ष्यते? न कोऽपीत्यर्थः, तस्मात् लिम्पत्यर्थतमसोः साधर्म्याभावाच्च नोपमानमिति भावः।।२२८।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रभा

उपमानङ्गीकारे युक्त्यन्तरमपि भवतीति दर्शयति– **उपमानोपमेयत्वमिति** उपमानोपमेयत्वम् उपमानोपमेयभावः तुल्यधर्मव्यपेक्षया समानधर्मापेक्षया भवति। अयं भावः। उपमानोपमेयशब्दौ हि संबधिनौ। तौ हि समानधर्मसंबन्धमपेक्ष्यैव सत्तां प्राप्नुतः। तथा हि सादृश्यप्रतियोगि उपमानम् अनुयोगि उपमयेम्। एवं च उपमानोपमेयत्वं तुल्यधर्मसापेक्षम्। तुल्यधर्मस्य अप्रतीतौ तन्नैव संभवति। अत्र प्रस्तुतोदाहरणे लिम्पतेर्लिम्पतीति तिङन्तार्थस्य। तमसश्च धर्मः समानधर्मः। कः समीक्ष्यते ज्ञायते न कोपीत्यर्थः। उभयानुगतधर्मस्याप्रतीतेर्नात्रोपमालंकारः।।२२८।।

विवृति

कुतः पुनस्तिङन्तेनोपमानं नास्तीत्यत आह–

तुल्यधर्ममपेक्ष्योभयधर्मिसाधारणं उपमानोपमेयभावः। लिम्पतेस्तिङन्तस्य पदस्य तथा तमसश्चासौ साधारणो धर्मः कोऽत्र समीक्ष्यते न कोऽपीत्यर्थः।।

तेषां भ्रान्तिं प्रकटयति–**उपमानेति।** एकेन समानधर्मेण हि उपमानोपमेयव्यवहारो भवति। अत्र लिम्पतितमसोः उपमानोपमेययोः कः समानधर्मः? कोऽपि नास्तीत्यर्थः।।

उपमानेति। उपमानभूतायाः लिम्पतिक्रियायाः उपमेयभूतस्य तमसश्च साधारणभूतो न कोऽपि धर्मो दृश्यते।।२२८।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यो लिम्पत्यमुना तुल्यं तम इत्यपि शंसतः।
अङ्गानीति न सम्बद्धं सोऽपि मृग्यः समो गुणः॥२२९।

रत्नश्री

यः कश्चिद् देवदत्तादिर्लिम्पति लिपिक्रियामाचरति अमुना तेन लिपिक्रियाविशिष्टेन कर्त्रा तुल्यं तम इत्येवमपि यः शंसति घटनां मन्यते, तस्यैवं शंसतो योजयतो वादिनो मतेन यदेतल्लिम्पतीवाङ्गानीत्यत्राङ्गानीति व्याप्यपदं तत्सम्बद्धं न स्यात् असङ्गतं भवेत्। तथा हि यदा लेपनमात्रं व्याप्यनिरपेक्षमात्मसमवेतं भवनादिवत् करोतीति शस्यते, तदाङ्गानीति व्याप्यं केन सम्बध्यताम्? लेपनेन कर्तृमात्रानुबन्धिना। अलब्धसम्बन्धमर्थान्तर-वदसङ्गतमङ्गं स्यादिति यावत्। ननु योऽङ्गानि लिम्पति तेन तुल्यं तमोविवक्षायां कथमसम्बन्धः? नन्वेवमपि लेपनविषय-मङ्गमर्थान्तरम् अपेक्षमाणः कर्ता कथमर्थान्तरं तमोऽपेक्षितुमीष्टे? लेपनं तु आत्मगतं भवनादिवदङ्गवदनर्थान्तरमविनिर्भागवर्ति निर्वर्तयन्नपेक्षतापि तमः अभ्युपगतमेतत्। इदमपि वा भवेत् कथञ्चित्। तथापि नोपमानोपमेयभावः, साधर्म्यादर्शनादिति। मूलमुद्धरन्नाह-सोऽपीत्यादि। पूर्वं साधर्म्यमभ्युपगम्य सर्वमुक्तं येन गुणेनोपमा सोऽपि समः साधारणो द्वयोः वृत्तेः, कान्त्यादिवत्। गुणो धर्मो मृग्यः अन्विष्यताम्। इह तावन्न दृश्यते। तथाहि लेपनं तावत् कर्तुरेव धर्मः न तमसः, केवलं तत्रोत्प्रेक्ष्यते नापि [70b] धर्मान्तरं साधारणम् इहास्ति, विवक्षितं वा। यद् वक्ष्यति न तथा लिम्पतौ लेपादन्यत्र प्रतीय[ते] इति॥

कथमिव नास्तीति वैधर्म्यदृष्टान्तेन स्पष्टयन्नाह-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हृदयङ्गमा

ननु तमसोऽपि आवरकतया गौणलेपनवत्त्वात् लेपनमेव साधारणधर्मो भवतु इत्याशङ्कां निराकर्त्तुमाह, यदीति।–यदि लेपनमेव इष्टं साधारणधर्मतया अभिलषितं, तदा लिम्पतिः नाम अपरः साधारणधर्मवान् उपमानरूपो धर्मीत्यर्थः, कः? न कोऽपीत्यर्थः ; यद्वा, –यदि लेपनं धात्वर्थ एव, इष्टम् उपमानत्वेन स्वीकृतं, तदा लिम्पतिर्नाम साधारणधर्मभूतः, अपरः कः? इत्यर्थः, वैयाकरणैर्व्यापारस्यैव विशेष्यतया तिङन्तपदप्रतिपाद्यत्वेनोक्तत्वात्; (तदुक्तं, –"फलव्यापारयोर्धातुराश्रये तु तिङः स्मृताः। फले प्रधानं व्यापारस्तिङर्थस्तु विशेषणम्।।" इति। तथा च, लेपनस्यैव धर्मित्वं न तु धर्मत्वमिति व्यक्तीकृतम्। लिम्पतिरित्यत्र अनुकरणे प्रथमेति बोध्यम्)। ननु भेदाभेदवादिनो भेदविरहेऽपि धर्मधर्मिभावमङ्गीकुर्वन्ति, तस्मात् एकस्यैव लेपनस्य धर्मित्वं धर्मत्वञ्चास्तु इत्याशङ्क्याह, स एवेति।–स एव लिम्पतिरेव, धर्मो धर्मी चेति उन्मत्तोऽपि वातूलोऽपि, न भाषते, धर्मधर्मिभावस्य भेदनियतत्वात् उन्मत्तेनापि एकस्य धर्मित्वं धर्मत्वं नोच्यते, का कथा सुधियामिति भावः। (अयमभिप्रायः,–भेदाभेदवादिनः भेदविरहेऽपि यत् धर्मधर्मिभावमङ्गीकुर्वन्ति तत्तु भिन्नप्रकारोपस्थितावेव, नीलो घट इत्यादिवत् भेदमादाय न पौनरुक्त्यम्, अभेदमादाय सामानाधिकरण्यमिति। तत्सिद्धान्तात्। अत एव कार्य्यादिस्थलेऽप्यन्यप्रकारेणैव भेदाभ्यपगमः ; तदुक्तं भामत्यां,–"कार्य्यरूपेण नानात्वमभेदः कारणात्मना। हाटकाद्यात्मनाऽभेदः कुण्डलाद्यात्मना भिदा।।" इति। तस्मात् सवमतेऽपि एकस्यैव लेपनस्य धर्मधर्मिभावो न युक्त इति बोध्यम्)।।२२९।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रभा

अन्यकल्पितं लेपनरूपं समानधर्मं दूषयति–**यदीति।** यदि लेपनमेवेष्टं तमोलिम्पत्यर्थयोः साधारणधर्मतया लेपनमेव इष्टम्। तमस आवरकतया गौणलेपनत्वेपि धर्मयोर्बिम्बप्रतिबिम्बभावेन ऐक्यात् साधारण्यं स्वीकृत्येति भावः। तर्हि लिम्पतिः लिम्पतिपदप्रतिपाद्य उपमानरूपो धर्मी अर्थः कः। न कोपीत्यर्थः। वैयाकरणा हि भावप्रधानमाख्यातं सत्त्वप्रधानानि नामानि इति यास्कोक्त्या धात्वर्थक्रियाया एव प्राधान्यं मन्यन्ते। तदुक्तम्–

फलव्यापारयोर्धातुराश्रये तु तिङः स्मृताः।
फले प्रधानं व्यापारस्तिङर्थस्तु विशेषणम्।। इति।

अस्यार्थः। देवदत्तो गच्छतीत्यादौ गमिधातोः फलम् उत्तरदेशसंयोगः। व्यापारस्तु तदनुकूलगमनात्मकः। एतदुभयार्थबोधको गमिधातुः। अत्र स्मृत इति वचनविपरिणामेन योज्यम्। आश्रये फलाये कर्मणि व्यापाराश्रये कर्तरि च तिङ्प्रत्ययाः स्मृताः। कर्मणि प्रयोगे तिङ्प्रत्ययार्थः कर्मकर्तरिप्रयोगे च कर्ता। फलं प्रधानं व्यापारः फलनिरूपितप्राधान्यवान् व्यापार इति भावः। तिङर्थः कर्तृकर्मरूपः विशेषणं व्यापारस्येति शेषः। तथा च अत्रार्थः–तमः कर्तृकम् अङ्गकर्मकं लेपनं व्यापारः। एवं चात्र लेपनव्यापारस्य प्राधान्यात् तस्यैव धर्मित्वम्। ननु यथा आत्मा आत्मानं जानाति इत्यादिस्थले एकस्यैव कर्तृत्वकर्मत्वे तथा अत्रापि एकस्यैव लेपनस्य धर्मत्वधर्मित्वे स्याताम्। तथा च उपमा संगच्छेत इति चेन्न। अनुन्मत्तः विचारवान् एकपदप्रतिपाद्यः एक एव पदार्थो धर्मो धर्मी च इति न भाषते। आत्मा आत्मानं जानातीत्यादौ भिन्नपदोपस्थित्या कर्तृत्वकर्मत्वे एकार्थस्य स्याताम्। अत्र तु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एकेनैव लिम्पतिपदार्थेन धर्मिधर्मार्थकल्पनमनुचितमिति भावः। तथा च भाष्यम्—उच्चारित एव शब्दः अर्थस्य प्रापको नानुच्चारित इति। अत ईदृशस्थले एकस्मिन्नेवार्थे धर्मिधर्मकल्पना न विद्वदनुसृता। एवं चात्र साधारणधर्मस्याप्रतीतेर्नोपमा शङ्कितव्या। देवदत्त इव यज्ञदत्तः पचति इत्यत्र तु उपमा भवत्येव। भिन्नपदोपात्तस्यार्थस्य एकव्यापाराश्रयत्वेपि विशेषणत्वोपपत्तेरिति भावः।।२२९।।

विवृति

यदि लेपनमेवेष्टं लेपनमेव यद्युपमानोपमेय(यो)स्तुल्यो धर्मोऽभिमतः तदा तस्माल्लिम्पतिर्नाम कोऽपरस्ततो लेपनादन्यः कोऽयं भिन्नो लिम्पतिर्नाम धर्मः न कोऽपीत्यर्थः। अथ स एव लिम्पतिर्धर्मो लेपनाभिधानो भवति धर्मी च स एव लेपनधर्माधारस्तत्राह—**स एव धर्मो धर्मी चेति।** स एव लिम्पतिधर्मश्च भवति लेपनाख्यस्तथा धर्मी च स एव लेपनधर्माधार इति एतदेवंविधं धर्मसम्बन्धमनुन्मत्तो यः पुमान् स न भाषते। उन्मत्त एव धर्मधर्मिणोरेकतामाहेत्यधिक्षिपति।।

शङ्कते यदीति। दूषयति **लिम्पतिरिति।** आख्यातार्थक्रियायाः प्राधान्यात् सैव लिम्पतिशब्दवाच्या। सा उपमानं सैव समानधर्मः इति भ्रान्तभाषितम्।।

यदीति। यदि लेपनक्रियैव धर्मत्वेन परिकल्प्यते, लेपनक्रियाव्यतिरिक्तो लिम्पतिर्नाम नापरोऽस्ति। लिम्पतिरेव धर्मश्च धर्मी च भवतीति चेत्, उन्मत्तजल्पितमेतत्। अनुन्मत्तो नैवं व्यवहरति।।२२९।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यथेन्दुरिव ते वक्त्रमिति कान्तिः प्रतीयते।
न तथा लिम्पतौ लेपादन्यदत्र प्रतीयते॥२३०॥

रत्नश्री

इन्दुरिव ते वक्त्रमिति प्रयोगे कान्तिरुभयोः समो गुणः प्रतीयते दृश्यते यथा तथा तद्वत्। लिम्पतौ लेपनकर्तरि लेपाद्धर्मादन्यत्र। धर्मान्तरं तमस्तुल्यं न प्रतीयते, यत उपमा स्यात्। लेपस्तु लिम्पतावेव वर्तते न तमसीति किमाश्रयेयमुपमा स्यात्॥

तदेवं प्रमाणसंवाद्याप्तभाषितमतिक्रम्य कैश्चिदविश्रुति-जनितभ्रान्तिरुपमीकृतेयमुत्प्रेक्षेति निगमयन्नाह–

हृदयङ्गमा

उपमानाभावस्यैवोपमाबाधकत्वात् किमत्रोपमानमित्यपेक्षायां कर्त्तुरुपमानत्वं निराकरोति, कर्त्तेति। –यदि कर्त्ता तिङा प्रतिपाद्यः लेपनरूपव्यापाराश्रयः, उपमानं स्यात् तमस उपमानत्वेन मन्येत, तदा तदपि न सङ्गतम् इति शेषः, यतः, असौ कर्त्ता, क्रियापदे व्यापाररूपे, न्यग्भूतः गौणीभूतः, विशेषणत्वमापन्नः इति यावत्, (तिङर्थस्य विशेषणत्वं पूर्वमुक्तम्। वैयाकरणमते आख्यातार्थस्य कर्त्तुर्धात्वर्थे विशेषणीभूतत्वेन तस्य सादृश्ये स्वप्रतियोगिकत्वसम्बन्धेनान्वयो न भवितुमर्हतीति भावः)। नन्वेकत्रान्वयबोधेऽप्यपरेणापि समन्वयः कथ न भवतीत्याह, स्वक्रियेति।– स्वक्रियायाः स्वविशेष्यभृतलेपनरूपायाः भावनायाः, साधने अन्वयेन चरितार्थतासम्पादने, व्यग्रः व्यापृतः, स्वविशेष्यभूतक्रियान्वयेन चरितार्थतयाऽन्यत्रान्वयानाकाङ्क्ष इत्यर्थः,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एकत्र जनितान्वयबोधत्वेन निराकाङ्क्षत्वादिति भावः, असौ कर्त्तेति शेषः, अन्यत् सादृश्यादिपदार्थम्, अपेक्षितं साधयितुं, स्वप्रकारान्वयबोधे विशेष्यतामापादयितुमित्यर्थः, न अलं न समर्थः। (अयं भावः, –"यद्यपि एकत्रान्वितस्यान्यत्रान्वयो निराकाङ्क्षतया न युक्तः, तथाऽपि कुत्रचित्तदङ्गीकारादिहापि तथा स्यात् इति च न वाच्यम्, एकत्र विशेषणत्वेनान्वितस्यान्यत्रापि विशेषणत्वेनान्वयस्य सर्वत्रैवायुक्तत्वात्, इहापि स्वविशेष्यक-क्रियायां विशेषणतया अन्वितस्य कर्त्तुः उपमेये तमस्यपि तथात्वेनान्वयो न युज्यते एव, उक्तञ्च दीधितिकारेण, –"इतरविशेषणत्वेनोपस्थितस्यान्यत्र विशेषणत्वेनान्वयायोगात्" इति। अतो नात्र कर्त्तुरुपमानत्वं सङ्गच्छत इति)।।२३०।।

प्रभा

अत्र औपम्यसिद्धये तिङर्थः कर्ता एवोपमानं तम उपमेयं लेपनं साधारणधर्मोस्तु। तथा च निर्बाधा उपमा इति चेत् तत्राह–**कर्तेति** कर्ता तिङन्तप्रतिपाद्यव्यापाराश्रयः। यदि उपमानं तमस उपमानं स्यात् कल्पेत तदपि न सम्यक्। यद् असौ व्यापाराश्रयः कर्ता क्रियापदेन लिम्पतिक्रियापदेन विशेष्यतया प्रतिपाद्ये व्यापारे न्यग्भूतो विशेषणतयान्वितो वर्तते। तिङर्थस्तु विशेषणम् इति पूर्वोक्तसिद्धान्तात्। अयमत्राशयः। तमः अङ्गानि लिम्पति इत्यत्र लिम्पतिना साध्यवसानलक्षणया व्यापनमपि ग्राह्यम्। तस्य च कर्ता तमः। उपमानभूतश्च लिम्पतिकर्ता। तथा च लिम्पतिकर्तृसदृशतमः कर्तृकं व्यापनम्। लेपनव्यापनयोश्च बिम्बप्रतिबिम्बभावेन एक्यम्। अतः सुस्थेयमुपमा इति चेन्न। लेपनव्यापारे विशेषणतया अन्वितस्य कर्तुरुपमानसंबन्धेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अन्यत्रान्वयायोगाद् एकविशेषणं नापरत्र स्वार्थं प्रत्याययति इति न्यायात्। उक्तं च मञ्जूषायां नागेशभट्टैः–एकत्र विशेषणत्वेन गृहीतशक्तिकस्य ज्ञातस्य वा अपरत्र विशेषणत्वायोगः। अत एव राज्ञः पुरुषोश्वश्च इतिवद् राजपुरुषोश्वश्च इति न इति। एतदेव दर्शयति–**स्वक्रियासाधनव्यग्रः** इति। स्वक्रिया स्वव्यापारो लेपनादिरूपस्तस्य साधनं सिद्धिर्विशेष्यतया बोधस्तत्र व्यग्रः व्यापृतः उपसर्जनतामापन्न इत्यर्थः। अन्यद् अपेक्षितुं पदार्थान्तरं स्वप्रकारकान्वयबोधे विशेष्यत्वेन आकाङ्क्षितुम् पदार्थान्तरविशेष्यकबोधे पुनः प्रकारीभवितुमित्यर्थः। नालं न समर्थः अयं भावः। एकपदस्य विशेषणतया अन्यत्रान्वितस्य ततोन्यत्र उपमानतया अन्वयो देवदत्त इव यज्ञदत्तो हसति इत्यादिस्थले पदान्तरोपस्थाप्यकर्तरि पदसंसर्गमर्यादया भवति। परं यत्र भिन्नशब्देन उपादानं नास्ति कर्तुस्तादृशतिङ्बोधितकर्तृस्थले एवमन्वयो भवितुं नार्हति। तस्मान्नात्रोपमेति भावः।।२३०।।

विवृति

अथ कर्तुस्तमस उपमानता भविष्यतीत्यत आह–

यदीति सम्भावनायां वर्तते। तमः कर्तृकारकम्। स कर्ता तमोऽभिधानः उपमीयते अनेनेत्युममानं यदि स्याद्भवेत्। तदा न्यग्भूतोऽसावप्रधानम्। क्वेत्याह क्रियापदे आख्याते। यतः कर्तृकर्मकरणकारकत्रयम(स्य) निष्पाद्य (द्या या) क्रिया सैव प्रधानम्। क्रियाप्रधानमाख्यातं (इति) कर्त्रादीनां क्रियानिर्वर्तकत्वेनोपसजर्नत्वात्। यद्धि यदर्थं तत्तत्र प्रधानमिति वचनात् स्वक्रियाऽऽख्यातवाच्या तत्साधने व्यग्रो नालमन्यदुपमेयं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वा उ(व्य)पेक्षितुं कर्तेति। ततश्च कर्तुस्तमसो लेपनक्रियानिर्वर्तकत्वेनोपक्षीणत्वान्नोपमानतेतिस्थितम्।।

शङ्कते कर्तेति। आख्याते क्रिया तत्कर्ता च द्वयमपि विद्यते; तत्र कर्ता उपमानं क्रिया किल समानधर्म इति चेत्, तत् प्रतिक्षिपति न्यग्भूत इति। आख्याते क्रियाप्राधान्येन तत्साधककर्ता सर्वाकारेण मग्नः। नामपदस्थकर्तेव न स्वतन्त्रः ; अतो न विशेषमाकाङ्क्षति।।

कर्तेति। लिम्पतिक्रियायाः कर्ता उपमानमिति चेत्, असौ न्यग्भूतः। प्रसिद्धं हि वस्तु उपमानं उपमेयं वा भवितुमर्हति; अपित्वसौ क्रियापदे न्यग्भवति। सङ्ख्यापुरुषविशिष्टस्य साधनस्य प्रत्ययवाच्यत्वे, कालोपग्रहविशिष्टायाः क्रियायाः प्रकृतिवाच्यत्वे प्रकृतिप्रत्ययौ सहितावेव प्रत्ययार्थं ब्रुवाते इति व्यवस्थायां भूतभव्यन्यायेन कथमत्र सिद्धं साध्यम्? साधन(साधनसाध्य) भूतायाः क्रियायाः सिद्धावुपक्षीणं वस्तु उपमानम् उपमेयं वा भवितुं न (?) समर्थम्।।२३०।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदुपश्लेषणार्थोऽयं लिम्पतिर्ध्वान्तकर्तृकः।
अङ्गकर्मा च पुंसैवमुत्प्रेक्ष्यत इतीष्यताम्॥२३१॥

रत्नश्री

यत एवं तत् तस्मादुपश्लेषणं लेपनक्रियारूपमर्थोऽभिधेयम्। ध्वान्तं च तमः कर्तृ अङ्गं च कर्म व्याप्यं यस्य स तादृशो लिम्पतिर्धातुरेवमुक्तेन प्रकारेण वस्तुनो लिम्पदपि तमोऽतिघनत्वात् लिम्पतीवेति उत्प्रेक्ष्यते परिकल्प्यते पुंसा कविना तदर्थस्योत्प्रेक्षितत्वात्। अभेदाव्यवसायेन शब्द उत्प्रेक्ष्यते इत्युक्तम्। ततश्चोत्प्रेक्षैवेयमित्येवमिष्यताम्, नोपमेति। तस्मादितीदमपि भूयिष्ठम् उत्प्रेक्षालक्षणान्वितमिति सिद्धम्। अयमेव न्यायो वर्षतीवाञ्जनं नभ इत्यत्राप्यनुगन्तव्यः॥

व्यवहारार्थमुत्प्रेक्षासूचकान् शब्दान् दर्शयन्नाह–

हृदयङ्गमा

वैयाकरणमते कर्त्तुर्विशेषणत्वेनोपसर्जनतया यद्यपि उपमानत्वं न सम्भवति, तथाऽपि प्रथमान्तमुख्यविशेष्यकान्वयबोधमङ्गीकुर्व्वाणांना नैयायिकानां मते तु कर्त्तुरेवोपमानत्वं स्यादित्याशङ्क्याह, य इति। –यो लिम्पति लेपनकर्त्ता इत्यर्थः, तमः अमुना तुल्यं लेपनकर्त्रा सदृशम्, अत्र यददः शब्दप्रयोग उपमानोपमेयत्वभावसूचनीय, लेपनकर्त्तेव तमः इत्यर्थः, इत्यपि शंसतः कथयतः, वादिनः मते इति शेषः, अङ्गानि इति कर्मपदं, न सम्बद्धं न सङ्गतम्, उपमेयतमः कर्त्तृकतदन्वययोग्यक्रियान्तराभावात् उपमेयांशे अनन्वयाच्चेति। ननु अङ्गकर्म्मकलेपनकर्त्तृसदृशं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तम इत्येवं शाब्दबोधे का क्षतिरिति चेत् तत्राह, स इति।–सोऽपि उपमानमात्रान्विताङ्गरूपो गुणोऽपि, समः साधारणधर्म्मतया, मृग्यः अन्वेष्टव्यः, अवश्यं वाच्य इत्यर्थः, तदप्रयोगे साधर्म्याप्रतीतेः उपमाया असम्भवादिति भावः।।२३१।।

प्रभा

नैयायिकैरनुसृते प्रथमान्तविशेष्यकशाब्दबोधे नोपमेति कथयति–**यो लिम्पतीति।** यो लिम्पति अमुना तेन लेपनकर्त्रा। तुल्यं तमः लेपनकर्तृसदृशं तमः। इति शंसतः प्रथमान्तविशेष्यकशाब्दबोधेन एवमर्थं प्रदर्शयतो मतेपीति अध्याहार्यम्। एवं शाब्दबोधं मन्वानस्य मतेपि अङ्गानीति पदं संबद्धं न भवति उपमेयगतलेपने अनुगतं न भवति। अत उपमेये संबन्धाभावाद्अङ्गकर्मकलेपनं समानधर्मो भवितुं नार्हति। तस्मात् प्रथमान्तविशेष्यकशाब्दबोधेपि समः साधारणः गुणः धर्मो मृग्यः अन्वेषणीयः। स अङ्गलेपनरूप उपमेये प्रतीतो न भवति। तं विना च उपमा नोपपन्ना। अत्रायमाशयः। उपमास्वीकारे लिम्पतीव तमोङ्गानीत्यस्य नैयायिकमते अङ्गवृत्तिफलजनकलेपनानूकूलकृति-मानिव तम इति वाक्यार्थबोधः स्यात्। तथा च लेपनकर्तृतमसोरुपमानोपमेयभावः। तत्र प्रथमान्तविशेष्यकशाब्द-बोधे अङ्गानीति पदं व्यापारविशेषणद्वारा उपमानभूतकर्तरि संबद्धमपि उपमेयभूततमसि तस्य संबन्धो दुर्घटः। एकविशेषणं नापरत्र स्वार्थं प्रत्याययति इति पूर्वोक्तन्यायादिति भावः। तथा च अङ्गानीति पदस्य समानधर्माङ्गभूतस्य उपमेये अनन्वयाद् अङ्गलेपनं समानधर्मो न भवितुमर्हति। क्रियाविशेष्यकशाब्दबोधवदत्रापि समानधर्मो मृग्यः। अपिशब्दः पूर्वोक्तसमानधर्माभावसमुच्चायकः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथवा मा भवतु उपमेयसमानधर्मे अङ्गानीतिपदस्य संबन्धः। तद्विनैव अङ्गकर्मकलेपनकर्तेव तमोलेपनम् इति बोधेपि उपमायाः सुवचत्वाद् इति चेत् तदपि न समीचीनम्। यतो लेपनस्यापि स्वोत्पादककर्तरि विशेषणत्वेन अन्वितत्वाद् उपमेये तदन्वयस्य दुरुपपादत्वात्। तथा च यथा अङ्गानीति उपमेयांशे असंबद्धं तथा लेपनमपि असंबद्धमेव। एवं च तत् समानधर्मो भवितुं नार्हति। अतश्च अङ्गानीति संबद्धं न भवति। तदर्थं तच्छून्यं केवलं लेपनमेव समानधर्मत्वेनाङ्गीकृतं चेत् तदपि उभयत्र संबद्धं न भवति। अतः समानधर्मोपि मृग्यः। अत्र अपिशब्दः अङ्गासंबन्धदोषसंग्राहकः। अत्र साधारणा हि गुणक्रियादयो धर्माः प्रथममुपमेयगतत्वेनैव अन्वयबोधविषयतामापद्यन्ते पर्यालोचनया तु उपमानगतत्वेन प्रतीयन्त इति तेषां साधारण्यम्। प्रकृते तु उपमानगतत्वेन लेपनस्य अन्वयबोध इति उपमानतावच्छेदकतया उपमानशरीरत्वमेव न तु उपमानोपमेययोः साधारणधर्मत्वमिति विवेचनीयम् इति अनुपमात्वं दर्शयन्ति केचित्। यो लिम्पत्यमुना तुल्यं तम इत्यपि संगतः। अङ्गानीति न संबन्धः सोपि न अतः समानधर्माभावात् सोपि समानधर्मोपि तमोगुणस्तमसानुसंबद्धो धर्मो मृग्यः अन्वेषणीय इति अन्वयः। एतदुपपादनं तु पूर्ववदेव। अत्र अपिशब्दो लिम्पतेस्तमसश्चासौ धर्मः कोत्र समीक्ष्यत इति पूर्वोक्तदोषसंग्राहको ज्ञेयः।।२३१।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मन्ये शङ्के ध्रुवं प्रायो नूनमित्येवमादिभिः।
उत्प्रेक्षा व्यजते शब्दैरिवशब्दोऽपि तादृशः॥२३२॥

रत्नश्री

इत्येवंरूपः शब्दराशिरादिर्येषां तर्कयामि कल्पयामि उत्पश्यामि यथेत्येवमादीनां तैः शब्दैरुत्प्रेक्षा उक्तलक्षणा शब्दान्तरोक्ताप्यव्यक्ता सती व्यज्यते द्योत्यते। इवशब्दोप्युक्तेन विधिना तादृश उत्प्रेक्षाव्यञ्जकः। न केवलमेत इति॥

॥ इत्युत्प्रेक्षाचक्रम् ॥

सूक्ष्मलेशसाधारणप्राधान्यकथने न हेतुं निदर्शयन्नाह–

हृदयङ्गमा

ननु साधारणधर्माप्रयोगे लुप्तोपमाऽपि भवतीति चेत् तत्राह, यथेति।– ते वक्त्रम् इन्दुरिव इत्यत्र यथा कान्तिः सौन्दर्य्यं, प्रतीयते साधारणधर्मतया विज्ञायते, अत्र लिम्पतौ लेपात् अन्यत् किमपि साधारणधर्म्मरूपं, तथा तद्वत्, न प्रतीयते। (तथा च, साधारणधर्माप्रयोगेऽपि यत्र सादृश्यस्य प्रसिद्धतया साधारणधर्मस्य स्फुटत्वं तत्रैव लुप्तोपमा, अत्र तु तमसः लेपनकर्त्तुश्च न तथात्वमिति साधारणधर्माप्रतीतेरत्रोपमासङ्ग्रहे काचित् विप्रतिपत्तिरिति भावः)॥२३२॥

प्रभा

साधारणधर्मस्य अप्रयोगेपि लुप्तोपमा भवति। तथा चात्र मा भवतु लेपनं साधारणो धर्मः। साधारणधर्मोपादानं विनैव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निष्पाद्यमानां लुप्तोपमामङ्गीकुर्मः, इति चेत् तदपि नात्र संभवतीति कथयति–**यथेन्दुरिवेति।** यथा इन्दुरिव ते वक्त्रम् इति उपमायां कान्तिः साधारणधर्मतया प्रतीयते वाचकाप्रयोगेपि प्रसिद्धेन्दोरुपमानत्वादेव गम्यते। लिम्पतेः लिम्पतीति उपमानात्। लेपात् अन्यद् उपमितिनिष्पादकं साधारणधर्मान्तरम् न प्रतीयते। लेपनं तु क्रियाविशेष्यकशाब्दबोधे उपमानमेव प्रथमान्तविशेष्यकशाब्दबोध उपमानोपसर्जनीभूतम्। अतः साधारणधर्मो भवितुं नार्हति इति प्रपञ्चितमेव। तथा च ईदशस्थले साधारणधर्मो न शब्दापात्तो न वा उपमानप्रसिद्ध्या गम्यः। एवं च साधारणधर्माप्रतीतेर्नात्र पूर्णोपमा लुप्तोपमा वा। लुप्तोपमायाः स एव विषयो यत्र उपमानोपमेयगतं सादृश्यं लोकप्रसिद्धतया स्फुटं प्रतीतिपदवीमारोहति। यथा इन्दुरिव ते वक्त्रमित्यादौ। यत्र तु न प्रतीतिपदवीमारोहति न तत्र सा। अत्र लेपनकर्तृतमसोर्न कोपि समानधर्मः प्रतीतिपदवीमारोहति। अतो नोपमा।।२३२।।

विवृति

अथ मन्यसे कर्तुस्तमसो यद्युपमानता न घटते मा घटिष्ट। लिम्पतिस्तु उपमानं भविष्यतीति। अत्राह–

लिम्पतीत्यनेन क्रियावाचिना (यः कर्ताऽऽक्षिप्यते तेन) उपमानत्वेन परैरभ्युपगत्तेन तुल्यं समं तमः इत्यपि शंसति वर्णयति यस्तस्याप्येवं शंसतो लिम्पतितमसोः परस्परोपमानोपमेयभावं ब्रुवतः अङ्गानीति न सम्बद्धमसङ्गतम्; तावता उपमानोपमेयभावस्य गतत्वात्। किं च सोऽपि मृग्योऽन्वेषणीयः समस्साधारणो गुणो धर्मः।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दूषणान्तरमाह—**य इति।** यो लिम्पति अमुना तमः तुल्यं इति वक्तुं न शक्यत इत्युक्तम्। उच्यतां वा; तथा चेत् अस्मिन् वाक्ये अङ्गानीति पदस्य न सम्बन्धः। अपि च लिम्पतिधर्मो लेपः तमस्यपि भवेत्; स तु नास्ति।।

य इति। अन्यच्च दूषणमस्ति—उपमानभूतस्य तमसा समानधर्मत्वं च गवेषणीयम् इति। तदाह—सोऽपि मृग्यः समो गुणः इति।।

स्वयं स्पष्टयति—

इन्दुवक्त्रयोर्धर्मिणोरुपमानोपमेयभावेनोपस्थितयोर्यथा कान्तिस्साधारणो धर्मः प्रतीयते न तथा लिम्पतेर्लेपादुपश्लेषणादन्यद् उभयधर्मिसाधारणमत्र धर्मान्तरं कान्तिप्रख्यं किंचित्प्रतीयते। ततो नोपमानोपमेयभाव इत्यर्थः।।

तदेव स्पष्टयति—यथेति। इन्दुरिव ते वक्त्रम् इत्युपमायाम् उपमाने इन्दाविव उपमेयेऽपि वक्त्रे यथा कान्तिः प्रतीयते, तथा उपमाने लिम्पताविव उपमेये तमस्यपि स समानधर्मो लेपनं प्रतीयेत। न तदस्ति; नाप्यन्यः कोऽपि तादृशो धर्मः।।

समानधर्मस्तु न कण्ठोक्तः, नापि प्रतीयते इत्याह—**यथेति**।।२३२।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हेतुश्च सूक्ष्मलेशौ च वाचामुत्तमभूषणम्।
कारकज्ञापकौ हेतू तौ च नैकविधौ यथा॥२३३॥

रत्नश्री

हेतुश्च सूक्ष्मो लेशश्चेति त्रयमेतद् वाचां काव्यानामुत्तमं प्रधानं भूषणम् अलङ्कारः। उत्तमभूषणमेवैतत्त्रयम्। नत्विदमेव अतिशयोक्त्यादेरपि तथाभावात्। एवं च ब्रुवता [यद्भामहोक्तिविरोधो] भवति, तन्निरस्तम्। [तथा च]–

हेतुश्च सूक्ष्मलेशौ च नालङ्कारतया मताः।

समुदायाभिधेयस्य वक्रोक्त्या नाभिधानतः॥ इति।

[काव्यालङ्कारे २.८६]

इह जनको बीजादिर्गमकश्च धूमादिरिति हेतुद्वयं दृश्यते। तत्र कतमोऽयं हेतुः? द्विविधोऽप्यत्र गृहीत इत्याह-कारकेत्यादि। कारको भावाभावरूपस्य कार्यस्य जनकः, ज्ञापकश्च सत एव कस्यचित् सम्बन्धात् [71a]कुतश्चित्प्रतिपादक इति कारकज्ञापकौ हि भुवि ज्ञेयौ। तौ च कारकज्ञापकौ। नैको विचित्रो त्रिधः प्रकारो ययोरिति नैकविधौ भवतः। जन्यकार्यवैचित्र्यात्। यथेत्युदाहरति॥

हृदयङ्गमा

उपसंहरति, तदिति।–तत् तस्मात्, उपश्लेषणं व्यापनमेव, अर्थः उत्प्रेक्षाया विषयः यस्य तथाभूतः, ध्वान्तकर्तृकः तमः कर्तृकः. तथा अङ्गकर्मा च अयं लिम्पतिः लेपनक्रिया, पुंसा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कविनिबन्धनवक्रा, एवं प्रस्तुततमोव्यापनस्याप्रस्तुततादृशलेपनत्वेन, उत्प्रेक्ष्यते सम्भाव्यते, इति इष्यताम् इष्टत्वेन गृह्यताम्। (तथा च, प्राकरणिकोऽर्थः उत्प्रेक्षाया विषयः, सम्भाव्यमानाप्रस्तुतार्थस्तस्या विषयीति नियमः, अत्र हि तमःकर्त्तृकाङ्गव्यापनम् उत्प्रेक्षाया विषयः, लेपनञ्च विषयि, ततश्च प्रस्तुतस्तमोव्यापनरूपो विषयः अप्रस्तुततादृशलेपनरूपविषयित्वेन उत्प्रेक्ष्यते, न तूपमानभूतेन तेन उपमीयते, ततश्च इवार्थोऽत्र सम्भावनैव, न तु सादृश्यमिति सिद्धम्। तदयं निष्कर्षः,–"लिम्पतीव तमः" इत्यत्र धातोर्लेपनक्रियायां शक्तिः अधोदेशव्यापने लक्षणा, आख्यातार्थो लक्षणया विषयत्वं सम्भावनमिवार्थः ; तथा च तमःकर्त्तृकाधोदेशव्यापनम् अङ्गलेपनप्रकारकसम्भावनाविषयः इति शाब्दबोधः। यद्वा,– लेपनप्रकारकसम्भावनाविषयाधोदेश-व्यापनाश्रयस्तमः इति बोधः। प्रथमबोधे इवार्थसम्भावनाया विशेष्यतया आख्यातार्थे तमसश्च कर्त्तृसम्बन्धेन धातुलक्ष्याधोदेशव्यापने धातुशक्यलेपनस्य प्रकारतासम्बन्धेन सम्भावनायामन्वयः। द्वितीयबोधे तु शक्यलेपनस्य प्रकारतया सम्भावनायां, तस्या निरूपितत्वेन सम्बन्धेन विषयत्वे, तस्य लक्ष्ये अधोदेशव्यापने, तस्याश्रयतया तमसि अन्वयः इति विशेषः इति विभाव्यम्)॥२३३॥

प्रभा

सिद्धान्तकथनेन विषयमुपसंहरति–**तदिति**। तत् तस्मादुपमाया अत्र अभावात्। अङ्गकर्मा अङ्गकर्मकः। ध्वान्तकर्तृकः उपश्लेषः लेपनं अर्थो यस्य स एतादृशो लिम्पतिः लिपिधात्वर्थः पुंसा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कविनिबद्धवक्त्रा एवं व्यापनरूपविषयनिगरणेन उत्प्रेक्ष्यते संभाव्यते इति ईक्ष्यतां सूक्ष्मया दृशा निरूप्यताम्। अत्र प्रेमचन्द्रशर्माणस्तु-लिम्पतिः लिम्पतिपदप्रतिपाद्या लेपनक्रिया पुंसा कविनिबद्धेन वक्त्रा उत्प्रेक्ष्यते संभाव्यते इति इष्यतां अकामेनापि अङ्गीक्रियतामित्यन्वयः। ननु विषयाभावे विषयीभूतायास्तथा-विधविशिष्टलेपनक्रियायाः कथमुत्प्रेक्षणीयत्वम्। संशयविशेष-रूपाया उत्प्रेक्षायाः कोटिद्वयविषयकत्वनियमाद् इति विषयं दर्शयन् विषयीभूतं लिम्पतिं विशिनष्टि **उपश्लेषणार्थ इति।** उपश्लेषणं तमः कर्तृकव्यापनम् अर्थः स्वविषयकोत्प्रेक्षाया विषयो यस्य सः। अयमर्थः। प्रस्तुतोर्थस्तावद्विषयः। तत्र संभाव्यमानो अध्यवसीयमानो वा अप्रस्तुतोर्थो विषयी। प्रकृते तमःकर्तृकाङ्गव्यापनम् उत्प्रेक्षाविषयः। तादृशलेपनं विषयीति। ततश्चात्र प्रस्तुतं तमोव्यापनं तादृशलेपनत्वेनोत्प्रेक्ष्यते। न तूपमानेन तेन उपमीयत इति प्रत्यपादयन्। परमस्मिन् उपश्लेषणार्थविषये क्लिष्टकल्पना दृश्यते। अपरं च अनुपादानविषया स्वरूपोत्प्रेक्षा इयमिति सर्वैरङ्गीकृतम्। ततश्च विषयिण उपादानेन अध्यवसानेन विषयस्य स्वरूपं ज्ञायमाने उत्प्रेक्षायाः सिद्धौ तद्विषयदर्शनाय इयान् प्रयत्नोनुपयुक्त एव। एतावत्प्रबन्धेन आचार्यदण्डिनो मते अत्र समानधर्मस्य प्रतीतिर्नास्तीति नोपमा किंतु प्रस्तुते अप्रस्तुतारोपरूपा उत्प्रेक्षा इति दर्शितम्। काव्यप्रकाशकारादयः संभावनमथोत्प्रेक्षा प्रकृतस्य समेन यद् (७०७ पत्रे) इति उत्प्रेक्षाया लक्षणं विधाय समेन उपमानेन इति व्याख्यानं च कृत्वा साधर्म्यमूलामेव तां वर्णयन्ति। तद् आचार्यदण्डिनः सिद्धान्तस्य विरुद्धम् इति बोध्यम्।।२३३।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विवृति

प्रकृतमुपसंहरन्नाह–

यतः लिम्पतीव तमोऽङ्गानीत्यादौ तुल्यधर्मव्यपेक्षाभावं नो(वान्नो)पमानोपमेयभावस्तस्मादुपश्लेषणा(र्थोयं लिम्पतिर्ध्वान्त-कर्तकत्वेनाङ्गकर्मकत्वेन चोत्प्रेक्ष्यत इति द्रष्टव्यम्)।।

उपसंहरति–**तदिति**।।

उपसंहरति–**तदिति**। उपश्लेषणं सम्बन्धः।।२३३।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अयमान्दोलितप्रौढचन्दनद्रुमपल्लवः।
उत्पादयति सर्वत्र प्रीतिं मलयमारुतः॥२३४॥

रत्नश्री

अयमनुभूयमानो मलयमारुतो दक्षिणोऽनिलः सर्वत्र लोकस्य प्रीति प्रमोदमुत्पादयति करोति। किंविशिष्टः? आन्दोलितानि आकम्पितानि अप्रौढ़ानि अभिनवानि चन्दनद्रुमाणां पल्लवानि येन स तादृशः सुरभिः शिशिरो मृदुश्च उत्पादयति इति प्रकृतम्॥

ननु किमत्र भूषणम्? केवलमनेनैतत् क्रियते इति स्वरूपकथनमात्रम्। विशेषस्तु न कश्चित्। विशेषरूपश्चालङ्कार इति विशेषं योजयन्नाह–

हृदयङ्गमा

इवशब्दस्य उत्प्रेक्षाया व्यञ्जकत्वमाह, मन्ये इति। –मन्ये इत्यादिभिः शब्दैः उत्प्रेक्षा व्यज्यते, इवशब्दोऽपि तादृश उत्प्रेक्षाव्यञ्जक इत्यर्थः। (अत्रेवशब्दोपादानमपि यत्रोपमा न सम्भवति तत्रोत्प्रेक्षात्वमित्यभिप्रायेण, न त्वाख्यातसमभिव्याहृतेवादिस्थले उत्प्रेक्षैवेति नियमाभिप्रायेणेति बोध्यम्)॥२३४॥

प्रभा

इवशब्दो बाहुल्येन उपमावाचकः। संभावनावाचकस्तु दूरे वसन्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देवदत्त इव भाति इत्यादिषु क्वचिदेवासौ दृष्टः। अतस्तस्योत्प्रेक्षावाचकत्वम् उत्प्रेक्षावाचकमध्ये परिगणनेन दर्शयति–**मन्य इति।** व्यज्यते बोध्यते। एषां प्रयोगे उत्प्रेक्षा वाच्या अन्यथा गम्या इति पूर्वं कथितमेव। अत्र आदिशब्देन तर्कयामि संभावयामि जाने उत्प्रेक्षे इत्यादीनां संग्रहः। एतेषां कानिचिदुदाहरणानि दर्शयामः–

यद्यनुष्णो भवेद्वह्निर्यद्यशीतं भवेज्जलम्।
मन्ये दृढव्रतो रामस्तदा स्यादप्यसत्यवाक्।।

सर्वातिशयसौन्दर्यं शङ्के सत्यवतो मुखम्।
येन सा मृगशावाक्षी सावित्री तरलीकृता।

तव निर्वर्ण्य यद्वर्णं स्वर्णं वर्णाय तादृशे।
त्वत्कोशगेहान्निर्गत्य तीर्थेषु वसति ध्रुवम्।।

त्वदाननेन सादृश्यं प्राप्तुकामो निशाकरः।
कलङ्कपङ्काभावाय नूनं मज्जति सागरे।।

रात्रौ रवेर्दिवा चेन्दोरभावादिव स प्रभुः।
भूमौ प्रतापयशसी सृष्टवान् सततोत्थिते।।

कस्तूरिकामृगाणामण्डाद्गुणगन्धमखिलमादाय।
यदि पुनरहं विधिः स्यां खलजिह्वाया निवेशयिष्यामि।।

इति।।२३४।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विवृति

यादृशा मन्यत(न्य) इत्येवमादयः तादृशोऽयमपीति इवशब्द उ(मु)पमाल(पल)भ्योपमाशङ्का(ं) मा कार्षुरित्यर्थः।।

उपमासूचकत्वेन दर्शित इवशब्दः उत्प्रेक्षायामपि साधारण इत्याह–**मन्य इति।।**

मन्य इति। न केवलं उपमाया एव द्योतक इवशब्दः उत्प्रेक्षाया अपि।।२३४।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रीत्युत्पादनयोग्यस्य रूपस्यात्रोपबृंहणम्।
अलङ्कारतयोद्दिष्टं निवृत्तावपि तत् समम्॥२३५॥

रत्नश्री

प्रीतेरुत्पादने करणे योग्यास्यानुरूपस्य स्वभावस्यान्दोलितेत्यादिनोद्भावितस्य सुरभित्वादेरुपबृंहणं प्रतिसंस्करणं यदेतत्, तदत्र प्रयोगेऽ[लं]कारतया काव्यभूषणरूपेण उदिष्टं विवक्षितं विशेषरूपत्वात्। न पुनरनेनैतत् क्रियते इत्यर्थमात्रं तस्य अलङ्कार्यत्वात्। अयं भावकार्यः कारकहेतुरपाकृतः, प्रीतिसत्ताकरणात्। यदेतद्भावकारि दर्शितं रूपं तदिदं निवत्तावभावेऽपि कार्ये न केंवलं भावे। समं तुल्यम्, अभावस्यापि कस्यचित् तेन करणादिति॥

तददाहरति–

हृदयङ्गमा

हेतुसूक्ष्मलवानामलङ्कारत्वं नासिद्धमिति सूचयन् हेत्वलङ्कारमाह, हेतुरिति।–हेतुः, सूक्ष्मः, तथा लेशः लव इत्युद्देशवाक्येनोक्तः, एते त्रयः वाचाम् उत्तमभूषणम् उत्कृष्टालङ्काराः। (एतेषामलङ्कारत्वमनङ्गीकुर्वतो भामहादीन् प्रति कटाक्षोक्तिरियम्। येषामलङ्कारत्वं न सिद्धं तेषामुत्तमालङ्कारत्वमेवास्माभिर्दृश्यते न त्वलङ्कारमात्रत्वमित्युत्तमशब्देन सूच्यते। एषामनलङ्कारत्वमुक्तं यथा, –"हेतुश्च सूक्ष्मलेशौ च नालङ्कारतया मताः। समुदायाभिधेयस्य वक्रोक्त्यनभिधानतः॥" इति। ते च निर्हेतुताया दोषत्वकथनादवश्यवक्तव्येषु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हेतुहेतुमद्वाक्यार्थेषु नालङ्कारत्वमिच्छन्ति, तथा वैचित्राभावात् सूक्ष्मस्य अपह्नुत्यलङ्कारेणैकविषयस्य लवस्यापि अलङ्कारत्वं नाङ्गीकुर्वन्ति। नैतदाचार्य्यादीनामभिमतमित्यभिप्रायः)। हेत्व-लङ्कारलक्षणमतिप्रसिद्धतया नाभिधाय प्रथमं तद्भेदानेव दर्शयति, कारकेत्यादि। –तत्र हेतू द्विविधौ कारकः ज्ञापकश्च। (हेतुत्वञ्च सिषाधयिषितार्थसाधकत्वम्। उक्तञ्च, –"सिषाधयिषितार्थस्य हेतुर्भवति साधकः। कारको ज्ञापक इति द्विधा सोऽप्युपजायते।। प्रवर्त्तते कारकाख्यः प्राक् पश्चात् कार्य्यजन्मतः। पूर्वः शेष इति ख्यातस्तयोरेव विशेष्यता।। कार्य्यकारणभावात् वा स्वभावात् वा नियामकात्। अविनाभावनियमादविनाभावदर्शनात्। ज्ञापकस्य च भेदोक्तिर्वेद्या पूर्वोक्तिदर्शनात्।।" इति। तत्र सिषाधयिषतः क्रियारूपार्थसाधकः कारकः वस्तुज्ञानरूपार्थसाधकश्च ज्ञापको हेतुरिति लक्षणमवधेयम्। तयोर्लक्षणमुक्तं भोजराजेन, –"यः प्रवृत्तिं निवृत्तिञ्च प्रयुक्तिञ्चान्तराविशन्। उदासीनोऽपि वा कुर्य्यात् कारकं तं प्रचक्षते।। द्वितीया च तृतीया च चतुर्थी सप्तमी च यम्। क्रियानाविष्टमाचष्टे लक्षणं ज्ञापकश्च सः।।" इति। एवञ्च साधयितुमभिप्रेतार्थस्य कारकज्ञापकान्यतमेन साधने वैचित्राप्रतीतिः हेत्वलङ्कार इति लक्षणम्)। तौ च कारकज्ञापकौ, अनेकविधौ बहुप्रकारौ, उदाहरणेषु ज्ञातव्यौ इति शेषः। (अस्मिंश्च हेत्वलङ्कारे मतान्तरोक्तस्य काव्यलिङ्गस्य कार्य्यकारणभावोक्तार्थान्तरन्यासस्य तथा अनुमानस्य च अन्तर्भावात् न पृथगुक्तिरिति बोध्यम्। दर्पणकारस्तु, –"अभेदेनाभिधा हेतुर्हेतोर्हेतुमता सह" इति लक्षणमाह। स च हेतुहेतुमतोरभेदोक्तिरूपो हेतुरस्मिन् मते अतिशयोक्तिरेवेति ध्येयम्)।।२३५।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रभा

अथ क्रमप्राप्तं हेत्वाद्यलंकारं प्रशंसापूर्वकं लक्षयति–**हेतुश्चेति।** हेतुसूक्ष्मलेशाभिधानास्त्रयोलंकारा वाचाम् वागर्थस्य उत्तमभूषणम् प्रधानालंकारः। भामहेन–

हेतुश्च सूक्ष्मो लेशोथ नालंकारतया मतः।
समुदायाभिधानस्य वक्रोक्त्यनभिधानतः।। (२.८६)

इति अलंकारत्रयं चमत्कृतिशून्यत्वेन प्रतिषिद्धमस्ति। समुदायाभिधानस्य वाक्यार्थस्य। वक्रोक्त्यनभिधानतो वक्रोक्तिश्चमत्कृतिविशिष्टोक्तिः तस्य अनभिधानतः अनुल्लेखात् चमत्कृतिशून्यत्वादित्यर्थः। एते त्रयोलंकारा न भवन्ति इति तदाशयः। आचार्यदण्डिनो मते अत्र चमत्कृतिर्वर्तते अतो विशेषमभिधत्ते वाचामुत्तमभूषणमिति। लेशः उद्देशवाक्ये लवसंज्ञयाभिहितः। तत्र उद्देशवाक्यानुरोधेन प्रथमं हेतुप्रभेदान् दर्शयति। लक्षणं तु प्रसिद्धार्थानुयायि इति पुनः नोक्तम्। तच्च आग्नेये–सिषाधयिषितार्थस्य हेतुर्भवति साधकः (३४४.२९) इति निरूपितमस्ति। भोजराजेनापि–क्रियायाः कारणं हेतुः (३.१२) इति दर्शितः। सोयं हेतुर्द्विविधः। कारकः ज्ञापकश्च इति। करोति निष्पादयति भावमिति क्रियासंपादको हेतुः कारकः। ज्ञापयति बोधयति कारणान्तरनिष्पन्नं भावमिति च ज्ञापकः। अग्निर्धूमस्य कारको हेतुर्धूमश्चाग्नेर्ज्ञापकः। अथवा मृदा घटं करोतीति कारकः। शास्त्रेण तत्त्वं जानातीति ज्ञापकः। उक्तं हि भोजराजेन–

यः प्रवृत्तिं निवृत्तिं च प्रयुक्तिं चान्तरा विशन्।
उदासीनोपि वा कुर्यात् कारकं तत् प्रचक्षते।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्वितीया च तृतीया च चतुर्थी सप्तमी च यम्।
क्रियानाविष्टमाचष्टे लक्षणं ज्ञापकश्च सः।। (३.१३१) इति।

तौ च कारकज्ञापकौ हेतू प्रवृत्तिनिवृत्त्यादिभेदेन तथा द्वितीयातृतीयादिविभक्तिदर्शितभेदेन। अनेकविधौ अनेकप्रकारौ। इति तदर्थः। एषामुदाहरणानि सरस्वतीकण्ठाभरणे द्रष्टव्यानि। अस्मिन्नेव हेत्वलंकारे काव्यलिङ्गानुमानयोस्तथा कार्यकारणमूलार्थान्तरन्यासस्य च संग्रहो भवति इति ते न पृथक्तया दर्शिता आचार्येण दण्डिना। अप्पय्यदीक्षितैः–

हेतोर्हेतुमता सार्धं वर्णनं हेतुरुच्यते।
हेतुहेतुमतोरैक्यं हेतुं केचित् प्रचक्षते।। इति।

द्विप्रकारको हेत्वलंकारो निर्दिष्टः। तत्र प्रथमः अतिशयोक्त्यलंकारे अन्तर्भवति। द्वितीयश्च न चमत्कारावह इति तदुभयमपि अलंकारतया न मन्यन्ते अपरे।।२३५।।

विवृति

इति उत्प्रेक्षाचक्रम्।।

हेतुसूक्ष्मलेशामु(नु) द्दिश्य हेतोः कारकज्ञापकभेदाद्द्वैविध्यमुद्दिशति कारकज्ञापकौ हेतू इति। करोतीति कारको यमा(था)बीजमङ्कुरस्य जनकं कारको हेतुरुच्यते। समवाय्यसमबायिनिमित्तभेदात् त्रिधेति केचित्। अपरे पुनरन्तरङ्ग(बहिरङ्ग?)भेदात् त्रि(द्वि)विधो हेतुः कारक इत्याहुः। ज्ञापयत्यवबोधयत्यतीतं भावि समकालं वा परोक्षं वा(व)स्त्विति ज्ञापकः। यथा परोक्षमग्निमध्यक्षो धूम इत्यलमतिप्रसङ्गेन। तौ च उभावपि हेतू न नै(अने)कविधौ। यथेत्युदाहरति।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हेतुं लक्षयिष्यन् भामहेनोक्तं–'हेतुश्च सूक्ष्मलेशौ च नालङ्कारतया मताः' –इत्येतत् प्रतिक्षिपति–हेतुश्चेति। उत्तमभूषणं इति प्रत्येकमभिसम्बन्धः। क्रियायाः कारणं हेतुः इति सामान्यलक्षणं मत्वा तं विभजते–**कारकेति।** तौ कारकज्ञापकौ हेतू भावरूपत्वेन अभावरूपत्वेनभावरूपकार्यत्वेन(अभाव....त्वेन?) चित्रहेतुत्वेन च बहुविधौ।।

प्रागुद्दिष्टानामपि हेतुसूक्ष्मलेशानां पुनरुद्देशेन तेषां अलङ्कारान्तरात् उत्कर्षं कथयति–**हेतुश्चेति।** तत्र हेत्वलङ्कारमाह। हेतुलक्षणन्तु कारकत्वेन ज्ञापकत्वेन च द्विप्रकारमित्याह–कारकज्ञापकौ हेतू इति। तौ एकैकशः अनेकप्रकारौ इत्याह–तौ चेति।।२३५।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चन्दनारण्यमाधूय स्पृष्ट्वा मलयनिर्झरान्।
पथिकानामभावाय पवनोऽयमुपस्थितः॥२३६॥

रत्नश्री

चन्दनानामरण्यं वनमाधूय आन्दोलयित्वा सौरभ्यं मान्द्यं चानेन सूचितम्। शैत्यमुद्भावयति-मलये महीधरे निर्झरान् सानुदेशपातिनी वारिधाराः स्पृष्ट्वा आमृश्य अयं दक्षिणः पवनो मनोहरः पथिकानां विरहिणामभावाय निधनार्थमुपस्थितो विजम्भत इति॥

कथमेवंप्रीतिकरो मारुतो मृत्यवे भवतीत्याह-

प्रभा

तत्र कारकहेतुमुदाहरति-**अयमिति।** आन्दोलिताः सलीले व्याधूताः प्रौढानां चन्दनद्रुमाणां पल्लवा येन सः। अनेन वायोः सौगन्ध्यशैत्यादयो धर्मा दर्शिताः। एतादृशो यो मलयमारुतः स सर्वस्य प्रीतिमुत्पादयति। अत्र मलयमारुतः प्रीत्युत्पादने कारकहेतुः। स च आन्दोलितप्रौढचन्दनद्रुमपल्लव इति विशेषणेन सविशेषं चमत्कारमावहति। अत एतादृशचमत्कृतिविशिष्टहेतूपादाने हेत्वलंकारो युक्त एव। यत्र च कारकं न चमत्कारावहं निर्दिष्टं तत्र नायमलंकारः। यथा गौश्चरतीति॥२३६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अभावसाधनायालमेवंभूतो हि मारुतः।
विरहज्वरसम्भूतमनोज्ञारोचके जने॥२३७॥

रत्नश्री

एवंभूत आधूतचन्द[ना]रण्यः स्पृष्टमलयनिर्झरो रम्यो मारुतः अभावस्य दशम्याः दशायाः साधनाय करणार्थम् अलं समर्थः। हिशब्दो वाचोयुक्तौ प्रसिद्धौ वा। कस्मिन् विषये? मनोज्ञानि रम्याणि रागजनकानि वस्तूनि मलयमारुतादीनि तेषु अरोचकं विद्वेषः। विरहः प्रियजनवियोगो ज्वरः सन्तापरूपत्वात् ततः संभूतं जातं मनोज्ञारोचकं यस्य जनस्य तस्मिन् विषये तस्या[71b]भावं साधयति। स हि तादृशः पवनो विरहज्वरमतितरां वर्द्धयन् निधनं विधत्ते विरहिणाम्। अयमभावकार्यः कारकहेतुः पथिकाभावकरणादिति॥

इह तावद्भावाभावरूपेण द्विधा कार्यम्। तत्राभावरूपं कार्यं निर्वर्त्यविकार्यप्राप्यभेदेन त्रिधा भिद्यते। अभावरूपं तु प्रागभावादिरूपेण चतुर्धा। तत्र भावत्रिविधे कार्ये हेतुव्यापारं निरूपयन्नाह—

हृदयङ्गमा

कारकहेतुमुदाहरन्नाह, अयमित्यादि।—आन्दोलिताः आधूताः, प्रौढ़ाः परिणताः, ऋतुराजस्य वसन्तस्य परिणामेनेति भावः, चन्दनद्रुमस्य पल्लवा येन तादृशः, अयं मलयमारुतः सर्व्वस्य प्रीतिम् उत्पादयति। (अत्र मलयमारुतस्य प्रीत्युत्पादनक्रियायाः कारकत्वम् आन्दोलितेत्यादिविशेषणेन मान्द्यसौगन्ध्यशैत्यादिप्रति-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पादनात् समधिकं वैचित्रामावहति सहृदयानामिति हेत्वलङ्कारः)। लक्षणं सङ्गमयति, प्रीत्युत्पादनेति।–प्रीत्युत्पादनयोग्यस्य आनन्दजननसमर्थस्य, रूपस्य प्रोक्तविशेषणविशिष्टस्य कर्त्तुरित्यर्थः, अत्र उक्तोदाहरणे, उपवृंहणं वैचित्राजनकतया कीर्त्तनम्, अलङ्कारतया उद्दिष्टं हेत्वलङ्कारत्वेन निर्द्दिष्टं, वैचित्रास्य प्रतीतेरिति भावः, (इत्थञ्च वैचित्र्याभावे नायमलङ्कार इत्यायातम्) तत् उपवृंहणं, निवृत्तावपि निषेधेऽपि, समं प्रवृत्तितुल्यम्। (क्रियायाः प्रवृत्तौ उक्तोदाहरणमेव। निवृत्तौ यथा, –"मुग्धे! तव मुखामोदलोलुपो मधुपो भ्रमन्। कर्णिकाकमलं फुल्लमपि नाभिसरत्ययम्।।" इति। अत्र अभिसरणक्रियाया निषेधः)।।२३६।। ।।२३७।।

प्रभा

उदाहरणस्य अलंकारत्वं प्रतिपादयति–**प्रीत्युत्पादनेति।** अत्र अस्मिन् श्लोके प्रीत्युत्पादनयोग्यस्य आह्लादप्रतीतिसमर्थस्य रूपस्य वर्णनस्वरूपस्य उपबृंहणं वैचित्र्यजनकत्वेनोपन्यासः अलंकारतया उद्दिष्टं निर्दिष्टः। वैचित्र्यस्य प्रतीयमानत्वाद् अत्रालंकारता इष्टैवेति भावः। अयं हेतुरुत्पादनक्रियायां दर्शितः। निवृत्तौ अपि क्रियानिवृत्तावपि हेतुनिर्देशे तत् समम् क्रियाप्रवृत्तिवदत्रापि हेत्वलंकार इति भावः।।२३७।।

विवृति

आन्दोलिताः (कं) पिताः अप्रौढाः बालाः चन्दनद्रुमपल्लवाः येन स तथाभूतो मलयमारुतो लोकस्य प्रीतिमुत्पादयति।।

इति जनमनःप्रीतिजननहेतु(तो)रेवंविधस्य पवनस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हेतुत्वमुक्तम्। तथा निवृत्तावपि अभावेऽपि जन्ये तद्धेतुकं(त्वं) सममस्य हेतोः। एतदुक्तं भवति–यथा भावो भा(वा)त् भवत्येव उ(म)भावो वि(ऽपि) प्रध्वंनो भावा(प्रध्वंसाभावो) भावादेव भवति। अयं तु विशेषः। कारणत्रयजन्यो भावः। अभावः पुनर्निमित्तमात्रादिति।।

भावरूपकार्यं हेतुं दर्शयति–अयमिति। हेतोः अलङ्कारत्वप्रत्याख्यायिनं भामहं प्रत्याह–प्रीत्युत्पादनेति। अत्र दक्षिणमारुतस्य आन्दोलितप्रौढचन्दनद्रुमपल्लवः इति विशेषणं हेत्वलङ्कारतया उक्तम्। एतद्विशेषणनिवृत्तावपि दक्षिणमारुतस्य हेतुत्वमात्रं सिद्धम्; तत्र नालङ्कारः।।

उदाहरति–अयमिति। मलयमारुतस्वरूपवर्णनस्य प्रीत्युत्पादनयोग्यत्वं च प्रयोजनमित्याह–प्रीतीति। निवृत्तावपि तत् समम्–इत्यत्र अपिशब्देन केवलं प्रवर्तकहेतोरिव निवर्तकहेतोरपि गुणादिवर्णनं कार्यम् इत्याह।।२३६–२३७।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निर्वर्त्ये च विकार्ये च हेतुत्वं तदपेक्षया।
प्राप्ये तु कर्मणि प्रायः क्रियापेक्षैव हेतुता॥२३८॥

रत्नश्री

निर्वर्त्यं यदसदेव प्रागभावरूपेण व्यवस्थितं क्रियते घटादिवत्। यस्य सत एव अवस्थान्तरं क्रियते तद्विकार्यम्। लूयमानकाण्डादिवत्। तस्मिन् निर्वर्त्ये विकार्ये च कर्मणि विषये हेतुत्वं कारकत्वं तयोर्निर्वर्त्यविकार्ययोरपेक्षया समाश्रयणेन हेतुत्वं जनकत्वं द्रष्टव्यम्, द्वयोस्तथोत्पाद्यत्वात्। वस्तुस्वरूप एव कारकव्यापारो न क्रियामात्रे। प्राप्यते क्रियया संबध्यते केवलं न निर्वर्त्यते नापि विक्रियते वेदवदध्ययनेनेति प्राप्यम्। तत्र कर्मणि व्याप्ये हेतुता कारकत्वं क्रियां व्यापारं तद्विषयामपेक्षते आश्रयतीति। क्रियापेक्षैव न कर्मस्वरूपापेक्षा। अत्रापि क्रियासंबन्धनं रूपान्तरं क्रियत इति विकार्यत्वम् अस्तीति चेदाह-प्राय इति। यद्यपि वस्तुगतिरीदृशी तथापि प्रायो बाहुल्येनैव प्रतीयत इत्यर्थः॥

कीदृशो निर्वर्त्यहेतुरिति पूर्वोक्तमनुस्मारयन् आह-

हृदयङ्गमा

पूर्वं भावसाधने उदाहरणं दर्शयित्वा इदानीम् अभावसाधनाय उदाहरति, चन्दनेति। -अयं पवनः चन्दनारण्यं चन्दनवनम्, आधूय कम्पयित्वा, तथा मलयनिर्झरान् स्पृष्ट्वा, पथिकानाम् अभावाय नाशाय, उपस्थितः, तादृशस्य पवनस्य विरहिणामतीव दुःसहत्वादिति भावः॥२३८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रभा

निवृत्तौ उदाहरति–**चन्दनेति**। चन्दनारण्यम् चन्दनवनम् आधूय मलयनिर्झरान् स्पृष्ट्वा। वाक्यद्वयेन सौरभ्यशैत्यसंपत्तिरुपात्ता। अयं पवनः पथिकानां पान्थानां वियोगिनामित्यर्थः। अभावाय विनाशाय उपस्थितः। कामोद्दीपकत्वात् तान विशसितुं संप्राप्त इति भावः।।२३८।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हेतुर्निर्वर्तनीयस्य दर्शितः शेषयोर्द्वयोः।
दत्त्वोदाहरणद्वन्द्वं ज्ञापको वर्णयिष्यते॥२३९॥

रत्नश्री

हेतुर्निर्वर्तनीयस्य कर्मणो भावरूपस्याभावरूपस्य च हेतुः कारको दर्शित उदाहृतः। संप्रति शेषयोरनुक्तयोर्द्वयोः। विकार्यप्राप्ययोः सम्बन्धि उदाहरणयोर्द्वन्द्वं युगलं दत्त्वा प्रदर्श्य पश्चात् ज्ञापको हेतुर्वर्णयिष्यते उदाहरिष्यत इति॥

हृदयङ्गमा

अभावेति।–एवम्भूतः उक्तगुणसमन्वितः, मारुतः हि निश्चयेन, विरहज्वरेण सम्भूतः यः मदनाग्नि, तेन आतुरे जने, (अत्र षष्ठार्थे सप्तमौ) तादृशस्य जनस्य इत्यर्थः, अभावसाधनाय अलं समर्थः ("क्रियायाः साधको हेतुः" इत्युक्तलक्षणस्य कारकहेतोरुदाहरणं दर्शयित्वा अभावस्यापि तद्विशिष्टक्रिया-बोधकत्वेन साध्यत्वं दर्शयितुम् इदमुदाहरणान्तरम्, अभावस्य क्रियात्वाभावेऽपि साध्यत्वं दर्शयितुम् इदमुदाहरणान्तरम्, अभावस्य क्रियात्वाभावेऽपि साध्यत्वसम्भवात् अत्र नानुपपत्तिरिति बोध्यम्; तथा हि अभावाय इत्यत्र उपस्थित इति क्रियाया अध्याहारात् निमित्ततया अभावविशिष्टाया उपस्थितिक्रियाया एव साध्यत्वं, क्रियारहितस्य वाक्यत्वाभावादेव यत्र क्रियापदं नास्ति तत्र तदध्याहर्त्तव्यमेव। उक्तञ्च,–"यत्रान्यत् क्रियापदं न श्रूयते तत्र अस्तिर्भवतीत्यपरः प्रयोक्तव्यः" इति। ततश्च एवम्भूतस्य पवनस्य पथिकविनाशसाधनक्रियायां कर्त्तृत्वेनावेशात् कारक-हेतुभेदः)॥२३९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रभा

निवृत्तौ अलंकारत्वं संगमयति-**अभावेति।** एवंभूतः शैत्यसौरभ्यान्वितो मारुतो विरहज्वरेण विरहसंतापेन संभूतं जातं मनोज्ञे मनोहारिणि वस्तुनि अरोचकम् अरुचिर्यस्य तस्मिन् मनोज्ञवस्तुनि खिन्नस्येत्यर्थः। विरहज्वरसंभूतमदनाग्न्यातुरे जने इति पाठे तु विरहेण कान्ताया विरहेण ज्वरः संतापस्तेन संभूतो यो मदनाग्निर्मदनरूपः संतापातिशयविधायकोग्निस्तेन आतुरे रुग्णे। जने उपस्थितः सन् तेषाम् अभावसाधनाय सत्ताविरहसंपादनाय अलं समर्थः। एवं भावविरहरूपेण क्रियानिवृत्तावपि हेतुः साधको भवति। यथा भावसंपादनाय हेतुः साधकः तथा अभावायेति भावः। तथा च उभयत्रापि अलंकारत्वं बोध्यम्। केचित्तु क्रियानिवृत्तौ–

मुग्धे मुखामोदलोलुपो मधुरो भ्रमन्।
कर्णिकाकमलं फुल्लमपि नाभिसरत्ययम्।।

इति उदाजह्रुः। तथा तु मूले प्रथमोदाहरणं क्रियासाधकस्य द्वितीयमभावसाधकस्य इति च भेदं दर्शयामासुः। परम् उपक्रमानुरोधेन क्रियाया उत्पत्तिनिवृत्तिप्रदर्शनायैव एतदुदाहरणयुगलमिति भाति।।२३९।।

विवृति

तदुदाहरति–

चन्दनारण्यमाधूयेत्यादिविशेषणसमन्वितः पवनः पथिकानाम-भावायोपस्थितो मरणाय जात इति वच(पव)नो भावोऽभावस्य मरणस्य हेतुरुक्तः। निवृत्तावपि तत्सममिति इदमनेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द(निद)र्शितम्। ऋजुः(जु)।। विरही(हो)ज्वर इव विरहज्वरः विरहो ज्वरत्वेन रूष्यते। विरहज्वरेण सम्भूतो जातो मनोज्ञेषु चन्दनचन्द्रिकादिष्वरोचकोऽरुचिर्यस्य सं विरहज्वरसम्भूत-मनोज्ञारोच(क)स्तस्मिन् जने। अभावसाधनायालमेवंभूतो हि मारुतः। सुगमम्।।

अभावरूपकार्यं हेतुं दर्शयति–**चन्दनेति।** सकलजनसन्तापहरो मलयमारुतः कथं पथिकप्राणह इत्याशङ्क्य आह–**अभावेति।** यानियानि वस्तूनि दयितासहितस्य प्रीतिकरणानि तानितानि तद्वियोगे सन्तापकराणि भवन्ति। विरहज्वरसन्तापकृतमनोज्ञ-पदार्थविषयकारोचकव्याधिमति जने मनोहरो मारुतः प्राणहरणाय अलम्।।

दर्शितस्तु प्रवर्तकहेतुः ; निवर्तकहेतुं दर्शयति–**चन्दनेति।** एतदेव व्याचष्टे–**अभावेति।** मनोज्ञेष्वपि वस्तुषु विरहज्वरार्तानाम् अरोचकं अरुचिः भवति। रोगाख्यायां ण्वुल् बहुलं इति बहुलग्रहणात् नपुंसकत्वम्।।२३८–२३९।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उत्प्रवालान्यरण्यानि वाप्यः सम्फुल्लपङ्कजाः।
चन्द्रः पूर्णश्च कामेन पान्थदृष्टेर्विषं कृतम्॥२४०॥

रत्नश्री

उद्गतानि प्रवालानि पल्लवानि येषां तान्यरण्यानि वनानि। संफुल्लं विकसितं पङ्कजं यासां ताश्च वाप्यो दीर्घिकाः। चन्द्रः पूर्णः पर्याप्तः। सर्वमेतन्मनोज्ञं वस्तु पान्थानां विरहिणां विरहज्वरसम्भूतमनो[विकारयुक्त]ानां दृष्टेश्चक्षुषो विषम् अविषह्यत्वात् कृतं विषरूपेण परिणामितम् कामेन मन्मथेन, तद्वशात्। तेषां तद्दृष्टिमूर्छाकरत्वात्। जितमन्मथानां तु किं तैरिति कामेनेत्युक्तम्। अयं विकार्यहेतुः कामः, तेन तादृशाम् अरण्यादीनां सतामेव पान्थदृष्टिविषरूपेण विकृतत्वादि[72a]ति॥

हृदयङ्गमा

क्रियापेक्षया हेतुत्वम् उदाहृतं, सम्प्रति कर्मापेक्षयाऽपि सम्भवति इति दर्शयितुमाह, निर्वर्त्ये चेति। –निर्वर्त्ये च विकार्य्ये च कर्म्मणि, तदपेक्षया हेतुत्वं तत्तत्कर्मापेक्षी हेतुरित्यर्थः, प्राप्ये तु कर्मणि प्रायः बाहुल्येन, हेतुता क्रियापेक्षैव क्रियाया अपेक्षा यत्र सा तथाभूतैव, क्रियापेक्षी हेतुरित्यर्थः। (तत्र निर्वर्त्यं पूर्वमसदेव क्रियया जन्यम् अथवा पूर्व्वं सदेव क्रियया प्रकाश्यमानमिति द्विविधम्। यथा,–कटं करोति, पुत्रं प्रसूते इत्यादि। विकार्य्यं यत् सदेव वस्तु क्रियया पूर्व्वरूपस्योच्छेदेनानुच्छेदेन वा रूपान्तरमापाद्यमानम्। यथा,–काष्ठं दहति, सुवर्णं कुण्डलं करोति इत्यादि। उक्तञ्च,–"यदसज्जायते पूर्वं जन्मना यत् प्रकाशते।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तन्निर्वर्त्यं, विकार्य्यञ्च कर्म द्वेधा व्यवस्थितम्।। प्रकृत्युच्छेदसम्भूतं किञ्चित् काष्ठादिभस्मवत्। किञ्चित् गुणान्तरोत्पत्त्या सुवर्णादिविकारवत्।।'' इति। प्राप्यन्तु कर्त्तुः क्रियया यत्र व्याप्तिमात्रं प्रतीयते तत्, न तु विकृत्यादिगुणान्तरितमित्यवधेयम्। तदुक्तं, –''क्रियाकृतविशेषाणां सिद्धिर्यत्र न गम्यते। दर्शनादनुमानाद्वा तत् प्राप्यमिति कथ्यते।।'' इति। जौमरास्तु अनीप्सितमपि कर्मेच्छन्ति। यथा,–दुःसंसर्गं परिहरतीत्यादि। अत्रापि क्रियापेक्षो हेतुरिति बोध्यम्)।।२४०।।

प्रभा

वाक्ये तावत् केचन हेतवः क्रियार्थसंपादकाः केचन कर्मार्थसंपादकाः। तत्र क्रियार्थसंपादकेषु कारकज्ञापकमिति भेदद्वयं परिकल्प्य कारकस्य उत्पत्तिनिवृत्तिप्रकारद्वयमभिधाय उदाहरणद्वयेन तद्दर्शितम्। इदानीं कर्मार्थसंपादकान् हेतून् प्रदर्शयितुमाह–**निर्वर्त्ये चेति।** निर्वर्त्ये विकार्ये च कर्मणि इति शेषः। तदपेक्षया निर्वर्त्यविकार्यकर्मापेक्षया हेतुत्वं भवति तत्संपादनाय हेतवो भवन्ति। प्राप्ये कर्मणि तु प्रायो बाहुल्येन। क्रियापेक्षैव क्रियाया एव अपेक्षा नान्यो हेतुस्त्रोपेक्षितो भवति। अतस्तत्र क्रियाया अपेक्षा एव हेतुता। क्रियैव हेतुर्भवतीत्यर्थः। अयमाशयः। प्राचीना वैयाकरणाः कर्मणस्त्रैविध्यं दर्शयन्ति निर्वर्त्यं विकार्यं प्राप्यं चेति। तत्र निर्वर्त्यं पूर्वमसतः करणरूपम् अथवा अलक्षितस्य प्रकाशानुरूपम्। यथा पटं करोति पुत्रं प्रसूते इत्यादि। विकार्यं द्विविधं प्रकृतेरुच्छेदकं प्रकृतेर्गुणान्तराधायकं च। यथा काष्ठं भस्म करोति सुवर्णं कुण्डलं करोति इति। यत्र क्रियाकृतः परिणामो न दृश्यते न वानुमीयते तत्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्राप्यम्। यथा सूर्यं पश्यति ग्रामं गच्छति इति। अत्र सूर्यग्रामयोः क्रियाकृतविशेषो न दृश्यते। अर्वाचीना अनीप्सितमिति चतुर्थं भेदं कल्पयन्ति। यथा पापं त्यजति इति। तदेतदुक्तं वैयाकरणैः यथा–

यदसज्जायते पूर्वं जन्मना यत् प्रकाशते।
तन्निर्वर्त्यं विकार्यं च कर्म द्वेधा व्यवस्थितम्।

प्रकृत्युच्छेदसंभूतं किंचित् काष्ठादिभस्मवत्।।
किंचिद्गुणान्तरोत्पत्त्या सुवर्णादिविकारवत्।।

क्रियाकृता विशेषाणां सिद्धिर्यत्र न गम्यते।
दर्शनादनुमानाद्वा तत् प्राप्यमिति कथ्यते।। इति।

तथा च निर्वर्त्यविकार्ययोर्हेत्वोः पूर्वावस्थातो विशेषदर्शनात् तत्र अन्येहेतोरपेक्षा भवति। प्राप्ये तु पूर्वावस्थातो न कोपि विशेषो दृश्यते केवलक्रियापेक्षैव कर्मत्वसंपादिका भवति। सूर्यं पश्यति ग्रामं गच्छति इत्यादौ केवलक्रिययैव तेषां कर्मत्वसिद्धिः। कटं करोति इत्यादिषु तु भवति अन्यसाधनापेक्षा। अतो निर्वर्त्ये च विकार्ये च तदपेक्षया तत्संपादनाय अन्यार्थस्य हेतुत्वं भवति तयोर्जन्यत्वात्। प्राप्ये तु क्रियैवापेक्ष्यते नान्यत् किमपि तस्य जन्यत्वाभावात्। अर्वाचीनैः स्वीकृते अनीप्सितेपि क्रियापेक्षैव ज्ञेया। स च हेतुर्निवृत्तिविषयः।।२४०।।

विवृति

इह खलु क्रियया व्याप्यं कर्म। तच्च त्रिविधं निर्वर्त्यं विकार्यं प्राप्यं चेति। तत्रासतः प्रादुर्भावो(वे) निर्वर्त्यम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदुक्तम्–प्रागसतस्सत्तासम्बन्धः स्वकारणसमवायो वा(.....?)। कार्यं निर्वर्त्य कर्मोच्यते। विक्रियत इति विकार्यम्। सतो गुणान्तराधानं विकारः। यथा हस्तौ कुरु पादौ कुर्वित्युक्ते नापूर्वप्रादुर्भावे(वो) घटस्येव। किन्तु मृदानेति गम्यते। तस्मिन्नुभयत्र कर्मणि हेतुत्वं तदपेक्षया उभयकर्मापेक्षया। प्राप्यत इति प्राप्यं यथा ग्रामं गच्छतीत्यत्र ग्रामो गमनक्रियया प्राप्यत इति कर्म। विषयभूतमपि प्राप्यमेव। तथाहि–आदित्यं पश्यति हिमवन्तं श्रृणोतीति दर्शनश्रवणक्रियाभ्यां आदित्यहिमवतो वाच्य(व्याप्य)मानत्वादेव प्राप्यकर्मता। तस्मिन् प्राप्ये कर्मणि प्रायो बाहुल्येन क्रियापेक्षैव हेतुता। क्रियापेक्षमेव प्राप्यं कर्म हेतुर्भवति। यथा ग्रामः प्राप्यस्सन् गमनक्रियाया हेतुः। आदित्यहिमवन्तौ दर्शनश्रवणक्रिययोरिति।।

निर्वर्त्य इति। निर्वर्त्यविकार्यप्राप्यभेदात् (?) त्रिविधो हेतुः। तत्र निर्वर्त्ये विकार्ये च कर्मणि निर्वर्तकविकारकयोः हेत्वोः तत्तत्कर्मापेक्षया हेतुत्वम्। प्राप्ये तु कर्मणि तद्गतविशेषजननाभावात् न प्राप्यं प्रति हेतुत्वम्। प्राप्तिक्रिया जायत इति तदपेक्षया हेतुत्वम्। प्रायःशब्देन बुद्धिसुखदुःखादिषु च प्राप्येषु तदपेक्षयैव हेतुत्वम् इति ज्ञाप्यते।।

हेतुहेतुमतोः कः सम्बन्धः इत्यत्राह–**निर्वर्त्य इति।** अस्यार्थः–निर्वर्तनं नाम अनुत्पन्नस्य उत्पादनम्। भाविनिष्पादनं निर्वर्त्यम्। तथा च घटं करोति इत्यादौ घटादयः निर्वर्त्याः। विकृतिर्नाम दशान्तरापत्तिः। एष्यद्दशान्तरं विकार्यम्; तथा च ओदनं पचति इत्यादौ ओदनादयः, अर्थतः तण्डुलादयः विकार्याः। निर्वर्त्ये

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तु कर्मणि तदपेक्षया निर्वर्त्यकर्मसिद्धिश्रद्धया, हेतुत्वं कर्तृत्वं इति यावत्। एवं विकार्येऽपि। प्राप्ये तु कर्मणि–अत्र तुशब्दः पूर्वस्मात् वैषम्यं दर्शयति। प्राप्ये कर्मणि स्वरूपस्पृशः कर्तव्यस्य अभावात्, प्राप्तिमात्रस्यैव अपेक्षितत्वात्, क्रियापेक्ष एव हेतुभावः न कर्मापेक्षः। प्राप्यम्–ग्रामं गच्छतीत्यादौ ग्रामादयः प्राप्याः। क्रियावत्त्वं नाम उपयत्र साधारणमेव।।२४०।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मानयोग्यां करोमीति प्रियस्थाने कृतां सखीम्।
बाला भ्रूभङ्गजिह्माक्षी पश्यति स्फुरिताधरम्॥२४१॥

रत्नश्री

मानः प्रातिकूल्यं प्रियविषयं भ्रूभेदाव्याहारादिरूपं तत्र योग्ये दृष्टे तस्मिन् मानं निर्वाहयामि न वेत्येवंरूपमीमांसाभ्यासो वा तां करोमीति कर्तुं प्रागेव माननिर्वाहं परिक्षमाणा सती बाला कादिङ्गना भ्रुवोर्भङ्गेन विकारलीलया जिह्ममारोपकोपकुटिलम् अक्षि यस्याः सा तादृशी पश्यति। स्फुरिताधरम् स्फुरितः कृतरोषलोलोऽधरो यस्मिन् दर्शन इति क्रियाविशेषणम्। किं पश्यति? प्रियस्य जीवितनाथस्य स्थाने भूमिकायां कृतां व्यवस्थापिताम् अयमसौ मे प्रिय इति तद्रूपेण परिकल्पितां सखींम् काञ्चित् पश्यतीति प्रकृतिं प्राप्य हेतुरयं निर्वर्तनविकारव्यतिरेकेण सखीविषयस्य दर्शनमात्रस्य बालया साधनादिति। एवं कारकहेतुस्त्रिधोदाहृतः॥

ज्ञापकमुदाहरन्नाह–

हृदयङ्गमा

हेतुरिति।–निर्वर्त्तनीयस्य कर्म्मणः, हेतुः दर्शितः, आन्दोलिते-त्याद्युदाहरणे इति शेषः, शेषयोः उक्तावशिष्टयोः, द्वयोः विकार्य्यप्राप्ययोरित्यर्थः, उदाहरणद्वन्द्वं दत्त्वा दर्शयित्वा, ज्ञापको हेतुः वर्णयिष्यते। (प्रतिज्ञेयं शिष्याणामुत्कण्ठावारणायेति बोध्यम्)॥२४१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रभा

हेतुरिति। निर्वर्तनीयस्य कर्मणः हेतुर्दर्शितः। अयमान्दोलितेत्युदाहरणे। तत्र प्रीतिरूपकर्मणो निर्वर्तनीयत्वात्। शेषयोर्द्वयोर्विकार्यप्राप्ययोरुदाहरणद्वन्द्वं दत्त्वा उदाहरणेन हेतुं विशदीकृत्य पश्चात् ज्ञापको हेतुर्वर्णयिष्यते वर्ण्यते।।२४१।।

विवृति

तत्र त्रिषु कर्मसु मध्ये निर्वर्तनीयस्य कर्मणो हेतुर्दर्शितः।

'अयमान्दोलिताप्रौढचन्दनद्रुमपल्लवः।
उत्पादयति लोकस्य प्रीति मलयमारुतः।।'

इत्यनेन श्लोको यथा– (केन भावस्य)

'चन्दनारण्यमाधूय स्पृष्ट्वा मलयनिर्झरान्।
पथिकानामभावाय पवनोऽयमुपस्थितः।।

इत्येननाभावस्य हेतुरुदाहृतः। शेषयोर्विकार्यप्राप्ययोर्द्वयोः कर्मणोर्दत्वा उदाहरणद्वन्द्वं ज्ञापको हेतुर्वर्णयिष्यते मया।।

हेतुरिति। पूर्वोदाहरणद्वयेन भावरूपाभावरूपनिर्वर्तनीयकार्यस्य हेतुः दर्शितः। शेषयोः विकार्यप्राप्ययोः उदाहरणे दत्त्वा ज्ञापको वर्णयिष्यते।।

प्रागुक्तं उदाहरणद्वयं निर्वर्तनीयस्य द्रष्टव्यम्। विकार्यप्राप्ययोरपि उदाहरणे दर्शयित्वा ज्ञापकं वर्णयिष्यामि इत्याह **हेतुरिति**।।२४१।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गतोऽस्तमर्को भातीन्दुर्यान्ति वासाय पक्षिणः।
इतीदमपि साध्वेव कालावस्थानिवेदने॥२४२॥

रत्नश्री

अर्कः सूर्यः अस्तम् अदर्शनं गतः। भाति इन्दुः चन्द्र उदितः। पक्षिणश्च वासाय निलयार्थं वासं वा यान्ति इतस्ततः। इत्येवंविधमिदं लक्ष्यमनपेक्षिततादृशविशेषं स्वरूपकथनमात्रमपि प्रागेव प्रतिसंस्कृतमन्यत् साधु समीचीनं भूषणमेव नान्यथा। कुत्र? कालस्यावस्था अत्र प्रदोषलक्षणा तस्या निवेदने ज्ञापने सूर्यास्तमयादिना हि तदव्यभिचारिणा रजनीमुखमाख्यायते। इति ज्ञापकहेतुरयं द्रष्टव्यं इति। अनेन चेदं निषिद्धम्–

गतोऽस्तमर्को भातीन्दुर्यान्ति वासाय पक्षिणः।

इत्येवमादि किं काव्यं वार्तामेनां प्रचक्षते।।इति।

[काव्यालङ्कारे २.८७]

हृदयङ्गमा

विकार्य्यकर्महेतुं दर्शयति, उत्प्रबालानीति।–उत्प्रबालानि उद्गतपल्लवानि, अरण्यानि, सम्फुल्लानि पङ्कजानि यासु तादृश्यः, वाप्यः दीर्घिकाः, तथा पूर्णः चन्द्रश्च, कामेन मदनेन, पान्थदृष्टेः पथिकनयनस्य, विषं कृतं विषीभावरूपविकारं नीतम्, उक्तानामेव त्रयाणामतौवोद्दीपकतया सन्तापकत्वादिति भावः। (अत्र प्रकृतिभूतम् उक्तत्रयं विषीभावरूपं विकारमापादितमिति प्रकृतिविकृतिभावरूपस्यारोपस्य वैचित्राजनकत्वेन हेत्वलङ्कारत्वम्,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनेवंविधे सुवर्णं कुण्डलं करोतीत्यादौ विकारस्य सत्यतया वैचित्राभावान्नालङ्कारतेति बोध्यम्)।।२४२।।

प्रभा

विकार्यहेतुं दर्शयति–**उत्प्रवालानीति।** उद्गतानि प्रवालानि किसलयपल्लवादीनि येषु तानि। अरण्यानि वनानि। संफुल्लानि विकसितानि पङ्कजानि यासु ताः। वाप्यः दीर्घिकाः। पूर्णः पूर्णमण्डलः। चन्द्रः। एतत् सर्वं कामेन पान्थदृष्टेर्वियोगिनो नयनस्य। विषं कृतम् विषरूपेण परिणामितम्। दाहकत्वेन विषभावमापादितमित्यर्थः। अत्र अरण्यादिषु विषरूपविकारत्व-मारोपितमेव। तस्यैव चमत्कारित्वात्। अतः सुवर्णं कुण्डलं करोति इत्यादौ वास्तवविकारे नायमलकारः।।२४२।।

विवृति

तत्र विकार्यस्य कर्मणो हेतुत्वं तावदुदाहरति–

विकार्यकर्महेतुं दर्शयति–**उदिति।** उत्प्रवालत्वादिना विकृतानि अरण्यादीनि। कालेन वसन्तेन तत् सर्वं पान्थदृष्टिविषं कृतम्।।

विकार्योदाहरणम्–**उदिति।** अरण्यादीनां विषत्वापत्तिः दशान्तरापत्तिरिह विकृतिः। पान्थवैरिणा कामेन तत सर्वं तथा कृतं इति विकार्यकर्मापेक्षया हेतुत्वम्।।२४२।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अवध्यैरिन्दुपादानामसाध्यैश्चन्दनाम्भसाम्।
देहोष्मभिः सुबोधं ते सखि! कामातुरं मनः॥२४३॥

रत्नश्री

इन्दोः पादानामत्यन्तशिशिराणां किरणानाम् अवध्यैस्तैरनपनेयैः चन्दनाम्भसां मलयजरसचर्चोपचाराणामसाध्यैरवध्यैः प्रत्युत उद्दीपनैः यैर्देहस्योष्मभिः सन्तापैर्निमित्तैः तव कामेनातुरं मन्मथमथितम् मनः सुबोधं सुज्ञातं व्यक्तमवगम्यते। व्यवहितमपि तादृशां देहोष्मणां तथाविधमनोनान्तरीयकत्वात्। सखीत्यामन्त्र्यते॥

पन्थानमेवमनुसरद्भिरयमलङ्कारः काव्येषु लक्षणीय इत्यतिदिशन्नाह–

हृदयङ्गमा

प्राप्यहेतुं दर्शयति, मानयोग्यामिति।–बाला मुग्धा काचित्, भ्रुवोर्भङ्गेन जिह्मे अक्षिणी यस्याः सा, तथा स्फुरितः कम्पितः, अधरो यस्यास्तादृशी सती, मानयोग्यां मानाभ्यासम्, ("अभ्यासः खुरली योग्या" इत्यमरमाला) करोमीति, अभिप्रेत्येति शेषः, प्रियस्य स्थाने सकाशे, स्थितां सखीं पश्यति निरीक्षते। (अत्र सखीमिति प्राप्यकर्म बालायास्तद्विषयकदर्शनक्रियापेक्षया हेतुत्वात् विशेषणानां काल्पनिकत्वाञ्च हेत्वलङ्कारः)॥२४३॥

प्रभा

प्राप्यहेतुमुदाहरति–**मानयोग्यामिति।** मानयोग्यां मानाभ्यासं मानसूचकाङ्गिकभावाभ्यासमिति भावः। करोमि इति अभिप्रेत्य।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रियस्य स्थाने विषये स्थितां कल्पिताम्। सखीम्। बाला अनभ्यस्तमानशिक्षा अप्रगल्भा। भ्रुवोर्भङ्गेन जिह्मे वक्रे अक्षिणी यस्याः सा। स्फुरितः अधरः अधरोष्ठो यस्याः सा। एतादृशी भूत्वा पश्यति। अत्र पश्यति क्रियया सखी न निष्पाद्यते वा विक्रियते। अत एतत् प्राप्यं कर्म। तद्विषयकदर्शनक्रियापेक्षयैव बालाया हेतुत्वम्। तच्च तादृशसकोपनिरीक्षणादिभिरुपस्कृतं विशेष-चमत्कारमावहति। अतो हेत्वलंकारः।।२४३।।

विवृति

बाला भ्रूमङ्गजिह्माक्षी पश्यतीत्येतस्या दर्शनक्रियायाः सस्वीमित्येतत् कर्म हेतुरिति दर्शनक्रियापेक्षैव सखीमित्येतस्य कर्मणो हेतुता।।

प्राप्यकर्महेतुं दर्शयति—**मानेति।** दर्शनक्रियाप्राप्यत्वं सख्या दर्शनक्रियां प्रति हेतुत्वं बालायाः।।

प्राप्योदाहरणमाह—**मानेति।** प्रियस्थाने प्रेषितां सखीं उद्दिश्य बाला तावत् एवं कृतवती अहं मानाभ्यांस करोमि इति। एतदर्थं हृदि कृत्वा तां सभ्रूभङ्गं प्रेक्षितवती। अत्र प्राप्यता नाम तस्या भवति पश्यतिक्रियया या सखी प्राप्यते।।२४३।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इति लक्ष्याः प्रयोगेषु रम्या ज्ञापकहेतवः।
अभावहेतवः केचित् व्याक्रियन्ते मनोरमाः॥२४४॥

रत्नश्री

इत्येवंविधिना ज्ञापकाश्च ते हेतवश्चेति ज्ञापकहेतवो रम्या मनोहराः प्रयोगेषु काव्येषु लक्ष्या ज्ञातव्याः स्वयं च प्रयोक्तव्याः। तद् यथा–

[72b] निर्वृतिं परमां वक्ति वक्त्रं तव नितम्बिनि!

स्विन्नमुद्भिन्नमन्दाक्षमामीलल्लोललोचनम्॥

जृम्भितं श्वसितं कम्पः कार्श्यं मूर्छाकुलं वचः।

वदन्ति तव तन्वङ्गि! विरहज्वरवेदनाम्॥

दृष्टिरामन्थरा ताम्रा ताम्यत्तरलतारका।

रागाभिभवमाचष्टे मृगाक्षि! तव दुर्जयम्॥

वराङ्गि! तव दुर्वारमुखरस्तोकदूषणः।

सुरतोत्सवसंकल्पमाकल्पः कथयत्ययम्॥ इति।

एवं भावस्वभावहेतुरुदाहृतः। इदानीमभावाश्च हेतवश्चेति अभावहेतवः केचित् कतिपये न सर्वे, विकल्पानामानन्त्याद्, व्याक्रियन्ते उदाह्रियन्ते मनोरमा रसावहा इति॥

हृदयङ्गमा

ज्ञापकहेतुमुदाहरति, गत इति।–अर्कः अस्तं गतः, इन्दुः भाति,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पक्षिणः वासाय वासस्थानाय, यान्ति, (गमनार्थयोगे कर्मणि चतुर्थी) इति उक्तरूपम्, इदमपि गतोऽस्तमर्क इत्यादिकमपि, कालावस्थायाः कालविशेषस्य सन्ध्याया इत्यर्थः, निवेदने ज्ञापने, साधु एव वैचित्राजनकत्वात् उत्कृष्टोपाय इत्यर्थः। (अस्तगतदिवाकरादिः ज्ञापको हेतुः, ज्ञाप्या च सन्ध्या, अत्र तु ज्ञाप्यस्य अशब्दत्वात् प्रतीयमानत्वम्। सन्ध्या वर्त्तते इत्यादौ तु नालङ्कारता वैचित्राभावादिति बोध्यम्)।।२४४।।

प्रभा

एवं कारकहेतुं सप्रपञ्चं निरूप्येदानीं ज्ञापकहेतुमुदाहरति– **गतोस्तमिति।** अर्कः अस्तं गतः। इन्दुः भाति प्रकाशते। वासाय निवासस्थानाय पक्षिणो यान्ति। कालावस्थाया कालविशेषस्य सांयकालस्येत्यर्थः। निवेदने ज्ञापने। साधु एव चमत्कारजनकतया अलंकारसंपादनाय पर्याप्तमेव। ज्ञाप्यं क्वचित् शब्दोपात्तं क्वचिच्च प्रतीयमानं भवति। अत्र प्रतीयमानम्। साध्वेव इति एवकारेण प्रतीयमाने ज्ञापकस्यानुपादानाद् हेतोः कथं ज्ञापकता इति शङ्कामनेन निवार्यति इति ज्ञेयम्। संप्रति सन्ध्यासमयो वर्तते इति वाक्ये न वैचित्र्यम्। उक्तप्रकारेण कथने एव वैचित्र्यमिति अलंकारता।।२४४।।

विवृति

इदानीं ज्ञापकं हेतुमुदाहरति–

'गतोऽस्तमर्को भातीन्दुर्यान्ति वासाय पक्षिणः। इत्येवमादिकीं (किं) काव्यं वार्तामेनां प्रचक्षते' इति यदुक्तं भामहेन तदपाकरोति–'इतीदमपि साध्वेव कालावस्थानिवेदने।' कालो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

'रात्रिंदिवर्तवः' इति वक्ष्यति। तस्यावस्थाना(?)दिना-पगमस्तन्निवेश(द)ने अवबोधनमि(इ)ति।।

गत इति। गतोऽस्तमर्क इत्यादीनि वाक्यानि निशारम्भद्योतकानि। ज्ञापकहेतुमात्रं नालङ्कारः।।

ज्ञापकहेतूदाहरणमाह—**गत इति।** सूर्यास्तमयादिना कालविशेषः परिज्ञात इति सूर्यास्तमयादेः ज्ञापकत्वम्।।२४४।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनभ्यासेन विद्यानामसंसर्गेण धीमताम्।
अनिग्रहेण चाक्षाणां जायते व्यसनं नृणाम्॥२४५॥

रत्नश्री

विद्यानां गुणदोषविवेकभूमीनां त्रयीप्रभृतीनाम् चतुर्वर्गशास्त्राणां विदन्त्याभिः चतुर्वर्गमिति कृत्वा, अनभ्यासेन श्रुतचिन्ताभावना-लक्षणस्याभियोगस्याभावेन। अनभ्यस्तविद्योऽपि यदि वृद्धोपसेवी, तावतार्थेन मोक्ष्यते। यथोक्तम्–

न सज्जनाद् दूरतरः क्वचिद् भवेत्,
भजेत साधून् विनयक्रमानुगः।
स्पृशन्त्ययत्नेन हि तत्समीप[गं]
विसर्पणास्तद्गुणपुष्परेणवः॥

इति। तदपि नास्तीत्याहधीमतां शास्त्रज्ञानां नयव्यवहारिणामसंसर्गेण संसर्गस्य संगतेरभावेन धीमत्संसर्गरहितो-ऽपि यदि प्रविनीतः स्यात्, न विपद्यते। तदपि नास्ति। अक्षाणामिन्द्रियाणां चक्षुरादीनामापायिकविष [य]प्रवृत्तिरोधरूपस्य निग्रहस्य जयस्याभावेन च हेतुना नृणां पुसां व्यसनं विपत्तिर्जायते। नात्र संशयः। तस्माद्विद्याभ्यासादिमता पुंसा भाव्यम्। अत्र विद्याभ्या[साद्यै]रनुत्पादात् व्यसनं भावरूपं कार्यमुद्भवतीति भावकार्यः प्रागभावः कारकहेतुरिति॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हृदयङ्गमा

ज्ञाप्यस्य शाब्दत्वे उदाहरति, अबध्यैरिति। –हे सखि! ते तव, कामातुरं विरहाकुलं, मनः इन्दुपादानां चन्द्रकिरणानाम्, अबध्यैः अनाश्यैः, तथा चन्दनाम्भसां चन्दनाक्तजलानाम्, असाध्यैः अप्रतिकार्य्यैं, देहस्य उष्मभिः सन्तापैः, सुबोधं सुखेन ज्ञेयम्। (अत्र मनसः कामातुरत्वं ज्ञाप्यं, तच्च शाब्दं, देहतापाश्च ज्ञापकाः, तेषाञ्च चन्द्रकिरणचन्दनरसानपनेयत्वात् आतपजन्यत्वादिव्यावर्त्तनेन विरहस्यासाधारण्यप्रतिपादनात् वैचित्रा, वैचित्रास्यैव च अलङ्कारत्वम्)।।२४५।।

प्रभा

ज्ञाप्यस्य शब्दोपादाने ज्ञापकहेतुमुदाहरति–**अवध्यैरिति।** इन्दुपादानां चन्द्रकिरणानाम्। अवध्यैः अविनाश्यैः। चन्दनाम्भसां चन्दनोदकानां विलेपनानामित्यर्थः। असाध्यैः अप्रतिकार्यैः। देहोष्मभिः शरीरसंतापैः। हे सखि ते कामातुरं मदनपीडितम्। मनः सुबोधं सुखेन बोधो विकारबोधो यस्य तत्। एतादृशमस्तीति शेषः। अत्र च ज्ञाप्यं मनसः कामातुरत्वम् तच्छब्दोपात्तम्। ज्ञापकाश्च अप्रतिकार्या देहोष्माणः।।२४५।।

विवृति

द्वितीयमुदाहरणं दर्शयितुमाह–

सख्या मदन(नसः) कामार्ततावबोधे देहोष्माणो हेतवः।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ज्ञापकहेत्वलङ्कारं दर्शयति—**अवध्यैरिति।** अवध्यैरित्यादि-विशेषणविशिष्टैः देहोष्मभिः कामातुरं मनः सुबोधम्। इति भावहेतवः।।

अवध्यैरिति। अवध्यैश्चन्द्रपादानां इत्यादिभिः शरीरतापैः तप्तं मनः कामातुरं ज्ञायते इति तेषां ज्ञापकत्वम्।।२४५।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गतः कामकथोन्मादो गलितो यौवनज्वरः।
क्षतो मोहश्च्युता तृष्णा कृतं पुण्याश्रमे मनः॥२४६॥

रत्नश्री

कामो विषयो भोगः। तस्य तत्र वा कथा साभिलाषोऽभिलापः चेष्टा च तादृशी प्रशमपरिपन्थिनी। सैवोन्मादो विभ्रमः, विकारप्रपञ्चलक्षणत्वात्। स तावद् गतो विरतः। यौवंन तारुण्यम् कार्यपक्षपातिविनयस्वास्थ्यविरुद्धमत्यन्तरागपरिदाहकत्वात् ज्वरः। सोऽपि गलितो विगतः। मोहः संसारे दुःखात्मके सुखमिति विपर्यासः। सोऽपि क्षतः क्षीणः। तृष्णापि तदनुसारिणी विषयाशक्तिलक्षणा च्युता नष्टा। ततश्च पुण्याश्रमे धर्मविषये विरागैकरसे मनः [73a] चित्तं कृतं निवेशितमिति कश्चित्पश्चिमवयोवर्ती [73a] निर्विण्णः कथयति। अत्र कामोन्मादादीनामुत्पन्नानामेवास्तमयाद् धर्ममार्गे मतिर्जातेति भावकार्यः प्रध्वंसाभावः कारकहेतुरुदाहृत इति॥

हृदयङ्गमा

इतीति।–इति एवंरूपाः, ज्ञापकहेतवः रम्याः सहृदयचमत्कारकाः, प्रयोगेषु कवीनां निबन्धेषु, लक्ष्याः ज्ञातव्याः। [द्वितीया-तृतीया-चतुर्थी सप्तमीघटितलक्षणत्वेन भेदाश्चात्र न दर्शिताः। तदुक्तं भोजराजेन-, "द्वितीया च तृतीया च चतुर्थी सप्तमी च यम्। क्रियानाविष्टमाचष्टे लक्षणं ज्ञापकश्च यः॥" इति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इह पञ्चैव लक्षणे विभक्तयो विहिताः ; तद्यथा, –"अनुर्लक्षणे" (१/४/८४ पा०) "लक्षणेत्थम्भूत" (१/४/९० पा०) इत्यादिना द्वितीया, "येनाङ्गविकारः" (२/३/२० पा०) "इत्थम्भूतलक्षणे" (२/३/२१ पा०) इत्येताभ्यां तृतीया, "उत्पातेन ज्ञापिते च" (वा०) इति चतुर्थी, "यस्य च भावेन भावलक्षणम्" (२/३/३७ पा०) इति सप्तमी, "षष्ठी चानादरे" (२/३/३८ पा०) इति षष्ठी। तत्र द्वितीयाया उदाहरणं यथा, –"तां प्रत्यभिव्यक्तमनोरथानां महीपतीनां प्रणयाग्रदूत्यः। प्रबालशोभा इव पादपानां श्रृङ्गारचेष्टा विविधा बभूवुः।।" अत्र इन्दुमतीमालम्बनविभावीकृत्य श्रृङ्गारचेष्टास्तयैव अवच्छिद्यन्ते, तदवस्था एव च लक्ष्यन्ते, ततो भवति हेतुत्वम्; सोऽयं लक्षणहेतुः प्रतिना योगे द्वितीयामुत्पादयति। तृतीयावाच्यमङ्गविकारलक्षणं यथा, –"स बाल आसीद्वपुषा चतुर्भुजो मुखेन पूर्णेन्दुनिभस्त्रिलोचनः। युवा कराक्रान्तमहीभृदुच्चकैरसंशयं सम्प्रति तेजसा रविः।।" इति; अत्र वपुषा चतुर्भुज इत्याद्यङ्गविकारैरङ्गिनो विकृतिर्लक्ष्यते, वपुषा इत्यादौ तृतीया विभक्तिश्च अङ्गविकारलक्षणा। एवमन्यासां विभक्तीनामुदाहरणं स्वयमूहनीयम्]। मनोहराः केचित् अभावहेतवः अभावरूपाः हेतवश्च, व्याह्रियन्ते उच्यन्ते। (एतेन भोजराजोक्तचतुर्विधभेदप्रदर्शनमेवास्याभिप्रायः। द्वैविध्यन्तु प्रधानतयोक्तम्। चतुर्विधत्वञ्च भोजेनोक्तं, यथा,–"क्रियायाः कारणं हेतुः कारको ज्ञापकश्च सः। अभावश्चित्रहेतुश्च चतुर्विध इहेष्यते।।" इति। अभावहेतवः इति बहुवचनेन प्रागभावः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ध्वंसाभावः अन्योऽन्याभावः अत्यन्ताभावश्चेति चतुर्विधा हेतवः, उदाहरिष्यन्ते इति सूचितम्)।।२४६।।

प्रभा

भावहेतुमुपसंहरति–**इतीति**। इति एवंप्रकाराः। प्रयोगेषु कवीनां निबन्धेषु। रम्याः वैचित्र्येण मनोहराः। ज्ञापकहेतवो लक्ष्याः अवबोद्धव्याः। केचिन् मनोहराः अभावरूपा हेतवो व्याह्रियन्ते कथ्यन्ते। अभावश्च अनेन कविना चतुर्धा कल्पितः। प्रागभावः प्रध्वंसाभावः अत्यन्ताभावः अन्योन्याभावश्चेति।।२४६।।

विवृति

इदानीमुपसंहरन्नाह–

तथाऽभावहेतवश्चान्ये व्याह्रियन्ते उच्यन्ते मनोहराः। अभावश्चासौ हेतुश्च अभावहेतुः अभावहेतुश्चा (भावहेतुश्चाभावहेतुश्चा) भावहेतव इत्येकशेषः। अभावाख्यो हेतुर्भावस्य द्रव्यगुणकर्मलक्षणस्य कार्यस्य प्रदर्श्यते। स च प्राक्प्रध्वंसेतरात्यन्तभेदादभावश्चतुर्धा भिद्यते। पथिकानामभावाय पवनोऽयमुपस्थित इत्यनेन भावोऽभावस्य कार्यस्य मरण(स्य)हेतुरुदाहृतम्(तः)। अयं पुनरभावो भावस्येति न पिष्टपेषणदोषः।।

भावहेतुप्रदर्शनानन्तरं अभावहेतवः प्रदर्श्यन्ते इत्याह–**इतीति**।।

इत्यादिज्ञापकहेतवः प्रयोगेषु लक्ष्याः इत्याह–**इतीति**। अभावहेतवो मनोहरा बहवो विद्यन्ते; तेषु केचित् व्याक्रियन्ते इत्याह–अभावेति। अभावा नामः बहवः सन्ति शास्त्रकृताः। तत्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नैयायिकपक्षमाश्रित्य अभावस्य विविधत्वमुक्तम्। अभावः पञ्चविधः—प्रागभावः, प्रध्वंसाभावः, इतरेतराभावः, अत्यन्ताभावः, अभावाभावश्च इति। प्रागभावो नाम कारणान्निष्पाद्यस्य वस्तुनः तत्कारणसन्निधानात् पूर्वम्। अनुदयः प्रध्वंसाभावस्तु कारणान्निष्पन्नस्य कारणान्तरेण विनाशः। इतरेतराभावो नाम भावे भावान्तरस्वरूपाभावः। अत्यन्ताभावः कारणशून्यस्य सर्वदा सत्ताया अभावः। अभावाभावो नाम—यस्य कस्यचित् पदार्थस्य अनुत्पत्तेः अभावो यः, असौ अभावाभावः; वस्तूदय इत्यर्थः।।२४६।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वनान्यमूनि न गृहाण्येता नद्यो न योषितः।
मृगा इमे न दायादास्तन्मे नन्दति मानसम्॥२४७॥

रत्नश्री

अमूनि इमानि दृश्यमानानि वनान्यरण्यानि शान्तानि न गृहाण्यनेकादीनवदीनान्येताश्च लक्ष्यमाणा नद्यो निम्नगाः भिषेकादिक्षमा न योषितो विषयविषमूर्छाभूमयः। इमे च मृगा तृणोदकमात्रवृत्तयः तपस्विजनायमाना न दायादाः तनया[दि]स्नेहबन्धानर्थहेतवः। यत एवमेतत्सर्वं कल्याणमुपस्थितं कुतश्चिद् दैवात्, तत् तस्मान्मे मानसं नन्दति परं प्रीत्युत्सवमनुभवति इति कश्चित् गृहचारकविरक्तमतिः वनप्रस्थं कञ्चिदासाद्य अभिनन्दति। अत्र वनगृहादीनामन्योन्यस्मिन्नभावात् उक्तेन विधिना मनोनन्दनमुत्पद्यत इति भावकार्योऽयमितरेतराभावः कारकहेतुरादर्शित इति॥

हृदयङ्गमा

कारकज्ञापकभेदेन हेतोर्द्वैविध्यमभिधाय 'तौ चानेकविधौ' इत्यनेन सूचितानन्यानपि भेदान् दर्शयन् उदाहरिष्यंश्च चतुर्विधहेतून् प्रथमं प्रागभावमाह, अनभ्यासेनेति। –विद्यानाम् अनभ्यासेन अशिक्षया, धीमतां साधूनाम्, असंसर्गेण, तथा अक्षाणाम् इन्द्रियाणाम्, अनिग्रहेण असंयमेन हेतुना, नृणां व्यसनं स्त्रीपानाद्यष्टादशविधदुष्प्रवृत्तिरिति यावत्, जायते। (उक्तञ्च मनुना व्यसनप्रस्तावे, –"मृगयाऽक्षो दिवास्वप्नः परीवादः स्त्रियो मदः। तौर्य्यत्रिकं वृथाट्या च कामजो दशको गणः॥ पैशुन्यं साहसं द्रोह ईर्ष्याऽसूयाऽर्थदूषणम्। वाग्दण्डजञ्च पारुष्यं क्रोधजोऽपि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गणोऽष्टकः।।'' इति। यावत् विद्यां न अभ्यस्यन्ति, यावन्न धीमद्भिः संसृज्यन्ते, यावच्च अक्षाणि न निगृह्णन्ति तावत् व्यसनमिति विवक्षणात् नात्यन्त्याभावसङ्करइति बोध्यम्। अत्र विद्याऽनभ्यासादेः प्रागभावस्य व्यसनकारणत्वम् इति प्रागभावरूपो हेत्वलङ्कारः। एवं ध्वंसाभावादीनामुदाहरणान्यपि क्रमेण दर्शयिष्यन्ते)।।२४७।।

प्रभा

अभावेषु प्रथमं प्रागभावमुदाहरति–**अनभ्यासेनेति।** विद्यानाम् आन्वीक्षिक्यादीनाम्। अनभ्यासेन अपरिशलिनेन। धीमतां विपश्चिताम् असंसर्गेण परिचयाभावेन अक्षाणां इन्द्रियाणाम् अनिग्रहेण असंयमनेन हेतुना नृणां व्यसनं दुष्प्रवृत्तिर्जायते। भगवता मनुना अष्टादशविधानि व्यसनान्युक्तानि। यथा–

मृगयाक्षो दिवास्वापः परीवादः स्त्रियो मदः।
तौर्यत्रिकं वृथाट्या च कामजो दशको गणः।।

पैशुन्यं साहसं द्रोह ईर्ष्यासूयार्थदूषणम्।
वाग्दण्डजं च पारुष्यं क्रोधजोपि गणोष्टकः।।
(७.४७.४८) इति।

अत्र यावद् विद्यादीनामभावस्तावद् व्यसनं भवत्येव इति विद्यादीनां प्रागभावस्य व्यसनं प्रति हेतुता।।२४७।।

विवृति

तत्र प्रागभावं भावहेतुमुदाहरति–

विन्दन्ति चतुर्वर्गमादि(भि)रिति विद्याः आन्वीक्षकीत्या-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(क्या)दयः तासामनभ्यासेनाधीतस्य स्थैर्यकरणे प्रयत्नाभावेना-ध्ययनाभावेन वा तदुक्तं 'तत्र स्थितौ यत्नोऽभ्यासः। स तु दीर्घकालनैरन्तर्यसत्कारासेवितो दृढभूमि(रिति)। तथा धीमतां विदुषामसंसर्गेण वृद्धसंयोगाभावेन। अक्षाणां कर्णत्वगक्षिजिह्वा-घ्राणानां अनिग्रहेण निग्रहाभावेनाजितेन्द्रियत्वेन च। तदुक्तं कर्णत्वगक्षिजिह्वाघ्राणानां अनिग्रहेण निग्रहाभावेनाजितेन्द्रियत्वेन च तदुक्तं कर्णत्वगक्षिजिह्वाघ्राणानां शब्दस्पर्शरूपरसगन्धेष्व-पिष्वप्रतिप(प्रवृत्ति) त्तिरिन्द्रियजयः तद्विरुद्धवृत्तिरप(व)श्येन्द्रिय इति। तेनानिग्रहेण चाक्षाणां मनःषष्ठानाम्। यदुक्तम्-कामक्रोधलोभमानमदहर्षत्यागादि[न्द्रि]यजयं कुर्वीत। व्यसनं कामजं मृगयादिचतुर्विधम्। क्रोधजं च वाक्पारुष्यादि त्रिविधम्। एवं सप्तधा मानुषमपनय(या)ज्जायते। तदुक्तम्-अविद्याविनयः पुरुषो व्यसनहेतुः।।

अनभ्यासेनेति। प्रागभावस्य हेतुत्वम्।।

क्रमेण उदाहरणानि-**अनभ्यासेनेति।** अत्र विद्यानभ्यासादेः प्रागभावस्य व्यसनहेतुत्वमुक्तम्।।२४७।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत्यन्तमसदार्याणामनालोचितचेष्टितम्।
अतस्तेषां विवर्धन्ते सततं सर्वसम्पदः॥२४८॥

रत्नश्री

आर्याणां सतामत्यन्तमेकान्तेनासन्नास्ति अनालोचितं सदसदित्यविचारितं दोषरूपं चेष्टितं चरितम्। सर्वदा विमृश्यकारिण एव ते, तल्लक्षणत्वादार्याणाम्। अन्यथा तद्भावहानेः। यत एवमतः कारणात् तेषामार्याणां सततं नित्यं सर्वाः सम्पदः विभूतयः ऐहिक्यः साम्परायिक्यश्च वर्द्धन्ते प्रकर्षं गच्छन्ति। स्थितिरेषा सताम्। इह सर्वथा अनालोचितचेष्टिताभावात्सम्पद्धनं फलमुपजायते इति भावकार्योऽत्यन्ताभावः कारकहेतुर्निदर्शित इति॥

हृदयङ्गमा

ध्वंसाभावमुदाहरति, गत इति। —कामकथया कामालापश्रवणेन, य उन्मादः उन्मत्तता, गतः स दूरीभूतः, यौवनज्वरः गलितः, मोहः अज्ञानं, गतः, तृष्णा वासना, च्युता, अतः पुण्याश्रमे सन्यासाश्रमे, मनः क्रतम् अर्पितम्। (अत्र कामकथादीनां प्रागुत्पन्नानां नाशात् ध्वंसरूपस्याभावस्य पुण्याश्रमे मनोनिधानं प्रति हेतुत्वम्)॥२४८॥

प्रभा

प्रध्वंसाभावहेतुमुदाहरति—**गत इति।** कामकथाभिर्य उन्मादः विषयेषु सङ्गाभिनिवेशः। स गतः। यौवनज्वरः तारुण्योष्मा। गलितः क्षीणप्रायः। मोहः ममत्वबुद्धिः। क्षतः नष्टः। तृष्णा विषयवासना। च्युता लुप्ता। अतः कारणात् पुण्याश्रमे पवित्राश्रमे चतुर्थाश्रमे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इत्यर्थः। मनः कृतम् निश्चयः कृतः। अत्र उन्मादादीनां प्रध्वंसाभावः एव चतुर्थाश्रमस्वीकाराय हेतुत्वेनोपात्तः। अतः प्रध्वंसाभावहेत्वलंकारः।।२४८।।

विवृति

प्रध्वंसाभावमुदाहरति–

गतः कामकथोद्धातः ध्वस्तः कामकथाप्रारम्भः। गलितो योवनज्वरः यूनो भावो यौवनं तज्ज्वर इव यौवनज्वरः। क्षतः क्षीणो मोहोऽज्ञानम्। च्युता तृष्णा भवविभवमनोभवभेदात् त्रिविधा सा विनष्टा। ततः कृतं पुण्याश्रमे तपसि मनश्चित्तम्। अनेन कामकथादीनां नाशः पुण्याश्रमे मनस्करणस्य हेतुरुक्तः।।

गत इति। प्रध्वंसाभावस्य हेतुत्वम्।।

गत इति। अत्र कामकथोन्मादगमनादिरूपस्य प्रध्वंसाभावस्य पुण्याश्रमानुसन्धानविषये कारणत्वम्।।२४८।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उद्यानसहकाराणामनुद्भिन्ना न मञ्जरी।
देयः पथिकनारीणां सतिलः सलिलाञ्जलिः॥२४९॥

रत्नश्री

उद्याने प्रमदवने सहकाराणां चूतानां मञ्जरी कलिका अनुद्भिन्ना उदिता न किम्? नैव। ततः किमित्याह–देय इत्यादि। पथिकनारीणां विरहिणीनां मनोज्ञवस्तुदर्शनज्वलितविरहानलदग्धानां लोकान्तरं गतानामिदानीं सतिलस्तथास्थितेस्तिलसंयुक्तः सलिलस्य अञ्जलिर्देयो दीयतां, किमद्यापि प्रतीक्ष्यते? इहानुद्भेदप्रागभावः उद्भेदरूपः पथिकनारीनिधनस्य जनक इति अभावकार्यः प्रागभावः कारकहेतुः आविष्कृतः। प्रध्वंसाभावादयस्त्रयोऽभाव-हेतवोऽभावकार्या नोदाहृतास्त उदाह्रियन्ते–

अदृष्ट्या हरिणीदृष्टस्तस्यास्तत्त[दनु]स्मरन्।
व्यर्थजीवितसंकल्पः सोऽयमञ्चति पञ्चताम्॥
[73b]पद्मिनीयं न सा तान्वी पद्ममेतन्न तन्मुखम्।
इन्दीवरमिदं चक्षुर्न्न तदित्यसवो गताः॥
न कदाचिदभूत्तन्व्यास्तस्या विनयविभ्रमः।
इति ध्यायन्नयं लोकः परैति परलोकताम्॥

ज्ञापकहेतुश्च कश्चित् अभावोऽभावविष[य]ः प्रदर्श्यते–

भ्रूमङ्गविगमस्तन्वि! तव कोपविपर्ययम्।
अस्य जीवितमाचष्टे दृष्टेः प्रकृतिमादिशन्॥ इति।

अभावहेतुप्रस्तावमुपसंहरन्नाह–

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हृदयङ्गमा

अन्योऽन्याभावमुदाहरति, वनानीति। –अमूनि वनानि, नानाविधाशनजातविहीनान्यपि स्वेच्छाविहरणयोग्यानीति भावः, न गृहाणि, स्वेच्छाभोगप्रतिकूलत्वेन दुःखातिशयप्रदगृहभिन्नानि इति भावः, एता नद्यः, नक्रादिक्रूरजन्तुसमाकुला अपि महौदार्य्यशालिन्यः इति भावः, न योषितः, प्रभूतवस्त्रालङ्कारलाभेनापि कुटिलैकभूमिललनाभिन्ना इत्याशयः, तथा इमे मृगाः, यत्किञ्चिदशनयत्नादिलाभेऽपि तृप्ताः सरलताऽऽधाराश्च इति भावः, न दायादाः, सर्वस्वग्रहणेनापि अपरितृप्तस्वार्थप्रवीणबान्धवभिन्ना इति भावः, तत् तस्मात्, मे मम, मानसं नन्दति। (गृहस्थाश्रमात् वानप्रस्थाश्रमं गतस्योक्तिरियम्। अत्र वनगृहादीनाम् अन्योऽन्यभेदस्य वनं गतस्य नन्दने हेतुतया निर्देशात् अन्योऽन्याभावरूपहेतुत्वम्)।।२४९।।

प्रभा

अन्योन्याभावहेतुमुदाहरति–**वनान्यमूनीति।** अमूनि चित्तैकास्य- संपादकानि। वनानि आश्रमारण्यानि। गृहाणि ममत्वादिभिर्नानादुःखास्पदानि आवसथानि न। एता विमलवारिधाराभिर्मनोहरा नद्यः। योषितो मनश्चाञ्चल्योत्पादकाः प्रमदाः न। इमे मधुरस्वभावाः मृगाः। दायादाः मत्सराक्रान्ताः संबन्धिजनाः न। तद् एतत् त्रयमपि मे मानसं नन्दति संतोषयति। अत्र वनादीना मन्योन्याभावेन मनः संतोषः संसाधितः। अतोन्योन्याभावहेत्वलंकारः। अत्र सादृश्यातिशयहेतुकाभेद-प्रतीतिपूर्वकभेदप्रतिपादनस्यैव चमत्कारजनकत्वाद् वनगृहादीनां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सादृश्यमस्त्येव। परं तु तदविवक्षणान्नात्र निर्णयोपमा इति प्रेमचन्द्रशर्माणः।।२४९।।

विवृति

इतरेतराभावमुदाहरति–

वनानि शून्यारण्यानि अनेकानि क(अमून्येतानि) नैतानि गृहाणि। नैताः (योषितः) पीनपयोघराः कुटिलगामिन्यः कामिन्यो न न भ(न म) वन्त्येताः। किं त्वेता नद्यः। तथा नैते दायादाः बान्धवाः किं त्वेते मृगाः रुरुपृषतादय इति। तन्मे नन्दति मानसम्। कश्चित् परित्यक्तसकलसंसारसङ्गस्तपस्यन्निदमभ्यधात्। अनेन मनोनन्दनस्य कार्यस्येतरेतराभावो हेतुरुक्तः।।

वनानीति। इतरेतराभावस्य हेतुत्वम्।।

वनानीति। अत्र वनान्यमूनि न गृहाणि इत्यादिरूपस्य इतरेतराभावस्य मनःप्रमोदे कारणत्वम्।।२४९।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रागभावादिरूपस्य हेतुत्वमिह वस्तुनः।
भावाभावस्वरूपस्य कार्यस्योत्पादनं प्रति॥२५०॥

रत्नश्री

प्रागभाव आदिर्यस्य प्रध्वंसाभावादेः तद्रूपं स्वभावो यस्य वस्तुनः पदार्थस्य। व्यावृत्तानुवृत्तबुद्धिग्राह्यत्वाद् अभावस्यापि भाववद्वस्तुत्वं न विरुध्यते। हेतुत्वं कारकत्वमिह प्रस्तावे दर्शितमिति शेषः। कतरत्कार्यमधिकृत्येत्याहभावेत्यादि। भावो विधिरभावः प्रतिषेधः। तदुभयं स्वरूपमात्मा यस्य तस्य [भावा]भावस्वरूपस्य चेति प्रत्येकं योज्यम्। नत्वेकमुभयात्मकम् इति कार्यस्य फलस्य उत्पादनं प्रतिक्रियामुद्दिश्य इति॥

चित्रहेतूनधिकृत्याह–

हृदयङ्गमा

अत्यन्ताभावमुदाहरति, अत्यन्तमिति।–आर्य्याणां साधूनाम्, अनालोचितचेष्टितम् अविमृष्यकारित्वम्, अत्यन्तम् अतिशयम्, असत् अविद्यमानं, नास्तीत्यर्थः, अतः विमृष्यकारित्वात्, तेषां साधूनां, सर्व्वसम्पदः विभूतयः, सततं विवर्द्धन्ते निर्विघ्नेन वृद्धिं लभन्ते इत्यर्थः। (अत्र अविमृष्यकारिताया अत्यन्ताभावः सर्वसम्पद्वृद्धौ हेतुरिति अत्यन्ताभावहेतुर्नामालङ्कारः)॥२५०॥

प्रभा

अत्यन्ताभावहेतुमुदाहरति–**अत्यन्तमिति।** आर्याणां सत्पुरुषाणाम् अनालोचितचेष्टितं अविमृश्यकारित्वम् अत्यन्तम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

असत् सर्वथा अविद्यमानम्। कदापि अविमृश्य न ते व्यवहरन्तीत्यर्थः। अतोविमृश्यताया अत्यन्ताभावात्। तेषां सर्वसंपदः ऐहिकामुष्मिकाः सर्वसमृद्धयः। सततं निरन्तरम्। विवर्धन्ते वृद्धिं प्राप्नुवन्ति। अत्र अनालोचितचेष्टितस्य अत्यन्ताभावः संपदां विवृद्धये हेतुत्वेनोपन्यस्त इति अत्यन्ताभावहेत्वलंकारः।।२५०।।

विवृति

अत्यन्ताभावमुदाहरति–

अत्यन्तमसदविद्यमानमार्याणां विदुषां विवेकिनामनालोचित-चेष्टितमविमृश्यकारित्वम्। अतस्तेषामस्मादेवानालोचितचेष्टिता-भावादेव विवर्धन्ते सततं सर्वसम्पदः। अविमृश्यकारित्वाभावः सम्पद्वृद्धेहेतुरुक्तः।।

अत्यन्तमिति। अत्यन्ताभावस्य हेतुत्वम्।।

अत्यन्तमिति। अत्र अनालोचितचेष्टितस्य अत्यन्ताभावः विभूतीनां सार्वत्रिकीणां सर्वकालीनानां हेतुः।।२५०।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दूरकार्यस्तत्सहजः कार्यानन्तरजस्तथा।
अयुक्तयुक्तकारी चेत्यसंख्याश्चित्रहेतवः॥२५१॥

रत्नश्री

दूरं हेतुव्यापारविषयान्तरगतकार्यं यस्य स तथा। तेन कार्येणात्मीयेन सह युगपज्जायते तत्सहजः फलसमानकालभावीत्यर्थः। कार्यं प्रथममुत्पद्यते, तस्या[न]न्तरं पश्चाद्धेतुर्जायते इति कार्या[न]न्तरजः। तथा समुच्चये। अयुक्तमनुचितं कार्यं करोति युक्तमनुरूपं करोतीति च राशिद्वयम्। अयुक्तकारी युक्तकारी चेत्यर्थः। अयुक्तयुक्तकार्यौ चेत्यपि पाठः। तत्रैवं व्याख्येयम्-अयुक्तं युक्तं च कार्यं ययोः प्रत्येकं तावत् युक्तायुक्तकार्यौ। अयुक्तकार्यो युक्तकार्यश्चेत्यर्थः। इत्येवंप्रकाराश्चित्राः प्रसिद्धहेतुविपरीता अपूर्वरूपा आश्चर्यभूताः हेतवोऽसंख्याता अनवधयो विकल्पानामानन्त्यादिति॥

नन्वेवंभूते न कश्चिन्मुख्यो हेतुरुपलक्ष्यते। तत्कथमेतत्सम्भव इत्याह–

हृदयङ्गमा

भावप्रतियोगिकानामभावानामुदाहरणानि दर्शयित्वा अभावप्रतियोगिकस्याभावस्य हेतुत्वमुदाहरणेन दर्शयति, उद्यानेति।– उद्यानसहकाराणाम् उपवनचूतानां, मञ्जरी न अनुद्भिन्ना अपि तु उद्भिन्ना, अतः पथिकनारीणां प्रोषितभर्तृकाणां, सतिलः सलिलाञ्जलिः तर्पणाञ्जलिः, देयः विधेयः ; चूतमञ्जर्य्युद्भेदेन वसन्तकालोदयावगतेः तस्य च कामोद्दीपकतया पतिविरहेण नूनमेव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तादृशीनां मरणमुपस्थितं, मृतानामेव तर्पणाञ्जलिदानविधानात् इति भावः। (अत्र मञ्जरीणामुद्भेदाभावस्य अभावः पथिकरमणीमरणकारणत्वेन निर्दिष्टः इति अभावाभावस्य हेतुत्वम्। वस्तुन उत्पादः प्रागभावाभाव उच्यते, ततश्च मञ्जरीणामुद्गमस्य पथिकरमणीनां मरणे हेतुत्वादयं प्रागभावाभाव इति बोध्यम्। एवं ध्वंसाभावाभावे उदाहरणं यथा,–"पीनश्रोणि गभीरनाभि निभृतं मध्ये भृशोच्चस्तनं, पायाद्वः परिरब्धमब्धिदुहितुः कान्तेन कान्तं वपुः। स्वावासानुपघातनिर्वृतमनास्तत्कालमीलदृशे, यस्मै सोऽच्युतनाभिपद्मवसतिर्वेधाः शिवं ध्यायति।।" इति; अत्र अच्युतनाभिपङ्कजनिवासिनो विधेः मनोनिर्वृतिं प्रति तन्नाभिपङ्कजानुपघात एव हेतुः ततश्च वस्तुनोऽवस्थानस्यैव प्रध्वंसाभावाभावत्वादयं ध्वंसाभावाभाव इत्यवधेयम्। एवम् अन्योऽन्यान्ताभवाभावौ अपि उदाहरणीयौ)।।२५१।।

प्रभा

एतावता भावप्रतियोगिकानां प्रागभावादिचतुर्णामभावानामुदाहरणानि दर्शितानि। इदानीं तु अभावप्रतियोगिकाभावस्य हेतुरूपतां दर्शयति–**उद्यानेति।** उद्याने स्थिता ये सहकाराः आम्रास्तेषाम्। मञ्जरी अनुद्भिन्ना विकासमप्राप्ता न। अपि तु विकासपरिपूर्णा इत्यर्थः। अतः तनमञ्जर्या उद्दीपकत्वात्। पथिकनारीणां प्रोषितभर्तृकाणाम्। सतिलः सलिलाञ्जलिः निवापाञ्जलिर्देयः। तासां मरणमुपस्थितमिति भावः। अत्र मञ्जरीणामनुद्भेदाभावो मरणस्य हेतुत्वेनोपन्यस्तः। अतोभावाभावहेत्वलंकारः। अन्येषामभावाभावानां उदाहरणानि सरस्वतीकण्ठाभरणे तट्टीकायां च दर्शितानि। तेषु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रध्वंसाभावाभावो यथा–

पीनश्रोणि गभीरनाभि निभृतं मध्ये भृशोच्चस्तनं
पायाद्वः परिरब्धमब्धिदुहितुः कान्तेन कान्तं वपुः।
स्वावासानुपघातनिर्वृतमनास्तत्कालमीलद्दृशे
यस्मै सोच्युतनाभिपद्मवसतिर्वेधाः शिवं ध्यायति।।
(३.१५) इति।

अत्र नारायणनाभिपङ्कजरूपस्यावासस्य उपघाताभावः विधेर्मनोनिर्वाणकारणं भवति। अतः प्रध्वंसाभावाभावहेतुरयम्। अन्योन्याभावाभावो यथा–

अवनिरुदकं तेजोवायुर्नभः शशिभास्करौ
पुरुष इति यत् केचिद्भिन्ना वदन्ति तनूस्तव।
तदनघ वचोवैचित्रीभिर्निरावरणस्य ते
विदधति पयः पूरोन्मीलन्मृषा मिहिरोपमाम्।।

अत्र भिन्न इत्यन्योन्याभावमुपन्यस्य निरावरणस्य मृषेत्येताभ्यां निषेधोन्योन्याभावाभावः स च मिहिरोपमात्वसाधकः। अतो हेत्वलंकारः। अत्यन्ताभावाभावो यथा–

न विद्यते यद्यपि पूर्ववासना
गुणानुबन्धि प्रतिभानमद्भुतम्।
श्रुतेन यत्नेन च वागुपासिता
ध्रुवं करोत्येव कमप्यनुग्रहम्।। (काव्यादर्श १-१०४) इति।

अत्र न विद्यते इत्यन्ताभावमुपन्यस्य कमपीति प्रतिभासत्ताभिधानेन प्रतिषेधः। स च श्रुतयत्नाभ्यां वागुपासितव्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इत्युन्नीतार्थस्य हेतुरिति अत्यन्ताभावाभावहेत्वलंकारः। अत्यन्तमसदार्याणामनालोचितचेष्टितम्। इत्येतदपि अत्यन्ताभावाभावोदाहरणं भवति।।२५१।।

विवृति

इदानीमभावाभावो भावस्य हेतुरुदाह्रियते–

उद्यानसहकारकुसुमाभावस्याभावः पथिकस्त्रीमरणहेतुरुक्तः।।

उद्यानेति। अभावाभावस्य हेतुत्वम्।।

उद्यानेति। अत्र वस्तुनः उत्पत्तिः प्रागभावाभाव उच्यते। तेन सहकारमञ्जरीणां उद्भेदस्य पथिकनारीणां मरणकारणत्वम्।।२५१।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तेऽमी प्रयोगमार्गेषु गौणवृत्तिव्यपाश्रयाः।
अत्यन्तसुन्दरा इष्टास्तदुदाहृतयो यथा॥२५२॥

रत्नश्री

ते अमी अनन्तरोक्ता दूरकार्यादयश्चित्रा हेतवः न मुख्या इष्यन्ते। किं तर्हि? गौणी गुणनिवृत्ता प्रसिद्धिविषयविपरीता समारोपिता वृत्तिर्व्यवस्था हेतुभावस्वभावाः व्यपाश्रयोऽधिष्ठानं येषां तस्यां वा ये व्यापाश्रया गौणा इति यावत्। प्रयोगाः काव्यानि मार्गाः पन्थानः। अथ विशेषव्याप्तिहेतुत्वात् तेषु सर्गबन्धादिषु [74a] प्रयुक्ता अत्यन्तम् एकान्तेन सुन्दरा मनोहरा दृष्ठा लक्षिताः। के पुनस्ते? येषां चित्रहेतूनामुदाहृतयः प्रयोगा उदाह्रियन्त इति कृत्वा। ताः किम्? प्रतिपाद्यन्त इति शेषः। यथेति निदर्शयति॥

हृदयङ्गमा

अभावस्य अभावाभावस्य च हेतुत्वेन भेदान् प्रतिपाद्य अभावहेतुमुपसंहरति, प्रागिति। –इह एतेषु उदाहरणेषु इत्यर्थः, कार्य्यस्य उत्पादनं प्रति भावाभावस्वरूपस्य भावरूपस्य अभावरूपस्य च, प्रागभावादिरूपस्य वस्तुनः विषयस्य, हेतुत्वं, दर्शितमिति शेषः। (तत्र भावान् प्रति हेतुत्वं दर्शितमेव, अभावं प्रति हेतुत्वन्तु प्राक् प्रदर्शिते उद्यानेत्याद्युदाहरणे ज्ञेयम्। एवमुक्तोदाहरणेषु कारकहेतुत्वमपि बोध्यम्)॥२५२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रभा

अभावहेतुमुपसंहरति–**प्रागभावादीति।** इह प्रागभावादिरूपस्य प्रागभावप्रध्वंसाभावान्योन्याभावात्यन्ताभावस्वरूपस्य वस्तुनः विषयस्य हेतुत्वम् भावाभावस्वरूपस्य कार्यस्य। तत्र भावरूपस्य अनभ्यासेन विद्यानाम् इत्यादिश्लोकत्रये अभावरूपकार्यस्य च उद्यानेति श्लोके। उत्पादनं प्रति निष्पत्तये दर्शितमिति शेषः। उक्तोदाहरणेषु कारकहेतुत्वं दर्शितम्। ज्ञापकहेतोरुदाहरणानि ऊह्यानि।।२५२।।

विवृति

इह भावहेतोव....रकारे (अभावहेत्वलङ्कारे) वस्तुनो हेतुत्वमुक्तम्। किंभूतस्येत्याह–प्रागभावादिरूपस्य प्रागभाव आदिर्यस्य तत् प्रागभावादि तद्रूपं यस्य तत् प्रागभावादिरूपं वस्तु तस्य। किं प्रतीत्याह–कार्यो(र्यस्यो)त्पादनं प्रति। कथंभूतस्य कार्यस्योत्पत्तिं प्रतीत्याह–भावाभावस्वभावस्य भावश्चाभावश्च भावाभावौ तौ स्वभावौ यस्य तत् भावाभावस्वभावं तस्य। इह खलु द्विविधं कार्यं भावस्वभावमभावस्वभावरूपं (?) चेति। तस्योभयस्याप्युदाहरणान्युक्तानि।

ननु प्रागभावादिरूपस्य वस्तुनो हेतुत्वमुक्तं नाभावस्य। कथमभावस्य भावाभावस्वभावं कार्यं प्रति हेतुत्वमिति चेत् .... भावो हि भावधर्मो .... प्रमायते च व्यपदिश्यते च वस्तुव्यवस्थागममेयमन्यत्। तथा हि ....

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

घटप्रध्वंसोऽपि कपालत्वा .... तेन निरूपयति भाव एव घटप्रध्वंसः। तथा घटे पटाभावोऽपि घटसद्भाव एवेति। इतरेतराभावोऽपि भावस्वरूप एव। अत्यन्ताभावोऽपि नास्ति प्रकृतिपुरुषस्य द्वितीयं शिरस्तृतीयो बाहुरित्येके(क)शिरस्सद्भाव एवेति। प्रागभावादिवस्तुनो हेतुत्वमुक्तमित्य(न)वद्यम्। अथ वा प्रागभावादिरूपस्येत्येतत्र वस्तुनो विशेषणम्। किं तु प्रागभावादिरूपस्य हेतुत्वमिह। तथा वस्तुनश्च भावस्य च। तथा चैवोदाहृतम्।।

अभावहेतूदाहराणानि व्याचष्टे–**प्रागिति**। चतुर्षु उदाहरणेषु भावरूपं कार्यम्; अन्त्योदाहरणे कार्यत्वं अभावस्य।।

प्रागिति सुबोधम्।।२५२।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वदपाङ्गाह्वयं जैत्रमनङ्गास्त्रं यदङ्गने।
मुक्तं तदन्यतस्तेन सोऽप्यहं मनसि क्षतः॥२५३॥

रत्नश्री

अङ्गने! अङ्गजस्य कामस्य अस्त्रम् आयुधं जैत्रम् जगज्जयशीलं तवापाङ्गमपाङ्गदर्शनमित्याह्वयोऽभिधानमस्येति त्वदपाङ्गाह्वयं यदिदं तत् त्वया मुक्तं क्षिप्तमन्यतोः अन्यस्मिन् जिगीषिते पुरुषे क्वचित् तेनान्यतो मुक्तेन सोऽप्यंह यो न लक्षीकृतः मनसि कृतो हतः। न केवलं यत्र मुक्तं स एवेत्यपिशब्दः। तदेतच्चित्रम्। प्रसिद्धं ह्यस्त्रं यत्र प्रयुज्यते तं विषयं क्षिणोति। इदं त्वव्यापारगौरवं वस्तु हिनस्ति इति दूरकार्यः चित्रहेतुरीदृशः प्रतिपत्तव्य इति॥

हृदयङ्गमा

कारकज्ञापकाभावरूपत्वेन हेतोस्त्रैविध्यं दर्शयित्वा अधुनाचित्राख्यहेतुभेदान् निर्दिशति, दूरकार्य्य इति।—दूरं दूरवर्त्ति, कार्य्यं यस्य सः, तत्सहजः तेन कार्य्येण सह जातः, कार्य्ये सहोत्पत्तिकतया निबद्ध इत्यर्थः, कारणशक्तिप्रकर्षात् समकालमिव कार्य्यं प्रतिभासते इति यावत्, कार्य्यानन्तरजः कार्य्यस्य अनन्तरं जातः, तथा अयुक्तम् अनुचितं, युक्तम् उचितञ्च कार्यं ययोस्तौ, इति एवम्प्रकाराः, असङ्ख्याः सङ्ख्यातीताः, बहुविधा इत्यर्थः, चित्रहेतवः चित्राख्याः हेतवः। (उक्तञ्च भोजराजेन,— "विदूरकार्य्यः सहजः कार्य्यानन्तरजस्तथा। युक्तो न युक्त इत्येवमसङ्ख्याश्चित्रहेतवः॥" इति)॥२५३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रभा

कारकज्ञापकहेतू सप्रपञ्चं निरूप्य इदानीं चित्रहेतुप्रभेदान् दर्शयति–**दूरकार्य इति।** दूरं कार्यं यस्य स दूरकार्यः। तेन कार्येण सह जायते स तत्सहजः। कार्याद् अनन्तरं जातः कार्यानन्तरजः। अयुक्तं स्वभावविरुद्धं युक्तं स्वभावानुरूपं कार्यं ययोस्तौ च। इति एवंप्रकारा असंख्याः संख्यातीता-श्चित्रहेतवो भवन्तीति शेषः।।२५३।।

विवृति

इदानीं दूरकार्यादीन् पञ्च कारककारकान् (?) हेतून् दर्शयति–

दूरदेशे व्यवधाने कार्यं यस्य हेतोरसौ दूरकार्यः। तेन कार्येण सहैव समकालमेव जायत इति तत्सहजः। कार्यादनन्तरं पश्चाज्जायत इति कार्यानन्तरजः अयुक्तं युक्तं च युक्तायुक्ते ते कार्ये जन्ये ययोस्तावयुक्तयुक्तकार्यौचेति। असंख्याश्चापि कारका ज्ञापकाश्च हेतवः स्वयमूह(ह्य):।।

चित्रहेतुनामकान् हेतूनाह–**दूरेति।।**

चित्रहेतुलक्षणप्रकारमाह–**दूरेति।** आश्चर्यहेतवस्तु अपर्यन्ताः; तत्र केचन दर्श्यन्ते क्वचित् देशे स्थितस्य हेतोः देशानतरे कार्ये दूरकार्यः। कार्येण सह जायमानः तत्सहजः। कार्यस्य पश्चाज्जातः कार्यानन्तरजः। स्वस्वभावविरुद्धार्थकारी अयुक्तकार्यः। स्वस्वभावानुरूपार्थकारी युक्तकार्यः।।२५३।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आविर्भवति नारीणां वयः पर्यस्तशैशवम्।
सहैव विविधैः पुंसामङ्गजोन्मादविभ्रमैः॥२५४॥

रत्नश्री

नारीणां वयः पर्यस्तं क्षिप्तं तदुपमादिनोदयात् शैशवं बाल्यमनेनेति पर्यस्तशैशवं यौवनमिति यावत्। अङ्गजः काम उन्मादो विकारहेतुत्वात्। तस्य विभ्रमाः तदनुरूपा दशाविशेषास्तैः कार्यभूतैर्विविधैर्नानाप्रकारैः चक्षुः प्रीतिमनः सङ्गसंकल्पोत्पत्ति-निद्राभङ्गादिभिः पुंसां सम्बन्धिभिः सह युगपदेवापूर्वाचारः समाविर्भवति उदेतीति चित्रमेतत्। प्रतीतो हि हेतुः कार्यात् पूर्वभावी तदुत्पादयति। अयं तु हेतुः सहैव कार्येण जायते इति कार्यसहजश्चित्रो हेतुरेवंविधो बोद्धव्यः॥

हृदयङ्गमा

तेऽमीति।—ते पूर्वोक्ताः, अमी चित्रहेतवः, गौणी या वृत्तिः सादृश्यनिबन्धना लक्षणा, सैव व्यपाश्रयः अवलम्बनं येषां तादृशाः, प्रयोगाणां निबन्धानां, मार्गेषु रीतिषु, अत्यन्तसुन्दराः अतिमनोहराः दृष्टाः, तेषामुदाहृतयः उदाहरणानि, यथा वक्ष्यन्ते इति भावः॥२५४॥

प्रभा

कार्याद् विदूरस्य सहजस्य तदनन्तरजस्य वा कारणस्य कथं कारणत्वमिति शङ्कां परिहरति—**तेमीति।** तेमी पूर्वोक्ताश्चित्रहेतवः। गौणवृत्तिव्यपाश्रयाः सारोपगौणीलक्षणा व्यपाश्रयोवलम्बनं येषां ते तादृशाः सन्तः। कारणतां प्राप्नुवन्ति इत्यर्थः। ते च प्रयोगमार्गेषु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रबन्धरीतिषु अत्यन्तसुंदरा दृष्टा अतः तदुदाहृतयो दर्शयाम इत्यर्थः। यथेति अग्रिमोदाहरणप्रस्तावाय। अत्र गौणवृत्तिव्यपाश्रयत्वं क्वचित् कार्यस्यापि। यथा पश्चात् पर्यस्य इतिवक्ष्यमाणोदाहरणे रागसागर इत्यत्र। तत्र हेतोर्गौणवृत्तित्वं परंपरयेति बोध्यम्। क्वचित् कार्यकारणयोरुभयोरपि गौणवृत्तिव्यपाश्रयत्वं भवति। यथा राज्ञां हस्तारविन्दानि इत्यत्र। एवं च गौणवृत्तिव्यपाश्रयाद् इति पञ्चम्यन्तपाठः साधुरिति भाति। क्वचित् साध्यवसानलक्षणायामपि हेतोश्चमत्कारिता। यथा आविर्भवति नारीणाम् इत्युदाहरणे।।२५४।।

विवृति

अमी दूरकार्यादयः प्रयोगमार्गे(षु) स्वलक्षप्रपञ्चेषु गौणप्र(?)वृत्तिव्यपाश्रयाः गौणीं प्र(?)वृत्तिमाश्रित्यात्यन्तसुन्दरा अत्यन्तरमणीया दृष्ट[ाः।] नाना(न)मुख्यवृत्तिव्यपाश्रयाः सन्तो रम्याः। तदुदाहृतयस्तेषां दूरकार्यादीनामुदाहृतय उदाहरणानि।।

कारणमन्यत्र कार्यमन्यत्र इत्यादि विरुद्धम् इत्याशङ्क्य परिहरति—त इति।।

त इति। अमी हेतवः गौणवृत्तिमाश्रित्य प्रयोक्तव्याः।।२५४।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पश्चात् पर्यस्य किरणानुदीर्णं चन्द्रमण्डलम्।
प्रागेव हरिणाक्षीणामुदीर्णो रागसागरः॥२५५॥

रत्नश्री

हरिणाक्षीणां रागः पुरुषाभिलाषः। सागरो वैपुल्पादिना। प्रागेव यावन्नेन्दुरुदेति उदीर्णो वृद्धिमगमत्। पश्चाद्रागसागरोदयानन्तरं किरणान् पर्यस्य दिक्षु विक्षिप्य उदीर्णमुदितं चन्द्रस्य मण्डलमित्यपूर्वोऽयं हेतुः। यः कार्यादूर्ध्वमुदेति इति कार्यान्तरजश्चित्रहेतुरेवंरूप इति॥

हृदयङ्गमा

दूरकार्य्यमुदाहरति, त्वदपाङ्गाह्वयमिति। –हे अङ्गने! चार्वङ्गि! यत् तत् प्रसिद्धं, जैत्रं जयसाधनं, तव अपाङ्गाह्वयम् अपाङ्गरूपम्, अनङ्गस्य कामस्य, अस्त्रम् अन्यतः अन्यस्मिन् जने, मुक्तं पातितं, त्वयेति शेषः, तेन अस्त्रेण, सः लक्ष्यभूतः जनः, तथा अहमपि अलक्ष्यभूत इत्यर्थः, मनसि क्षतः विद्धः। (अत्र अस्त्रस्य लक्ष्यवेधरूपं कार्य्यं सन्निहितम् अलक्ष्यवेधरूपन्तु दूरवर्त्ति, इति हेतोरस्त्रस्य दूरकार्यत्वं, तस्य चासम्भवाच्चित्रमिति दूरकार्य्यो नाम चित्रहेतुः। अस्य उदाहरणान्तरं यथा,–"अनश्नुवानेन युगोपमानमलब्धमौर्वीकिणलाच्छनेन। अस्पृष्टखड्गत्सरुणाऽपि चासीद्रक्षावती तस्य भुजेन भूमिः॥" इति; सोऽयं बाल्य एव नवयौवनकार्य्यकारणात् दूरकार्यः नाम चित्रहेतुः)॥२५५॥

प्रभा

तत्र कार्यस्य हेतोर्दूरदेशस्थस्य उदाहरणं दर्शयति–**त्वदिति**। हे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अङ्गने शोभनगात्रि। त्वदपाङ्गाह्वयं त्वदपाङ्गसंज्ञकम्। अनेन अत्र सारोपा गौणी लक्षणा दर्शिता। जैत्रं जयशालि। अनङ्गास्त्रं अन्यतः मद्भिन्नपुरुषान्तरे मुक्तं त्वयेति शेषः। तेन त्वदपाङ्गरूपमदनास्त्रेण सः लक्ष्यभूतः। अलक्ष्यभूतोहमपि च। मनसि हृदये। क्षतः विद्धः। अत्र अस्त्रस्य लक्ष्यवेधरूपकार्यं संनिहितम् अलक्ष्यवेधरूपं तु विदूरम् इति तादृशकार्यस्यात्र विदूरता। इति देशविदूरताया उदाहरणम्। कालविदूरताया यथा–

अनश्नुवानेन युगोपमानमलब्धमौर्वीकिणलाञ्छनेन।
अस्पृष्टखड्गत्सरुणापि चासीद्रक्षावती तस्य भुजेन भूमिः।।

इति। अत्र यौवनकार्यस्य बाल्ये एव कारणाद्धेतोर्दूरकार्यता। इति सरस्वतीकण्ठाभरणे (३.१७)।।२५५।।

विवृति

यथा–

हे अङ्गने! यदेतत् त्वदपाङ्गाभिधानमनङ्गास्त्रं तद्यतः अन्यस्मिन्नन्यतः त्वया मुक्तं तेनान्यतो(मुक्तेनाहं)मनसि क्षतो विद्ध इति दूरकार्यः।।

त्वदिति। वैयधिकरण्येन प्रवृतो हेतुः दूरकार्यः। यत्किञ्चिदपि पश्यन्त्याः कस्याश्चित् चक्षुषोः विभ्रमातिरेकेण हृतहृदयः कश्चित् एवमाह–**सोऽस्मयहं मनसि क्षतः** इति।।

क्रमेण उदाहरणानि। त्वदिति–अन्यतो मुक्तस्य अपाङ्गात्मनो हेतुभूतस्य अस्त्रस्य अन्यतः क्षताभिधानकार्यदर्शनात् असौ दूरकार्यः।।२५५।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

राज्ञां हस्तारविन्दानि कुड्मलीकुरुते कुतः।
देव! त्वच्चरणद्वन्द्वरागबालातपः स्पृशन्॥२५६॥

रत्नश्री

देव! तवचरणयोर्द्वन्द्वस्य युगलस्य रागो बालश्चासौ आतपश्चेति बालातपः तरुण तरणिकिरणसुन्दरः, लोहितत्वादिति। राज्ञां हस्तारविन्दानि कान्त्यादिना स्पृशन् अभिसारित्वेनामृशन् सन् कुतः कस्मात् कुड्मलीकुरुते मुकुलयति। अञ्जलिप्रणामत्वेनायुक्तमेतत्। बालातपो हि पद्मोन्मीलनहेतुः। अयं त्वपूर्वो [74b] बालातपो यः पद्मानि निमीलयतीति। अनुचितकार्यकरणात् अयुक्तकारी चित्रहेतुरेवंविध इति॥

हृदयङ्गमा

तत्सहजमुदाहरति, आविर्भवतीति। —नारीणां पर्य्यस्तं निराकृतं, शैशवं येन तादृशं, वयः यौवनमित्यर्थः, पुंसां विविधैः अङ्गजेन कामेन, यः उन्मादः तस्य विभ्रमैः सहैव आविर्भवति। (अत्र नारीणां यौवनरूपस्य हेतोस्तत्कार्य्यभूतपुरुषविभ्रमैः सहाविर्भावात् तत्सहजत्वं, तच्च कार्य्यकारणयोर्यौगपद्येन वैचित्र्यातिशयसूचनात् चित्रम्, एवञ्च यौवनरूपकारणादनन्तरं जायमानानां विभ्रमाणां प्रागुत्पद्यमानत्वेनाध्यवसायात् अध्यवसायमूलत्वं न तु गौणव्यपाश्रय इति बोध्यम्। उदाहरणान्तरं यथा,—"सममेव समाक्रान्तं द्वयं द्विरदगामिना। तेन सिंहासनं पित्रामखिलञ्चारिमण्डलम्॥" अत्र राज्याभिषेकरिपुमण्डलाक्रमणयोर्हेतुहेतुमद्भावेन सत्यपि पौर्वापर्य्ये क्षिप्रकारित्वात्तुल्यमेव कार्य्यकारणभावो विवक्षितः इति सहजो नाम चित्रहेतुः)॥२५६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रभा

सहजहेतोरुदाहरणं दर्शयति–**आविर्भवतीति।** नारीणां पर्यस्तशैशवं निराकृतबाल्यम् वयः यौवनमित्यर्थः। पुंसां कामिनाम् विविधैः बहुप्रकारैरङ्गजोन्मादविभ्रमैः अङ्गजः मनसिजः तेन कृतैः उन्मादविभ्रमैः मनोविकारविलासैः सह एव आविर्भवति। अत्र मनोविभ्रमस्य यौवनं कारणं कार्यभूतेन तेन सहैव जायते इति कार्यस्य आशुभावप्रतिपादनाय वर्णितम्। तथा चात्र कार्यप्राक्क्षणवर्तित्वं विशेषविवक्षया कारणस्य अपह्नुतम्। तथा च अत्र विभ्रमाणां पश्चादुत्पद्यमानत्वं प्रागुत्पाद्यमानत्वेनाध्यवसितमिति अध्यवसायव्यपाश्रयोत्र हेतुश्चमत्कारातिशयजनको न तु गौणव्यपाश्रय इति बोध्यम् इति प्रेमचन्द्रशर्माणः।।२५६।।

विवृति

तत्सहजमुदाहरति–

अतीतबालभावं वयो यौवनं वनितानां प्रकटीभवति। पुंसामङ्गजो[न्मा] दविभ्रमैर्विविधैः सहेत्यनेन वनितानां यौवनस्य कामुकजन (विभ्रमकारणस्य स्वकार्यैः कामुकजनविभ्रमैः सह जननमुक्तम्।।

कार्यसहजं हेतुं दर्शयति–**आविरिति।** तारुण्यस्य वयसः युवोन्मादकत्वमत्र लक्ष्यम्।।

आविरिति। पर्यस्तशैशवस्य नारीणां वयोलक्षणस्य हेतोः पुंसां अङ्गजोन्मादविभ्रमस्य च कार्यस्य सहदर्शनात् तत्सहजः।।२५६।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पाणिपद्मानि भूपानां सङ्कोचयितुमीशते।
त्वत्पादनखचन्द्राणामर्चिषः कुन्दनिर्मलाः॥२५७॥

रत्नश्री

देव! तव पादानां नखाश्चन्द्राः कान्त्यादिना तेषामर्च्चिषः किरणाः कुन्दकुसुमनिर्मलाः शुद्धाः भूपानां राज्ञां पाणीन् पद्मानि कान्त्यादिना सङ्कोचयितुं प्रणतिकरसम्पुटरूपेण मीलयितुमीशते कल्पन्ते। युक्तकारी चित्रहेतुरेवंविधः, चन्द्रतः पङ्कजसंकोचस्योचितत्वादिति॥

हेतुमुपसं[हरन्नाह]–

इति हेतुविकल्पस्य दर्शिता गतिरीदृशी।

इति कथितेन विधिना हेतोर्विकल्पस्य प्रभेदस्य सामान्यरूपानुगतस्य गतिः स्वरूपमीदृशी कथितरूपा दर्शिता प्रतिपादिता॥

॥ इति हेतुचक्रम् ॥

हृदयङ्गमा

कार्य्यानन्तरजमुदाहरति, पश्चादिति। –हरिणाक्षीणां रागसागरः प्रेमानुरागसमुद्रः, प्रागेव उदीर्णः उच्छलितः, स्फीत इत्यर्थः, पश्चात् किरणान् पर्य्यस्य उत्क्षिप्य, चन्द्रमण्डलम् उदीर्णम् उदितम्। (अत्र चन्द्रोदयलक्षणाद्धेतोः पूर्वकालमेव रागसागर उदीर्ण इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कार्य्यस्योदयलाभः। सः इह गुणवृत्त्याश्रयणेन हेतावतिशयं पुष्यतीति कार्य्यानन्तरजनामायं चित्रहेतुः; तच्च कार्य्यकारणयोरग्रपश्चाद्भावप्रतिपादनेन समधिकं वैचित्रामावहतीति चित्रम्। अत्रापि पश्चाद्भावित्वस्य पूर्वभावित्वेन अध्यवसितमिति अध्यवसायमूलत्वमस्येति ज्ञेयम्)।।२५७।।

प्रभा

कार्यानन्तरजहेतुमुदाहरति–**पश्चादिति।** किरणान् मरीचीः। पर्यस्य उत्क्षिप्य। चन्द्रमण्डलम् पश्चाद् रागसागरोदीर्णानन्तरम्। उदीर्णमुदितम्। हरिणाक्षीणां रागसागरः कामाभिलाषसमुद्रः प्रागेव चन्द्रमण्डलोदयात् पूर्वमेव उदीर्णः उच्छलितः स्फीत इति यावत्। अत्र चन्द्रोदयस्य रागोद्दीपकत्वात् कारणत्वम्। तच्च कार्यभूतरागोदीर्णानन्तरं संभूतमिति कार्यानन्तरजत्वं हेतोर्बोध्यम्। एवं पौर्वापर्यव्यत्यासेन वर्णनं वैचित्र्यशालीति हेतुवैचित्र्यं बोध्यम्। वस्तुतस्तु अत्र चन्द्रमण्डलोदयरूपकारणात् क्षिप्रकार्यस्य पश्चाद्भाविता पूर्वभावित्वेनाध्यवसिता। तेनात्राध्यवसायमूल एव चमत्कारातिशय इति प्रेमचन्द्रशर्माणः।।२५७।।

विवृति

किरणान्विकीर्य चन्द्रमण्डलं पश्चादुद्गतम्; हरिणाक्षीणां रागसागरः पुनश्चन्द्रोदयात् प्रागेवक्षुभित इति रागसागरविवृद्धिलक्षणात् कार्यात् (परं) चन्द्रोदयाभिधानो हेतुरुद्गत इति कार्यानन्तरजः।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पश्चादिति। अत्र कार्यानन्तरजो हेतुः। चन्द्रोदयम् उत्प्रेक्षमाणानाम् उदयात् प्रागेव रागः प्रवृद्ध इति भावः।।

अत्र चन्द्रोदयलक्षणात् हेतोः पूर्वमेव रागसागरः उदीर्णः इति कार्यस्य उदयलाभः। स इह गौणवृत्त्याश्रयो हेतोः अतिशयं पुष्यति। कार्यानन्तरजः एष हेतुः।।२५७।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सूक्ष्ममालक्षयन्नाह–

इङ्गिताकारलक्ष्योऽर्थः सौक्ष्म्यात् सूक्ष्म इति स्मृतः॥२५८॥

रत्नश्री

संप्रति सूक्ष्मो लक्ष्यते। इङ्गितं कस्यचिदन्तर्गतस्य भावस्य ज्ञापनार्थं तादृशि प्रस्तावे बुद्धिपूर्वकं क्रियमाणां तादृशं कायिकं चेष्टितम्। आकारस्तु स्वयमेव भावानुरूपमाविर्भवन् तत्सूचकमवस्थान्तरं शरीरस्येत्यनयोर्भेदः। ताभ्यां लक्ष्यो गम्योऽर्थः कश्चिदन्तर्मात्राधिरूढः सुरतोत्सवादिः सूक्ष्मः इति स्मृतो विज्ञायते तज्ज्ञैः। कुतः? शब्दालोकातिवर्तिनो वस्तुनः कायविज्ञप्तिमात्रेण तादृशेन लक्ष्यतया सौक्ष्म्यात् सूक्ष्मत्वात् तथाविधैरेव ग्रहणादिति॥

[इङ्गितलक्ष्य]सूक्ष्ममुदाहरति–

हृदयङ्गमा

अयुक्तकार्य्यमुदाहरति, राज्ञामिति।–हे देव! तव चरणद्वन्द्वमेव रविबालातपः नवोदितार्कमयूखः, राज्ञां हस्ता एव अरविन्दानि तानि स्पृशन् कुतः कुद्मलीकुरुते? मुकुलीकरोति? इत्यर्थः ; बालातपस्पर्शात् अरविन्दानां विकास एव भवति, न तु सङ्कोचः। (अत्र बालातपरूपकारणस्य अरविन्दसङ्कोचरूपकार्य्यमयुक्तमिति अयुक्तकार्य्यत्वं, तच्च राजविषयकरतिभावस्य सातिशयचमत्कार-विषयत्वात् अतिमनोरममिति चित्रम्। यथा वा,–"न मीलयति पद्मानि न नभोऽप्यवगाहते। त्वन्मुखेन्दुर्ममासूनां हरणायैव यस्यति॥" अत्र मुखेन्दोः पद्मनिमीलनादि न युज्यते इति अयुक्तकार्य्यः नाम चित्रहेतुः)॥२५८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रभा

अयुक्तकार्यं हेतुमुदाहरति–**राज्ञामिति।** देव त्वच्चरणयुगुलस्य रागः रक्तिमा स एव बालातपः मृदुसूर्यरश्मिः। राज्ञां हस्ता एव अरविन्दानि तानि। स्पृशन् कुतः कुड्मलीकुरुते मुकुलीकरोति। बालातपस्पर्शेन अरविन्दानां विकास एव भाव्यो न तु संकोचः। अतोरविन्दसंकोचविधानम् बालातपस्य अयुक्तमिति अयुक्तकार्योयं हेतुः। स च राजविषयकरतेः पोषकतया चमत्कारविषयत्वान्मनोरम इति ध्येयम्। अत्र हस्तारविन्दानां कुड्मलीकरणं प्रणामाञ्जलिरूपतया ज्ञेयम्।।२५८।।

विवृति

अयुक्तकार्यमाह–

हे देव त्वत्पादद्वयराग एव बालातपः स्पृशन् राज्ञां सामन्तानां पाणिपद्मानि कुड्मलीकुरुते मुकुलतामापादयतीत्ययुक्तकार्यः यस्मादादित्योदयसमुद्भूतातपः पद्मानां विकासस्य हेतुः न सङ्कोचस्येति। अयं पुनस्तद्विपरीत इत्ययुक्तकार्यः।।

अयुक्तहेतुं दर्शयति–**राज्ञामिति।** कुत इति अयुक्तं दर्शयति।।

राज्ञामिति। बालातपस्वभावः कमलविकासकारी। अत्र तु वर्णनीयचरणद्वन्द्वरागबालातपः राज्ञां कराम्बुजानि सङ्कोचयति इति स्वभावाननुरूपकारित्वात् अयुक्तकार्यः।।२५८।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कदा नौ सङ्गमो भावीत्याकीर्णे वक्तुमक्षमम्।
अवेत्य कान्तमबला लीलापद्मं न्यमीलयत्॥२५९॥

रत्नश्री

आकीर्णे जनसंबाधे स्थाने नौ आवयोः सङ्गमो योगः कदा कस्यां वेलायां भावी भविष्यतीति वक्तुं वाचा प्रतिपादयितुं भयत्रपिष्णुतया अक्षमम् अशक्तं कान्तं रमणम् आकारात् तथाविधादवेत्य ज्ञात्वा लीलार्थं पद्मं विभ्रमकमलं करतलगतं न्यमीलयत् अबला काचिद् विलासिनीति॥

तद् विवृणोति–

हृदयङ्गमा

युक्तकार्य्यमुदाहरति, पाणिपद्मानीति।–कुन्दनिर्मलाः कुन्दपुष्पधवलाः, तव पादनखचन्द्राणां पादनखरूपचन्द्राणाम्, अर्च्चिषः भूपानां पाणिपद्मानि पाणिरूपाणि पद्मानि, सङ्कोचयितुम् ईशते प्रभवन्ति। (अत्र चन्द्रकिरणरूपकारणस्य पद्मनिमीलनकार्यं युक्तं, तच्च राजविषयिणो रतिभावस्य व्यञ्जकतया सातिशयां चमत्कृतिपदवीमारोहतीति चित्रम्। यथा वा, –"गुणानुरागमिश्रेणा यशसा ते प्रसर्पता। दिग्बधूनां मुखे जातमकस्मादर्द्धकुङ्कुमम्॥" अत्र दिग्बधूमुखेषु ते गुणानुरागः कुङ्कुमं, यशस्तु चन्दनमिति गौणावृत्तिव्यपाश्रयेण युक्तत्वात् युक्तकार्यो नाम चित्रहेतुः)॥२५९॥

प्रभा

युक्तकार्यमुदाहरति–**पाणिपद्मानीति।** त्वत्पादनखचन्द्राणां तव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पदनखान्येव चन्द्रास्तेषाम्। कुन्दनिर्मलाः कुन्दकुसुमधवलाः। अर्चिषः कान्तयः। भूपानां पाणिपद्मानि हस्तकमलानि संकोचयितुं प्रणामाञ्जलिविधायकत्वेन मुकुलीकर्तुम् ईशते समर्था भवन्ति। अत्र चन्द्रार्चिषां पद्मनिमीलनं युक्तमेव इति युक्तकार्योयं हेतुः। स च राजविषयकरतिपोषकतया सविशेषचमत्कारकारीति बोध्यम्।।२५९।।

विवृति

युक्तहेतुं दर्शयति—**पाणीति।।**

पाणीति। अत्र तु वर्णनीयनखचन्द्रार्चिरपि राज्ञां कराम्बुजानि सङ्कोचयति इति स्वभावानुरूपार्थकारित्वात् युक्तकार्यः।।२५९।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पद्मसंमीलनादत्र सूचितो निशि सङ्गमः।
आश्वासयितुमिच्छन्त्या प्रियमङ्गजपीडितम्॥२६०॥

रत्नश्री

अत्र प्रयोगे निशि रात्रौ संगमः सुरतरूपः संकल्पात्मना सूक्ष्मो व्यवस्थितः, पद्मस्य संमीलनात्। मुकुलीकरणात् इङ्गितविशेषान्निमित्तात्। सूचितः प्रकाशितः। कान्तस्य किमेवं स्यादित्याह-आश्वासयितुमित्यादि। प्रियं वल्लभमङ्गजेन कामेन पीड़ितमाकुलीकृतम् इङ्गितग्रहणे निपुणं भावसमर्पणेनाश्वास-यितुमाशापत्रिकादानेन व्यवस्थापयितुमिच्छन्त्या बालया [75a] सूचित इति प्रकृतम्। अयमिङ्गितसूक्ष्मो दर्शितः, पद्मसम्मीलनात् उत्पलकृतस्य कायकर्मण इङ्गितरूपत्वादिति॥

आकारसूक्ष्ममुदाहरन्नाह–

हृदयङ्गमा

हेतुमुपसंहरति, इतीति अर्द्धेन श्लोकेन। –हेतोर्विकल्पानां प्रभेदानाम्, इति पूर्वोक्तप्रकारा, ईदृशी गतिः दर्शिता; अनयैव रीत्या अन्येऽपि प्रभेदाः ज्ञातव्या इति भावः। (एवं शक्तिहानिव्यधिकरणादयः अन्येऽपि हेतुभेदाः अन्यैरुक्ताः ज्ञातव्याः। तत्र शक्तिहानिहेतुर्यथा,–"अनुरागवती सन्ध्या दिवसस्तत्पुरः सरः। अहो! दैवगतिश्चित्रा तथाऽपि न समागमः॥" इति। अत्र अनुरागवत्त्व तत्पुरः सरत्वयोः समागमहेत्वोः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सामर्थ्यविघाते दैवगतिः कारणमिति शक्तेर्हानिः। तथा,–"सा बाला वयमप्रगल्भवचसः सा स्त्री वयं कातराः" इत्यादौ अभिव्यक्तमेव कार्य्यकारणयोः व्यधिकरणत्वं प्रतीयते इति व्यधिकरणो नाम चित्रहेतुः। एवमन्येऽपि)।।–

अथ सूक्ष्मं निरूपयति, इङ्गितेति।–इङ्गितम् अभिप्राय-प्रकाशकचेष्टाविष्कारः, नेत्रहस्तादिव्यङ्ग्यः इत्यर्थः ; ("इङ्गितं हृद्गतो भावः" इति विश्वः) आकारः अवस्थाविशेषव्यञ्जक-मुखरागादिः, ("स्यादाकारोऽङ्गवैकृतम्" इति वोपालितः) एताभ्यां लक्ष्यः अनुमेयः, अर्थः विषयः, सौक्ष्म्यात् दुर्ज्ञेयत्वात्, सूक्ष्म इति स्मृतः। (इत्थञ्च सूक्ष्मः स्थूलमतिभिरसंलक्ष्यः योऽर्थः, स यदा निपुणमतिभिरिङ्गिताकाराभ्यां संलक्ष्यते तदा तस्य संलक्षितस्य यत् प्रकाशनं स सूक्ष्मालङ्कार इति लक्षणम्। अत एव प्रकाशकारः, –"कुतोऽपि लक्षितः सूक्ष्मोऽप्यर्थोऽन्यस्मै प्रकाश्यते। धर्मेण केनचित् यत्र तत् सूक्ष्मं परिचक्षते।।" इत्याह। "संलक्षितस्तु सूक्ष्मोऽर्थ आकारेणेङ्गितेन वा। कयाऽपि सूच्यते भङ्ग्या यत्र सूक्ष्मं तदुच्यते।।" इति च दर्पणकारः)।।२६०।।

प्रभा

हेतुमुपसंहरति–**इतीति**। हेतोर्विकल्पानां प्रभेदानाम्। ईदृशी एवंप्रकारा। गतिः पद्धतिः। दर्शिता निरूपिता। अनेन प्रकारेण अन्येपि हेत्वलंकारभेदा ज्ञेया इति भावः। ते च अहेत्वादयो सरस्वतीकण्ठाभरणतो ज्ञातव्याः। अत्रास्माभिर्विस्तरभिया न दर्शिताः। सूक्ष्मालंकार निर्दिशति–**इङ्गितेति**। इङ्गितं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वाभिप्रायसूचकः शरीरावयवव्यापारः। आकारः अन्तर्भावसूचको रूपादेरन्यथाभावः। ताभ्यां लक्ष्यः अनुमेयः अर्थः प्रतिपाद्यविषयः। स च क्वचिद् अभिलाषाद्यभ्यन्तरविषयः क्वचिच्च रहः क्रियमाणबहिर्विषयो वेति द्विधा। सौक्ष्म्यात् सूक्ष्ममतिवेद्यत्वात् साधारणपुरुषदुर्ज्ञेयत्वाच्च। सूक्ष्मः सूक्ष्माभिधः स्मृतः। तथा च इङ्गिताकाराभ्यां सूक्ष्ममतिज्ञेयं अर्थस्य वर्णनं सूक्ष्मालंकार इति लक्षणं संपन्नम्। प्रकाशकारादयस्तु–

कुतोपि लक्षितः सूक्ष्मोप्यर्थोन्यस्मै प्रकाश्यते।
धर्मेण केनचिद्यत्र तत् सूक्ष्मं परिचक्षते।। (८६६ पत्रे)

इत्याहुः। तथा च कुतोपि आकारादिङ्गिताद्वा लक्षितस्य सूक्ष्मार्थस्य तीक्ष्णमतिसंवेद्यार्थस्य केनचिद्भङ्ग्यन्तरेण यत् सूचनं स सूक्ष्म इति तदभिप्रायः।।२६०।।

विवृति

प्रकृतमुपसंहरन्नाह–

इति हेतुचक्रम्।

हेत्वलङ्कारप्रपञ्चस्यैवंविधा गतिरुक्ता।

सूक्ष्मलक्षणमाह–

इङ्गितमन्यथा (?) (इङ्गिताका) राभ्यां लक्ष्यत इतीङ्गिताकारलक्ष्यः। इङ्गिताकारलक्ष्य इत्यन्तर्गत(त्यनूद्य) सूक्ष्म

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इति विधीयते। कस्मात् सूक्ष्म इत्याह–सूक्ष्म (सौक्ष्म्यात्) (सर्वैर्घट) प(ट)ादिवदुपलक्षयितुमशक्यत्वात्।।

सूक्ष्मं लक्षयति–**इङ्गितेति।** इङ्गितं कायचेष्टाविशेषः ; आकारः मानसविकारद्योतकमुखवर्णादिः ; ताभ्यां लक्षणीयः अर्थः सौक्ष्म्यात् दुर्ज्ञेयत्वात् सूक्ष्मः।।

इङ्गितेति। इङ्गितं भ्रूक्षेपकटाक्षवीक्षणादि; आकारः स्वेदरोमाञ्चादिः; ताभ्यां अनुमेयः अर्थः सूक्ष्मः।।२६०।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वदर्पितदृशस्तस्या गीतगोष्ठ्यामवर्धत।
उद्दामरागतरला छाया कापि मुखाम्बुजे॥२६१॥

रत्नश्री

गीतलक्षणगोष्ठी विनोदस्तस्यां त्वयि अर्पिता व्यापारिता दृक् दृष्टिः यस्या यया वा तस्या मुखाम्बुजे कान्त्यादिना उद्दामेन उदीर्णेन रागेण रत्यभिप्रायेण तरला उज्ज्वला रक्तच्छाया कान्तिः कापि विशिष्टा या निधुवनानन्दोत्सवमन्तर्वर्तिनमाविष्करोति। अवर्धत व्यजृम्भत। अयमाकारसूक्ष्मो निर्दिष्टः, तादृशो मुखच्छायायाः स्वयमेव तथाविधाभिप्रायवशादबुद्धिपूर्वमाविर्भावादिति॥

तद् व्याचष्टे–

प्रभा

इङ्गितलक्ष्यार्थमुदाहरति–**कदेति।** कदा कस्मिन् समये नौ आवयोः संगमः समागमो भावि भविष्यति इति आकीर्णे जनसंकुले स्थाने वक्तुं प्रष्टुमिति भावः। अक्षमम् असमर्थम्। नायकेन वाचा अपृष्टमपि तदीयमुखच्छायया तं प्रश्नमनुमीयेत्यर्थः। एतददृशं कान्तं नायकम् अवेक्ष्य अबला सा नायिका। लीलापद्मं क्रीडाधृतकमलम् अमीलयत् संकोचयामास॥२६१॥

विवृति

तत्र इङ्गितलक्ष्यमर्थमुदाहरति–

(कदा कस्यां वेला) यां नौ आवयोः सङ्गमः सुरतसंयोगो भावी भविष्यतीति (वक्तुमसमर्थं प्रियं ज्ञात्वा लीलापद्मं न्यमीलयत्) सङ्कोचमनयत्। वक्तुमक्षमत्वं च सङ्कीर्णत्वात्॥२६१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इत्यनुद्भिन्नरूपत्वाद्रत्युत्सवमनोरथः।
अनुल्लंघ्येव सूक्ष्मत्वमभूदत्र व्यवस्थितः॥२६२॥

रत्नश्री

इत्युक्तेन प्रकारेण रतिः सुरतमुत्सवो महः प्रीतिविशेषलक्षणत्वात् तस्मिन् मनोरथोऽभिलाषः। सूक्ष्मत्वं दुरुपलक्षणत्वमनुल्लङ्घ्य अनतिक्रम्यैव सूक्ष्म एव व्यवस्थितो भावरूपेणाभूत्। कुतः? अनुद्भिन्नमशब्दप्रकाशितमव्यक्तं रूपं स्वभावो यस्य रत्युत्सवमनोरथस्य तस्य भावः तत्त्वं तस्मात्। अत्राप्याकारसूक्ष्मप्रयोगे न केवलम् इङ्गितसूक्ष्मलक्ष्ये कदेत्यादाविति॥

॥ इति सूक्ष्मचक्रम् ॥

लेशमादर्शयन्नाह–यो लव इत्युद्दिष्टः–

हृदयङ्गमा

इङ्गितलक्ष्यं सूक्ष्ममुदाहरति, कदेत्यादि। –कदा कस्मिन् समये, नौ आवयोः, सङ्गमो भावी इति आकीर्णे जनबहुले स्थाने, वक्तुमक्षमं कान्तम् अवेक्ष्य अबला कामिनी, लीलापद्मं क्रीड़ाकमलं, न्यमीलयत् समकोचयत्। अत्र अङ्गजपीड़ितं कामार्त्तं, प्रियम् आश्वासयितुम् इच्छन्त्या अनया कामिन्या, पद्मसम्मीलनात् निशि रात्रौ, सङ्गमः, भावीति शेषः, सूचितः। (पद्मनिमीलनमिह इङ्गितं निशि प्रियसङ्गमरूपसूक्ष्मोऽर्थः इति बोध्यम्। अस्य च सहृदयचमत्कारितया अलङ्कारत्वमवगन्तव्यम्। यथा वा, –"तां प्रत्यभिव्यक्तमनोरथानां महीपतीनां प्रणयाग्रदूत्यः। प्रबालशोभा इव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पादपानां श्रृङ्गारचेष्टा विविधा बभूवुः।।'' अत्र राज्ञां राजपुत्रीं प्रति प्राप्तिलक्षणस्य मनोरथस्य श्रृङ्गारचेष्टात्मकेन इङ्गितेन व्यङ्ग्यत्वात् इङ्गितलक्ष्यः सूक्ष्मः)।।२६१।।२६२।।

प्रभा

उदाहरणं विशदयति-**पद्मेति।** अत्र अस्मिन् पद्ये। अङ्गजपीडितं मदनपरितप्तं प्रियम् आश्वासयितुं समाधातुम् इच्छन्त्या नायिकया पद्मसंमीलनान निशि रात्रौ भावीति शेषः। संगमः सूचितः लक्षितः। अत्र पद्मनिमीलनरूपेङ्गितेन निशि संगमो भावीति प्रियाय सूक्ष्मतया सूचितम् इति सूक्ष्मालंकारः। तच्च सूचनं सहृदयचमत्कारि। अतोस्यालंकारत्वं निर्बाधमेव।।२६२।।

विवृति

स्वयं व्याचष्टे–

[आकारलक्ष्यमुदाहरति]

इङ्गितलक्षणं दर्शयति–कदेति। आकीर्णे जनसङ्घाते 'कदा नौ सङ्गमो भवेत्?' इति वक्तुमक्षमम्, कान्तं तदिङ्गितेन ज्ञात्वा, हस्तगतं पद्मं निमीलनाभिनयेन मुकुलीचकार। एतत् विवृणोति–**पद्मेति**।।

कदेति। नायिकादर्शितस्य निशि समागमस्य पद्मसम्मीलनलक्षणेन इङ्गितेन प्रियतमेन लक्षितत्वात् अयम् इङ्गितलक्ष्यः सूक्ष्मः।।२६२।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लेशो लेशेन निर्भिन्नवस्तुरूपनिगूहनम्।
उदाहरण एवास्य रूपमाविर्भविष्यति॥२६३॥

रत्नश्री

निर्भिन्नस्याकारात् तादृशात् कुतश्चित् प्रकटीभूतस्य वस्तुरूपस्यार्थात्मनः कस्यचिदनुरागादेर्लेशेन व्याजेन केनचित् निगूहनं कथञ्चित्संवरणमित्यनूद्य लेशो विधीयते। एवमप्यनभिव्यक्तस्वभाव इत्याह–उदाहरणे लक्ष्य एवास्य रूपं स्वभाव आविर्भविष्यति प्रकटतां यास्यति। ततस्तत्रैव परिस्फुटमवगम्यतामिति॥

तमुदाहरन्नाह–

हृदयङ्गमा

आकारलक्ष्यं सूक्ष्मं दर्शयति, मदर्पितदृश इति।–गीतगोष्ठ्यां सङ्गीतसंसदि, मयि अर्पिते दृशौ यया तादृश्याः, तस्याः मुखाम्बुजे उद्दामः अतिप्रवृद्धः, यः रागः रमणाभिलाषः, तेन तरला विकस्वरा, काऽपि अनिर्वचनीया, छाया कान्तिः, अवर्द्धत। (अत्र मुखच्छायावैलक्षण्येन नायिकाया रत्युत्सवाभिलाषस्य लक्षितत्वात् सूक्ष्मतत्वम्। उदाहरणान्तरं यथा, –"सा यूनि तस्मिन्नभिलाषबन्धं शशाक शालीनतया न वक्तुम्। रोमाञ्चलक्ष्येण स गात्रयष्टिं भित्त्वा निरक्रामदरालकेश्याः॥" इति; अत्र अभिलाषबन्धो रोमाञ्चलक्ष्येण गात्रयष्टिं भित्त्वा निरक्रामत् इत्याकारलक्ष्यः सूक्ष्मभेदः)॥२६३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रभा

आकारलक्ष्यार्थमुदाहरति–**मदर्पितेति।** गीतगोष्ठ्यां संगीतशालायाम्। मदर्पितदृशः मयि बद्धदृष्ट्यास्तस्याः नायिकाया मुखाम्बुजे उद्दामरागतरलां उद्दामः मर्यादातिक्रान्तः यः रागः अनुरागः तेन तरला तेजोभासुरा पूर्णानुरागसूचिकेत्यर्थः। कापि अनिर्वचनीया छाया कान्तिरवर्धत। अत्र मुखच्छायावैलक्षण्य-रूपाकारविशेषेण नायिकाया रत्युत्सवाभिलाषः सूक्ष्मतया दर्शित इति सूक्ष्मालंकारः।।२६३।।

विवृति

त्वामालोकयन्त्यास्तस्याः कान्ताया उक्त(उत्कटानुरागललिता काऽपि शोभाऽवर्ध)तेति आकारलक्ष्योऽर्थ इति सूक्ष्मः।।२६३।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

राजकन्यानुरक्तं मां रोमोद्भेदेन रक्षकाः।
अवगच्छेयुरा ज्ञातमहो शीतानीलं वनम्॥२६४॥

रत्नश्री

राज्ञः कन्यायां कस्याञ्चिदनुरक्तमुद्भूताभिलाषम् मामवगच्छेयुर्जानीयुः रक्षकाः तत्परिपालनाधिकृता वर्षवरादयः। कथम्? रोम्णामुद्भेदेन हर्षणानुरागकार्यतया तज्ज्ञापकेन हेतुना। किमिदमासीदिति रोमाञ्चेन निर्भिन्नमनुरागलक्षणं वस्तुरूपमिह तावद्दर्शितम्, तदिदानीं कारणान्तरोपन्यासेन लेशेन निगूह्यते। आः स्मृतिप्रतिलम्भे, ज्ञातं भवतु दृष्टम्। अहो [75b]अतिशये। शीतोऽनिलो यस्मिन् तच्छीतानिलम् अहो यथेदं वनम् यतो रोमाञ्चो जायत इति रोमोद्भेदस्य शिशिरमारुतसंसर्गादप्युपपत्तेरन्यथासिद्ध्या निर्भिन्नोऽनुरागो निगूढ़ इति स्पष्टरूपमीदृशम्॥

हृदयङ्गमा

कदा नौ इत्यादौ निशि सङ्गमस्य पद्मसङ्कोचनेन सूचनरूपः अर्थस्तु सूक्ष्म इति,तत्र सूक्ष्मत्वन्तावद्भवतु, अत्र तु तादृशमुखकान्त्या रत्युत्सवस्य स्फुटं प्रतीयमानत्वात् कथं सूक्ष्मत्वमित्याशङ्क्याह, इतीति। –अत्र रत्युत्सवमनोरथः इति उक्तरूपेण, अनुद्भिन्नरूपत्वात् आकारलक्षितत्वेन स्फुटतया प्रतीयमानत्वाभावात्, सूक्ष्मत्वम् अनुलङ्घ्यैव अपरित्यज्यैव, व्यवस्थितः वर्णितः, अभूत्। (तथा च तादृशी मुखच्छाया अवश्यमेव रत्युत्मवमनोरथं व्यञ्जयतीति न तावन्नियमः,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अन्यविधमनोरथेनापि तत्सम्भवात्; अतो नियतत्वाभावात् स्फुटं तादृशमनोरथो न प्रतीयते, विशेषपर्य्यालोचनया तादृशसुनिपुणो लक्षयिता कथञ्चित् इममर्थं लक्षयितुं शन्कोतीति सूक्ष्मालङ्कारस्यावकाश इति बोध्यम्)।।२६४।।

प्रभा

उदाहरणे लक्षणं संगमयति–**इतीति**। इति एवं केवलं छाययैव सूक्ष्मरूपेण दर्शितत्वात्। अनुद्भिन्नरूपत्वात् स्फुटतया अप्रतीयमानत्वात् सूक्ष्मत्वम् अनुल्लङ्घ्यैव अपरित्यज्यैव रत्युत्सवमनोरथो व्यवस्थितः वर्णितः अभूत्। अतः सूक्ष्मप्रकारेण मनोरथाविष्कारवर्णनात् सूक्ष्मालंकार इति भावः। अत्र केचित्। उद्दामरागतरला मुखच्छाया तावद् रत्युत्सवमनोरथस्यैवानुभाव इति न नियमः। विषयान्तरमनोरथादिनापि तत्संभवादित्यनैकान्तिकत्वान्न स्फुटतरं तादृशमनोरथं लक्षयति। लक्षयिता तु स्वीयविलक्षणसहृदयतासध्रीचीनया तया कथचिल्लक्षयतीति सूक्ष्मत्वमेव रत्युतसवविषयस्येत्याहुः।।२६४।।

विवृति

रतिरेवो (त्सवः। तत्र) मनोरथा(थोऽ) वाप्तिप्रार्थना अनुद्भिन्नं रूपं यस्याः सा[?] अनुद्भिन्नरूपा। तस्या भावोऽनुद्भिन्नरूपत्वं तस्मात् सूक्ष्मत्वमनुल्लङ्घ्यैव व्यवस्थितोऽत्रासीदिति।।

आकारलक्ष्यं दर्शयति–**त्वदिति**। गीतगोष्ठ्यां त्वदर्पितदृशः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्याः मुखाम्बुजे उद्दामरागतरला रागातिरेकभासुरा कापि शोभा अवर्धत इति, तदीक्षणसमये तस्या मुखच्छायाभेदेन तस्मिन् अनुरागं लक्षयित्वा कोऽपि कथयति। इतीति। कस्मिंश्चित् अनुरागलक्षणस्य अल्प(र्थ?)स्य अप्रकाशितरूपत्वात् निपुणवेद्यत्वात् सूक्ष्मत्वम्।।

त्वदिति। वर्णनीयमनसि वर्तमानः रत्युत्सवमनोरथः विलक्षणया मुखच्छायया लक्षित इति आकारलक्ष्यः सूक्ष्म एषः।।२६४।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आनन्दाश्रु प्रवृत्तं मे कथं दृष्ट्वैव कन्यकाम्।
अक्षि मे पुष्परजसा वातोद्धूतेन दूषितम्॥२६५॥

रत्नश्री

कन्यकां पतिम्वरा दृष्ट्वैव दर्शनसमनन्तरमेवानन्दजनितमश्रु हर्षवाष्पः प्रवृत्तं जातं मे। कथमेतदयुक्तं बत संवृत्तमिति निर्भिन्नस्य वस्तुनोऽनुरागस्य लेशेन निगूहनमिदं क्रियते। आ ज्ञातमक्षि मे पुष्पाणां रजसा रेणुना वातैरुद्धूतेन प्रेरितेन दूषितमुपद्रूतम् इति अश्रुपातस्य रजोदूषणादपि सम्भवात् संवृत्तो लेशेन भावस्तादृश इति॥

तामनुस्मृत्य पद्माक्षीमक्षि वाष्पायते मम।

श्रोत्रं सुभाषितानन्दममन्दमभिनन्दति॥

इत्यपरमुदारहणम्॥

लेशप्रकारमुपसंहृत्य प्रकारान्तरमस्य दर्शयन्नाह–

हृदयङ्गमा

इदानीमुद्देशवाक्याप्राप्तलवापरपर्य्यायं लेशं निरूपयति, लेश इति।– लेशेन किञ्चिन्मात्रतया, निर्भिन्नं प्रकटितं, वस्तुनः यत् रूपं स्वरूपं, तस्य निगूहनं गोपनं, लेशः, उदाहरणे एव राजकन्यानुरक्तमित्यादौ वक्ष्यमाणे एव इत्यर्थः, अस्य अलङ्कारस्य, रूपं वैचित्र्यात्मकं स्वरूपम्, आविर्भविष्यति प्रकाशिष्यते। (इत्थञ्च नेत्रादिव्यङ्गेन ईषत्प्रकाश-गोप्यविषयस्य यत् केनचित्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्याजेन गोपनं स लेशः इति लक्षणम्। इममेव व्याजोक्तिं वदन्ति केचित्। यथा,–"व्याजोक्तिश्छद्मनोद्भिन्नवस्तुरूपनिगूहनम्" इति। विश्वनाथस्तु,–"गोपनीयं कमप्यर्थं द्योतयित्वा कथञ्चन। यदि श्लेषेणान्यथा वाऽन्यथयेत् साऽप्यपह्नुतिः।।" इत्युक्तलक्षणां द्वितीयापह्नुतिमत्र मन्यते; उदाहरति च श्लिष्टाश्लिष्टत्वेन, –"काले वारिधराणामपतितया नैव शक्यते स्थातुम्। उत्कण्ठिताऽमि तरले। न हि न हि सखि! पिच्छिलः पन्थाः।।" "इह पुरोऽनिलकम्पितविग्रहा मिलति का न वनस्पतिना लता?। स्मरसि किं सखि कान्तरतोत्सवम्? न हि घनागमरीतिरुदाहृता।।" इति। पूर्वत्र अपतितया इत्यस्य श्लिष्टत्वेन पतिमन्तरेण इत्यर्थमभिधाय पतनाभावत्वेन निगूहनम्; द्वितीये पतिसङ्गेच्छां सूचयित्वा घनागमस्वभावत्वेन तन्निगूहनम् इत्यपह्नुतिरेव। व्याजोक्तो गोपनकृता गोपनीयं प्रथममभिधीयते, अपह्नुतौ तु न तथा इति तयोर्भेदः तेनैव दर्शितः ; वक्ष्यमाणापह्नुतौ तु लेशनिर्भिन्नवस्तुनः व्याजेन नापह्नवः, लेशे तु तथेत्यनयोर्भेदः)।।२६५।।

प्रभा

क्रमप्राप्तं लवापरपर्यायं लेशं निरूपयति–**लेश इति।** लेशेन स्वल्पतया निर्भिन्नं प्रकटीभूतं यद्वस्तुनो गोप्यविषयस्य रूपं स्वरूपं तस्य निगूहनम् संवरणम्। लेशः लेशनामालंकारः। केचित्तु लेशेन व्याजेन वस्तुरूपनिगूहनं लेशोलंकार इति विवृण्वन्ति। तथा च कारणान्तरोत्पन्नसय प्रकटीभूतस्य वस्तुनः कारणान्तरोत्पन्नत्वकथनेन तदाच्छादनं लेश इति भावः। स च वस्तुरूपनिर्भेदः क्वचिद् रोमादिगात्रविकारैः क्वचिद्वक्तुरनवधानतया संभवति। इमं नव्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्याजोक्तिं वदन्ति। तथा च प्रकाशकारः– व्याजोक्तिश्च्छद्मनोद्भिन्नवस्तुरूपनिगूहनम् इति। अप्पय्यदीक्षित-वर्णिता छेकापह्नुतिरपि अस्यैव प्रभेदः। तल्लक्षणोदाहरणं तु–

छेकापह्नुतिरन्यस्य शङ्कातस्तथ्यनिह्नवे।
प्रजल्पन् मत्पदे लग्नः कान्तः किं न हि नूपुरः।। इति।

अन्यान्यपि उदाहरणानि–

समये पयोधराणामपतितया नैव शक्यते स्थातुम्।
उत्कण्ठितासि बाले नहि नहि सखि पिच्छिलः पन्थाः।।

यथा वा–

सीत्कारं शिक्षयति व्रणयत्यधरं तनोति रोमाञ्चम्।
नागरिकः किं मिलितो नहि नहि सखि हैमनः पवनः।। इति।।

ननु नास्त्यत्र लेशनिर्भिन्ननिगूहने कश्चिच्चमत्कार इति नायं अलंकारः। तदेतन्मतं निराकर्तुमाह–**उदाहरणेति इति।** अस्य अलंकारस्य। उदाहरणे एव रूपं चमत्कृतिस्वरूपम् आविर्भविष्यति प्रकटीभविष्यति।।२६५।।

विवृति

इति सूक्ष्मम्।।

लवमुदाहरति–

लेशो लवपर्यायः। उद्देशे लव इति निर्देशे लेश इति वदतो न दोषः। तत्पर्यायत्वात्। लेश इति लक्ष्यनिर्देशः। लेशेन व्याजेन स्तोकेन मनागिति यावत्। निर्भिन्नं च तद्वस्तु च तस्य रूपं तस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निगूहनं संवरणमिति लक्षणनिर्देशः। अस्य लेशस्य उदाहरणवाक्ये रूपमाविर्भविष्यति।।

लेशं लक्षयति **लेश इति।** किञ्चित्प्रकाशस्य अर्थरूपस्य प्रकारान्तरेण निगूहनं लेशः।।

लेशालङ्कारमाह–**लेश इति।** लेशेन व्याजेन निर्भिन्नस्य प्रकटीभूतस्य वस्तुनः तिरस्करणं लेशः लवः इति सम्बन्धः। सात्त्विकविकारेषु अन्यतमस्य तत्कारणतया ज्ञायमानस्य कारणान्तरकथनेन निगूहनम् सूक्ष्मभूतेन कारणेन अनुमितस्य गूहनात् लेशः। लवस्य रूपं उदाहरणे व्यक्तीभविष्यति इत्याह–**उदाहरण इति**।।२६५।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इत्येवमादिस्थानेऽयमलङ्कारोऽतिशोभते।
लेशमेके विदुर्निन्दां स्तुतिं वा लेशतः कृताम्॥२६६॥

रत्नश्री

इत्येवंरूपमनन्तरोक्तं राजकन्यादर्शनादि यस्य रागनिगूहनादेस्तस्मिन् स्थाने प्रस्तावे अयमलङ्कारो लेशः अतिशोभते, तस्यात्यन्तसुन्दरत्वात् इति स्वमतमुपसंहृतम्। एके अन्ये पुनर्निन्दां दोषोक्तिं लेशतो व्याजेन कथञ्चित् कृतां तादृशविषयां स्तुति वा गुणाविष्क्रियामीषत्प्रयुक्तां लेशं विदुः स्मरन्ति। अ[य]मपरो लेशप्रकार इति॥

तमुदाहरन्नाह–

हृदयङ्गमा

अनिष्टसम्भावनायां लेशमुदाहरति, राजकन्येति।–रोमोद्भेदेन रोमहर्षेण, राजकन्याया दर्शनजनितेनेति भावः ; मां राजकन्यायाम् अनुरक्तम् अभिलाषुकं, रक्षकाः राजान्तः पुररक्षिणः, अवगच्छेयुः, (सम्भावनायां विधिलिङ्) आ ज्ञातम् आ इति स्मरणार्थकमव्ययम्; ज्ञातं विदितं, निगूहनप्रकारो ज्ञायत इत्यर्थः, (ज्ञातमिति वर्त्तमाने क्तप्रत्ययः) अहो! वनं शीतः अनिलः यत्र तत् शीतानिलस्पर्शेन रोमाञ्चोदय इति भावः। (अत्र रोमोद्भेदस्य शीतानिलजत्वेन अनुरागनिगूहनं वैचित्र्यमावहतीति अस्यालङ्कारत्वम्)॥२६६॥

प्रभा

उदाहरणं दर्शयति–**राजेति।** रक्षकाः राजान्तः पुराधिकृता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रोमोद्भेदेन रोमहर्षेण मां राजकन्यानुरक्तं नृपकन्यकाभिलाषुकम् अवगच्छेयुः जानीयुः। संभावयानां लिङ्। आ ज्ञातम्। आः इति स्मरणे निगूहनप्रकारः कल्पित इत्यर्थः। अहो इति विस्मये। वनं शीतानिलम् शीतः अनिलः वायुर्यत्र तत्। शीतानिलसंपर्केण रोमोद्गम इति भावः। अत्र शीतानिलसंपर्केण रोमोद्गमस्य व्यवस्थापनाद् अनुरागनिगूहनं संपादितम्। तच्च वैचित्र्यातिशालि इति युक्तमस्यालंकारत्वम्। निर्भिन्नवस्तुनिगूहनम् अनिष्टसंभावनया लज्जया वा भवति। अत्र अनिष्टसंभावनया। लज्जया तु अग्रिमोदाहरणे इति ज्ञेयम्।।२६६।।

विवृति

रागहेतुभूतेन रोमहर्षेण रक्षा[क्षका]मामवगच्छेयुर्यथाऽयं राजकन्यानु(रक्त इति। आः) ज्ञातम्। अहो शीतानिलं वनमित्यनेन व्याजेन शीतहेतुकं रोमहर्षक(?)मापादयद्रा [न् रा]जकन्याविषयाभि [लाषं निगूहतीति लेशः]।।

राजेति। राजकन्यादर्शनसमये समुपजातं आत्मनो रोमाञ्चमवेक्ष्य, तद्रक्षकैरात्मविकारदर्शनभिया तद्गहनोपायं विचिन्त्य, उपवनानिलशैत्यं रोमाञ्चहेतुमुपन्यस्तवान्। आः ज्ञातम् इति रोमाञ्चेहेतुस्मरणं द्योतयति।।

उदाहरति—**राजेति।** राजकन्याविषयं अनुरागं पुलकोद्गमेन रक्षकाः शुद्धान्तरक्षकाः ज्ञास्यन्तीति भयात्कोऽत्र परिहारः इति चिन्तयता, कारणान्तेरण आः ज्ञातं शीतानिलं वनं इति लेशेन परिहारः कृत इति उक्तलक्षणो लेशालङ्कारः।।२६६।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

युवैव गुणवान् राजा योग्यस्ते पतिरूर्जितः।
रणोत्सवे मनः सक्तं यस्य कामोत्सवादपि॥२६७॥

रत्नश्री

युवा तरुणः। विषयसम्भोगैकरसे विविधा[नन्दजु]षि वयसि वर्तमान एव गुणवान् विनयसम्पन्नः। एवम्भूतोऽपि, न यः कश्चित्। किं तु राजा मध्यमलोकपालः। ऊर्जितस्तेजस्वी महानुभावः तवायमेव योग्यः समुचितः पतिर्वरो वरारोहे! पुण्येन महता प्राप्तः। यस्य विक्रमैकरसस्य रणे उत्सवे प्रीतिकरत्वान्मनः सक्तं निरतं कामोसवात्सुरतसुखादप्यधिकम्, न तस्योत्रास्था यथा समरमहोत्सवे इति॥

नन्वत्र सर्वथा गुण एव प्रतीयते नतु कश्चिद् दोषो यतो लेशतो निन्दा स्यादित्यत आह–

हृदयङ्गमा

लज्जायां लेशमुदाहरति, आनन्दाश्रु इति।–कन्यकां दृष्टैव मे मम, कथम् आनन्दाश्रु प्रवृत्तम्? विवाहार्थमुद्वाहसमितौ समानीतायाः कन्याया दर्शनमात्रेण अनुरागोदयात् आनन्दाश्रुप्रवृत्तिर्लज्जाकरीति भावः। अत्र निगूहनप्रकारमाह, अक्षीति।–वातोद्धूतेन पवनचालितेन, पुष्परजमाकुसुमपरागेण, मे अक्षि दूषितम्। (अत्र आनन्दाश्रुणोऽक्षिदूषणजत्वप्रतिपादन–व्याजेनानुरागस्य संवरणादलङ्कारत्वम् इति)॥२६७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रभा

लज्जया निगूहनात्मकं लेशमुदाहरति–**आनन्देति।** कन्यकां विवाहमण्डपे आगतां कन्यकां दृष्ट्वैव मे आनन्दाश्रु कथं प्रवृत्तम्। एवं कन्यकादर्शनेन आनन्दाश्रुप्रवृत्तिश्चित्तचाञ्चल्यसूचिका इति आशङ्क्य निगूहति। मे अक्षिनयनं वातोद्धूतेन पवनोत्क्षिप्तेन पुष्परजसा कुसुमपरागेण दूषितम् इति। अत्र आनन्दाश्रुणः पुष्परजोदूषिताक्षिजत्वप्रतिपादनेन निगूहनाद् लेशालंकारः।।२६७।।

विवृति

(अपर)मुदाहरणं दर्शयति–

इदञ्च प्राक्तनोऽप्युदा(नोदा)ह(रणव्याख्यानेनैव कृत)-व्याख्यानमिति न पृथक्प्रपञ्च्यते।।

आनन्देति। अत्र स्वानुरागप्रकाशकानन्दाश्रुरूपसात्त्विक-भावनिगूहनाय अश्रुकारणं पुष्परेणुमुपन्यस्तवान् उदाहरणद्वयप्रदर्शनं शङ्काहेतुसात्त्विकभेदकथनेन विषयव्याप्त्यर्थम्।।

आनन्देति। राजकन्याविषयं अनुरागं परिसरवर्तिनः प्रमोदबाष्पेण ज्ञास्यन्ति इति तस्य कारणान्तरकथनात् लेशलक्षणयोगः।।२६७।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वीर्योत्कर्षस्तुतिर्निन्दैवास्मिन् भावनिवृत्तये।
कन्यायाः कल्पते भोगान्निर्विविक्षोर्निरन्तरान्॥२६८॥

रत्नश्री

वीर्यस्य विक्रमस्योत्कर्षोऽधिमात्रता तस्य स्तुतिः वर्णनं निन्दैव दोषोक्तिरेव जायते। कथम्? यतः कन्याया निरन्तरानविच्छेदवर्तिनो भोगान् [76a] सुरतसुखानि विविक्षोरनुबुभूषोः सम्बन्धिनो भावस्य स्वीकाराभिप्रायस्यास्मिन् यथोपवर्णिते पुंसि तन्मनोरथप्रतिकूलवर्तिनि विषये वैमुख्याय कल्पते। ततो निन्दैवेयं जाता स्तुतिः, अन्यथा भावनिवृत्त्ययोगात्। नहि गुणवत्तया प्रतीतः परित्यज्यते किं तु दोषवानेव। तथा असौ अलीकरणरागव्यसनी सुरतसमरमहोत्सवपराङ्मुखः प्रतीतो यतस्तं विभावयतीति निन्दैवेयं लेशतः कृतेति॥

[मुग्धो] नराधिपः सोऽयं निर्विकारः सुमेरुवत्।

आश्रितानामपि क्लेशैर्व्यथते यो न जातुचित्॥

इत्यपरमुदाहरणम्॥

हृदयङ्गमा

अस्यालङ्कारत्वं प्रतिपादयन्नाह, इतीति। –इत्येवमादिस्थाने एवमाद्युदाहरणे, अयम् अलङ्कारः अतिशोभते सहृदयचमत्कारितया समुल्लसति।–

लेशे मतान्तरं प्रदर्शयति, लेशमिति। –एके पण्डिताः, लेशतः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

छलेन, कृतां निन्दां वा स्तुतिं व्याजस्तुतिमित्यर्थः, लेशं विदुः। (तदुक्तं, –"दोषस्य यो गुणीभावो दोषीभावो गुणस्य यः। स लेशः स्यात् ततो नान्या व्याजस्तुतिरपीष्यते।।" इति। लेशकृतस्तुतिनिन्दयोरपि लेशनामालङ्कारत्वं किं व्याजस्तुतीति नामान्तराभ्युपगमेन इति भावः)।।२६८।।

प्रभा

उदाहरण एवास्य रूपमाविर्भविष्यति इति प्रतिज्ञानुरोधेन उदाहरणं प्रदर्श्य तत्र वैचित्र्यं दर्शयन् उपसंहरति–**इत्येवमिति।** इत्येवमादिस्थाने एवंविधस्थले अयमलंकारः। लेशोतिशोभते चमत्कृतिविशेषमावहति। अतः परोक्तं लेशस्य अनलंकारत्वं न स्वीकर्तव्यमिति भावः। लेशस्य अपरं प्रकारं दर्शयति **लेशमिति।** एके पण्डिताः। लेशतः कृतां स्तुतिं वा निन्दां वा लेशं विदुः जानन्ति। तथा च स्तुतिमिषेण कृता निन्दा निन्दामिषेण कृता स्तुतिर्वा लेश इत्यर्थः। यदा लेशेन निर्भिन्नवस्तुनिगूह-नाल्लेशालंकारस्तथा लेशेन स्तुतिनिन्दाविधानेपि स एव अलंकार उचितः। चमत्कृतौ लेशस्य प्राधान्यात्। एवं च व्याजस्तुत्यलंकारान्तराभ्युपगमनं न युक्तम्।

दोषस्य यो गुणीभावो दोषीभावो गुणस्य वा।
स लेशः स्यात् ततो नान्या व्याजस्तुतिरपीष्यते।।

इति प्राञ्चः। अप्पयदीक्षितास्तु–
लेशः स्याद्दोषगुणयोर्गुणदोषत्वकल्पनम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अखिलेषु विहङ्गेषु हन्त स्वच्छन्दचारिषु।
शुक पञ्चरबन्धस्ते मधुराणां गिरां फलम्।।

इति लक्षणोदाहरणं प्रदर्श्य अग्रे आहुः। दण्डी त्वत्रोदाजहार–

युवैष गुणवान् राजा योगस्ते पतिरूर्जितः।
रणोत्सवे मनः सक्तं यस्य कामोत्सवादपि।।

चपलो निर्दयश्चासौ जनः किं तेन मे सखि।
आगः प्रमार्जनायैव चाटवो येन शिक्षिताः।। इति।

अत्राद्यश्लोके राज्ञो वीर्योत्कर्षस्तुतिः। कन्याया निरन्तरसंभोग-निर्विवर्तिषया दोषत्वेन प्रतिभासतामित्यभिप्रेत्य विदग्धया सख्या राजप्रकोपपरिजिहीर्षया स एव दोषो गुणत्वेन वर्णितः। उत्तरश्लोके सखीभिरुपदिष्टं मानं कर्तुमशक्तयापि तदग्रतो मानपरिग्रहानुगुण्यं प्रतिज्ञाय तदनिर्वाहमाशङ्कमानया सखीनामुपहासं परिजिहीर्षन्त्या नायिकया नायकस्य चाटुकारितागुण एव दोषत्वेन वर्णितः। न चाद्यश्लोके स्तुतिर्निन्दापर्यवसायिनी द्वितीयश्लोके निन्दा स्तुतिपर्यवसायिनीति व्याजस्तुतिराशङ्कनीया। राजप्रकोप-परिहारार्थमिह निन्दास्तुत्योरन्याविदिततया लेशत एवोद्घाटनेन ततो विशेषादिति। वस्तुतस्तु इह व्याजस्तुतिसद्भावेपि न दोषः। नहि एतावता लेशमात्रस्य व्याजस्तुत्यन्तर्भावः प्रसज्यते। तदसंकीर्णयोरपि लेशोदाहरणयोर्दर्शितत्वात्। नापि व्याजस्तुतिमात्रस्य लेशे अन्तर्भावः प्रसज्यते। भिन्नविषयव्याजस्तुत्युदाहरणेषु–

कस्त्वं वानर रामचन्द्रभवने लेखार्थसंवाहको।
यद्वक्त्रं मुहुरीक्षसे न धनिनां ब्रूषे न चाटून् मृषा।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इत्यादिषु दोषगुणीकरणस्य गुणदोषीकरणस्य। चाभावात् तत्र अन्यगुणदोषाभ्यां अन्यत्र गुणदोषयोः प्रतीतेः। विषयैक्येपि–

इन्दोर्लक्ष्म त्रिपुरजयिनः कण्ठमूलं मुरारिः
दिङ्नागानां मदजलमषीभाञ्जि गण्डस्थलानि।
अद्याप्युर्वीवलयतिलक श्यामलिम्नानुलिप्ता-
न्याभासन्ते वद धवलितं किं यशोभिस्त्वदीयैः।।

इत्याद्युदाहरणेषु लेशास्पर्शनात्। तत्र हीन्दुलक्ष्मादीनां धवलीकरणाभावदोष एव गुणत्वेन न पर्यवस्यति किंतु परिसंख्यारूपेण ततोन्यत् सर्वं धवलितमित्यन्यो गुणः प्रतीयते। क्वचिद् व्याजस्तुत्युदाहरणे गुणदोषीकरणसत्त्वेपि स्तुतेर्विषयान्तरमपि दृश्यते। यथा–

सर्वदा सर्वदोसीति मिथ्या संस्तूयसे बुधैः।
नारयो लेभिरे पृष्ठं न वक्षः परयोषितः।।

अत्र हि वाच्यया निन्दया परिसंख्यारूपेण ततोन्यत् सर्वमर्थिनामभिमतं दीनारादि दीयते इति स्तुत्यन्तरमपि प्रतीयते। एवं च येषूदाहरणेषु–कस्ते शौर्यमदो योद्धुम् इत्यादिषु–गुणदोषादिषु गुणदोषीकरणादिकमेव व्याजस्तुतिरूपतयावतिष्ठते तत्र लेशव्याजस्तुत्योः संकरोस्तु इत्याहुः। जगन्नाथोपि–न चायमलंकारो व्याजस्तुत्या उभयरूपया गतार्थ इति शङ्क्यम्। मुखप्रतिपादितार्थवैपरीत्येन अत्र सर्वत्र पर्यवसानाभावाद् इत्यादि प्रबन्धेनामुमेव सिद्धान्तं दर्शयामास इत्यलं पल्लवितेन।।२६८।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विवृति

इत्येवमादिस्थानेऽयमलङ्कारो लेशोऽतीव शोभते।

लेशस्य लक्षणान्तरमाह--**लेशमिति।** एतत् लेशलक्षणं वक्ष्यमाणव्याजस्तुतिलक्षणेन सङ्कीर्णं इति स्वाभिमतमित्याह–**एके इति।।**

इतीति। एवमादिस्थाने ईदृशे स्थाने। लेशलक्षणं बहुप्रकारं आचक्षते; इदमेव तु श्लाघनीयम् इत्यभिप्रायः। लेशालङ्कारस्य आचार्यान्तरमतं लक्षणं दर्शयति–**लेशमिति।** एके कचिदाचार्याः। लेशतः कृता तुतिर्वा लेशतः कृता निन्दा वा लेशः इत्यर्थः।।२६८।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चपलो निर्दयश्चासौ जनः किं तेन मे सखि।
आगः प्रमार्जनायैव चाटवो येन शिक्षिताः॥२६९॥

रत्नश्री

चपलो दुर्विनीतः यत्किञ्चनकारी निर्दयः क्रूरश्च। किं तेनैवं दुःखदायिना जनेन निर्गुणेन? पुनस्तादृश एवासौ येनागसामपराधानां प्रतिक्षणभाविनामात्मीयानां प्रमार्जनाय परिशोधनार्थमेव केवलम्, नानुग्रहाय कस्मैचित्तादृशाय चाटवोऽनेकविधा लोलनप्रकाराः शिक्षिताः स्वभ्यस्ताः। किं तेन चाटुचुञ्चुनेति निगमनीयम्॥

ननु दोष एवात्र सर्वथोक्तो न गुणः क्वचित् यतो लेशतः स्तुतिः स्यात् इत्यत आह–

हृदयङ्गमा

स्तुतिव्याजेन निन्दामाह, युवेति।–एष राजा युवा गुणवान्, तथा ऊर्जितः विक्रान्तः, अतः ते तव, योग्यः पतिः, यस्य मनः कामोत्सवादपि रणोत्सवे सक्तम्। (स्वयंवरां कन्यां प्रति तत्सख्या उक्तिरियम्। अत्र द्वितीयार्द्धे महावीरत्वेनस्तुतिर्बोधिताऽपि कामोत्सवे अनासक्तत्वप्रतिपादनव्याजेन तव सम्भोगसुखं दुर्लभम्, अतो नायं वरणीय इति द्योतयतीति स्तुत्या निन्दैव प्रतिपादिता)॥२६९॥

प्रभा

स्तुतिव्याजेन निन्दारूपं लेशमुदाहरति–**युवैश इति** एष राजा युवा गुणवान् ऊर्जितः तेजस्वी ते योग्यः समुचितः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पतिर्भवितुमर्हति। यस्य मनः कामोत्सवादपि रणोत्सवे संग्रामविहारे सक्तम्। स्वयंवरप्रसक्तां राजकन्यां प्रतितत्संख्या उक्तिरियम्। तेन मुखतोतिवीरोयं व्रियतामिति रणोत्सवे मनः सक्तं यस्य कामोत्सवादपि इत्यनेन स्तुत्यवगतावपि पर्यवसाने सर्वथा रणव्यग्रोयं नानेन ते पर्याप्तरतिसुखलाभः स्यादिति संभोगाभिलाषुकाया निवेदनान्निन्दाया एव अवबोधो भवति। अतः स्तुतिमिषेण निन्दाविधानाद् लेशालंकारः।।२६९।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दोषाभासो गुणः कोऽपि दर्शितश्चाटुकारिता।
मानं सखीजनोद्दिष्टं कर्तुं रागादशक्तया॥२७०॥

रत्नश्री

सखि! त्वयाकिमतिदाक्षिण्येन अस्य दास्या भूयते? अणुभिरपि न कदाचिदञ्च्यसे। मानिन्यो हि वयम्। किमपरमस्माकमस्त्रमिति सखीजनेनोद्दिष्टम् उपदिष्टम् मानमुन्नतिं चित्तस्य कर्तुमनुष्ठातुमशक्ततया कयाचिदङ्गनया। कुतः? रागात् तद्विषयाभिषङ्गान्मानविरोधिनो हेतोश्चाटुकारिता उपचारचातुर्थं नाम गुणो विशेषः कोऽपि कश्चिदुपात्तो नागरकजनोचितः कोऽपि वा कश्चिदेकः सर्वदोषवदाभासते। अपराधप्रमार्जनपरत्वेनैव प्रकाशनात् दोषाभासो दर्शितः। ततो लेशतः स्तुति[रि]यं कल्पत इति।

नृशंसो नृपतिः सोऽयं व्यसनी नयनिस्पृहः।

दोषसंशोधनायैव त्यागो यस्य विजृम्भते॥

इत्यपरमुदाहरणम्॥

॥ इति लेशचक्रम् ॥

क्रमं विवरीतुमुपक्रमते–

हृदयङ्गमा

अत्रालङ्कारं सङ्गमयति, वीर्य्येति। –अस्मिन् उदाहरणे, निरन्तरं भोगान् रतोत्सवान्, निर्विविक्षोः भोक्तुमिच्छोः, ("निर्वेशो भृतिभोगयोः" इत्यमरः) कन्यायाः भावस्य वरणाभिप्रायस्य,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निवृत्तये वीर्य्योत्कर्षस्य वीर्य्याधिक्यस्य, स्तुतिः निन्दैव कल्पते निन्दारूपेणैव पर्य्यवस्यतीत्यर्थः।।२७०।।

प्रभा

उदाहरणं विशदयति–**वीर्येति**। अस्मिन् पद्ये। निरन्तरं भोगान् निर्विविक्षोः सततभोगाभिलाषुकायाः कन्यायाः भावनिवृत्तये भावः मनोरागः वरणाभिप्रायो वा तन्निवृत्तये राज्ञो वीर्योत्कर्षस्तुतिर्निन्दैव कल्पते निन्दात्वेन परिणमति।।२७०।।

विवृति

युवैष गुणवान् राजेत्यादिवीर्योत्कर्षस्तुतिः निन्दैवास्मिन् राजनि; न स्तुतिः। कन्याया भोगान् निरन्तरं निर्विवक्षे(क्षोरभि)लाषभङ्गाय जायते।।२६९–२७०।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उद्दिष्टानां पदार्थानामनुदेशो यथाक्रमम्।
यथासंख्यमिति प्रोक्तं संख्यातं क्रम इत्यपि॥२७१॥

रत्नश्री

उद्दिष्टानां पूर्वप्रयुक्तानामर्थानां वस्तूनां केषाञ्चिद् यथाक्रममुद्देशक्रमानतिक्रमेण अनुदेशः प्रत्याम्नायः पुनरर्थान्तराश्रयेण परामर्शः [76b]यथासंख्यमिति यथासंख्यं प्रोक्तम्। यथासंख्यमित्यपेक्ष्य नपुंस[क]त्वम् तस्य विधेयत्वात्। अनुदेशस्यानूद्यतया अप्रधानत्वान्न तल्लिङ्गपरिग्रहः। प्रोक्तम् इति संख्यातमित्यपि प्रोक्तम्। क्रम इत्यपि प्रोक्त इति लिङ्गपरिणामेन योज्यम्। क्रम इत्यपि उपदिश्यत इति वा अध्याहार्यम् इति॥

तदुदाहरन्नाह–

हृदयङ्गमा

निन्दाव्याजेन स्तुतिमाह, चपल इति। –हे सखि। असौ जनः चपलः अस्थिरः, निर्दयः परपीड़ानभिज्ञतया दयारहितश्च, येन आगःप्रमार्जनाय अपराधक्षालनाय, चाटवः प्रियवादाः, शिक्षिताः, अतस्तेन युष्माभिरुपदिष्टेन मानेन इत्यर्थः, मे मम, किम्? तस्मिन् जने निष्प्रयोजनं मानकरणमित्यर्थः, तस्य चाटुवचनेन अनुरागजननात् मानस्यापगमादिति भावः। (प्रेयसि मानो गौरवजनकत्वेन विधेय इत्युपदिशन्तीं सखीं प्रति कस्याश्चिन्नायिकाया उक्तिरियम्)॥२७१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रभा

निन्दाव्याजेन स्तुतिमाह–**चपल इति।** मानपरिपालनमेव मनस्विन्या गौरवहेतुः। अतस्त्वया प्रेयसि स विधेय इति उपदिशन्त्याः सख्याः पुरतः प्रतिज्ञातमपि मानस्वीकारं तमनुष्ठातुमसमर्थाया स्वोपहासपरिजिहीर्षन्त्या नायिकाया उक्तिरियम्। हे सखि असौ मन्नायकरूपः जनः। चपलः चञ्चलस्वभावः। निर्दयश्च परपीडानभिज्ञतया दयाशून्यश्चास्ति। येन आगः प्रमार्जनायैव अपराधनिराकरणायैव। चाटवः प्रियालापाः शिक्षिताः। अतस्तेन भवतीभिरुपदिष्टेन मानेन। किम्। न किमपि प्रयोजनमित्यर्थः। स चाटुप्रयोगचतुरो धृतमपि मानं शिथिलयतीत्यर्थः।।२७१।।

विवृति

[तेन] जनेन।

इत्यत्र

चाटून् करोतीति चाटुकारः [तस्य भावश्चाटुकारिता। दोषाभासो न] तु परमार्थतो दोषः किं तु गुणवत्[एव]। किं कुर्वते[त्ये]त्याह–(सखीज)नेनोपदिष्टो मानः तं रागात् भर्तृविषये स्नेहात्कर्तुमश(क्तया। चपलो निर्दय इत्या)दिना दोषवत्तामुद्भाव्य चाटुकारगुणप्रकाशनात् (लवः)।।२७१।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ध्रुवं ते चोरिता तन्वि स्मितेक्षणमुखद्युतिः।
स्नातुमम्भःप्रविष्टायाः कुमुदोत्पलपङ्कजैः॥२७२॥

रत्नश्री

तन्वि! ते स्नातुमम्भः [प्रविष्टायाः] सरः प्रविष्टायाः स्मितं चेक्षणं च मुखं च तेषां द्युतिरित्युद्देशः कुमुदान्युत्पलानि पङ्कजानि च तैश्चोरिता मुषिता कुमुदैः स्मितद्युतिरुत्पलैरीक्षणद्युतिः पङ्कजैर्मुखद्युतिश्चोरितेति यथोद्देशमयमनुदेशः। वस्तुतोऽतथाभावाद् ध्रुवमित्युत्प्रेक्ष्यते।

यद्येवमुत्प्रेक्षेयं कथं यथासंख्यमिति चेत्? यद्येवं निरूप्यते, उपमाप्यत्र विद्यते, स्मितादीनां कुमुदादिभिः सादृश्यप्रतीतेः। तस्माद्यत्रालङ्कारान्तरमपि प्रतीयते, तत्रापि उद्देशानुरूपानुदेशसंख्यातमेवालङ्कारो व्यवह्रियते। तस्यैव मुख्यता, विवक्षितत्वात्। यत्र तु अलङ्कारान्तरं न गम्यते तत्र सुतरामेव क्रम इति विज्ञेयम्॥

॥ इति क्रमः ॥

प्रेयोरसवदूर्जस्वीत्यलङ्कारत्रयं लक्षयन्नाह–

हृदयङ्गमा

दोषाभास इति। –रागात् प्रियानुरागाधिक्यात्, सखी-जनेन उद्दिष्टम् उपदिष्टं, मानं कर्त्तुम् अशक्तया नायिकया, चाटुकारिता चाटुकारितारूपः, कोऽपि स्त्रीजनहृद्यः इत्यर्थः, गुणः दोष इव आभासते इति तथोक्तः, दर्शितः दोषरूपेण कथित इत्यर्थः। (अत्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निन्दाव्याजेन स्तुतिरभिहिता; केचिदिमां व्याजस्तुतिं केचन वा लेशं मन्यन्ते इत्यभिप्रायः)।।२७२।।

प्रभा

उदाहरणं विशदयति–**दोषाभास इति।** रागात् प्रियस्नेहात्। सखी जनोद्दिष्टं सखीजनापेक्षितम्। सखीजनोपदिष्टमिति केचित्। मानं कर्तुं अनुष्ठातुम्। अशक्तया नायिकया चाटुकारतारूपः कोपि गुणः स्त्रीजनमनोहारी दोषाभाषः दोष इव आभासते स दोषाभासः कृतः। दोषत्वेन निरूपित इत्यर्थः। अत्र निन्दाव्याजेन स्तुतिर्दर्शिता इति लेशः।।२७२।।

विवृति

युवेत्यादि। लेशोदाहरणे स्पष्टे।।

युवेत्यादि। राज्ञो वीर्योत्कर्षस्तुतिः कन्यायाः भोगान् निरन्तरान् निर्विवेक्षोः दोषत्वेन प्रतिभासमाना तद्राजविषयाभिलाषनिवृत्तये भवति। चपल इत्येतत् व्याचष्टे–**दोषाभास** इति। अस्मिन्नुदाहरणे दोषाभासाः गुणत्वेन दर्शिताः। चपलः विरहावस्थायां स्थातुमशक्तः; निर्दयः संश्लेषे कठोरः ; आगः प्रमार्जनाय चाटुवचनं शिक्षितवान् इति गुणः। अत्र सखीजनोपदिष्टं मानं निर्वोढुं अपारयन्त्या नायिकया प्रियस्य दोषाभासो गुणीकृतः।।२७२।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रेयः प्रियतराख्यानं रसवद्रसपेशलम्।
ऊर्जस्वि रूढ़ाहङ्कारं युक्तोत्कर्षं च तत् त्रयम्॥२७३॥

रत्नश्री

प्रियतरस्यातिशयेन प्रियस्यार्थरूपस्य कस्यचिदाख्यानं प्रतिपादनम् आख्यायते अनेनेत्यनूद्य प्रेय इति ज्ञाप्यते। रसेन श्रृङ्गारादिना प्रतिपाद्येन पेशलं मनोज्ञं रसवद् वाक्यं विज्ञेयम्। रूढ़ो दीप्तोऽहङ्कारः सौटीर्यं यत्र तादृशं वचनमूर्जस्वि ज्ञेयम्। तच्चैतत्त्रयं प्रेयो रसवत् ऊर्जस्वि च युक्तः सङ्गतः उत्कर्षोऽधिमात्रता येनेति युक्तोत्कर्षमत्यन्तप्रियमेकान्तरसवत् भृशमूर्जस्वीत्यर्थः। अयं चार्थः-अयमु[प]मादिभिरतिशयविधिभिरुक्तो युक्तोत्कर्ष इति॥

प्रेयस्तावदुदाहरन्नाह–

हृदयङ्गमा

क्रमालङ्कारं निरूपयति, उद्दिष्टानामिति।–उद्दिष्टानाम् उक्तानां, पदार्थानां यथाक्रमम् अनु पश्चात्, उद्देशः पश्चादुक्तपदार्थैः सङ्गतिः, यथासङ्ख्यं सङ्ख्यामनतिक्रम्य इति यथासङ्ख्यम्, इति, नाम्नेति शेषः, प्रोक्तं, सङ्ख्यानं क्रम इत्यपि पर्य्यायशब्द इत्यर्थः॥२७३॥

प्रभा

हेतुः सूक्ष्मो लवः क्रमः इति क्रमप्राप्तं क्रममुदाहरति–**उद्दिष्टानामिति** उद्दिष्टानाम् प्रथमं कथितानां पदार्थानां यथाक्रमम् उद्देशक्रमानुरूपमेव अनूद्देशः पश्चादुक्तानां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्संबन्धिनां कथनम्। यथासंख्यं तत्संज्ञकोलंकारः। पूर्वोक्तानां तदनुरोधेन पश्चादुक्तैः पदार्थैः सहान्वयो यथासंख्यालंकार इति भावः। उद्देशवाक्यगतस्य क्रमपदस्य संगतिं दर्शयति–**संख्यानं क्रम इत्यपीति।** यथासंख्यएव संख्यानक्रमपर्यायः इत्यर्थः। तदुक्तं भामहेन–

यथासंख्यमथोत्प्रेक्षामलंकारद्वयं विदुः।
संख्यानमिति मेधावी नोत्प्रेक्षाभिहिता क्वचित्।। (२.८८) इति।

अनेन मेधावी यथासंख्यं संख्यानमिति अभिधत्ते इति स्पष्टम्। भोजराजो यथासंख्यं क्रमशब्देन व्यवहरति।।२७३।।

विवृति

इति लेशचक्रम्।।

कमल (क्रमं लक्षयति–)

....(उद्दिष्टानां उ)च्चारितानां पदार्थानामनु पश्चाद्देशोऽनुदेशस्तस्यै (थै)व पाठः यथा(संख्यामिति प्रोक्तम्। क्रम इति यथासंख्यमि)त्यपि पर्यायशब्दाविमाविति उद्देशग्रन्थे हेतुः सूक्ष्मो लवः क्रम इत्युक्तमिह तु (यथासंख्यमिति)।।

क्रमं लक्षयति–**उद्दिष्टानामिति।।**

क्रमालङ्कारमाह–**उद्दिष्टानामिति।** यस्मिन् उद्दिष्टाः पदार्थाः संख्यावन्तः समानसंख्यैः अनुदेशिभिः पदार्थैः क्रमेण सम्बद्ध्यन्ते यथासंख्यम् संख्यानम् क्रमः इत्यपि भवति।।२७३।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अद्य या मम गोविन्द! जाता त्वयि गृहागते।
कालेनैषा भवेत् प्रीतिस्तवैवागमनात् पुनः॥२७४॥

रत्नश्री

गोविन्द विष्णो! त्वयि गृहमिदमस्मदीयमतिधन्यमागते सति या प्रीतिः तुष्टिः अद्य अस्मिन् पुण्याहे मम जाता एषा इयं प्रीतिः कालेन पुनरीदृशेन शुभेन समयेन केनचित् तवैव नान्यस्य। कस्त्वादृशः? आगमनादुपसंक्रमण[77a]महोत्सवात्कारणात् भवेत् जायते। त्वदागमनमेवासाधारण[कारण]मस्याः, ज्योत्स्नाया इव चन्द्र इति॥

तद् व्याचष्टे–

हृदयङ्गमा

क्रममुदाहरति, ध्रुवमिति। –हे तन्वि! स्नातुम् अम्भः जलं, प्रविष्टायाः ते तव, स्मितेक्षणमुखद्युतिः ईषद्धास्यलोचनवदनानां कान्तिः, कुमुदोत्पलपङ्कजेः कैरवेन्दीवरकमलैः, ध्रुवं निश्चितं, चोरिता अपहृता, कियदंशेनेति शेषः, समग्रहरणे नायिकायां तदसत्त्वेन चारुत्वापायादिति भावः। (अत्र स्मितद्युतिः कुमुदेन, ईक्षणद्युतिः उत्पलेन, मुखद्युतिः पङ्कजेनेति यथाक्रममुक्तपदार्थानां पश्चादुक्तपदार्थैः समन्वयश्चारुत्वातिशयमापादयतीति अस्यालङ्कारत्वम्)॥२७४॥

प्रभा

यथासंख्यमुदाहरति–**ध्रुवं त इति।** हे तन्वि स्नातुम् अम्भः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रविष्टायाः जलगतायाः। ते स्मितेक्षणमुखद्युतिः कुमुदोत्पलपङ्कजैः ध्रुवं निश्चयेन चोरिता अपहृता। अत्र कुमुदानां श्वेतत्वं उत्पलानां नीलत्वं पङ्कजानां च आरक्तत्वं ज्ञेयम्। तेन साम्यप्रतीतिः। तथा च कुमुदेन स्मितद्युतिः, उत्पलेन ईक्षणद्युतिः, पङ्कजेन मुखद्युतिश्च चोरिता इति पूर्वक्रमानुरोधेन उत्तरत्र क्रम इति यथासंख्यम्। अन्यदुदाहरणं यथा–

एकस्त्रिधा वससि चेतसि चित्रमत्र
देव द्विषां च विदुषां च मृगीदृशां च।
तापं च संमदरसं च रतिं च पुष्णन्
शौर्योष्मणा च विनयेन च लीलया च।। इति।।२७४।।

विवृति

स्मितं चेक्षणे च मुखं च। (ते त्वत्सम्)बन्धिनां स्मितादीनां ध्रुवं हे तद्विरोचि(तन्वि चोरि)ता। कैरित्याह कुमुदोत्पलपङ्कजैः कुमुदानि श्वतोपे(त्पलानि। उत्पलानि नीलानि। पङ्कजानि प)द्मानि तैरिति यथासंख्यमस्ति। तथा हि। कुमुदैः स्मितद्युतिश्चोरिता नीलोत्पलैरीक्षणद्युतिः पङ्कजैः (मुखद्युतिः। इति पूर्वं यथा निर्देशः पश्चादपि त)था निर्देश इति क(क्र)मः।।

उदाहरति–**ध्रुवमिति।** अत्र स्मितद्युतिः कुमुदेन ईक्षणद्युतिः उत्पलेन, मुखद्युतिः पङ्कजेन इति यथाक्रमं अनुदेशः, यथासंख्यम् संख्यानम् क्रमः इति संज्ञात्रयवान्।।

ध्रुवमिति सुबोधमेतत्।।२७४।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इत्याह युक्तं विदुरो नान्यतस्तादृशी धृतिः।
भक्तिमात्रसमाराध्यः सुप्रीतश्च ततो हरिः॥२७५॥

रत्नश्री

इत्येतद्नन्तरोक्तं युक्तं प्राप्तकालमाह ब्रवीति विदुरो नरोत्तमः कश्चिदेवमभिधानः। यतो नैव गोविन्दागमनादृतेऽन्यतः कुतश्चिदपि तादृशी गोविन्दागमनभाविनी धृतिः प्रीतिर्जायते। यतो युक्तमाहेत्यपीक्षणीयं ततः ईदृशात् प्राप्तकालात्। सुप्रीतोः अत्यन्तप्रसन्नो हरिर्विष्णुरभूत्। किमेतावता सुप्रीतः स्यात्? न किञ्चिद् गृहागताय तस्मै तथा विधायातिथये तादृशं वस्तूपहृतं यतः सुप्रीतः स्यादित्याह–भक्तिरीदृशी वचनादिरूपा यथाभाविनी सेवा सैव तन्मात्रम् बहिर्वस्तूपहाराद्यनपेक्षणात्। तेन समाराध्यः प्रतिपूजनीयो यतस्तस्मात् तत एव भक्तेः सुप्रीत इति निगमनीयम्॥

हृदयङ्गमा

सम्प्रति प्रेयः प्रभृतीनां त्रयाणामेव असंलक्ष्यक्रमरूपैकधर्म्मवत्त्वेन एकत्र सन्निवेशस्यैव न्याय्यत्वेन प्रेयोरसवदूर्जस्विनामकमलङ्कारत्रितयं निरूपयति, प्रेय इति। –प्रियतरं भावाभिव्यक्त्या अतिप्रीतिकरम्, आख्यानं प्रेयः ; (अतिप्रियत्वादन्वर्थसंज्ञेयम्। भावाश्चात्र निर्वेदादयस्त्रयस्त्रिंशत् देवादिविषयश्च रत्यादिः। तत्र निर्वेदादयो यथा,– "निर्वेदग्लानिशङ्काऽऽख्या तथाऽसूयामदश्रमाः। आलस्यञ्चैव देन्यञ्च चिन्ता मोहः स्मृतिर्धृतिः॥ व्रीड़ा चपलता हर्ष आवेगो जड़ता तथा। गर्वो विषाद औत्सुक्यं निद्राऽपस्मार एव च॥ सुप्तं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विबोधोऽमर्षश्चाप्यवहित्थमथोग्रता। मतिर्व्याधिस्तथोन्मादस्तथा मरणमेव च।। त्रासश्चैव वितर्कश्च विज्ञेया व्यभिचारिणः। त्रयस्त्रिंशदमी भावाः समाख्यातास्तु नामतः।।" इति देवादिविषयाणामानन्त्यात् रतेरनेकत्वेऽपि रत्यात्मभावरूपत्वेनास्या एकत्वमुक्तम्; यथा, –"रतिर्देवादिविषया व्यभिचारी तथाऽञ्जितः। भावः प्रोक्तः –" इति। ततश्च आख्यानचातुर्य्येण रसोपकारकतया व्यज्यमानदेवादिविषयकरतिभावः वाच्यशोभाजनकतया प्रेयोनामालङ्कारः इति लक्षणम्)। तथा रसपेशलं रसेन रत्यादिस्थायिभावरूपेण, पेशलं सहृदयानन्दजननं, रसवत् रसो विद्यते यत्र तदात्मकं रसवदलङ्कारः इत्यर्थः। ..(इत्थञ्च आख्यानचातुर्य्येण व्यज्यमानो रस एव वाच्यशोभाजनकतया रसवदलङ्कार इति लक्षणम्। रसज्ञानमन्तरेणास्यालङ्कारस्याप्रतीतेः तत्स्वरूपमादौ निरूपणीयमिति किञ्चिदुच्यते, –दृश्यश्रव्यान्यतम-काव्यनिष्ठो रत्यादिस्थायिभाव एव यदा सहृदयानां सहृदयतावशवर्त्तिना भावनाविशेषमहिम्ना वास्तवरामपत्न्यादावपि विगलितरामपत्नीत्वादिबोधैः, सीतादिभिरालम्बनविभावैः, चन्द्रिकादिभिरुद्दीपनविभावैः, चिन्तादिभिः व्यभिचारिभावैः, अश्रुपातादिभिः कार्य्यैश्चाभिव्यज्यमानः अलौकिकचमत्कारात्मकं ब्रह्मस्वादस्वरूपं प्रकर्षगतमानन्दं सामाजिकानां चेतसि स्वाभिन्नतया जनयति तदा स एव रस इति व्यपदिश्यते। उक्तञ्च, –"व्यक्तः स तैर्विभावाद्यैः स्थायिभावो रसः स्मृतः" इति। ते च रसा अष्टौ, तेषाञ्च स्थायिभावाः, –रतिहासशोकक्रोधोत्साहभयजुगुप्सा-विस्मयाः इत्यष्टौ। शान्तनामाऽपि रसोऽस्ति निर्वेदः शमो वा तत्र स्थायिभावः)। तथा रूढः अभिव्यक्तः, अहङ्कारः गर्वः यत्र तादृशं गर्वप्रधानमाख्यानम्, ऊर्जस्वि ऊर्ज्जो बलं तदस्यास्तीति योगबलात्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अहङ्कारस्य च ऊर्जोधर्मरूपत्वात् तथा व्यपदेशः, आख्यानचातुर्य्येणाभिव्यज्यमानो गर्वाख्यो व्यभिचारिभावः एव ऊर्ज्जस्विनामालङ्कार इति निष्कर्षः। (गर्वश्च, –"गर्वो मदः प्रभावश्रीविद्यासत्कुलतादिजः" इत्युक्तलक्षणः)। एषामलङ्कार-संज्ञायां हेतुमाह, युक्तोत्कर्षमिति –तेषाम् उक्तानां प्रेयः प्रभृतीनाम् अलङ्काराणां, त्रयं युक्तः अलङ्कारव्यपदेशसमुचितः, उत्कर्षो यस्मिन् तादृशम्; वाच्यार्थशोभाजनकतया यथा उपमादयः अलङ्कारपदवाच्याः, तथा वाच्यशोभाजनकत्वसाम्याद्भावादयोऽपि, अत एवैषामलङ्कारत्वकीर्त्तनं न दोषावहमिति भावः। (उल्लिखितेषु भावेषु च देवादिविषयकरतिभावस्यैव प्रेयोनामालङ्कारत्वम्, अन्येषां भावानां रसाभास–भावाभास भावशान्ति भावोदय–भावशबलतानाञ्च रस्यमानपदार्थत्वेन सवदलङ्कारत्वम्; उक्तञ्च विश्वनाथेन, –"रसभावौ तदाभासौ भावस्य प्रशमोदयौ। सन्धिः शबलता चेति सर्वेऽपि रसनात् रसोः।।" इति। गर्वाख्यभावस्य तु ऊर्जस्विनामालङ्कारत्वमिति विशेषः। ननु अङ्गिनो रसादेरलङ्कार्य्यत्वात् कथमलंङ्कारत्वमिति चेन्न, अङ्गभूतस्य रसादेरलङ्कारत्वस्य युक्तत्वात्; यावता उपमादीनां सर्वालङ्काराणां प्रकृतवस्तूपरञ्जकत्वमलङ्कारत्वे निबन्धनम्, अङ्गभूतेनापि रसेन तत् क्रियत एव, प्रकृतस्य रसादेस्तदुपस्कृतत्वेन भावात्; अत उपमादीनामलङ्कारत्वे यादृश्येव वार्त्ता तादृश्येव रसादीनाम्; तदुक्तं,– "प्रधानतां यत्र रसादयो गताः रसो रसादिध्वनिगोचरो भवेत्। भवन्ति ते यत्र रसादिपोषका रसाद्यलङ्कारदशा हि सा पृथक्।।" इति। अत्र केचिदाहुः,– "निर्वेदादीनां भावानां कदाचिदपि स्वप्राधान्याभावात् सर्वदा रसाद्यङ्गत्वे एव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ध्वनिभेदत्वमिति कथमेषामलङ्कारत्वम्? तथा चोक्तं,–निर्वेदादीनां सर्वदैवाङ्गभावात् प्रेयोलङ्कारस्तद्व्यपेक्षो न वाच्यः। तस्मादेतेषां व्यङ्ग्यतायां ध्वनित्वं न प्राधान्यं क्वापि यस्माद्भजन्ते।। एतेन भावप्रशमादयोऽपि व्यङ्ग्याः सदैव ध्वनितां प्रयान्ति। ध्वनित्वमिष्टं यदि तर्हि तेषु न लक्षणीयस्तु समाहितादिः।।'' इति। नैतत् समीचीनं, प्रधानाप्रधानभावस्यापेक्षिकत्वात् ''क्वचिदप्य-परस्याङ्गम्'' इति नीत्या एषामङ्गित्वमङ्गत्वञ्च इत्यभ्युपगमत्वात्। तथा चोक्तं, –''मुख्ये रसेऽपि तेऽङ्गित्वं प्राप्नुवन्ति कदाचन'' इति; ततश्च रसव्यक्तौ एषां सहकारित्वम्, अङ्गित्वे ध्वनित्वम्, अङ्गत्वे चालङ्कारत्वमिति विभागः। यत्र असतो वस्तुनो रसस्य स्वरूपनिष्पत्तये निर्वेदादयो भावाः तदङ्गतामुपयान्ति, तत्र रसोपसर्जनीभूतत्वात्तद्व्यञ्जनमात्रमेव फलमिति सहकारित्वमेषां, न तत्र ध्वनित्वं न वा अलङ्कारत्वं, रसव्यक्तिव्यतिरेकिप्रयोजनान्तर-सम्पादनत्वायोगात्। यत्र तु ते लब्धसत्ताकस्याङ्गिन उपकारकतया अङ्गतामुपयान्ति तत्रालङ्कारत्वं, यत्र रसानुद्गमेन निर्वेदादयः वाक्यतात्पर्य्यविषयत्वेन विश्राम्यन्ति, तदा तेषामेव प्राधान्यमित्यभिप्रायः। यथा,–''इतश्चारुप्रेमप्रणयसुकुमारा वरबधूरितः स्वेच्छालभ्यानुपमफलमूला वनमही। इतो मौर्वीनादोन्मुखनिखिलसैन्यो रणविधिः क्व नामायं मादृक् तरलहृदयो रज्यतु जनः?।।'' अत्र मुख्यानामपि श्रृङ्गारादिरसानामप्रयढ़त्वेन विभावानुभावाभ्यां व्यञ्जितायाश्चिन्ताया एव वाक्यतात्पर्य्यविषयत्वेन प्राधान्यादङ्गित्वम्। रसस्याङ्गित्वं यथा, –''नायं कञ्चुलिकाविमोक्षसमयः स्पृष्टो न काञ्चीगुणः, प्रक्रान्ता न मया विपर्य्ययरतारम्भाय वा प्रार्थना। न त्वत्कर्त्तृकमर्थयामि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निविड़ं दोः कन्दलीबन्धनं, तन्निष्कारणमेव बाललवलीवल्लीव किं वेपसे?''।। अत्र आलम्बनविभावो लता, वेपनादिरनुभावः, वितर्कश्च व्यभिचारिभावः, एषाञ्च रसव्यञ्जकत्वमात्रमेव प्रयोजनं न किञ्चित् फलान्तरमिति रसस्यैवात्र प्राधान्यम्। रसस्याङ्गत्व यथा,–''पार्वत्यारचिताङ्कपालि वृषभारूढ़ं विलासाङ्गद ग्रन्थि क्लान्तमहाहिलोचनलसज्जालं पिणाकाङ्कितम्। कन्दर्पार्पित-शासनाङ्कवि वलत्कङ्कालमर्द्धेन्दुमत् भस्माङ्कञ्च पुनातु वो नव रसान् पुष्णान्मरारेर्धनुः।।'' इत्र भगवद्विषयायाः रतेः नव रसा अङ्गाः; ततश्च रसानामङ्गत्वे रसवदलङ्कारः, भावानामङ्गत्वे प्रेयोनामालङ्कारः, रसाभास भावाभासानामङ्गत्वे ऊर्जस्वयलङ्कारः, भावशान्तेरङ्गत्वे समाहितालङ्कारः, भावोदय-भावसन्धि भावशबलतानामङ्गत्वे तत्तन्नामालङ्कारः इति। ध्वनिकारश्च अङ्गिनो रसादेरलङ्कार्य्यत्वम्, अङ्गस्य तु अलङ्कारत्वमित्याह। यथा, –''प्रधानेऽन्यत्र वाक्यार्थे यत्राङ्गन्तु रसादयः। काव्ये तस्मिन्नलङ्कारो रसादिरिति मे मतिः।।'' विश्वनाथस्तु, –''रसभावौ तदाभासौ भावस्य प्रशमस्तथा। गुणीभूतत्वमायान्ति यदाऽलङ्कृतयस्तदा।। रसवत् प्रेय ऊर्जस्वि समाहितमिति क्रमात्। भावस्य चोदये सन्धौ मिश्रत्वे च तदाख्यकाः।।'' इत्याह। स्वमते तु, –''काव्यशोभाकरान् धर्म्मान् अलङ्कारान् प्रचक्षते'' इत्यलङ्कारलक्षणेन शब्दार्थशरीरस्य काव्यस्यैवालङ्कार्य्यत्वप्रतिपादनात् तदुपस्कारकस्य व्यङ्ग्यमात्र-स्यैवालङ्कारत्वं सिद्धं, तथा हि, यथा अचेतनं शवशरीरादिकं कटकाद्युपेतमपि अलङ्कार्य्यत्वाभावान्न शोभते, अतः देहद्वारेणात्मैवालङ्कार्य्यः, तथा इहापि शब्दार्थशरीरत्वात्, तन्मुखेना-लङ्कार्य्यत्वम् इति सिद्धान्तात्। उपमादौ सादृश्यमाश्रित्यालङ्कारत्वम्, इह तु रसभावादितात्पर्य्यमाश्रित्य इति विवेचनीयम्)।।२७५।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रभा

व्यङ्ग्यस्य संलक्ष्यक्रमासंलक्ष्यक्रमौ इति द्वौ भेदौ प्रागस्माभिर्निरूपितौ। तत्र संलक्ष्यक्रमाणां वस्त्वलंकाररूपव्यङ्ग्यानां वाच्यार्थस्य शोभाजनकतया समासोक्तिरूपकादिनाम्नालङ्कारत्व-मुक्तम्। असंलक्ष्यक्रमाणां रसादिवाङ्भयानामपि वाच्योपस्कारेण अलंकारत्वमुचितमिति तदुपजीवि प्रेयोरसवदुर्जस्वि इत्यलंकारत्रयं दर्शयति–**प्रेय इति।** त्रयाणामसंलक्ष्यक्रमत्वरूपैकधर्मत्वाद् एकत्र निवेशः। तेषु प्रियतरं भावाभिव्यक्त्या बोद्धव्यस्य प्रीत्यतिशयकरं वक्तुर्वा प्रीत्याधिक्यसूचकमाख्यानं प्रेयः प्रयोनामालंकारः। अतिशयेन प्रियत्वात् प्रेय इत्यर्थः। भावाश्च देवतागुरुशिष्यद्विजपुत्रादावभिव्यज्यमाना रतिस्तथा विभावा-नुभावाभ्यां व्यञ्जितो निर्वेदादित्रयस्त्रिंशद्भेदो भावो व्यभिचारिणो भावाश्च। उक्तं च प्रकाशे रतिर्देवादिविषया व्यभिचारी तथाञ्जितः (४.३५)। भावः प्रोक्तः इति। देवादिविषयेत्यप्राप्त-रसावस्थोपलक्षणम्। तदुक्तं–

रत्यादिश्चेन्निरङ्गः स्याद्देवादिविषयोथवा।
अन्याङ्गभावभाग्वा स्यान्न तदा स्थायिशब्दभाक्।। इति।

आचार्यदण्डिनस्तु देवादिविषयकरतिभावव्यञ्जकमाख्यानं प्रेयोलंकारस्य विषयतयाभिप्रेतमिति उदाहरणानुरोधादवगम्यते। एवं च कथनचातुरीवशेन व्यज्यमाना देवादिविषयिका रतिर्यत्र वाच्योपस्कारिका तत्र प्रेयोलंकार इति लक्षणं निष्पन्नम्। तथा च रसपेशलं रसेन रत्यादिस्थायिभावरूपेण पेशलं सहृदयानन्दजनन-माख्यानं रसवदलंकारः। तथा रूढः अभिव्यक्तः अहंकारो गर्वः यत्र तादृशमाख्यानम् ऊर्जस्वि। आख्यानचातुर्येण प्रधानतयाभिव्यज्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मानो गर्वाख्यो व्यभिचारिभाव ऊर्जस्विनामालंकार इत्यर्थः। गर्वलक्षणं हि–

गर्वोभिजनलावण्यधनैश्वर्यादिभिर्मदः।
सविलासाङ्गवीक्षाविनयावज्ञादिकृत्तु सः।। इति।।

युक्तोत्कर्षं चेति। युक्तः अलंकारव्यपदेशोपयुक्तः उत्कर्षः वाच्यशोभा यस्मात् तत्। तत् त्रयं तेषां प्रेयः प्रभृतीनां त्रयम् अलंकारव्यपदेशार्हं भवतीत्यर्थः। सादृश्यादयो वाच्यार्थशोभाजनकत्वाद्यथा उपमालंकारादयो भवन्ति तथा भावादयोपि तेनैव कारणेन अलंकारव्यवहार्या भवितुं युक्ता इत्यर्थः। अत्र प्रसङ्गतो रसभावानां किंचित् स्वरूपं दर्शयामः। तत्र विभावानुभावव्यभिचारिभिर्व्यञ्जितो रतिहासशोकादिश्चित्त-वृत्तिविशेषो रसः। तदुक्तम्–

विभावैरनुभावैश्च सात्त्विकैर्व्यभिचारिभिः।
आनीयमानः स्वाद्यत्वं स्थायी भावो रसः स्मृतः।। इति।

भरतोपि विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिरित्याह। तत्र विभावा वासनारूपतया अतिसूक्ष्मरूपेण अवस्थितान् रत्यादीन् स्थायिभावापरपर्यायान् विभावयन्ति आस्वादयोग्यतां नयन्ति ते ललनानायकचन्द्रिकावसन्तादयो ज्ञेयाः। तत्र ललनानायकौ आलम्बनविभावौ। चन्द्रिकावसन्तादयश्चोद्दीपनविभावा इति विवेकः। अनुभावाश्च रत्यादीन् स्थायिनो येनुभावयन्ति अनुभवविषयीकुर्वन्ति ते अनुभावाः कटाक्षभुजाक्षेपरोमाञ्च-प्रभृतयः। अथवा अनु रसोद्बोधानन्तरमुद्भवन्ति रसकार्यरूपा ते अनुभावा कटाक्षरोमाञ्चादयः। व्यभिचारिणस्तु विशेषेण अभितः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वाङ्गव्यापितया रत्यादीन् स्थायिनः काये चारयन्ति संचारयन्ति मुहुर्मुहुरभिव्यञ्जयन्ति ते निर्वेदग्लानिशङ्कादय त्रयस्त्रिंशत् ज्ञेयाः। तत्र संयोगात् नाम विभावैरुत्पाद्योत्पादकरूपसंबन्धाद् अनुभावैर्गम्यगमकभावरूपसंबन्धाद् व्यभिचारिभिश्च पोष्यपोषक-भावरूपसंबन्धाच्च रसनिष्पत्तिर्नाम विभावैरुत्पत्तिः, अनुभावैरभिव्यक्तिः, व्यभिचारिभिः पुष्टिश्च स्थायिनो भवन्ति इति भट्टलोल्लटः। विभावादिभिः संयोगाद् गम्यगमकभावरूपाद् अनुमाप्यानुमापकभावरूपात् संबन्धाद् रसस्य निष्पत्तिरिति श्रीशङ्कुकः। विभावादिभिः संयोगाद् भोज्यभोजकरूपसंबधाद् रसस्य निष्पत्तिर्भुक्तिरिति भट्टनायकः। अभिनवगुप्तपादास्तु स्थायिनां विभावादीभिः समं संयोगाद् व्यङ्ग्यव्यञ्जकभावरूपात् संबन्धाद् विभावादिनां वा परस्परसंयोगान् मीलनाद् रसस्य निष्पत्तिरभिव्यक्तिरिति सूत्रार्थं विवृण्वन्ति। अयमेव चालंकारिकसंमतोर्थः। विस्तरस्तु काव्यप्रकाशे तट्टीकादौ च द्रष्टव्यः। रसविशेषाश्च–

शृङ्गारहास्यकरुणरौद्रवीरभयानकाः।
बीभत्साद्भुतसंज्ञाश्चेत्यष्टौ नाट्ये रसाः स्मृताः।।

इति भरतेनोपदिष्टाः। एषां स्थायिभावाश्च तेनैव कथिताः। यथा–

रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा।
जुगुप्सा विस्मयश्चेति स्थायिभावाः प्रकीर्तिताः।। इति।

स्थायित्वलक्षणं तु–

विरुद्धा अविरुद्धा वा यं तिरोधातुमक्षमाः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आनन्दाङ्कुरकन्दोसौ भावः स्थायिपदास्पदम्।। इति।

एवमेव पण्डितजगन्नाथोपि–

सजातीयविजातीयैरतिरस्कृतमूर्तिमान्।
यावद्रसं वर्तमानः स्थायिभाव उदाहृतः।। (३१ पत्रे)

इति लक्षणमाह। तत्र स्त्रीपुंसयोरन्योन्यालम्बनः प्रेमाख्यश्चित्तवृत्तिविशेषो रतिस्थायिभावः। वागङ्गादिविकार-दर्शनजन्मा चेतोविकासो हासः। पुत्रादिवियोग–मरणादिजन्मा वैक्लव्याख्यश्चित्तवृत्तिविशेषः शोकः। गुरुबन्धुवधादि-परमापराधजन्मा प्रज्वलनाख्यः क्रोधः। परपराक्रमदानादिस्मृतिजन्मा औन्नात्याख्य उत्साहः। व्याघ्रदर्शनादिजन्मा परमानर्थविषयको वैक्लव्याख्यश्चेतोविशेषो भयम्। कदर्यवस्तुविलोकनजन्मा विचिकित्साख्यश्चित्तवृत्तिविशेषो जुगुप्सा। अलौकिक-वस्तुदर्शनादिजन्मा आश्चर्याख्यो विस्मयः। अनुभावास्तु–

अनुभावो विकारस्तु भावसंसूचनात्मकः।
स्तम्भप्रलयरोमाञ्चाः स्वेदो वैवर्ण्यवेपथू।।

अश्रु वैस्वर्यमित्यष्टौ सात्त्विकाः परिकीर्तिताः।

इत्युक्तलक्षणाः। एषामुदाहरणानि विस्तरभयान्न प्रदर्श्यन्ते। रसगङ्गाधरादौ तानि द्रष्टव्यानि। तत्र श्रृङ्गारस्य द्वौ प्रभेदौ संभोगो विप्रलम्भश्च इति। रतेः संयोगकालावच्छिन्नत्वे प्रथमः। वियोगकालावच्छिन्नत्वे द्वितीयः। संयोगवियोगौ च दम्पत्योरावां संयुक्तवियुक्तौ इत्याकारिकौ अन्तकरणवृत्तिविशेषौ ग्राह्यौ। तेन एकतल्पशयनेपि ईर्ष्यादिसद्भावे विप्रलम्भवर्णनमुचितम् इति ज्ञेयम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्यभिचारिणो भावास्तु–

निर्वेदग्लानिशङ्काख्यास्तथासूयामदश्रमाः।
आलस्यं चैव दैन्यं च चिन्ता मोहः स्मृतिर्धृतिः।।

व्रीडा चपलता हर्ष आवेगो जडता तथा।
गर्वो विषाद औत्सुक्यं निद्रा विस्मृतिरेव च।।

त्रासश्चैव वितर्कश्च विज्ञेया व्यभिचारिणः।
स्वप्नो विबोधोमर्षश्चाप्यवहित्थम्थोग्रता।।

मतिर्व्याधिस्तथोन्मादस्तथा मरणमेव च।
त्रयस्त्रिंशदमी भावाः समाख्यातास्तु नामतः।।

इति भरतेनोक्ताः। एतेषामपि लक्षणोदाहरणानि प्रकाशादौ द्रष्टव्यानि। प्रकाशकाराः–निर्वेदस्थायिभावोस्ति शान्तोपि नवमो रस इति शान्तं रसं स्वीकुर्वन्ति। निर्वेदो नाम नित्यानित्यवस्तुविचारजन्मा विषयविरागः। रसभावविवेचन-विस्तारस्तु नाट्यशास्त्रे षष्ठसप्तमाध्याययोर्ध्वन्यालोकादौ च द्रष्टव्यः। अत्रेदमवधार्यम्। उपर्युक्तभावेषु देवादिविषयकरतिभावस्य प्रेयोनामालंकारत्वम्। गर्वाख्यभावस्य च ऊर्जस्विनामालांकारत्वम्। अवशिष्टभावानां तथा रसाभासभावाभासभावशान्तिभावोदयभाव-संधिभावशबलतानां च रसवदलंकारत्वं बोध्यम्। रसपेशलम् इत्यत्र रसपदस्य रस्यमानपरत्वाद् भावानामपि रसपदेनैव संग्रहो ज्ञेयः। तथा चोक्तम्–

रसभावौ तदाभासौ भावस्य प्रशमोदयौ।
संधिः शबलता चेति सर्वेपि रसनाद्रसाः।। इति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आचार्यदण्डिनो मते अङ्गित्वेनाङ्गत्वेन वाभिव्यज्याना रसादयोलंकारतां प्राप्नुवन्ति। उभयोरपि काव्यशोभाजनकत्वा-विशेषात्। ननु अङ्गिनो रसादेरलंकार्यत्वात् कथमलंकारत्वम्। रसस्य प्राधान्येलंकारर्यत्वम् तदन्यत्र चालंकारत्वमुक्तं ध्वन्यालोकलोचन-कारैर्यथा–

प्रधानेन्यत्र वाक्यार्थे यत्राङ्गं तु रसादयः।
काव्ये तस्मिन्नलंकारो रसादिरिति मे मतिः।। इति।

परं दण्डिनो मते शब्दार्थात्मकस्य काव्यस्यैवालंकार्यत्वेन तदुपस्कारकस्य व्यङ्ग्यमात्रस्य काव्यशोभाकरत्वेन अलंकारव्यपदेशे बाधाभावात्। काव्यशोभाकरान् धर्मानलंकारान् प्रचक्षते। इति अलंकारसामान्यलक्षणस्यात्रापि निर्बाधप्रवृत्तेः। यदुक्तं विश्वनाथेन ध्वन्यालोकानुसारिणा–

रसभावौ तदाभासौ भावस्य प्रशमस्तथा।
गुणीभूतत्वमायान्ति यदालंकृतयस्तदा।।

रसवत् प्रेय ऊर्जस्वि समाहितमिति क्रमात्।
भावस्य चोदये संधौ मिश्रत्वे च तदाख्यकाः।। (१०.९५) इति।

तत्र रसवत्प्रेयऊर्जस्विनां लक्षणं मूलकृतोक्तम्। प्रशाम्यदवस्था भावप्रशमः। स यत्र परस्याङ्गं तत्र समाहितालंकारः। भावस्य उद्गमावस्था भावोदयः। तस्य पराङ्गत्वे भावोदयालंकारः। द्वयोर्विरुद्धयोर्भावयोः परस्परस्पर्धा भावसंधिः। तस्य पराङ्गत्वे भावसन्धिरलंकारः। बहूनां भावानां पूर्वपूर्वोपमर्देनोत्पत्तिर्भाव-मिश्रत्वम्। तस्य पराङ्गत्वे भावमिश्रालंकारः। रसस्य अङ्गित्वे अलंकार्यत्वभङ्गत्वेलंकारत्वमिति। तदेतत्प्रकाशकारादीनां मतं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दूषयन्त आहुः प्रेमचन्द्रशर्माणः। अत्र ते नव्याः प्रष्टव्याः। किं प्रधानतया प्रतीयमानस्य व्यङ्ग्यमात्रस्यैवालंकार्यत्वम् उत तथाभूतस्य रसादेरेवेति। तत्र न तावत् प्रथमः। समासोक्त्यप्रस्तुतप्रशंसापर्यायोक्तादौ प्रधानतयैवाभिव्यज्यमानानां वस्त्वलंकाराणां तैरप्यलंकारत्वाभ्युपगमात्। न च तत्र वाच्यार्थस्यैव प्रधानत्वं प्रतीयमानानां वस्त्वलंकाराणां त्वप्रधानत्वम्। अप्रधानानां त्वलंकारत्वमुचितमेवेति वाच्यम्। तत्र तत्र व्यङ्ग्यानामेव प्राधान्यस्यानुभवसिद्धतयानपलपनीयत्वात्। नापि द्वितीयः। सामान्येन काव्यात्मकतयाभ्युपगतानां वरत्वलंकाररसादिव्यङ्ग्यानां मध्ये वस्त्वलंकाराणामलंकारत्वम् रसादीनामेवालंकार्यत्वम् इति निर्वक्तुमयोग्यत्वात्। न च रसादिव्यङ्ग्यस्यैव प्रधानस्य काव्यात्मकत्वादलंकार्यत्वं न वस्त्वलंकारयोरिति विश्वनाथोक्त-मादरणीयम्।

यत्रोन्मदानां प्रमदाजनानामभ्रंलिहः शोणमणीमयूखः।
संध्याभ्रमं प्राप्तवतामकाण्डेप्यनङ्गनेपथ्यविधिं व्यधत्त।।

इत्यादौ तेनापि अङ्गभूतेन शृङ्गारेणैव काव्यव्यवहाराभ्युपगमात्। संलक्ष्यक्रमव्यङ्ग्यरूपध्वनिभेदस्य सर्वैरालंकारिकैरभ्युपगतत्वेन रसादेरेव काव्यात्मत्वप्रतिपादनस्य बहुशो दूषितत्वाच्च। तस्माद् व्यङ्ग्यतया विशिष्टानां वस्त्वलंकाराणां रसादीनां काव्यशोभाजनकतयालंकारत्वं युक्त्यनुभवप्रतिपन्नमिति प्राचां सरणिरेव साधीयसी इत्याहुः। अत्र रसस्य अलंकार्यत्वम् पूर्वं च रसवद्वाचि इत्यादिना गुणत्वमुक्तम् तत् कथमेकस्यैव गुणत्वमंलकारत्वं चेति शङ्कायाः समाधानमग्रे मूले एव स्फुटीभविष्यति।।२७५।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विवृति

इति क्रमः।

प्रेयोरसवदूर्जस्विनां लक्षणम्–

प्रियवचनमतिशययुक्तं प्रेयः।

(रसैः) रमणीयं यत्तद्रसवत्। अतिशायने मतुप्।

रूढः प्रसिद्धोऽहङ्कारोऽभिमानो (यत्र तत्) मानोऽहङ्कारो अहङ्कारोऽमर्षः पुरुषकार इति वचनात् अन्यैरपि.... ....मीदृशम् (?)।

तत् त्रयः (यं यत्) प्रेयो रसवदूर्जस्वीत्युक्तम्।।

केचित् प्रेय इति रसवद्वर्णयन्ति, उद्धतमिति च। ततः साम्यात् प्रेयो रसवदूर्जस्वीति त्रयं युगपल्लक्षयति–**प्रेय इति।** रसात्मकत्वात्। त्रयं एतत् उत्कृष्टम्। देवगुरुपित्रादिविषयः प्रीतिप्रकर्षः प्रेयः।।२७५।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सोमः सूर्यो मरुद् भूमिर्व्योम होतानलो जलम्।
इति मूर्त्तीरतिक्रम्य त्वां द्रष्टुं देव! के वयम्॥२७६॥

रत्नश्री

होता यजमानः। इत्येवंभूतानि रूपाणि व्यक्तानि अष्टौ मूर्त्तीस्तवातिक्रम्य मु[क्त्वा] देव! त्वामत्यन्ताव्यक्तपरमतत्त्वं योगिभिरपि महद्भिरगम्यं द्रष्टुं साक्षात्कर्तुं के वयमितरे प्राणिनः? नैवास्मादृशोऽगोचरो देवः। सोमादीनि व्यक्तानि रूपाणि देवस्य यदि वयं पश्येम इति॥

तद्विभजन्नाह–

हृदयङ्गमा

प्रेय उदाहरति, अद्येति। –गोविन्द! अद्य त्वयि गृहागते या मम प्रीतिः जाता, कालेन समयान्तरेण, तवैव, (नान्यस्य कस्यचित् साधोरित्येवकारेण ध्वन्यते) पुनरागमनात् एषा प्रीतिः भेवत् भविष्यतीत्यर्थः, यदा त्वं पुनरागमिष्यति तदैव ईदृशी प्रीतिः भविष्यति नान्यथेति भावः। (स्वभवनमागतं भगवन्तं प्रति विदुरस्य सानुरागोक्तिरियम्। अत्र भगवद्विषयकरतिभावो वाक्यभङ्ग्या भगवतः प्रीत्यतिशयोत्पादनेन वाच्यशोभां जनयन् सहृदयानां सातिशयचमत्कृतिमादधातीति प्रेयोऽलङ्कारः। अयञ्च श्लोकः, –"या प्रीतिः पुण्डरीकाक्ष! तवागमनकारणात्। सा किमाख्यायते तुभ्यमन्तरात्माऽसि देहिनाम्॥" इति भारतोद्योगपर्वीय-विदुरवचनस्य प्रतिरूपः)॥२७६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रभा

प्रेय उदाहरति—**अद्येति।** गृहागतं भगवन्तं प्रति विदुरोक्तिरियम्। हे गोविन्द त्वयि गृहागते सति मदीयभवनं संप्राप्ते सति अद्य मम या प्रीतिर्जाता, कालेन कालान्तरेण तवैववागमनात् पुनरपि त्वदागमनेनैव एषा प्रीतिरद्यतनीसदृशी प्रीतिर्भवेद् भविष्यति। त्वयि गते त्वदितरसत्पुरुषागमनेन एवंविधा प्रीतिर्नैव भविष्यति इत्यर्थः। अत्र विदुरस्य भगवद्विषयकरतिभावो वाक्यभङ्ग्याभिव्यज्यमानो भगवतः प्रीत्यतिशयजनने वाच्यस्य शोभां पुष्णाति।।२७६।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इति साक्षात्कृते देवे राज्ञो यद्रातवर्मणः।
प्रीतिप्रकाशनं तच्च प्रेय इत्यनुगम्यताम्॥२७७॥

रत्नश्री

इतीदृशं यत् प्रीतिप्रकाशनं तत् प्रेयोवचनम् प्रकाश्यतेऽनेनेति कृत्वा रातवर्मणः तन्नाम्नो रघुवंशजन्मनो राज्ञः सम्बन्धि तत्प्रयुक्तत्वात्। देवे शंकरे परमभक्तिसमाराधिते प्रसन्ने किल दत्तदर्शने साक्षात्कृते दृष्टे सति। तेनेत्यर्थाद् गम्यते। तच्च तादृशं वचनमीश्वरविषयं रातवर्मप्रयुक्तं प्रेय इत्येवमनुगम्यतां ज्ञातव्यमिति॥

॥ इति प्रेयश्चक्रम् ॥

रसवदुदाहरन्नाह–

हृदयङ्गमा

एतदेव सङ्गमयति, इतीति।–विदुर इति "अद्य या मम" इत्यादि प्रागुक्तमित्यर्थः, स्वभवनमुपागतं हरिं प्रति तद्वाक्यस्योक्तेरिति भावः, युक्तम् आह, यतस्तस्य अन्यतः अन्यस्मात् आगन्तुकात्, तादृशी धृतिः सन्तोषः, न, आसीदिति शेषः, ततश्च भक्तिमात्रेण न तु केनाप्यन्येनोपचारेणेति भावः, समाराध्यः हरिः सुप्रीतः, तस्य अभवत् इति वाक्यशेषः। (ततश्च प्रीतिकराख्यानयोगात् इह प्रेयोऽलङ्कार इति सङ्गतिः)॥२७७॥

प्रभा

उदाहरणं संगमयति–**इत्याहेति।** इति पूर्वोक्तप्रकारम्। विदुरो युक्तं तद्भक्तेरनुरूपम् आह। यतस्तस्य अन्यतो भगवदितरस्मात्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तादृशी धृतिः संतोषो नास्ति। अथवा अन्यतो विदुरेतरे पुंसि तादृशी धृतिः धैर्यं नास्ति। भक्तिमात्रेण केवलभक्त्या न तु तच्छून्यैरुपचारैरित्यर्थः। समाराध्यः हरिः ततस्तस्माद्विदुरवचनात् सुप्रीतः संतुष्टः अभूत्। अत्र बोद्धव्यस्य भगवतः प्रीतिकरमेतदाख्यानमिति प्रेयोलंकारः। उद्योगपर्वस्थितस्य–

या प्रीतिः पुण्डरीकाक्ष तवागमनकारणात्।
सा किमाख्यायते तुभ्यमन्तरात्मासि देहिनाम्।।

इत्यस्य श्लोकस्य प्रतिरूपकोयं श्लोक इति प्रेमचन्द्रशर्मादयः।।२७७।।

विवृति

तत्र प्रेय उदाहरति–

(तवागमना)द(दे)व यदि स्यात्; नाद्य(न्य)त इति।।

इत्याह–युक्त(क्तं) सम्बन्ध[द्ध]मेव विदुरो राजा। कुतो युक्तमित्याह–नान्यतस्तादृशी (धृतिः प्रीतिः) यतो नास्त्यतः। भक्तिरेव केवलं भक्तिमात्रं तेन समाराध्य आराधयितुं शक्यः सुप्रीतश्च ततो विदुरवचनाद्धरिः। भक्त्या तुष्यन्ति देवा (वता) इति।।

तत् उदाहरति–**अद्येति**। प्रेयस्त्वं व्याचष्टे–**इतीति**। कृष्णविषये प्रेयो दर्शितम्।।

प्रेयस उदाहरणम्–**अद्येति**। एतत् व्याचष्टे–**इतीति**। विदुरः एवं अवदत्। तस्य च अन्यागमनात् एवं न धृतिः प्रीतिः अभवत् यथा विष्णौ गृहमागते आसीत्।।२७६–२७७।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मृतेति प्रेत्य संगन्तुं यया में मरणं मतम्।
सैवावन्ती मया लब्धा कथमत्रैव जन्मनि॥२७८॥

रत्नश्री

इयं किल प्रेयसी मृता स्वर्गमगमदिति हेतोः प्रेतलोकान्तरे क्वचित् ययानया संगन्तुं योगार्थं मरणं देहविसर्जनं मतमिष्टं मम। मृत्वाप्यवश्यं तया संगंस्ये इति। सैव या परासुः किलासीत् नान्या अवन्ती अवन्तिराजतनया मया [अयातजीवि]तेन तथाव्यवसितेनात्रैव जन्मनि न प्रेत्य कथं लब्धा, किमिद[77b]मद्भुतम्। नास्ति भाग्यानां दुष्करम्। उदयनः किल वत्सराजः अवन्तिराजसुतायां वासवदत्तायामासक्तः राज्यचिन्ताविमुखोऽवर्तत इति मन्त्रिभिः सा क्वचिन्निगूह्य मृतेति ख्यापिता। स च तद्विरहमसहमानोऽतिरक्ततयाऽनुमरणं तत्सङ्गमवर्त्म व्यवससौ। ततस्तैः पुनर्जह्रे इति कथोदाहृता॥

ननु प्रीतिरियं पूर्वोदाहृता। तत्किमनयेति विशेषं दर्शयन्नाह–

प्रभा

बोद्धुः प्रीतौ पूर्वमुदाहृतम् इदानीं वक्तृप्रीतावुदाहरति–**सोम इति।** हे देव सोमः चन्द्रः। सूर्यः। मरुत् वायुः। भूमिः। व्योम आकाशम्। होता यजमानः। अनलः अग्निः। जलम् च। इति रूपाणि एवंविधानि स्थूलानि अष्टौ रूपाणि। अतिक्रम्य विलङ्घ्य त्वां सच्चिदानन्दैकमयम्-अणोरणीयान् महतो, महीयान्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इत्यादिश्रुतिशतवर्णितं भगवन्तम् द्रष्टुं साक्षात्कर्तुम् के वयम् पामराः। वयं त्वत्स्वरूपावलोकने आकलने वा न समर्था इत्यर्थः। एवं स्थिते यत्तव दर्शनं तत्र तवानुग्रह एव हेतुरिति भावः। अत्र केचित्–इति रूपाणि सोमादिस्थूलरूपा अष्टौ मूर्तीरतिक्रम्य सूक्ष्मस्वरूपेण वर्तमानं सच्चिदानन्दं त्वां द्रष्टुम् इति अतिक्रमणक्रियां भगवत एव वर्णयन्ति।।२७८।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्राक् प्रीतिर्दर्शिता सेयं रतिः श्रृङ्गारतां गता।
रूपबाहुल्ययोगेन तदिदंरसवद्वचः॥२७९॥

रत्नश्री

प्राक् प्रेयस्यलङ्कारे प्रीतिस्तुष्टिः पुरुषविषया दर्शिता। या पुनरियमनन्तरम् उदाहृता सा त्वियं रतिः स्त्रीविषयानुरक्तिः भावविशेषः श्रृङ्गाररसयोनिस्तादृशविभावजन्यस्तथाविधानुभाव-गम्यः। यदाह-श्रृङ्गारतां श्रृङ्गाराख्यरसविशेषत्वं गता तद्रूपेण परिणता। कुतः? रूपस्य स्वभावस्यात्मीयस्य संकल्पविशषलक्षणस्य बाहुल्येनोदीर्णतया अत्युपचयेन सह योगेन सम्बन्धेन हेतुना। एतदुक्तं भवति-रतिरियमव्यक्ता अनुपचिता अन्तस्तत्त्वेन वर्तमाना संकल्पविशेषस्वभावा भाव उच्यते। अत एव विकारो मानसो भाव इत्यमिधीयते। सैव यदा समुदीर्णा अनुभावात् कुतश्चिन्नाटिकाभिनयादिलक्षणात् व्यक्तिमायाति तदा श्रृङ्गारो नाम रसः सम्पद्यत इत्यत एवोच्यते-अभिव्यक्ता भावा एव रसाख्यां प्रतिलभन्ते। विस्तरस्तु तच्छास्त्रात्। वक्ष्यमाणेषु रौद्रादिषु रसेषु क्रोधादिभावपरिणामविशेषरूपेष्वप्ययं न्यायोऽनगुन्तव्य इत्यलं विस्तरेण। तत्तस्मादिदमीदृशं वचः काव्यं रसवद्विज्ञेयम्, श्रङ्गार[र]सयोगात्। यद्वेदृशं तद्रसवद्वचनमिति योज्यम्॥

हृदयङ्गमा

पूर्वं वक्तृबोद्धव्ययोः प्रीतावुदाहृतम्, इदानीं केवलं वक्तुः प्रीतावुदाहरति, सोम इत्यादि।-हे देव! सोमः चन्द्रः, सूर्य्यः, मरुत् वायुः, भूमिः, व्योम आकाशं, होता यजमानः, अनलः अग्निः, तथा जलम् इति ते रूपाणि अष्टौ मूर्त्तीरित्यर्थः, अतिक्रम्य अतीत्य,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्थितमिति शेषः, त्वां परमात्मस्वरूपं, सूक्ष्मस्वरूपमिति भावः, द्रष्टुं वयं के? न वयं योग्या इत्यर्थः, तथाऽपि यत् दृष्टोऽसि तत्र केवलं भक्तानुग्रह एव हेतुरिति भावः। देवे महेश्वरे, साक्षात्कृते तपसा प्रत्यक्षगोचरीकृते सति, राजवर्मणः राजवर्माख्यस्य राज्ञः, इति उक्तरूपं, यत् प्रीतिप्रकाशनं महादेवविषयकरतिभावसूचनं, तच्च तदपि, प्रेय इति अवगम्यताम्। (अत्र परब्रह्मणो भगवतो जन्यप्रीतेरभावात् वक्तुरेव भगवद्विषयकप्रीतिर्व्यज्यते, व्यज्यमानस्य प्रियाख्यानस्य सत्त्वाच्च प्रेय इति निष्कर्षः। प्रोक्तश्लोकद्वये देवविषयकरतिभावो दर्शितः। मुनिविषयकरतिभावो यथा, –"हरत्यघं सम्प्रति हेतुरेष्यतः शुभस्य पूर्वाचरितैः कृतं शुभैः। शरीरभाजां भवदीयदर्शनं व्यनक्ति कालत्रितयेऽपि योग्यताम्।।" इति)।।२७८।।२७९।।

प्रभा

उदाहरणं विशदयति–**इतीति**। देवे महेश्वरे। साक्षात्कृते तपोभिः प्रत्यक्षीकृते। रातवर्मणः। तत्संज्ञकस्य। राज्ञः नृपतेः। यत् प्रीतिप्रकाशनं महेश्वरविषयकरतिभावसूचनम्। तच्च तदपि प्रेय इति अवगम्यताम् ज्ञायताम्। अत्र केवलभक्तस्यैव प्रीत्यभिव्यक्तिर्बोद्धव्या। सोमादिभिन्नस्य प्राकृतरूपगुणशून्यस्य निष्कलस्य परब्रह्मणो जन्यप्रीतेरभावान् न आराध्यगता प्रीतिरत्रास्तीति भावः। रतिर्देवादिविषया इति भावलक्षणे आदिशब्देन मुनिनृपादीनां संग्रहः। तत्र देवविषयकरतेरुदाहरणं ग्रन्थकृता दर्शितम्। मुनिनृपादीनां यथा–

हरत्यघं संप्रति हेतुरेष्यतः शुभस्य पूर्वाचरितैः कृतं शुभैः।
शरीरभाजां भवदीयदर्शनं व्यनक्ति कालत्रितयेपि योग्यताम्।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इयं हि नारदमुद्दिश्य भगवतः श्रीकृष्णस्योक्तिः।

अत्युच्चाः परितः स्फुरन्ति गिरयः स्फारास्तथाम्भोधय-
स्तानेतानपि बिभ्रती किमपि न क्लान्तासि तुभ्यं नमः।
आश्चर्येण मुहुर्मुहुः स्तुतिमिमां प्रस्तौमि यावद्भुव-
स्तावद्बिभ्रदिमां स्मृतस्तव भुजो वाचस्ततो मुद्रिताः।। इति।

अत्र पूर्वार्धे भूविषया उत्तरार्धे राजविषया रतिः। तत्र चाङ्गाङ्गिभावः।।२७९।।

विवृति

प्रेयस एव (द्विती)यमुदाहरणम्।

सोमः, सूर्यः, मरुत् पवनः, भूमिः, व्योम आकाशः, होता यज़मानः, अनलो हुताशनः, जलमिति रूपाण्यष्टावतिक्रम्य हे देव महादेव त्वां द्रष्टुं के वयं मांसचक्षुष इत्येवंविधं हृदये यथार्थवस्तुप्रतिपादकवचनरचनातः (?) साक्षात् कृते देवे महेश्वरे राज्ञो यद्रामवर्मणः प्रीतिप्रकाशनं तच्च तदपि प्रेय इत्यवगम्यताम्।।

महेश्वरविषयं प्रेयो दर्शयति–**सोम इति**। एतत् व्याचष्टे–**इति साक्षात्कृत** इति।।

अस्य उदाहरणान्तरं दर्शयति **सोम इति**। अष्टौ रूपाणि अतिक्रम्य त्वां परमार्थतः द्रष्टुं वयं के। व्याचष्टे–**इतीति**। शिवे साक्षात्कृते सति रातवर्मनाम्ना राज्ञा प्रीतिप्रकाशनं यत् तच्च पूर्वोक्तं च प्रेयः इति अवगम्यताम्।।२७८–२७९।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निगृह्य केशेष्वाकृष्टा कृष्णा येनाग्रतो मम।
सोऽयं दुःशासनः पापो लब्धः किं जीवति क्षणम्॥२८०॥

रत्नश्री

येन दुरात्मना ममाग्रतः पुरस्तात् केशेषु निगृह्य अवष्टभ्य कृष्णा द्रौपदी प्रिया आकृष्टा आक्षिप्ता परिभूता, सोऽयमेष पापो दुरात्मा दुःशासनो मया भीमेन लब्धः प्राप्तः किं क्षणमेकं जीवति? नैव जीवितुं लभते। एष मया हतो वर्तते कौरवाणां पश्यताम्। त्रिभुवनमपि संहतमेतत्परित्राणे न समर्थमिति भीमो गर्जति॥

कोऽयं रस इति दर्शयन्नाह–

हृदयङ्गमा

अथ रसवदलङ्कारं दर्शयन् रसानाञ्च श्रृङ्गारादीनां प्राथम्येन सर्वजनहृद्यत्वेन च प्रथमं श्रृङ्गारमुदाहरति, मृतेति।–मृता इति, निश्चित्य इत्यध्याहार्य्यम्; प्रेत्य परलोकं गत्वा, यया कान्तया, सङ्गन्तुं संयोगं प्राप्तुं, मे मरणं मतम् इष्टं, मरणावधारणं कृतमित्यर्थः, एषा सा तन्वी अत्रैव जन्मनि मरणं विनेति भावः, कथं मयाः लब्धा? प्राप्ता?। (मृतां मदालसां नागानां प्रसादेन पुनः प्रत्युज्जीवितां प्राप्य तत्पत्युःकुवलयाश्वस्योक्तिरियम्। "सैषा तन्वी" इत्यत्र "सैवावन्ती" इति पाठोऽपि दृश्यते, तथात्वे आवन्ती अवन्तिदेशभवा वासवदत्तेत्यर्थः, तस्याश्च दाहप्रवादेन मरणनिश्चयात् दुःखितस्य वत्सराजस्य पुनस्तां प्राप्यानन्दोक्तिरियम्। अत्र सम्भोग श्रृङ्गाररसः; तल्लक्षणन्तूक्तं विश्वनाथेन, यथा,–"दर्शनस्पर्शनादीनि निषेवेते विलासिनौ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यत्रानुरक्तावन्योऽन्यं सम्भोगोऽयमुदाहृतः।।'' इति। अयञ्च विप्रलम्भानन्तर्य्यात् परां पुष्टिं नीतः। उक्तञ्च विश्वनाथेन, –''न विना विप्रलम्भेन सम्भोगः पुष्टिमश्नुते। कषायिते हि वस्त्रादौ भूयान् रागो विवर्द्धते।।'' इति। विप्रलम्भश्च तेनैवोक्तः यथा, –''यत्र तु रतिः प्रकृष्टा नाभीष्टमुपैति विप्रलम्भोऽसौ। स च पूर्वराग-मान-प्रवास-करुणात्मकः चतुर्द्धा स्यात्।'' इत्यनेनोक्तस्य चतुर्भेदस्य तस्यात्र करुणविप्रलम्भाख्य शृङ्गार इत्यवधेयम्। तल्लक्षणन्तूक्तं विश्वनाथेन यथा,–''यूनोरेकतरस्मिन् गतवति लोकान्तरं पुनर्लभ्य। विमनायते यदैकस्तदा भवेत् करुणविप्रलम्भाख्यः।।'' इति)।।२८०।।

प्रभा

रसवदलंकारं दिदर्शयिषू रसेषु प्राथम्यात् सर्वजनाभिनन्दनीयत्वाच्च प्रथमं श्रृङ्गारमुदाहरति–**मृतेति।** वासवदत्ताया दाहप्रवादेन परं दुःखितस्य पुनस्तां प्राप्य हर्षस्य परां कोटिमुपगतस्य वत्सराजस्योक्तिरियम्। मृता अग्निदाहात् पञ्चत्वं गता इति हेतोः। यया वासवदत्तया सह प्रेत्य परलोके संगन्तुम् संयोगं प्राप्तुम् मे मया मरणं मतं प्रार्थितं सा एव अवन्ती अवन्तिदेशोद्भवा वासवदत्ता कथम् अत्रैव जन्मनि मया लब्धा। अत्र संभोगश्रृङ्गारः। तदुक्तं प्रदीपे–

अनुकूलौ निषेवेते यत्रान्योन्यं विलासिनौ।
दर्शनस्पर्शनादीनि स संभोगो मुदान्वितः।।

अयं च विप्रलम्भानन्तरं वर्णितः पुष्टिमाप्नोति इत्यत्र विप्रलम्भानन्तरं वर्णितः। तदुक्तं–

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न विना विप्रलम्भेन संभोगः पुष्टिमश्नुते।
कषायिते हि वस्त्रादौ भूयान् रागो विवर्धते।। इति।

विप्रलम्भलक्षणम् प्रदीपे–

भावो यदा रतिर्नाम प्रकर्षमधिगच्छति।
नाधिगच्छति चाभीष्टं विप्रलम्भस्तदोच्यते।। इति।।

अयं च विप्रलम्भः पूर्वरागमानप्रवासकरुणात्मकतया चतुर्विधः। तत्र करुणात्मको यथा–

यूनोरेकतरस्मिन् गतवति लोकान्तरे पुनर्लभ्ये।
विमनायते यदेकस्तदा भवेत् करुणविप्रलम्भाख्यः।। इति।।२८०।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इत्यारुह्य परां कोटिं क्रोधो रौद्रात्मतां गतः।
भीमस्य पश्यतः शत्रुमित्येतद्रसवद्वचः॥२८१॥

रत्नश्री

इति उक्तेन प्रकारेण परां कोटि प्रकर्षनिष्ठामारुह्य प्राप्य अनुभावेनाभिव्यक्तिमागम्य क्रोधो भावविशेषो रौद्रात्मतां रौद्ररसविशेषस्वभावतां गतः। कस्यासौ क्रोधो य एवमवदत्? भीमस्य शत्रुं दुःशासनं पश्यतः। अनेन तादृशवस्तुस्वभावो विभावो भावयोनिः सूचित इत्येवंविधं वचः काव्यं रसवद्रौद्ररसयोगादिति॥

हृदयङ्गमा

नन्वत्रापि नायिकाविषयकरतिभावो व्यज्यते, तत् प्रेयोऽलङ्कार एव कथमत्र न स्यादित्याशङ्क्याह, प्रागिति। –प्राक् पूर्वोक्तयोः "अद्य या" तथा "सोमः सूर्य्यः" इत्युदाहरणयोः, प्रीतिः विभावादिभिरपरिपुष्टा रतिः, दर्शिता भगवद्विषयकरतिव्यञ्जकत्वेन प्रेयोऽलङ्कारतया प्रतिपादितेत्यर्थः ; (एतेन प्रीतिप्रेयसोरेकपर्य्यायत्वं सूचितम्; उक्तञ्च, –"मनोऽनुकूलेष्वर्थेषु सुखसंवेदनं वचः। असम्प्रयोगविषया सैव प्रीतिर्निगद्यते॥" इति)। सम्प्रयोगश्च विभावादिभिः परिपोषः, स चात्र वर्त्तते ततो न प्रीतिरियमित्याह, सेयमिति। –सा देवादिविषयकरतिसजातीया इत्यर्थः, इयं रतिः, –"रतिर्मनोऽनुकूलेऽर्थे मनसः प्रवणायितम्" इत्युक्तलक्षणरूपः कान्ताविषयकोऽनुराग इत्यर्थः, रूपस्य स्वरूपस्य, रत्यात्मकस्य इति यावत्, बाहुल्यं विभावानु भावव्यभिचारिभिः पुष्टिः, तस्य योगेन सम्बन्धेन, श्रृङ्गारतां गता अलौकिकचमत्कारजनकतया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्परिणामेन वा श्रृङ्गाररसत्वं प्राप्ता। (तथा हि अत्र नायिका विभावः, स्मेरतादयोऽनुभावाः, हर्षविस्मयादयः सञ्चारिणः, तैरभिव्यक्तः रत्यादिस्थायिभावः एव रसव्यपदेशं लभते इत्यर्थः। उक्तञ्च भरतेन, –"विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः" इति। रसोद्बोधे च विभावादीनां समुदितानां त्रयाणमेव हेतुत्वं, यत्र तु एकस्य द्वयोर्वा सद्भावः, तत्रान्यतमस्य औचित्यादाक्षेपेण समुदितत्वं बोध्यम्। यत्र तु कृच्छ्रेणाक्षेपस्तत्र तु दोष एव) तस्मात् इदं मृतेत्युक्तं, वचः रसवत् रसवदलङ्कारेण अलङ्कृतमित्यर्थः।।२८१।।

प्रभा

नायिकाविषयकप्रीतेरत्रापि प्रतीयमानत्वात् कुतो नायं प्रेयोलंकार इत्याह–**प्रागिति।** प्राक् पूर्वोदाहृतप्रेयोलंकारोदाहरणद्वये प्रीतिः दर्शिता। संप्रयोगशून्या रतिः प्रीतिः। सा प्रेयोलंकारविषयीभूता इति तदलंकारे सा दर्शिता। तत्र हि भगवद्विषयका रतिर्विभावादिभिरपरिपुष्टा अतः प्रीतिः। तदुक्तम्–

मनोनुकूलेष्वर्थेषु सुखसंवेदनं वचः।
असंप्रयोगविषया सैव प्रीतिर्निगद्यते।। इति।

संप्रयोगे नाम विभावादिभिः परिपोषः। स तु पूर्वोदाहरणे नास्ति इति तत्र प्रीतिः। अत्र तु तादृशः परिपोषो वर्तते इति रतिः। तदाह–**सेयं रतिरिति।** सा तादृशी देवादिविषयक-पूर्वदर्शितरतिसजातीया रतिः–रतिर्मनोनुकूलेर्थे मनसः प्रवणायितम् इत्याद्युक्तलक्षणा। प्रकृते कान्ताविषयकानुराग इत्यर्थः। रूपबाहुल्ययोगेन रूपस्य स्वरूपस्य बाहुल्यं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विभावानुभावव्यभिचारिभावादिभिः परिपोषस्तस्य योगेन संबन्धेन शृङ्गारतां गता अलौकिकानन्दसंपादकत्वेन शृङ्गाररसत्वं प्राप्ता। अत इदं वचः रसवत् रसवदलंकार इत्यर्थः।अत्र वासवदत्ता विभावः। तदुक्तमधुरवचनसुहास्यादयो अनुभावा उन्नेयाः। हर्षविस्मयादयश्च व्यभिचारिणः। एभिः परिपोषं नीतो रत्याख्यः स्थायिभावः शृङ्गाररसतामापद्यते। शृङ्गारपदार्थस्तु–

शृङ्गं हि मन्मथोद्भेदस्तदागमनहेतुकः।
पुरुषप्रमदाभूमिः शृङ्गार इति गीयते।। इति।।

रसोद्बोधे विभावादयस्त्रयः समुदिता हेतुत्वं भजन्ते। यत्र तु कस्यचिन् न्यूनता तत्र तस्याक्षेपात् समुदितत्वं बोद्धव्यम्। तदुक्तम्–

सद्भावश्चेद्विभावादेर्द्वयोरेकस्य वा भवेत्।
झटित्यन्यतमाक्षेपे तदा दोषो न विद्यते।। इति।

तथा च–

वियदलिमलिनाम्बुगर्भमेघं मधुकरकोकिलकूजितैर्दिशां श्रीः।
धरणिरभिनवाङ्कुराङ्कटङ्का प्रणतिपरे दयिते प्रसीद मुग्धे।।

इत्यत्र केवलं मुग्धदयितामेघादिरूपाणामालम्बनोद्दीपन-विभावानामेव वर्णनं न तु अनुभावव्यभिचारिभावानाम्। तथापि आक्षेपेण तत्कल्पनया समुदितत्वम् बोध्यम्। यत्र तु आक्षेपे क्लेशस्तत्र तु दोष एव। तदुक्तं प्रकाशे–

परिहरति रतिं मतिं लुनीते स्खलति भृशं परिवर्तते च भूयः।
इति बत विषमा दशास्य देहं परिभवति प्रसभं किमत्र कुर्मः।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत्र रतिपरिहारादीनामनुभावानां करुणादावपि संभवात् कामिनीरूपो विभावो यत्नतः प्रतिपाद्य इति।।२८१।।

विवृति

इति प्रेयः।

रसवदुदाहरति–

मृतेति प्रेत्य मृत्वा सङ्गन्तुं यया सह मे मरणं मतं सैवावन्ती वासवदत्ता मया दृष्टा। कथमत्रैव जन्मनि जीवतीति वाक्यशेषः।।

प्रीतिर्दर्शिता यया प्रेत्य सङ्गन्तुमित्यनेन। सेयं रतिः श्रृङ्गारतां गता रति(: श्रृङ्गाररसोत्पत्तौ स्थायी)भावः। श्रृङ्गाराख्यरसरूपस्य बाहुल्यं तद्योगे(न तदीयबहुरू)पसमपा (सम्पादनेन समवायेन) (रस)वद्वचः रस (इतिसामा)न्येनाभिधाने(ऽपि र)तिः श्रृङ्गारतां गतेति (कथनात्) श्रृङ्गाररसेन रसवदिति लभ्यते।।

अष्टरसभेदेन रसवत् अष्टधा दर्शयिष्यति; श्रृङ्गारवत् दर्शयति–**मृतेति।** प्राक् प्रीतिरिति–'मनोऽनुकूलेष्वर्थेषु सुखसंवेदनं रतिः। असंप्रयोगविषया सैव प्रीतिर्निगद्यते' इति प्रीतिलक्षणम्। तत्र पूर्वोदाहरणे प्रीतिप्रकर्षो दर्शितः। अत्र तु रतिः रूपबाहुल्ययोगेन श्रृङ्गाराकारा दर्शिता।

रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा।
जुगुप्सा विस्मयश्चेति स्थायिभावाः प्रकीर्तिताः।।

श्रृङ्गारहास्यकरुणा वीररौद्रभयानकाः।
बीभत्साद्भुतसंज्ञौ चेत्यष्ट नाट्यरसाः स्मृताः।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ज्ञायमानतया यत्र विभावो भावपोषकृत्।
आलम्बनोद्दीपनत्वप्रभेदेन स च द्विधा।।

अनुभावो विकारस्तु भावसंसूचनात्मकः।
स्तम्भप्रलयरोमाञ्चाः स्वेदो वैवर्ण्यवेपथू।
अश्रु वैस्वर्यमित्यष्टौ सात्त्विकाः परिकीर्तिताः।।

विशेषादाभिमुख्येन चरन्तो व्यभिचारिणः।
स्थायिन्युन्मग्ननिर्मग्नाः कल्लोला इव सागरे।।

निर्वेदग्लानिशङ्काश्रमधृतिजडताहर्षदैन्यौग्र्यचिन्ता–
त्रासेर्ष्याऽमर्षगर्वस्मृतिमरणमदाः सुप्तिनिद्रावबोधाः।
व्रीडापस्मारमोहाः समतिरलसताऽऽवेगतर्कावहित्था
व्याध्युन्मादौ विषादोत्सुकचपलयुतास्त्रिंशदते त्रयश्च।।

विभावैरनुभावैश्च सात्त्विकैर्व्याभिचारिभिः।
आनीयमानः खाद्यत्वं स्थायी भावो रसः स्मृतः।।

अत्र अवन्तीविषये वत्सराजस्य जाता रतिः, तस्य महाकुलीनतादिभिः उद्दीपनविभावैः उद्दीप्यमाना, सा नष्टा इति श्रुत्वा विषादमरणाध्यवसायादिभिः व्यभिचारिभिः स्तम्भप्रलयादिभिः सात्त्विकैः पुनर्जीवन्त्या(न्ती) दृष्टया अ(दृष्टेत्य)नेन वागारम्भानुभावेन परां पुष्टिं आनीयमाना, श्रृङ्गाररसतां आपाद्यते। तदिदं रसवत्। रूपबाहुल्ययोगेन विभावानुभावव्यभिचारियोगेन इत्यर्थः।।

रसवतः उदाहरणमाह–**मृतेति।** ननु इदमपि प्रीत्युदाहरणत्वेन दर्शयितुं युक्तम्; नष्टावन्तीलाभतुष्टवत्सराजस्य प्रीतेः कथं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रतिप्रतीतिः इत्याशंक्य आह—**प्रागिति।** विदुररातवर्मणोः पुरुषोत्तमभवानी पतिविषया स्नेहवृत्तिः असंप्रयोगविषयत्वात् प्रीतिर्भवति। अत्र तु वत्सराजस्य वासवदत्ताविषया स्नेहवृत्तिः संप्रयोगविषयत्वात् रतिः भवति। रत्यभिधानः एष स्थायी भावः मृतेत्यादिना वागारम्भानुभावेन अनुमीयमानैः हर्षधृतिस्मृतिवितर्कप्रभृतिभिः व्यभिचारिभिः संसृज्यमानः करुणानन्तरां श्रृङ्गाराख्यां लभते। तेन अन्वितमेतत् रसवत्।।२८०—२८१।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अजित्वा सार्णवामुर्वीमनिष्ट्वा विविधैर्मखैः।
अदत्त्वा चार्थमर्थिभ्यो भवेयं पार्थिवः कथम्॥२८२॥

रत्नश्री

उर्वीं महीं सार्णवां सहार्णवैर्वर्तत इति चतुःसमुद्रपर्यन्तामजित्वा अनिर्जित्य अनात्मसात्कृत्वा तज्जयलब्धया च धनसम्पदा विविधैर्विचित्रैः शास्त्रोक्तैरश्वमेधविश्वजिद्वाजपेयराजसूयादिभिर्मखैर्यागविशेषैः करणभूतैः यागसामान्ये तद्विशेषस्य साधकतमत्वात्। अनिष्ट्वा यजनमकृत्वा अर्थिभ्यश्च वनीयकेभ्योऽर्थं यथार्थं यथाकाममदत्त्वा अप्रतिपाद्य अहं राजधर्मशून्यः कथं पार्थिवः पृथिवीपतिः भवेयम्? नैव, पृथिवीजयादिलक्षणत्वात् पार्थिवताया इति॥

कतरोऽयं रस इति विवृण्वन्नाह–

हृदयङ्गमा

रौद्ररसमुदाहरति, निगृह्येति। –येन मम अग्रतः माम नादृत्य इत्यर्थः, कृष्णा दौपदौ, केशेषु (अवच्छेदे सप्तमी) निगृह्य निग्रहं कृत्वा, आकृष्टा, सः अयं पापः दुःशासनः मया लब्धः प्राप्तः, क्षणं जीवति किम्? नैव जीवतीत्यर्थः॥२८२॥

प्रभा

रौद्रमुदाहरति–निगृह्येति। येन दुःशासनेन। मम अग्रतः मामगणयित्वेत्यर्थः। कृष्णा द्रौपदी केशेषु निगृह्य गृहीत्वा आकृष्टा सोयं पापः दुःशासनो लब्धो मयेति शेषः। किं क्षणम् अत्यल्पकालमपि जीवति नैव जीविष्यतीत्यर्थः॥२८२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इत्युत्साहः प्रकृष्टात्मा तिष्ठन्वीररसात्मना।
रसवत्त्वं गिरां तासां समर्थयितुमीश्वरः॥२८३॥

रत्नश्री

इत्युक्तेन विधिना उत्साहो भावविशेषः प्रकृष्ट आत्मा अस्येति प्रकृष्टात्मा परां कोटिमारूढोऽभिव्यक्तत्वात्। वीरश्चासौ रसश्च तस्य स एवात्मा स्वभावः तेन लक्षितः तिष्ठन् वर्तमानो वीररसतामापन्नः। तासामनन्तरोक्तानां गिरां काव्यरूपाणां रसवत्त्वं वीररसयोगितां समर्थयितुं कर्तुमीश्वरः समर्थ इति॥

हृदयङ्गमा

इतीति। –शत्रुं दुःशासनं, पश्यतः भीमस्य क्रोधः इति उक्तप्रकारेण, परां कोटिम् आरुह्य विभावादिभिः परिपोषं प्राप्य इत्यर्थः, रौद्रतां रौद्रभावं, गतः रौद्ररसत्वेन परिणत इत्यर्थः। इति अस्माद्धेतोः, एतत् प्रागुक्तं 'निगृह्य' इत्यादि, वचः वाक्यं, रसवत् रसवदलङ्कारेणालङ्कृतमिति। (तथा च शत्रुरत्र आलम्बनविभावः, कृष्णाकेशाकर्षणादिकमुद्दीपनविभावः, पाप इत्यधिक्षेपवाक्य-मनुभावः, गर्वादयश्च प्रतीयमाना व्यभिचारिणः, एतैः पुष्टिं नीतः क्रोधः स्थायिभावः रौद्ररसत्वमापन्नः)॥२८३॥

प्रभा

रौद्ररसत्वं विशदयति–**इतीति**। इति उक्तप्रकारेण। परां कोटिमारुह्य विभावादिभिः परिपुष्टिं प्राप्य। क्रोधः स्थायिभावः स च–प्रतिकूलेषु तैक्ष्ण्यस्य प्रबोधः क्रोधसंज्ञितः इत्युक्तलक्षणः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तैक्ष्ण्यस्य अपचिकीर्षायाः प्रबोध उत्कटत्वं क्रोधः। तैक्ष्ण्यजनकचित्तवृत्तिविशेष इति यावत्। रौद्रात्मतां रौद्ररसत्वम् गतः प्राप्तः। अत्र दुःशासन आलम्बनविभावः। कृष्णाकेशक-षर्णादिस्मरणमुद्दीपनविभावः। पाप इत्यधिक्षेपवचनमनुभावः। प्रतीयमानाश्च गर्वादयो व्यभिचारिणः। एतैः पुष्टिं प्रापितः क्रोधस्थायिभावः रौद्ररसत्वमापन्नः। तद्वर्णनपरमेतद्वचो रसवदलंकारालंकृतम्।।२८३।।

विवृति

क्रोधो रौद्ररसस्य स्थायीभावो रौद्रात्मतां गतः रौद्ररसभावेन परिणतः। शत्रु(मि)त्येतद्रसवद्वचः। पूर्ववद्योज्यम्।।

रौद्रं दर्शयति–**निगृह्येति।** द्रौपदीकेशाकर्षणजनितः क्रोधः स्मृत्यौग्र्यचिन्तादिभिः व्यभिचारिभिः अनेन वागारम्भानुभावेन च पोषं नीयमानः रौद्रतां आपाद्यते।।

निगृह्येत्यादि। अत्रापि निगृह्येत्यादिना वागारम्भानुभावेन, अनुरूपैः व्यभिचारिभिश्च, संसृज्यमानेन रौद्रात्मतां गतेन क्रोधेन अन्वयात् रसवत्·एतत्।।२८२–२८३।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यस्याः कुसुमशय्यापि कोमलाङ्ग्या रुजाकरी।
साधिशेते कथं देवी हुताशनवतीं चिताम्॥२८४॥

रत्नश्री

यस्या देव्याः कोमलमङ्गमस्या इति कोमलाङ्ग्याः मार्दवगुणेनैव केवलेन निर्मिताया अत एव कुसुममयी शय्या कुसुमशय्या पुष्पतल्पमत्यन्तकोमलं किमुतान्यत्? रुजाकरी पीड़ाहेतुः। सेयमेकान्तसुकुमारदेहा देवी हुताशनवतीमन-लज्वालाकरालां चितां चितिमन्तशय्यां कथं नामाधिशेते? तस्य मार्दवस्य किमिदं शयनम्? हा दग्धदैव! किमिदं व्यवसितं त्वया इति॥

कतमोऽयं रस इति प्रकटयति–

हृदयङ्गमा

वीररसमुदाहरति, अजित्वेति। –सार्णवां ससागराम्, उर्वीं पृथिवीम्, अजित्वा जयेन अलब्ध्वा, विविधैः बहुविधैः, मखैः यज्ञैः अश्वमेधादिभिः, अनिष्ट्वा देवान् अपरितोष्य, तथा अर्थिभ्यः याचकेभ्यः, अर्थं धनम् अदत्त्वा अवितीर्य्य कथं केन रूपेण, पार्थिवः राजा, भवेयम्? राजकर्त्तव्यानामुक्तानामकरणे पार्थिवत्वं विड़म्बनैवेति भावः॥२८४॥

प्रभा

वीरमुदाहरति–**अजित्वेति।** सार्णवां। अर्णवनेमिम्। उर्वीम् मेदिनीम्। अजित्वा शत्रुपराजयेन आत्मसादकृत्वा। विविधैः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अश्वमेधप्रभृतिभिः मखैः यज्ञैः अनिष्ट्वा यजनमविधाय। अर्थिभ्यः याचकेभ्यः। अर्थं द्रविणम्। अदत्त्वा अनवितीर्य अहं पार्थिवः पृथिव्या ईश्वरः कथं भवेयम्। एतत्त्रित्यशून्यस्य पार्थिवत्वं विडम्बनैवेति भावः। अत्र क्त्वान्तवाक्यत्रयेण क्रमेण युद्धधर्मदानविषयक उत्साहः प्रकटितः। तेन च अस्य नृपस्य युद्धवीरत्वं धर्मवीरत्वं दानविरत्वं च वर्णितं भवति। दयावीरोदाहरणं यथा साहित्यदर्पणे–

शिरामुखैः स्यन्दत एव रक्तमद्यापि देहे मम मांसमस्ति।

तृप्तिं न पश्यामि तवापि तावत् किं भक्षणात् त्वं विरतो गरुत्मन्।। (१८१ पत्रे) इति।

अत्र गरुडस्य तृप्तिमपश्यतो जीमूतवाहनस्योक्तिरियं दयाया उत्साहातिशयं दर्शयति इति दयावीरः। एवं च युद्धवीरा रामार्जुनप्रभृतयो धर्मवीरा युधिष्ठिरप्रभृतयो दानवीराः परशुरामबलिप्रभृतयो दयावीराश्च बुद्धजीमूतवाहनप्रभृतय इति बोद्धव्यम्।।२८४।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इति कारुण्यमुद्रिक्तमलङ्कारतया स्मृतम्।
तथापरेऽपि बीभत्सहास्याद्भुतभयानकाः॥२८५॥

रत्नश्री

इति कथितेन [पथा] यथा कारुण्यं शोको भावविशेषः कारुण्याख्यरसविशेषाश्रयः उद्रिक्तमभिव्यक्तमागतं करुणरसात्मना वर्तमानमलङ्कारतया काव्यभूषणत्वेन स्मृतम् इष्टं तज्ज्ञैरिति। तथेत्यादि। यथा रतिक्रोधोत्साहशोकोद्रेकरूपाश्च[78b]त्वारो [श्रृङ्गार]रौद्रवीरकरुणा रसा निदर्शितास्तथाऽपरे शेषाश्चत्वारो जुगुप्साहासविस्मयभयभावोद्भावस्वभावाः, बीभत्सश्च हास्यश्च अद्भुतश्च भयानकश्चेति बीभत्सहास्याद्भुत भयानका रसा निदर्श्यन्त इति शेषः॥

हृदयङ्गमा

इतीति। –उक्तरूपः प्रकृष्टः आत्मा यस्य सः विभावादिभिः परिपुष्ट इत्यर्थः, उत्साहः "कार्य्यारम्भेषु संरम्भः स्थेयानुत्साह उच्यते" इत्युक्तलक्षणः संरम्भ इत्यर्थः, वीररसात्मना तिष्ठन् वीररसरूपेण परिणमन्, आसां गिरां वाचां, रसवत्त्वं रसवदलङ्कारयुक्तत्वं, समर्थयितुं दृढ़ीकर्त्तुम्, ईश्वरः समर्थः। (दानधर्म्मदयायुद्धभेदात् वीररसस्य चतुर्विधत्वं, तेनात्र युद्धवीरः धर्म्मवीरः दानवीरश्च इति वीररसत्रयमेकत्र दर्शितम्। क्रमेण युद्धधर्म्मदानविषया उत्साहाः स्थायिभावाः इति बोध्यम्; ततश्च सार्णवामुर्वीमजित्वा इत्यनेन युद्धे जेतव्याः शत्रवः, अनिष्ट्वा इत्यनेन धर्म्मे धर्म्मः, अर्थिभ्यः अर्थम् अदत्त्वा इति च दाने याचकाः क्रमेण उत्साहस्य आलम्बनविभावाः, प्रतीयमानाः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सहायान्वेषणादयः अनुभावाः, हर्षधृत्यादयो व्यभिचारिणः, एतैरभिव्यक्तः उत्साहरूपस्थायिभावः वीररसतां लभते इति। तथा चोक्तं विश्वनाथेन, –"उत्तमप्रकृतिर्वीरः उत्साहस्थायिभावकः। महेन्द्रदैवतो हेमवर्णोऽयं समुदाहृतः।। आलम्बनविभावास्तु विजेतव्यादयो मताः। विजेतव्यादिचेष्टाद्यास्तस्योद्दीपनरूपिणः।। अनुभावास्तु तत्र स्युः सहायान्वेषणादयः। सञ्चारिणस्तु धृतिमतिगर्वस्मृतितर्करोमाञ्चाः।। स च दानधर्म्मयुद्धैर्दयया च समन्वितश्चतुर्द्धा स्यात्।।" इति। तत्र दयावीरो यथा, –"शिरामुखैः स्यन्दत एव रक्तमद्यापि देहे मम मांसमस्ति। तृप्तिं न पश्यामि तवापि तावत् किं भक्षणात्त्वं विरतो गरुत्मन्!?"।। अत्र जीमूतवाहनस्य गरुड़भुक्तावशिष्टसर्पान् प्रति दयायामुत्साहः स्थायिभावः वीररसतामुपगतः इति दयावीरत्वम् इति)।।२८५।।

प्रभा

वीररसत्वं विशदयति–**इतीति।** इति पूर्ववर्णितप्रकारक उत्साहः। कार्यारम्भेषु संरम्भः। इत्यादिना उक्तलक्षणः प्रकृष्टात्मा विभवादिभिः परिपुष्टस्वरूपस्तिष्ठन् वीररसात्मना वर्तमान आसां गिरां रसवत्त्वं रसवदलंकारत्त्वं समर्थयितुं संपादयितुम् ईश्वरः समर्थः। अस्ति इति शेषः। अत्र युद्धे विजेतव्याः शत्रवो धर्मे यज्ञा दाने याचका आलम्बनविभावाः। सहायान्वेषणादयः प्रतीयमाना अनुभावाः हर्षधृतिस्मृत्यादयो व्यभिचारिणः। एवैरभिव्यक्त उत्साह रूपस्थायिभावो वीररसतां लभते।।२८५।।

विवृति

सागरपर्यन्तां महीं (अजित्वा) राजसूयादिभिर्यागैरनिष्ट्वा,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

याचकेऽभिलषितमर्थमदत्वा च कथमहं पार्थिवः स्याम् इत्युत्साहप्रकृष्टात् (त्मा)उत्साह(ो)वीररसोत्पत्तौ स्थायी भावः तेन प्रकृष्टं (ष्ट आत्मा यस्य सः। वी)ररसात्मना वीररसतादात्म्येन वर्तमानः कश्चित् क्षत्रियः रसवत्त्वं गिरां तासां अजित्वा सार्णवां महीं इ(त्यादीनां सम्पादयितुं समर्थः)।।

अजित्वेति। अजित्वा सार्णवां उर्वीमिति समरवीरः ; अनिष्ट्वा विविधैः मखैः इति देवतां उद्दिश्य द्रव्यत्यागः इति दानवीरः ; दीनानाथेभ्यः अर्थं अदत्त्वा इति दयावीरः ; इति त्रिविधो वीरो दर्शितः।।

अजित्वेति। अत्र वसुधाविजयादेरालम्बनविभावात् उत्पन्नः स्थायी उत्साहः, तेजआद्युद्दीपनविभावैः उद्दीप्यमानः, समुत्पन्नेषु वागारम्भानुभावानुमीयमानेषु स्मृतिवितर्कादिषु व्यभिचारिषु निष्पन्नः, वीररससंज्ञया व्यवह्रियते। तेन अन्वितं रसवत् एतत्। अत्र त्रिविधो वीरः प्रतिपाद्यते–अजित्वा सार्णवामुर्वीमित्यनेन युद्धवीरः ; अनिष्ट्वेत्यनेन दानवीरः ; अदत्त्वेत्यादिना दयावीरश्च। उक्तमर्थमभिधत्ते–**इतीति**।।२८५।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पायं पायं तवारीणां शोणितं पाणिसम्पुटैः।
कौणपाः सह नृत्यन्ति कबन्धैरन्त्रभूषणाः॥२८६॥

रत्नश्री

देव! तवारीणां त्वत्कृपाणकृतान्तपीतजीवितानां शोणितं रक्तं पाणिसम्पुटैः अञ्जलिभिः पायं पायमभीक्ष्णं पीत्वा मत्ताः कौणपाः राक्षसा अन्त्राणि भूषणानि रक्तकुसुमदामायमानानि येषामित्यन्त्रभूषणाः कबन्धैः विशिरोभिः शरीरैः सह तवारीणामित्यपेक्षणीयम्। नृत्यन्ति [इति] उत्प्रेक्षा, तेषामपि नृत्ययोगात्। अत्र जुगुप्साख्यो भावः तादृशविभावजनितः, अनुभावेन तद्रूपेणाभिव्यक्तः। विकृतरूपबीभत्सरसस्व-भावतामनुभवन्नलङ्कारत्वेनेष्ट इति द्रष्टव्यम्॥

प्रभा

करुणमुदाहरति—**यस्या इति।** यस्याः कोमलाङ्ग्याः कुसुमशय्यापि रुजाकरी पीडाकरी भवतीति शेषः। सा तन्वी सुकुमारगात्री। हुताशनवतीं ज्वलनप्रदीप्तां चितां कथं अधिशेते अध्यारोहति। अतिकष्टास्पदमेतदिति भावः॥२८६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इदमम्लानमालाया लग्नं स्तनतटे तव।
छाद्यतामुत्तरीयेण नवं नखपदं सखि॥२८७॥

रत्नश्री

सखि! तवाद्यापि अम्लाना प्रत्यग्रा परिणयोत्सवनिवेशिता माला कुसुमदामानि यस्या इत्यम्लानमालायाः। अन्ये तु पुरुषायितपरिश्रमेण म्लानमालत्वेऽपि अम्लानमालाया इति विशेषणमुपहासपरम् इति व्याचक्षते। स्तनस्य तटे प्रदेशे लग्नं व्यवस्थितं नखपदमिदं दृश्यमानं मयूरपदकशशप्लुतकादिरूपं नवमभिनवमार्द्रं छाद्यतां संव्रियतामुत्तरीयेण संव्यानेन। किमेवमतित्वरितम्। आनन्दिताः सखि! वयम्। साधु कृतम्। अत्रानुचितार्थदर्शनविभावात् कृतो हासाख्यो भावः समुद्रिक्तरूपो हास्यरसतामागतः। काव्यशोभाकरमिदं विज्ञेयम्॥

हृदयङ्गमा

करुणरसमुदाहरति, यस्या इत्यादि द्वाभ्याम्। –यस्याः कोमलाङ्ग्याः कुसुमशय्याऽपि रुजाकरी पीड़ाकरौ, सा तन्वौ कथं हुताशनवतीं ज्वलन्तीमित्यर्थः, चिताम् अधिशेते? इति उक्तरूपेण, उद्रिक्तं विभावादिभिः परिपुष्टं, कारुण्यं करुणरसस्थायिभावः शोकः, इष्टनाशादिजनितदुःखविशेष इत्यर्थः, ("इष्टनाशादिभिश्चेतोवैक्लव्यं शोकशब्दभाक्" इति लक्षणात्) अलङ्कारतया करुणरसीभूय काव्यशोभासम्पादनात् रसवदलङ्कारत्वेन, स्मृतं ज्ञातम्। (अत्र गतप्राणा तन्वी आलम्बनविभावः, कुसुमशय्याऽपीत्यादिना जीविताया नायिकायाः सर्वविधभावस्मरणम् उद्दीपनविभावः, तादृशकरुणवचनम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनुभावः, कथमित्यनेन प्रतीयमानाश्चिन्तादयो व्यभिचारिणः, एतैः परिपुष्टः शोकाख्यः स्थायिभावः करुणरसतां लभते इति ज्ञेयम्) तथा परे अन्ये, बीभत्सहास्याद्भुतभयानका अपि, रसा वेदितव्या इति शेषः। (एतेन स्वमते रसानामष्टत्वं सूचितम्; यथा पूर्व्वोदाहरणेषु रतिक्रोधोत्साहशोकस्थायितया श्रृङ्गाररौद्रवीर-करुणरसरूपाश्चत्वारो दर्शिताः, तथा वक्ष्यमाणेष्वपि जुगुप्साहास-विस्मयभयस्थायित्वेन बीभत्सादयश्चत्वारः रसाः दर्शयिष्यन्ते। "तन्वी" इत्यत्र "देवी" इति क्वचित् पाठः)॥२८६॥२८७॥

प्रभा

करुणत्वं प्रकटयति–**इतीति।** इति एवं वर्णितम्। कारुण्यं करुणरस स्थायिभावः शोकः–इष्टनाशादिभिश्चेतोवैकल्व्यं शोक उच्यते। इत्युक्तलक्षणः। उद्रिक्तं विभावादिभिः परिपुष्टं सद् अलंकारतया रसवदलंकारत्वेन स्मृतम् पूर्वमहर्षिभिरिति शेषः। अत्र विगतजीविता तन्वी आलम्बनविभावः। कुसुमशय्यादय उद्दीपनविभावाः। करुणवचनमनुभावः। कथमित्यनेन प्रतीयमानाश्चिन्तादयो व्यभिचारिणः। एतैः पुष्टि नीतः शोकाख्यः स्थायिभावः करुणरसत्वं भजते। अथ अपरेपि पूर्वदर्शितशृङ्गारवीररौद्रकरुणरसवद् अन्येपि बीभत्सहास्याद्भुत-भयानका रसाः सन्ति। तेषामपि स्वरूपं दर्शयाम इत्यर्थः। प्रस्तावव्राक्यमेतत्॥२८७॥

विवृति

कुसुमास्तरणं शयनमपि यस्या दुःखमुत्पादयति सा देवी (हुताशनवतीं चितां कथमधिशेत इति कारुण्यं शो) का (त्)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्थायिनो भावात् आविर्भूतमलङ्कारतया स्मृतमाचार्यैः।।

करुणं दर्शयति—**यस्या इति।** चितां आरोपितां स्ववल्लभां दृष्टवतः कस्यचित् मरणजनितः शोकः, तत्सौकुमार्यादिभिः उद्दीपनविभावैः; निर्वेदग्लानिचिन्तादिभिः व्यभिचारिभिः, वागारम्भानुभावेन च निष्पन्नः, करुणरसतां आपाद्यते। कारुण्यमिति शोकः उच्यते। अथापरेऽपीति वक्ष्यमाणेषूदाहरणेषु संक्रमं दर्शयति।।

यस्याः इति। आलम्बनविभावभूतात् देवीमरणात् उत्पन्नः शोकः स्थायी भावः, चितानिवेशनहुताशनज्वालादिभिः उद्दीपनविभावैः उद्दीप्यमानः, वागारम्भानुभावानुमेयैः निर्वेददैन्यादिभिः व्यभिचारिभिः संसृज्यमानः, करुण इति ज्ञायते। तादृशेन करुणरसेन अन्वितं रसवत् एतत्। प्रागुक्ताः श्रृङ्गारवीरकरुणाः ; अथ अपरेऽपि बीभत्सहास्याद्भुतभयानकाः। उच्यन्ते इति वाक्यशेषः।।२८६—२८७।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अंशुकानि प्रवालानि पुष्पं हारादिभूषणम्।
शाखाश्च मन्दिराण्येषां चित्रं नन्दनशाखिनाम्॥२८८॥

रत्नश्री

ऐषां नन्दने उद्याने शाखिनाम् अंशुकानि वस्त्राणि प्रवालानि पल्लवानि हारादि च भूषणमलङ्कारः पुष्पम्। आदिशब्देनाङ्गदकुण्डलादिपरिग्रहः। शाखाश्च विचित्रसंनिवेश-विशेषाः। मन्दिराणि प्रासादाः। [अ]हो चित्रमिदमपूर्वमिदं दृष्टम्! इह विस्मयो नाम भावः परिस्फुटीभूतोऽद्भुतरसतामासेवत इति वेदितव्यम्॥

हृदयङ्गमा

तत्र बीभत्समुदाहरन्नाह, पायमिति। –कौणपाः राक्षसाः, कबन्धैः अशिरस्कक्रियायुक्तकलेवरैः सह, ("कबन्धोऽस्त्री क्रियायुक्तमपमूर्द्धकलेवरम्" इत्यमरः) अन्त्रं पुरीतत्, भूषणं येषां तादृशाः सन्तः, पाणिसम्पुटैः तव अरीणां शोणितं पायं पायं पुनः पुनः पीत्वा, नृत्यन्ति। (अत्र जुगुप्सा स्थायिभावः। सा च,–"दोषेक्षणादिभिर्गर्हा जुगुप्सा विषयोद्भवा" इत्युक्तलक्षणा। तस्याश्च शोणितपायिनः अन्त्रभूषणाः राक्षसाः आलम्बनविभावाः, अन्ये च अनुभावादयः आक्षिप्ताः, तथा हि निष्ठीवनास्यवलनादयोऽनुभावाः, मोहापस्मारादयः व्यभिचारिणः, तैश्च परिपुष्टा जुगुप्सा बीभत्सरसत्वं भजते। अत्र राजविषयकरतिभावस्य प्राधान्यात् बीभत्सपरिपुष्टतया तस्यैव चमत्कारित्वात् प्रेयोऽलङ्कारत्वमेव युक्तमिति बोध्यम्। रसवत्प्रयसोः सङ्कर इति केचित्)॥२८८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रभा

बीभत्समुदाहरति—**पायं पायमिति।** अन्त्राणि पुरीततो भूषणानि येषां ते। कौणपाः राक्षसाः। कबन्धैः सह मृतानां शिरोविहीनक्रियायुतशरीरैः सह। तवारीणां शोणितं पाणिसंपुटैः हस्तपुटकैः। पायं पायं पीत्वा पीत्वा नृत्यन्ति सप्रमोदं क्रीडन्ति। अत्र जुगप्सारूपस्थायिभावः। दोषेक्षणादिभिर्गर्हा जुगुप्सेति निगद्यते। इति तल्लक्षणम्। तस्याः कौणपा आलम्बनविभावः। प्रतीयमाननिष्ठीवनच्छर्दनादयोनुभावाः। मोहापस्मारादयो व्यभिचारिणः। तैश्च परिपुष्टा सा बीभत्सरसत्वं भजते। बीभत्सश्चात्र राजविषयकरतौ गुणीभूतः। तादृशरतिश्च वर्णनीयप्रीतिकरत्वात् प्रेयोलंकारः। इति प्रेयोरसवतोः संकरः।।२८८।।

विवृति

तो वा (जुगुप्सातः स्थायिनो भावात्) बीभत्सरसोत्पत्तिः। तां दर्शयति—त्वदरातीनां रुधिरं हस्ताञ्जलिभिः पीत्वा पीत्वा कौणपा वेतालप्रेतपिशाचराक्षसाः आन्त्राणि भूषणानि आभरणानि येषां ते आन्त्रभूषणाः कबन्धैः सह नृत्यन्तीति बीभत्सरसेन रसवद्वचः।।

बीभत्सं दर्शयति—**पायं पायमिति।** अत्र रुधिरपानादिजनिता जुगुप्सा हि स्थायी भावः ; स च नासावक्रविकूणनादिभिः अनुभावैः, आवेगादिभिः, व्यभिचारिभिःपुष्टः बीभत्सो भवति।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पायं पायमिति। अत्र आलम्बनविभावेभ्यो भूतेभ्यः कस्यचित् रिपुविजयाशंसिनः उत्पन्ना जुगुप्सा स्थायी भावः, शिरश्छेदविगलद्रुधिरधारापरिप्लुतकबन्धनर्तनकौणपान्त्रभूषणशोणितपानादिभिः उद्दीपनविभावैः उद्दीप्यमानः, समुत्पन्नेशु वागारम्भानुमेयेषु भयावेगशङ्कावहित्थादिषु व्यभिचारिषु, उच्यते बीभत्स इति। तेनान्वितं रसवत् एतत्।।२८८।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इदं मघोनः कुलिशं धारासन्निहितानलम्।
स्मरणं यस्य दैत्यस्त्रीगर्भपाताय कल्पते॥२८९॥

रत्नश्री

मघोनः शक्रस्य कुलिशं वज्रमिदं दृश्यते। धारासु कोटिषु सन्निहितो व्यवस्थितोऽनलोऽग्निरस्येति धारासन्नि[79a] हितानलम्। यस्य कुलिशस्य स्मरणं किमु दर्शनम्? दैत्यानामसुराणामन्तर्वत्नयो याः स्त्रियस्तासामतिभयग्रस्तानां गर्भाणां पाताय नाशार्थं कल्पते सम्पद्यते। यस्य स्मरणादप्यसुरस्त्रीणां गर्भाः पतन्ति तदिदं कुलिशमिति प्रकृतम्। अत्र भयाख्यो भावः समुद्भूतो भयानकरसरूपेण तिष्ठन्नलङ्कारः स्मृत इत्यवसेयम्॥

नन्वियं रसवत्ता प्रागेव माधुर्यप्रस्तावे दर्शिता। तत् किं पुनरुच्यत इति चेदाह–

हृदयङ्गमा

हास्यमुदाहरन्नाह, इदमिति। –हे सखि! अम्लानः अखण्डितः, अस्मद्विनयादिनाऽप्यप्रशमित इत्यर्थः, मानो यस्याः तथाविधायाः अपि, तव स्तनतटे लग्नम् इदं नवं, न तु प्राचीनमिति भावः, नखपदं नखाघातचिह्नम्, उत्तरीयेण छाद्यताम्। (सखीसन्निधौ कृतमानप्रकाशां रहसि कान्तेन सह कृतविहारां काञ्चित् नायिकां प्रति तत्सख्या सोपहासोक्तिरियम्। अत्र हासः स्थायिभावः, स च,–"वागादिवैकृतैश्चेतोविकाशो हास उच्यते" इत्युक्तलक्षणः। तादृशी मानवती नायिका आलम्बनविभावः, नखक्षतमुद्दीपन-विभावः, तादृशवचनानि अनुभावाः, व्यभिचारिणश्च प्रतीयमानाः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अवहित्थादयः, एतैश्च परिपुष्टः अयं स्थायिभावः हासः हास्यरसत्वेन परिणमति)।।२८९।।

प्रभा

हास्यमुदाहरति–**इदमिति।** सखीनां पुरतो मानकथां कुर्वतीं रहसि च नायकेन सह कृतक्रीडां नायिकां प्रति तत्सख्या उपहासोक्तिरियम्। अम्लानः म्लानिमप्राप्तः अस्मद्वचनैर्न न्यूनीभूत इत्यर्थः। तादृशः मानो यस्याः सा तस्याः। तव स्तनतटे स्तनप्रान्ते लग्नं आसक्तम् नवं न तु प्राचीनं नखपदं नखव्रणचिह्नम् हे सखि उत्तरीयेण छाद्यतां आच्छाद्यताम्। मानिन्यास्ते नायकसंभोगसूचकं नखव्रणं झटिति आच्छाद्यताम्। अन्यथास्मत्पुरतो दर्शिता मानकथा कथं यथार्था स्याद् इति परिहासोक्तिः। अत्र–वागादिविकृताच्चेतोविकासो हास इष्यते इत्युक्तलक्षणो हासः स्थायिभावः। तादृशी कपटमानवती नायिका आलम्बनविभावः नखक्षतमुद्दीपनविभावः। तादृशसोल्लुण्ठवचनान्यनुभावः। प्रतीयमाना अवहित्थादयो व्यभिचारिणः। एतैः परिपुष्टो हासस्थायिभावो हास्यरसतां भजते। अम्लानमानाया इत्यत्र अम्लानमालाया इति पाठो दृश्यते। स तु न सरसः।।२८९।।

विवृति

हासात् स्थायिनो भावात् हास्यरसोत्पतिं दर्शयति–

इदमम्लानमानाया इत्यादिनाऽभिमानशालिनीं सखीं काचित् नर्मणा हसतीति हास(स्य) रसवद्वचः।।

हास्यमुदाहरति इदमिति। कृतप्रणयकलहां पूर्वदिने

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सायन्तनसमये दयितेन पादपतनादिभिः सखीसान्त्वनैश्च कृतेऽपि प्रसादने अकृतप्रसादां, प्रियोपभोगचिह्ननखपदादिवैकृतवतीं, नायिकां प्रातरालोक्य जातो हासः स्थायी, स्मितवागारम्भादिभिः अनुभावैः व्यभिचारिभिश्च पुष्टः, हास्यरसो भवति।।

इदमिति। अत्र काञ्चित् सखीं, भर्तरि पूर्वं परिगृहीतमानां, तेनैव नवनखपदाङ्कितस्तनीम् आलम्बनविभावभूतामुपाश्रित्य, तस्याः सान्त्वने वितथयत्नायाः सख्याः उत्पन्नो हासः स्थायी भावः, तदीयमानपरिग्रहणादिभिः उद्दीपनविभावैः उद्दीप्यमानः, समुत्पन्नेषु वागारम्भणानुमितेषु शङ्कावहित्थासूयाहर्षगद्गदादिषु व्यभिचारिषु निष्पन्नः, हास्यशब्देन अभिधीयते। तेनान्वितं रसवत् एतत्।।२८९।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वाच्यस्याग्राम्यतायोनिर्माधुर्ये दर्शितो रसः।
इह त्वष्टरसायत्ता रसवत्ता स्मृता गिराम्॥२९०॥

रत्नश्री

वाच्यस्य काव्याधेयवस्तुनः सम्बधिनी सा ग्राम्यता असभ्यता योनिः प्रभवः अस्येति अग्राम्यतायोनिः। गमकत्वाद्वाच्यस्येति सापेक्षत्वेऽपि समस्यते। रसोऽर्थरसः। माधुर्ये शब्दार्थसाधारणे विभज्यमाने दर्शितः कामं सर्वोऽप्यलङ्कार [१.६२] इत्यादिना। इह तु रसवदलङ्कारेऽष्टौ यथोक्ता रसास्तेष्वायत्ता प्रतिबद्धा रसवत्ता रसयोगिता अष्टरसा इति यावत्। गिरां काव्यानां सम्बन्धिनः स्मृता अभिमता इति।

रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा।

जुगुप्सा विस्मयश्चेति स्थायिभावाः प्रकीर्तिता॥

[नाट्यशास्त्रे ६.१८]

श्रृङ्गारहास्यकरुणा रौद्रवीरभयानकाः।

वीभत्साद्भुतसंज्ञो चेत्यष्टौ नाट्यरसाः स्मृताः॥

[नाट्यशास्त्रे ६.१६]

इति भावरससंग्रहश्लोकाविति॥

॥ इति रसवच्चक्रम् ॥

ऊर्जस्वि निदर्शयन्नाह–

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हृदयङ्गमा

अद्भुतरसमुदाहरति, अंशुकानीति। –एषां नन्दनशाखिनां कल्पद्रुमाणां, प्रबालानि किशलयाः, अंशुकानि वसनानि, पुष्पं हारादिभूषणं, शाखाश्च मन्दिराणि गृहाणि, चित्रं विस्मयकरमेतदित्यर्थः। (अत्र स्थायिभावो विस्मयः। तल्लक्षणं यथा,–"विविधेषु पदार्थेषु लोकसीमाऽतिवर्त्तिषु। विस्फारश्चेतसो यस्तु स विस्मय उदाहृतः।।" इति। अलौकिकनन्दन-शाखिभिरालम्बनविभावैः, तेषाञ्च वसनादिमत्त्वरूपगुणोत्कर्षै-रुद्दीपनविभावैः, प्रतीयमानैः स्तम्भस्वेदादिभिरनुभावैः, सञ्चारिभिश्च वितर्कादिभिः परिपुष्टः विस्मयः अद्भुतरसतया पर्य्यवस्यतीति)।।२९०।।

प्रभा

अद्भुतमुदाहरति–अंशुकानीति। एषां नन्दनशाखिनां कल्पवृक्षाणाम् प्रवालानि कोमलपत्राणि। अंशुकानि वसनानि। पुष्पं हारादिभूषणम्। शाखाश्च मन्दिराणि गृहाणि। चित्रम् एतद् विस्मयास्पदम्। अत्र–विस्मयश्चित्तविस्तारो वस्तुमाहात्म्यदर्शनात्। इत्युक्तलक्षणस्य विस्मयस्थायिभावस्य दिव्यनन्दनशाखिन आलम्बनविभावाः। तेषामंशुकादिमत्त्वगुणमहिमा उद्दीपनविभावः। प्रतीयमानाः स्तम्भस्वेदादयोनुभावाः। तथैव वितर्कादयश्च व्यभिचारिणः। एभिः परिपुष्टो विस्मयोद्भुतरसत्वं भजते।।२९०।।

विवृति

(विस्मयात्स्थायिनो भावात् अद्भुतरसोत्पत्तिं) उदाहरति–

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अंशुकानि क्षौमदुकूलचीनपट्टादीनि तान्येव प्रवालानि तथा पुष्पं हारादिभूषणं हारनूपुरादिभूषणमेव पुष्प(म्)। सुधाधवलितप्रासादकाञ्चनवलभीप्रभृतीन्येव शाखाः ये(ए)षां नन्दन(शाखिना)मिन्द्रोद्यानतरूणामिति चित्रमेतत्।।

अद्भुतं दर्शयति–**अंशुकानीति।** नन्दनशाखिनां प्रवालादीनां अंशुकत्वादिना जनितो विस्मयः स्थायी भावः, साधुवादादिभिः अनुभावैः हर्षावेगधृत्यादिभिः व्यभिचारिभिश्च पुष्टः अद्भुतरसो भवति।।

अंशुकानीति। प्रवालपुष्पशाखासम्पत्तिः निजरूपं तरूणाम्; नन्दनशाखिनां पुनः प्रवालादिस्थानेषु अंशुकहारमन्दिराणि। तदेतदाश्चर्यम्। अतश्च एतेभ्यः आलम्बनविभावेभ्यः कस्यचित् देवभूमिं गतस्य उत्पन्नो विस्मयः स्थायी भावः, तदीयावयवदर्शनादिभिः उद्दीपनविभावादिभिः उद्दीप्यमानः, समुत्पन्नेषु वागारम्भानुमितेषु हर्षरोमोद्गमखेदगद्गदादिषु व्यभिचारिषु निष्पद्यमानः, अद्भुतः इत्युच्यते। तत्सम्बन्धात् रसवदेतत्।।२९०।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अपक्तॉहमस्मीति हृदि ते मा स्म भूद्भयम्।
विमुखेषु न मे खड्गः प्रहर्तुं जातु वाञ्छति॥२९१॥

रत्नश्री

अहमस्यापकर्ता प्रतिकूलवर्ती प्राप्तश्चेदानीमनेनास्मि भवामीति हेतोस्ते तव हृदि चित्ते भयं त्रासो मृतोऽस्मीति मा स्म भूत् मा भैषीः। न त्वां हन्मि। नहि जातु कदाचिदपि मे मम खड्गो विमुखेषु समरनिरास्थेषु अप्रतिप्रहरत्सु अप्रहर्तृषु क्रमितुं वाञ्छति। नास्त्यस्येदृशी स्थितिः यद्विमुखेषु प्रहरतीति॥

तद्विवृणोति–

हृदयङ्गमा

भयानकरसमुदाहरति, इदमिति। –इदं मघोन इन्द्रस्य, कुलिशं वज्रं, धारासु सन्निहितः अनलः यस्य तादृशं, यस्य स्मरणं दैत्यस्त्रीणाम् असुरकामिनीनां, गर्भपाताय कल्पते प्रभवति। (अत्र दैत्यस्त्रीणां भयमेव स्थायिभावः। तल्लक्षणं यथा, –"रौद्रशक्त्या तु जनितं चित्तवैक्लव्यदं भयम्" इति। मघोना आलम्बनविभावेन, तादृशकुलिशेन उद्दीपनविभावेन, गर्भपातेन च अनुभावेन, प्रतीयमानैः आवेगसम्मोहादिभिः व्यभिचारिभावैश्च परिपुष्टं भयं भयानकरसत्वं प्राप्नोतीति)॥२९१॥

प्रभा

भयानकं दर्शयति–**इदमिति।** मघोनः महेन्द्रस्य। इदं धारासंनिहितानलं धारासु निशितमुखेषु संनिहितः अनलः यस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्। एतादृशं कुलिशं वज्रमस्तीति शेषः। यस्य स्मरणं दैत्यस्त्रीगर्भपाताय असुराङ्गनागर्भस्त्रंसनाय कल्पते प्रभवति। तत्स्मरणेन दैत्याङ्गनानां गर्भाः भयेन च्युता भवन्तीत्यर्थः। अत्र–रौद्रशक्त्या तु जनितं वैक्लव्यं मनसो भयम्। इत्युक्तलक्षणस्य भयस्थायिभावस्य मघवा आलम्बनविभावः। कुलिशमुद्दीपनविभावः। गर्भपातादयोनुभावाः। प्रतीयमाना आवेगसंमोहादयश्च व्यभिचारिणः। एतैः परिपुष्टो भयस्थायिभावः भयानकरसत्वं भजते। अष्टौ नाट्ये रसाः स्मृता इत्युक्त्यनुरोधेन एते अष्टौ रसाः प्रदर्शिताः। शान्ताख्यो नवमो रसः श्रव्यकाव्ये दृश्यते। तल्लक्षणं प्रकाशे–निर्वेदस्थायिभावोस्ति शान्तोपि नवमो रस इति। अन्यत्रापि–

न यत्र दुःखं न सुखं न चिन्ता न द्वेषरागौ न च काचिदिच्छा।
रसः स शान्तः कथितो मुनीन्द्रैः सर्वेषु भावेषु शमप्रधानः।। इति।

तदुदाहरणं–

अहौ वा हारे वा कुसुमशयने वा दृषदि वा।
मणौ वा लोष्टे वा बलवति रिपौ वा सुहृदि वा।
तृणे वा स्त्रैणे वा मम समदृशो यान्ति दिवसाः।
कदा पुण्येरण्ये शिव शिव शिवेति प्रलपतः।। इति।

अत्र हि मिथ्यात्वेन परिभाव्यमानं निखिलं जगदालम्बनम्। तपोवनाद्युद्दीपनम्। अहिहाराद्योः समदर्शनमनुभावः। मतिधृतिर्हर्षाः व्यभिचारिभावाः एतैर्निर्वेदस्थायिभावः शमस्थायिभावो वा परिपोषं गतः शान्तरसत्वेन पर्यवस्यति। केचित् पुनः भक्तिरसमन्यं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वीकुर्वन्ति। जगन्नाथपण्डितराजस्तु (४५ पत्रे) कथमेते एव रसाः। भगवदालम्बनस्य रोमाञ्चाश्रुपातादिभिरनुभावितस्य हर्षादिभिः परिपोषितस्य भागवतादिपुराणश्रवणसमये भगवद्भक्तैरनुभूयमानस्य भक्तिरसस्य दुरपह्नवत्वात्। भगवदनुरागरूपा भक्तिश्चात्र स्थायिभावः। न चासौ शान्तरसे अन्तर्भावमर्हति। अनुरागस्य वैराग्यविरुद्धत्वात्। उच्यते। भक्तेर्देवादिविषयरतित्वेन भावान्तर्गततथा रसत्वानुपपत्तेः।

रतिर्देवादिविषया व्यभिचारी तथाञ्जितः।
भावः प्रोक्तस्तदाभासा ह्यनौचित्यप्रवर्तिताः।

इति हि प्राचां सिद्धान्तात्। न च तर्हि कामिनीविषयाया अपि रतेर्भावत्वमस्तु रतित्वाविशेषात्। अस्तु वा भगवद्भक्तेरेव स्थायित्वम् कामिन्यादिरतीनां च भावत्वं विनिगमकाभावादिति वाच्यम्। भरतादिमुनिवचनानामेवात्र रसभावत्वादिव्यवस्थास्थापकत्वेन स्वातन्त्र्यायोगात्। इति एवं केवलभरतवचनप्रामाण्येन भक्तिरसं भावत्वेन सोमन्यत। परं शाण्डिल्यवर्त्मानुगा भक्तिरसं स्वीकुर्वन्त्येव। तदुक्तं भगवद्भक्तिचन्द्रिकामृतरसोल्लासे–

परत्रानासङ्गं जनयति रतिर्या नियमतः।
परस्मिन्नेवास्मिन् समरसतया पश्यत इमम्।
परप्रेमाढ्येयं भवति परमानन्दमधुरा
परा भक्तिः प्रोक्ता रस इति रसास्वादनचणैः।। इति।

तथा रसाभासभावाभासादयोपि रसनाद्रसाः। तेषां सद्भावे रसवदेवालंकारः। तत्र अनौचित्येन प्रवृत्तौ रसभावौ रसाभासभावाभासौ। भावोदयादीनां स्वरूपं पूर्वमेव कथितम्। तेषामुदाहरणान्यपि कुवलयानन्दादिषु द्रष्टव्यानि।।२९१।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विवृति

भयात् स्थायिनो भावात् भयानकरस उत्पद्यते। तेन भया (नकरस) वत्तामुदाहरति–

इदं मघोनो देवराजस्य कुलिशं वज्रमायुधम्। किं भूतम्। धारासु सन्निहितोऽनलोऽग्निर्यस्य तद्धारासन्निहितानलम्। यस्य स्मरणं दैत्यस्त्रीगर्भपाताय कल्पते। स्मरणादेव दा(नवस्त्रीणां)गर्भाः पतन्तीति।।

भयानकं दर्शयति इदमिति। दैत्यघातकमघवत्कुलिशस्मरण-जनितं दैत्यस्त्रीणां भयं स्थायी भावः, सर्वाङ्गवेपथुस्वेदशोषादिभिः अनुभावैः दैन्यसंभ्रमसंमोहनादिभिः व्यभिचारिभिश्च पुष्टः, भयानकरसो भवति।।

इदमिति। अत्र महेन्द्रकुलिशधारासन्निहितानलात् आलम्बनविभावात् स्मर्यमाणादपि दैत्यस्त्रीणामुत्पन्नं भयं स्थायी भावः, तदीयावयवदर्शनादिभिः उद्दीपनविभावैः उद्दीप्यमानः, गर्भपातादिभिः अनुभावैः तदनुमितस्तम्भवैवर्ण्यवेपथुप्रभृतिभिः व्यभिचारिभिः संसृज्यमानः, भयानकरसरूपेण निष्पद्यते। तत्सम्बन्धात् रसवदेतत्।।२९१।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इति मुक्तः परो युद्धे निरुद्धो दर्पशालिना।
पुंसा केनापि तज्ज्ञेयमूर्जस्वीत्येवमादिकम्॥२९२॥

रत्नश्री

इत्यनन्तरोक्तेन क्रमेण पुंसा केनापि केनचित् अनिर्दिष्टगोत्रनामधेयेन दर्पशालिना सौटीर्यसम्बन्धितेन युद्धे निरुद्धः प्राप्तः परः शत्रुः मुक्तस्त्यक्तो न हतः। यदीदृशं वचनं तदेवमादिकमन्यदपि तादृशम्–

प्राणा[न्] जुहौमि युद्धाग्नौ यद्यरातिर्ममोर्जितः।

न सीतार्पणकार्पण्यम्लानः प्राणिमि रावणः॥

[79b]इत्याद्यूर्जस्वीत्यवज्ञेयमवगन्तव्यमिति॥

॥ इति ऊर्जस्वि ॥

हृदयङ्गमा

ननु माधुर्य्यनिरूपणे "मधुरं रसवत्" इत्युक्तेः रसवत्त्वस्य माधुर्य्यगुणत्वम् अभिहितम्, अत्र तु अलङ्कारत्वं कथं सङ्गच्छते इत्याह, वाक्यस्येति। –माधुर्य्ये माधुर्य्यनिरूपणे, वाक्यस्य वाच्यस्य इत्यर्थः, (वाच्योपलक्षकमिह वाक्यशब्दः "वस्तुन्यपि रसस्थितिः" इत्युक्तेः) अग्राम्यता ग्राम्यत्वदोषाभावत्वेनालङ्कारादि-मत्तेत्यर्थः, सा एव योनिः कारणं, व्यञ्जिकेत्यर्थः, यस्य तादृशः, रसः दर्शितः ("कामं सर्वोऽप्यलङ्कारो रसमर्थे निषिञ्चति। तथाऽप्यग्राम्यतैवैनं भारं वहति भूयसा॥") इत्यनेन निरूपित

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इत्यर्थः, अग्राम्यताया एव रसत्वेन उपचारतः कीर्त्तनमिति भावः। इह तु गिरां विभावानुभावव्यभिचारिभावोपस्थापकवाक्यानां, रसवत्ता रसवदलङ्कारवत्ता, अष्टरसायत्ता अष्टसु रसेषु श्रङ्गारादिषु आयत्ता श्रृङ्गारादिरसाधीना, स्मृता। (एतेन रसव्यञ्जकग्राम्यत्व-दोषाभावसहकृतालङ्कारादिमत्त्वं माधुर्यगुणत्वं, रसवदलङ्कारस्तु रस एवेत्यनयोर्भेद इति बोध्यम्। एवं देवादिविषयकरतिभावानां रसाभास-भावाभास-भावोदय- भावसन्धि भावशान्ति भावशबलतानाञ्च रस्यमानत्वात् रसवदलङ्कारत्वम्। इह रसानामष्टत्वं यदुक्तं तत्तु नाट्याभिप्रायेण "अष्टौ नाट्ये रसाः स्मृताः" इत्युक्तेः ; श्रव्याकाव्ये तु अन्यैरुक्तः शान्तनामाऽपि रसो दृश्यते, तथा चोक्तं प्रकाशकृता, –"निर्वेदस्थायिभावोऽस्ति शान्तोऽपि नवमो रसः" इति। विश्वनाथेनापि उक्तं यथा, –"शान्तः शमस्थायिभावः उत्तमप्रकृतिर्मतः। कुन्देन्दुसुन्दरच्छायः श्रीनारायणदैवतः।। अनित्यत्वादिनाऽशेषवस्तुनिः सारता तु या। परमात्मस्वरूपं वा तस्यालम्बनमिष्यते।। पुण्याश्रमहरिक्षेत्रतीर्थ-रम्यवनादयः। महापुरुषसङ्गाद्यास्तस्योद्दीपनरूपिणः।। रोमाञ्चाद्या-श्चानुभावास्तथा स्युर्व्यभिचारिणः। निर्वेदहर्षस्मरणमतिभूत-दयाऽऽदयः।।" इति। तस्योदाहरणं यथा प्रकाशकारोक्तम्, –"अहौ वा हारे वा कुसुमशयने वा दृषदि वा मणौ वा लोष्ट्रे वा बलवति रिपौ वा सुहृदि वा। तृणे वा स्त्रैणे वा मम समदृशो यान्ति दिवसाः क्वचित् पुण्येऽरण्ये शिव शिव शिवेति प्रलपतः।।" अत्र शमः स्थायिभावः, शिवः वस्तुनः अस्थायित्वं वा आलम्बनविभावः, पुण्यारण्यादय उद्दीपनविभावाः, रोमाञ्चा- दयोऽनुभावाः, हर्षादयः व्यभिचारिभावाः, इति शान्तरसः)।।२९२।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रभा

प्रथमपरिच्छेदे गुणनिर्वचनप्रसङ्गे मधुरं रसवद्वाचि इत्यनेन रसवत्त्वस्य माधुर्यगुणत्वमुक्तम्। इह चालंकारत्वम्। तत्र क उभयोर्भेद इति दर्शयति– **वाक्यस्येति** । मधुर्ये मधुरगुणे वाक्यस्य अग्राम्यता ग्राम्यतादोषाभावसमानाधिकरणालंकारत्वमित्यर्थः। सैव योनिर्व्यञ्जिका यस्य स दर्शितः–

कामं सर्वोप्यलंकारो रसमर्थे निषिञ्चति।
तथाप्यग्राम्यतैवेनं भारं वहति भूयसा।।

इति कथितः। इह रसवदलंकारे तु गिरां वाचाम् अष्टरसायत्ता शृङ्गाराद्यष्टरसाधीना रसवत्ता रसवदलंकारवत्ता स्मृता। अयं भावः–ग्राम्यत्वाभावसमानाधिकरणरसव्यञ्जकालंकारादिमत्त्वस्य माधुर्यगुणत्वं पूर्वमुक्तम्। इह तु केवलरसानामेवालंकारत्वमुक्तम्। अतो न माधुर्यरसवत्तयोरभेद इति ज्ञेयम्। अत्र अष्टेत्यनेन आचार्यदण्डिनः शान्तो रसो नाभिप्रेत इति सूच्यते।।२९२।।

विवृति

ननु च माधुर्यं वैदर्भमार्गावसरे प्रतिपादितमेव। तत् किमर्थं पुनरिहोच्यत इत्याशंक्याह–

वाच्यस्य वस (न ग्राम्यमग्राम्यम्) ता समता (तस्य भावोऽग्राम्यता) सैव योनिरिव योनिरुत्पत्तिस्थानं यस्याः सा (यस्य सः) अग्राम्यतायोनिः माधुर्ये वैदर्भमार्गप्रा(णभूते गु)णे दर्शि(तो) रसः पूर्वम्। यदुक्तम्–

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

'मधुरं रसवद्वाचि वस्तुन्यपि रसस्थितिः।
येन माद्यन्ति धीमन्तो मधुनेव मधुव्रताः।।

कामं सर्वोऽप्यलङ्कारो रसमर्थे निषिञ्चति।
तथाऽप्यग्राम्यतैवैनं भारं वहति भूयसा।।'

एवं श्रृङ्गारादिभिः अष्टमी रसैः पूर्वदर्शितेन च अग्राम्यतारूपेण रसेन नवधा रसवत्त्वम् इति रसवदलङ्कारं उपसंहरति **वाक्यस्येति।।**

वाक्यस्येति। माधुर्यगुणे प्रदर्शितः शब्दार्थयोः अग्राम्यतया जातः रसः वाक्यस्य भवति। अलङ्कारतया निर्दिष्टं रसवत्त्वं अष्टरसायत्तमेव।।२९२।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अर्थमिष्टमनाख्याय साक्षात्तस्यैव सिद्धये।
यत्प्रकारान्तराख्यानं पर्यायोक्तं तदीदृशम्॥२९३॥

रत्नश्री

इष्टमभिमतमर्थं कञ्चित्प्रियसमागमादिलक्षणं साक्षादञ्जसा वाचकव्यापारेण अनाख्याय अप्रतिपाद्य तस्यैवेष्टस्यार्थस्य सिद्धये निष्पत्त्यर्थं प्रकारान्तरस्य तत्सिद्ध्यनुगुणस्य अन्यस्यार्थस्याख्यानम् आख्यायतेऽनेनेति वाक्यं तादृशम् इति अनूद्य तदीदृशं वचनं पर्यायोक्तमिष्टं मनीषिभिरिति विधिः॥

तदुदाहरति–

हृदयङ्गमा

ऊर्जस्व्यलङ्कारमुदाहरति, अपकर्त्तेति। –अहं ते अपकर्त्ता शत्रुः, अस्मि इति हेतोः, ते हृदि मनसि, भयं मास्म भूत् न भवतु, मे मम, खड्गः विमुखेषु प्रहर्त्तुं जातु कदाचिदपि, न वाञ्छति। (तथा चोक्तं हन्यादित्यनुवृत्तौ मनुना; यथा, –"नायुधव्यसनप्राप्तं नार्त्तं नातिपरिक्षतम्। न भीतं न परावृत्तं सतां धर्ममनुस्मरन्॥" इति। युद्धे पलायनपरं शत्रुं प्रति कस्यचित् वीरस्योक्तिः। अत्र युद्धवीररसस्य गर्वरूपो व्यभिचारिभावः स्थायिभावादपि उत्साहादुद्रिक्ततया व्यक्त इति ऊर्जस्विनामालङ्कारः, ऊर्जो बलप्रकाशनमत्रास्तीति व्युत्पत्तेरिति भावः। यत्र तु गर्वरूपं व्यभिचारिभावं निगीर्य्य उत्साह एव प्रधानतया वर्त्तते, तत्र वीरो रसः, स एव रसवदलङ्कारतया व्यपदिश्यते इति बोध्यम्)॥२९३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रभा

ऊर्जस्विनं दर्शयति–**अपकर्ताहमिति।** समराङ्गणाद् धावमानं प्रति कस्यचिद् उक्तिरियम्। अहं ते अपकर्ता अस्मि अपकारम् आचरिष्यामि इति भयं ते हृदि मा स्म भून् मा भवतु। मे खड्गो विमुखेषु जातु कदाचिदपि प्रहर्तुं न वाञ्छति। तदुक्तं मनुना–

नायुधव्यसनप्राप्तं नार्तं नातिपरिक्षतम्।
न भीतं न परावृत्तं सतां धर्ममनुस्मरन्।। (७.९३) इति।,

अत्र–

गर्वो मदप्रभावश्रीविद्यासत्कुलजन्मभिः।
अवज्ञा सविलासाङ्गदर्शनाविनयादिकृत्।।

इत्युक्तलक्षणो गर्वरूपो व्यभिचारिभावः स्थायिभाव-मुत्साहमाच्छाद्य उद्रिक्ततया प्रकाशते इति ऊर्जस्विनामालंकारः। अयं च–व्यभिचारी तथाञ्जित इति प्रकाशकृदुक्तेर्भाव एव। ऊर्जः बलं तत्प्रकाशनादूर्जस्वि इति नाम्नात्र व्यवह्रियते। अत्राहुः प्रेमचन्द्रशर्माणः–यत्र त्वयमेव गर्वरूपव्यभिचारिभावः स्थायिनि उत्साहे निलीयते तत्र वीरो रसः। स च पूर्वोक्तरसवन्नाम्ना व्यपदिश्यते। यथा–

क्षुद्राः संत्रासमेते विजहत हरयः क्षुण्णशक्रेभकुम्भा
युष्मद्देहेषु लज्जां दधति परममी सायका निष्पतन्तः।
सौमित्रे तिष्ठ पात्रं त्वमसि न हि रुषां नन्वहं मेघनादः
किंचिद्भ्रूभङ्गलीलानियमितजलधिं राममन्वेषयामि।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत्र पादत्रयेणोद्रिक्ततया व्यज्यमानोपि गर्वश्चतुर्थपाद-व्यङ्ग्यस्य रामजयोत्साहाख्यस्थायिभावस्य कुक्षौ विलीयते। अत एवेदं प्रकाशकारेण वीररसोदाहरणत्वेनोपन्यस्तम्। तस्मादयं रसवदलंकार एव। नव्यास्तु रसाभासो भावाभासो वा रसान्तरादेहरङ्गत्वमापन्नः सन् ऊर्जस्व्यलंकारो भवतीत्याचक्षते। तन्न रुचिरम्। तथात्वे ऊर्जस्विसंज्ञाया अन्वर्थतानुपपत्तेः। अलंकारसंज्ञानां तथात्वस्यैव नियमात्। इति।।२९३।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दशत्यसौ परभृतः सहकारस्य मञ्जरीम्।
तमहं वारयिष्यामि युवाभ्यां स्वैरमास्यताम्॥२९४॥

रत्नश्री

परभृतः कोकिलोऽसावयं सहकारस्य सम्बन्धिनीं मञ्जरीं कलिकां दशति भिनत्ति। तमहं परभृतं वारयिष्यामि गत्वा, युवाभ्यां दम्पतीभ्यां स्वैरं स्वतन्त्रम् आस्यतां स्थीयताम्। अलं मदपेक्षयेति॥

तद् व्याचष्टे–

हृदयङ्गमा

एवमुक्तेति। –दर्पशालिना अहङ्कारवता, केनापि पुंसा एवम् उक्तरूपं वचनम्, उक्त्वा युद्धे परः शत्रुः, निरुद्धः, तत् तस्मात्, इत्येवमादिकम् उक्तरूपं निरोधनं तादृशमन्यत रसान्तरव्यभिचारि च इत्यर्थः, ऊर्जस्वि ज्ञेयम् ऊर्जस्विनामालङ्कारः स्मृतः, रसान्तरेऽपि तादृशो गर्वः, ऊर्जस्वीति निष्कर्षः॥२९४॥

प्रभा

उदाहरणं विशदयति–**इतीति**। दर्पशालिना अहंकारवता। केनापि पुंसा वीरेण। एवमुक्त्वा युद्धे निरुद्धः पराजितः। परः शत्रुः। मुक्तः गन्तुमनुज्ञातः। तत् तस्माद् अयं ऊर्जस्व्यलंकारो ज्ञेयः। एवमादिकम् यथा अत्र वीररसाव्यभिचारी गर्व ऊर्जस्वित्वेनोक्तस्तथा अन्यरसाव्यभिचारी गर्व ऊर्जस्वी भवति इत्यर्थः॥२९४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विवृति

इति रसवचचक्रम्।।

ऊर्जस्व्युदाहरति–

कुतो भयं ते माभूत्, यतो विमुखेषु संग्रामान्निवृत्तेषु न (मे).. ..हुः (खड्गः)प्रहर्तुं जातु कदाचित् वाञ्छति इति मुक्तः परो रिपुर्यद्धेर्निरुद्धः केनापि दर्पशालिना पुंसा तज्ज्ञेयमूर्जस्वीत्येव-मादिकमन्यदपि रूढाहङ्कारमिति।।

ऊर्जस्वि दर्शयति–**अपकर्तेति।** एतत् व्याचष्टे–**एवमिति।** ऊर्जस्वि इत्येतदलङ्कारः गर्वस्थायिभावः उद्धतरस इति, प्रेयोरसः प्रीतिस्थायिभावः प्रेयान् अलङ्कार इति, केचित् कथयन्ति। तेन रसात्मकत्वेन 'युक्तोत्कर्षं च तत् त्रयम्' इत्युक्तम्।।

ऊर्जस्विन उदाहरणमाह–**अपकर्तेति।** अत्र मया अस्य अपकारः क्रियते इति यत्ते चेतसि भयं तत् मा भूत्, मम खड्गः परेषु पराङ्मुखेषु न कदाचिदपि प्रहर्तुं उत्सहते; इति सर्वदैव रूढः अहङ्कारः प्रतीयते। तेन अन्वितं ऊर्जस्वि इत्युच्यते। एवमादिकं ईदृशं अन्यदपि द्रष्टव्यं इति यावत्।।२९४।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सङ्गमय्य सखीं यूना संङ्केते तद्रतोत्सवम्।
निर्वर्तयितुमिच्छन्त्या कयाप्यपसृतं तथा॥२९५॥

रत्नश्री

सङ्केते कृतसंविदि कस्मिंश्चित् स्थाने सखीमात्मनो यूना केनचित् सह सङ्गमय्य सङ्गतां कृत्वा तयो रतोत्सवं रहो निर्वर्तयितुं साधयितुमिच्छन्त्या कयापि कयाचिद् विदग्धया सख्या तथा अनन्तरोक्तेन प्रकारेण परभृतवारणव्यपदेशेनापसृतं ततः सङ्केतादिति॥

॥ इति पर्यायोक्तम् ॥

समाहितमालक्षयन्नाह–

हृदयङ्गमा

पर्य्यायोक्तं लक्षयति, अर्थमिति। –इष्टम् अभिलषितम्, अर्थं साक्षात् वाचकशब्देन, अनाख्याय अकथयित्वा, तस्यैव इष्टार्थस्य, सिद्धये प्रतिपत्तये, यत् प्रकारान्तरेण भङ्गिविशेषेण, आख्यानं व्यञ्जनया द्योतनं, तत् पर्य्यायोक्तम् इष्यते। (एतेन वाच्य एवार्थो यत्र प्रकारान्तरेण व्यङ्ग्यतया उच्यते, तत् पर्य्यायोक्तमिति लक्षणं बोद्धव्यम्; न च एकस्यैवार्थस्य व्यापारद्वयेन बोधवैयर्थ्यात् पौनरुक्त्यमिति वाच्यं, प्रकारभेदसत्त्वेन तदभावात्। तदुक्तं, –"यदेवोच्यते तदेव व्यङ्ग्यं न तु यथोच्यते तथा" इति। यथा हि निर्विकल्पकज्ञाने घटो घटत्वञ्च विषयः, घट इति सविकल्पकेऽपि तदेव; तत्र निर्विकल्पकत्वे घटघटत्वयोर्विशकलितत्वेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सविकल्पकत्वेन तयोर्वैशिष्ट्येन प्रतीतिरिति तयोर्भेद उपपद्यते, तद्वदत्रापि इति न दोषः। एवञ्च "निवेद्यतां हन्त समापयन्तौ शिरीषकोषम्रदिमाभिमानम्। पदौ कियद्दूरमिमौ प्रयासे निधित्सते तुच्छदयं मनस्ते।।" अत्र कियद्दूरं गन्तुमिच्छसीति व्यङ्ग्यं, तदेव भङ्ग्यन्तरेण उक्तं दूरगमनेच्छात्वेन प्रकारेण व्यङ्ग्यत्वं, पादनिधानेच्छात्वेन इच्छाया वाच्यत्वमिति न दोषः। ततश्च ध्वनित्वं नात्र सम्भवति, तत्र वाच्यव्यङ्ग्ययोर्भेदात्। केचित्तु एकस्यैव एकस्मिन् काले वाच्यत्वगम्यत्वासम्भवात् "गम्यस्यापि भङ्ग्यन्तरेणाभिधानं पर्य्यायोक्तम्" इति लक्षणमभिधाय लक्षणानुपपत्तिमाशङ्क्य भङ्ग्यन्तरेण इत्यस्य कार्य्यादिद्वारेण इत्यर्थमाहुः, व्यङ्ग्यस्याभिधेयत्वायोगात् गम्यस्य यत् कार्य्यादिद्वारेणाभिधानं तत् पर्य्यायोक्तमिति तेषां लक्षणार्थः। उदाहृतञ्च तैः, –"स्पृष्टास्ता नन्दने शच्याः केशसम्भोगलालिताः। सावज्ञं पारिजातस्य मञ्जर्य्यो यस्य सैनिकैः।।" इत्येतत् पद्यम्; अत्र हयग्रीवस्य कार्य्यमुखेन स्वर्गविजयो वर्णितः प्रभावातिशयश्च प्रतिपादितः। अभिनवगुप्ताचार्य्यपादास्तुपर्य्यायेण वाच्यादतिरिक्तप्रकारेण व्यङ्ग्येन उपलक्षितम् उक्तम् अभिहितं पर्य्यायोक्तमिति व्युत्पत्तिलभ्यो लक्षणार्थः इत्याहुः। दीक्षितेन तु, –"सन्ति हि व्यङ्ग्यस्यापि रूपान्तरेणाभिधाने बहून्युदाहरणानि" इत्यभिधाय दर्शितानि तथाविधानि बहून्युदाहरणानि। तत्र दिङ्मात्रं यथा, –"नमस्तस्मै कृतौ येन मुधा राहुबधूकुचौ"। अत्र भगवान् वासुदेवः स्वासाधारणरूपेण व्यङ्ग्यः, राहुबधूकुचवैयर्थ्यकारित्वरूपान्तरेण स एवाभिहितः। इदमत्रावधेयं, –पर्य्यायता हि शब्दानामेकार्थत्वं, तच्च एकयैव वृत्त्या इति न नियमः,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वृत्त्यन्तरेणापि तदर्थप्रतिपादकत्वे पर्य्यायताऽनापायात्; ततश्च पर्य्यायेण उक्तं विवक्षितं यत्र तत् पर्य्यायोक्तमिति व्युत्पत्तिलभ्यार्थस्वीकारेऽपि न काचित् क्षतिरिति सर्वमवदातम्। विवक्षितार्थश्चात्र क्वचित् वाच्य एव भङ्ग्यन्तरेण व्यज्यते क्वचिच्च वाच्यार्थनियतसम्बन्धित्वेन वक्रादिवैशिष्ट्यमन्तरेणापि प्रयुक्तशब्देन झटिति व्यज्यते इत्यस्य द्वौ भेदौ। प्रथमस्य यथा, –यं प्रेक्ष्य चिररूढ़ाऽपि निवासप्रीतिरुज्झिता। मदेनैरावणमुखे मानेन हृदये हरेः।।'' इत्यत्र शक्रैरावणौ मानमदमुक्तौ जाताविति व्यङ्ग्यं तदेव प्रकारान्तरेण वाच्यमिति। द्वितीयस्तु, –''दशत्यसौ परभृतः'' इत्यादि ग्रन्थकृता यदुदाहरिष्यते)।।२९५।।

प्रभा

पर्यायोक्तं लक्षयति–**अर्थमिति।** इष्टं प्रतिपादनाभिलषितम् अर्थं साक्षाद् वाचकशब्देन अनाख्याय अप्रतिपाद्य तस्यैव इष्टार्थस्यैव सिद्धये सचमत्कारप्रतित्तये यत् प्रकारान्तराख्यानम् प्रकारान्तरेण चातुर्यद्योतकभङ्गिविशेषेण आख्यानं व्यञ्जनया द्योतनं तत् पर्यायोक्तम् पर्यायेण तदर्थकशब्दान्तरेण विवक्षितार्थस्योक्तत्वात् पर्यायोक्तम् कथ्यते इति शेषः। पर्यायता च शब्दानामेकार्थप्रतिपादकता। सा च एकयैव वृत्त्येति न नियमः। वृत्त्यन्तरेणापि तदर्थप्रतिपादकत्वे पर्यायतानपायात्। तथा च विवक्षितमर्थं साक्षात् तद्वाचकपदेन अकथयित्वा वैचित्र्यविशेषाय प्रकारान्तरेण तत्कथनं पर्यायोक्तम्। वाच्यार्थस्य व्यञ्जनया प्रतिपादनं पर्यायोक्तमित्यर्थः। अत्र व्यञ्जनया वाच्यार्थस्यैवाभिधानम्। ध्वनौ तु न वाच्य एवार्थो विषय इति ततो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भेदः। अपरं च अत्र व्यङ्ग्यार्थोतिस्फुटतया न तथा अतिशेते यथा उक्तिवैचित्र्यमिति नास्य ध्वनित्वं नापि गुणीभूतव्यङ्ग्यत्वं किंतु चित्रकाव्यमेवैतत्। प्रेमचन्द्रशर्माणस्तु–विवक्षितार्थश्च क्वचिद् वाच्यार्थनियतसंबन्धित्वाद् वक्त्रादिवैशिष्ट्यप्रतीतिमन्तरेणापि झटिति प्रयुक्तशब्देन व्यज्यते क्वचिच्च वाच्य एव प्रकारान्तरेण व्यज्यते इत्यस्य द्वौ भेदौ। एवमस्य व्यङ्ग्यमूलकेभ्योलंकारेभ्यो भेदो बोद्धव्यः। तेषु निरुक्तरूपत्वाभावात्। न च–

गच्छ गच्छसि चेत् कान्त पन्थानः सन्तु ते शिवाः।
ममापि जन्म तत्रैव भूयाद्यत्र गतो भवान्।।

इत्यादौ वाच्यव्यङ्ग्ययोर्गमनागमनयोर्नियतसंबन्धित्वात् कथमाक्षेपादस्य भेद इति वाच्यम्। वाच्यनियतसंबन्धिनोपि गमनाभावरूपव्यङ्ग्यस्य वक्तृवैशिष्ट्यपर्यालोचनया त्वयि गतेहं मरिष्यामीति द्वितीयार्थव्यङ्ग्यपर्यालोचनया च प्रतीयमानत्वेन झटिति व्यज्यमानत्वाभावात्। तत्र प्रथमस्योदाहरणं दशत्यसौ परभृत इत्यादि ग्रन्थकृता दर्शयिष्यते। द्वितीयस्य यथा–

यं प्रेक्ष्य चिररूढापि निवासप्रीतिरुज्झिता।
मदेनैरावणमुखे मानेन हृदये हरेः।। इति।

अत्र शक्रैरावणौ मानमदमुक्तौ इति व्यङ्ग्यम्। तदेव च प्रकारान्तरेण वाच्यमिति। केचित्तु पर्यायोक्तेस्मिन् द्वयोरेव वाच्यव्यङ्ग्ययोः प्रस्तुतत्वम्। समासोक्तौ वाच्यस्यैव प्रस्तुतत्वम्। अप्रस्तुतप्रशंसायां व्यङ्ग्यस्यैव प्रस्तुतत्वमित्येषां मिथो भेद इत्याहुः। तत्तु प्रसिद्धोदाहरणविरुद्धमित्युपेक्षितम्।।२९५।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विवृति

इत्यूर्जस्वि।

पर्यायोक्तस्य लक्षणमाह–

अभिलषितं सर्वं साक्षाद्वाचकेन शब्देनानाख्याय अनभिधाय तस्यैवेष्टस्यार्थस्य सिद्धये यत् प्रकारान्तरस्याख्यानं वचनं तत् पर्यायेणान्यवस्तुपतिपादनद्वारेणोक्तं तदिष्यते।।

पर्यायोक्तं लक्षयति–**अर्थमिति।।**

अर्थमिति। प्रकारान्तराख्यानं व्याजकथनम्।।२९५।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किञ्चिदारभमाणस्य कार्यं दैववशात् पुनः।
तत्साधनसमापत्तिर्या तदाहुः समाहितम्॥२९६॥

रत्नश्री

किञ्चित्कार्यं प्रसादनादिकमारभमाणस्य साधयितुं सज्जीभूतस्य पुंसो दैववशात् विधिबलात् कारणात् न तु स्वसामर्थ्यात्। तस्य सिषाधयिषितस्य कार्यस्य साधनं साध्यते अनेनेति तस्य पुनरपरस्य प्रत्ययस्य कस्यचित्समापत्तिः सन्निधानं या तदेवं लक्षणं समाहितमाहुः ब्रुवते कवय इति॥

तदुदाहरति–

हृदयङ्गमा

पर्य्यायोक्तमुदाहरति, दशतीति। –असौ परभृतः कोकिलः, सहकारस्य, कुञ्जवहिः स्थितस्येति शेषः, मञ्जरीं दशति, अहं तं वारयिष्यामि, युवाभ्यां स्वैरं स्वच्छन्दम्, आस्यतां स्थीयतामिति। (कान्तकामिन्योः सुरतोत्सवस्य व्याघातो मा भूदिति सख्यास्ततोऽपसरणस्यौचित्ये इतोऽहं गच्छामीति वाचक-पदेनाभिधाने वैचित्र्यातिशयस्याभावो जायते इति परभृतवारणव्याजेन तदपसरणं व्यक्तीकृतमिति पर्य्यायोक्तम्)॥२९६॥

प्रभा

पर्यायोक्तमुदाहरति–**दशतीति।** असौ परभृतः कोकिलः सहकारस्य आम्रस्य मञ्जरीं दशति आस्वादनेन विनाशयति। अहं तं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वारयिष्यामि निवारयामि। युवाभ्यां स्वैरं स्वच्छन्दं सविश्रम्भमिति भावः आस्यतां स्थीयताम्। अत्र अन्यजनसांनिध्यं सुरतोत्सवप्रतिबन्धकमिति नायिकानायकयोः संनिधानात् संख्या अपसरणमिष्टम्। तद् अहं गमिष्यामि इत्युक्तौ वक्त्र्या अवैदग्ध्यं दर्शयेत्। अतः परभृतवारणमिषेण तत् कृतमिति चमत्कारातिशयः। अतः पर्यायोक्तम्। केचित्तु अत्र परभृतशब्देन नायको मञ्जरीशब्देन नायिका तत्संभोगप्रतिबन्धिका च अहम् इति शब्देन सूच्यते अतः पर्यायोक्तमिति वर्णयन्ति। परं तन्न रुचिरम। तथात्वे वाच्यार्थस्य अप्रस्तुतत्वेन लक्षणासंगत्यापत्तेः। युवाभ्यां स्वैरमास्यताम् इत्यस्य सरसत्वाननकूलत्वाच्चेति ज्ञेयम्।।२९६।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मानमस्या निराकर्तुं पादयोर्मे नमस्यतः।
उपकाराय दिष्ट्यैतदुदीर्णं घनगर्जितम्॥२९७॥

रत्नश्री

अस्याः प्रियाया मानं प्रतिकूलवर्तितां निराकर्तुं पादयोरेनामस्या वा नमस्यतः नमतो मे ममोपकाराय आरब्धकार्यानुग्रहार्थं घनस्य मेघस्य गर्जितं मन्मथनिर्भर्त्सितमिव मानिनीमानदुःसहमुदीर्णम् उदितं दिष्ट्येत्यानन्दनिवेदनमिष्टसिद्धेः। इह मान निराकरणं कार्यमारब्धम्, तत्र विधिवशाद् घनगर्जितमपरं साधनं च समापन्नमिति लक्षणं योज्यम्॥

॥ इति समाहितम् ॥

उदात्तमादर्शयन्नाह–

हृदयङ्गमा

सङ्गमय्येति।–सङ्केते सङ्केतस्थाने, सखीं यूना सह सङ्गमय्य तयोः रतोत्सवं निर्वर्त्तयितुं सम्पादयितुम्, इच्छन्त्या कयाऽपि सख्या, ततः अपसृतमित्यन्वयः॥२९७॥

प्रभा

प्रकारणिकार्थबोधं विना लक्षणसमन्वयोत्र दुर्घट इति तं दर्शयति–**संगमय्येति।** यूना नायकेन सह सखीं नायिकाभूतां संकेते संकेतस्थाने संगमय्य संयोज्य तद्रतोत्सवं तदुभययो रतोत्सवं सुखविलासं निर्वर्तयितुं स्वगमनेन सविश्रम्भं संपादयितुम् इच्छन्त्या कयापि चतुरया सख्या ततः तस्मात् स्थानादपसृतम्॥२९७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विवृति

दशत्यसौ परभृतः कोकिलः सहकारस्याम्रतरोर्मञ्चरीम्। तमहं परभृतं वारयिष्यामि। युवाभ्यां स्वैरमास्यतां अभिलषितमनुष्ठीयताम्।।

सङ्गमस्य संयोज्य सखीं यूना सह सङ्केते समयस्थाने उद्यानादौ तयोः रतोत्सवं निर्वर्तयितुमिच्छन्त्या (कयाऽप्यप)सृतं तत्सङ्केतस्थानादिति।।

उदाहरति–**दशतीति।** एतत् व्याचष्टे–**सङ्गमय्येति।।**

उदाहरति–**दशतीति।** **सङ्गमय्येति**–नायकरत्युत्सबलक्षणं स्वाभिमतं अर्थं अनाचक्षाणया सख्या तत्सिद्धये सहकारमञ्जरीकबलनोन्मुखपरभृतनिवारणव्याजकथनेन सङ्केतगृहात् अपसृतम्।।२९६–२९७।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आशयस्य विभूतेर्वा यन्महत्वमनुत्तरम्।
उदात्तं नाम तं प्राहुरलङ्कारं मनीषिणः॥२९८॥

रत्नश्री

आशयस्याभिप्रायस्य कस्यचिद्विभूतेः सम्पदो वा यन्महत्वमौदार्यमनुत्तरं नास्मादुत्तरमधिकमस्ति प्रकर्ष[80a]निष्ठाधिष्ठानत्वादिति। तमलङ्कारं निरतिशयोदात्तत्वप्रकाशनरूपमुदात्तं नाम प्राहुर्मनीषिणः कवय इति॥

हृदयङ्गमा

समाहितं निरूपयति, किञ्चिदिति।–किञ्चित् कार्य्यम् आरभमाणस्य कर्त्तुमुपक्रममाणस्य, दैववशात् अकस्मात्, पुनः या तस्य साधनस्य समाधानस्य, समापत्तिः सौकर्य्यं, तत् समाहितम् आहुः। (कार्य्यं समाधीयते अनेन इति समाहितं, हेत्वन्तरसमाधानरूपत्वात् अन्वर्यसंज्ञेयमिति; ततश्च चिकीर्षितस्य कार्य्यस्य सिद्ध्यर्थमभिमतो यो हेतुस्तदतिरिक्तहेतुना तत्सम्पादनं समाहितमिति लक्षणम्। दैववशादिति तु न नियमपरं, बुद्धिपूर्वककारणान्तरालम्बनेन कार्य्यसमाधानेऽपि अस्य सद्भावात्। तदुक्तं भोजराजेन, –"कार्यारम्भे सहायाप्तिर्देवादैवकृतेह या। आकस्मिकी बुद्धिपूर्वोभयी वा तत् समाहितम्॥" इति। अन्ये तु, –"कारणान्तरयोगात् कार्य्यस्य सुकरत्वं समाधिः" इति लक्षणं कृत्वा कारणस्य भेदद्वयात् द्विविध्यमाहुः, तत्र दैववशादागन्तुकहेतौ "मानमस्याः" इत्यादि उदाहृतम्। द्वितीयस्य यथा, –"स्त्रैणं लीलाभरणमभितस्त्रोटयित्वा श्रमाम्भः शत्त्या पत्रावलिमृगमदव्यञ्जितश्मश्रुदेहः। केलिक्षोभः कुवलयदृशां मान्मथे कार्य्यभावे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुंवद्भावं घटितमभितः पारिपूर्णं निनाय।।" अत्र स्वेदादिना घटितस्यापि पुंवद्भावस्य केलिक्षोभाख्येन कारणान्तरेण स्त्रैणाभरणत्रोटनादिना स्वरूपोपचयाधानात् समाधिरिति। एतेन भावशान्तेः समाहितत्वं तेषामभिमतमिति दिक्)।।२९८।।

प्रभा

समाहितं लक्षयति–**किंचिदिति।** किंचित् कार्यम् आरभमाणस्य समुचितकारणेन संपादयितुमुद्यतस्य। दैववशाद् अकस्मादेव तस्य कार्यस्य यत् साधनं संपादकसाधनान्तरं तस्य समापत्तिः संप्राप्तिः तत् समाहितमाहुः। दैववशेन कारणान्तरोदयेनारब्धकार्यस्य सौकर्येण समाधानं समाहितमित्यर्थः। अर्वाचीनास्तु अमुं समाधिमाहुः। भावशान्तिं तु समाहितमित्याहुः। अत्र साधनपरं साधनान्तरपरं तत एव वैचित्र्योद्भवात्। तदाह प्रकाशकारः–समाधिः सुकरं कार्यं कारणान्तरयोगत इति। दैववशादिति न नियमपरम् बुद्धिपूर्वककारणान्तरावलम्बनेन कार्यसंपत्तावपि अस्य सद्भावात्। तदुक्तं भोजराजेन–

कार्यारम्भे सहायाप्तिर्दैवादैवकृतेह या।
आकस्मिकी बुद्धिपूर्वोभयी वा तत् समाहितम्।। (३.३४)

इति।

उदाहृतं च–

कल्पान्ते शमितत्रिविक्रममहाकङ्कालदण्डस्फुर-
च्छेषस्यूतनृसिंहवक्रनखरप्रोतादिकोलामिषः।
विश्वैकार्णवताविशेषमुदितौ तौ मत्स्यकूर्मावुभौ
कर्षन् धीवरतां गतः स्यतु जगन्मोहं महाभैरवः।। इति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत्र प्रलयसमये महेश्वरेण समापयितुमुपक्रान्तानां त्रिविक्रमादीनां योयं तद्भुवा बडिशदिना मत्स्यकूर्मयोराकर्षणप्रकारः स भगवता भैरवेण बुद्धिपूर्वकमुपकल्प्यमानो दैवात् तथाभूतैरेव तैः संपद्यते इति बुद्धिपूर्वेयं दैवकृता सहायाप्तिरिति। विस्तरस्तु जिज्ञासुभिस्तत्रैव द्रष्टव्यः।।२९८।।

विवृति

इति पर्यायोक्तम्।।

समाहि(तलक्षण)माह–

किञ्चित्कार्यमारभमाणस्य दैववशाददृष्टबलात्अदृष्ट-वशात(?) तत्कार्यकरणसमर्थं यत्साधनं हेतुस्तस्य या समापत्तिरुपढौकनं तत्समाहितमाहुराचार्याः।।

समाहितं लक्षयति–**किञ्चिदिति।।**

समाहितालङ्कारमाह–**किञ्चिदिति।** साधनसमापत्तिः सहायावाप्तिः ।।२९८।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गुरोः शासमत्येतुं न शशाक स राघवः।
यो रावणशिरश्छेदकार्यभारेऽप्यविक्लवः॥२९९॥

रत्नश्री

गुरोः पितुर्दशरथस्य शासनं राज्यमिदं मया भरताय दत्तं त्वया वनमावस्तव्यमित्याज्ञामत्येतुं लङ्घितुं न शशाक न समर्थोऽभूत् विनयपरवशतया स राघवो रामः। किमसावित्थमकिञ्चित्करो यत् स्वभाव्यं राज्यमन्यस्मै दीयमानमात्मानं च वने क्षिप्यमाणमपेक्षते? नैवम्। गुरुभक्तिः कापि सा तस्येत्याह-य इत्यादि। यो राघवः रावणस्य दशकन्धरस्य राक्षसराजस्य दासीकृतत्रैलोक्यस्य शिरसां छेदः कार्यं त्रैलोक्यार्थमनुष्ठेयत्वात् तदेव भारोऽतिदुर्वहत्वात्। तत्रापि किम्? पुनरात्मविपक्षनिग्रहमात्रेऽविक्लवः शक्तः स तादृशः गुरोराज्ञां नाति चक्रामेत्याशयमाहात्म्यं विनयोत्कर्षराज्यलोभानभिभवादिलक्षणमालक्ष्यत इति॥

हृदयङ्गमा

समाहितमुदाहरति, मानमिति। – अस्याः मानिन्याः, मानं निराकर्त्तुं पादयोः पतिष्यतः मे मम, उपकाराय दिष्ट्या दैवेन, एतत् घनगर्जितम् उदीर्णम्। (अत्र मानभङ्गाय पादपतनप्रवृत्तस्य दैवादुदीर्णेन घनगर्जितेन तस्यातीवोद्दीपकत्वात् अक्लेशेन तत्समाधानमिति समाहितमलङ्कारः। विश्वनाथस्तु अस्य समाधिरिति नाम कृत्वा इममेव उदाहृतवान्। तल्लक्षणं यथा, –"समाधिः सुकरे कार्य्ये दैवाद्वस्त्वन्तरागमात्" इति)॥२९९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रभा

समाहितमुदाहरति–**मानमस्या इति।** अस्या मानिन्या मानं निराकर्तुं अपसारयितुम् पादयोः पतिष्यतः नमस्यतः प्रणंस्यतो मे मम उपकाराय दिष्ट्या सुदैवेन। एतद् घनगर्जितम् उदीर्णम् उद्भूतम्। अत्र माननिराकरणाय प्रणामतत्परस्य दैवादुदीर्णघनगर्जितेन तस्य अतीवोद्दीपकत्वान् माननिराकरणसंप्राप्तिरिति समाहितालंकारो विज्ञेयः। मानिन्या माननिराकरणसाधनेषु प्रणाम एकतमोस्ति। तदुक्तम्–

सामं भेदं च दानं च नत्युपेक्षे रसान्तरम्।
तद्भङ्गाय पतिः कुर्यात् षडुपायानिति क्रमात्।। इति।

परं नतिर्नैव निश्चयेन कार्यसंपादिका। तया मानभङ्गाभावे उपेक्षादेः कर्तव्यत्वेनोपदिष्टत्वात्। घनगर्जितं तु एकान्तेन फलोपधायकं तस्यातीवोद्दीपकत्वात्। तथा चात्र संशयितोपायेन माननिरासाय प्रवृत्तस्य नायकस्य निश्चितोपायसंपत्त्या कार्यस्य सौकर्येण लाभ इति ज्ञेयम्।।२९९।।

विवृति

ननु पादौ नमस्यत इति द्वितीयया कर्मणि भवितव्यम्। तत् कथं पादयोः। न चौपपदिकी कर्मणि षष्ठ्यस्ति। न च कृद्योगे विहितोऽप्यस्ति। लादेशत्वाच्छतुः 'न लोकाव्ययनिष्ठाखलर्थतृना' मिति प्रतिषेधात्। अत्रोच्यते। नमस्यत इति वाक्यार्थे पदवचनमेतदित्यदोषः। नमस्यतः नमस्कारं कुर्वत इत्यर्थः। दृष्टं च वाक्यार्थे पदवचनम्। यथा जीवन्ति प्राणान् धारयन्तीति। ततः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रातिपदिकार्थव्यतिरेकात् भवत्येव शैषिकी षष्ठीत्यनवद्यम्। मानिनीमानमपनिनीषोरनुकूलं घनगर्जितम्। तदुक्तं कैश्चित्–

तान्येतानि शिखण्डिताण्डवगुरूनम्भोधराडम्बरे [रैः]

तत्पानानि दिनानि[संस्त्यानानि] नूनममृतस्यन्[न्दो]नि वन्दामहे।

उद्गाढा नवनीलनीरजदृशामत्यन्तमायामिनो

भिद्यन्ते स्वयमेव येषु विषमा मानग्रहग्रन्थयः'।।

तत् उदाहरति–**मानमिति॥**

उदाहरति–**मानमिति।** माननिराकरणकालोत्पन्नस्य मेघगर्जितस्य मानविध्वंसे सहकारित्वात् इयं दैवकृता सहायसम्पत्तिः इति समाहितम्।।२९९।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रत्नभित्तिषु संक्रान्तैः प्रतिबिम्बशतैर्वृतः।
ज्ञातो लङ्केश्वरः कृच्छ्रादाञ्जनेयेन तत्त्वतः॥३००॥

रत्नश्री

पद्मरागादिरत्नविकारा भित्तयः कुड्यानि रत्नभित्तयस्तासु संक्रान्तैरुदितैः प्रतिबिम्बानां प्रतिशरीराणां शतैर्वृतः परिक्षिप्तो लङ्केश्वरो [रा]वणः आञ्जनेयेन हनूमता सीतान्वेषणार्थं तत्र गतेनायं रावणः, प्रतिबिम्बान्येतानीति तत्त्वतः सम्यग् ज्ञातो निर्धारितः कृच्छ्राद्यत्नेन निपुणं निरूपयता न झटित्येवेति भूतिमहत्त्वमनतिशयमुक्तं गृहाण्यपि रत्नमयानि इति॥

तदुभयं विवृण्वन्नाह–

हृदयङ्गमा

उदात्तं निरूपयति, आशयस्येति। –आशयस्य अभिप्रायस्य, विभूतेः सम्पत्तेः, वा यत् अनुत्तमम् अलौकिकं, महत्त्वम् आधिक्यं, वर्ण्यते इति शेषः, मनीषिणः तम् अलङ्कारम् उदात्तं नाम प्राहुः ; वर्णनीयस्य महाशयत्ववर्णनं लोकातिशयसम्पत्तिवर्णनं वा द्विविध उदात्तालङ्कार इत्यभिप्रायः। (तथा च, प्रस्तुतस्य उदाराशयत्ववर्णनेन लोकातिशयसम्पद्वर्णनेन वा यत् वैचित्र्यं स एव उदात्तालङ्कार इति निष्कर्षः। अत्र अलौकिकमित्यनेन कविप्रतिभोत्थापित-मैश्वर्य्यलक्षणम् असम्भाव्यमानविभूतियुक्तस्य वस्तुनो· वर्णनं, स्वभावोक्तौ भाविके च यथावद्वस्तुवर्णनमिति उदात्तेन एतयोः भेद इति बोध्यम्। केचित्तु, –"यद्वाऽपि प्रस्तुतस्याङ्गं महतां चरितं भवेत्" इति आहुः। तन्मते महापुरुषाणामुदात्तचरितानां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रस्तुतस्याङ्गभावेन उपनिबध्यमानं चरितञ्च उदात्तं, महापुरुषचरितस्योदात्तत्वात्। यथा,–"तदिदमरण्यं यस्मिन् दशरथवचनानुपालनव्यसनी। निवसन् बाहुसहायश्चकार रक्षः क्षयं रामः।।" अत्रारण्ये वर्णनीये रामचरितमङ्गत्वेन वर्णितम्। इदमपि प्रकृतस्य महात्म्यातिशयव्यञ्जकत्वेन लोकातीतविभूतिवर्णन-रूपमेवेति ग्रन्थकृता पृथगुपन्यासः न कृत इति बोध्यम्)।।३००।।

प्रभा

उदात्तं लक्षयति–**आशयस्येति।** आशयस्य अभिप्रायस्य मनोव्यापारविशेषस्येति यावत्। विभूतेः संपत्तेर्वा। अनुत्तमम् अलौकिकमित्यर्थः। यन्महत्त्वं आधिक्यम् वर्ण्यते तं मनीषिण उदात्तम् अलंकारम् आहुरित्यन्वयः। तथा च प्रस्तुतस्य अलौकिकं महाशयत्वं विभूतिमत्त्वं वा यद् वर्ण्यते स उदात्तो नामालंकार इति भावः। परे तु प्रस्तुतस्याङ्गत्वेन वर्ण्यमानं महतां चरितमपि उदात्तं मन्यन्ते। तदुक्तम् प्रकाशकृता–महतां चोपलक्षणम् इति। उदाहरणं च–

तदिदमरण्यं यस्मिन् दशरथवचनानुपालनव्यसनी।
निवसन् बाहुसहायश्चकार रक्षःक्षयं रामः।। इति।।

अत्र प्रस्तुतस्य दण्डकारण्यस्य तदुत्कर्षाय महतो रामस्य अङ्गत्वेन वर्णनं कृतमित्युदात्तालंकारः। यथा वा–

नाभिप्रभिन्नाम्बुरुहासनेन संस्तूयमानः प्रथमेन धात्रा।
अमून् युगान्तोचितयोगनिद्रः संहृत्य लोकान् पुरुषोधिशेते।।
इति।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत्र प्रस्तुतस्य समुद्रस्याङ्गत्वेन लोकसंहर्तुर्भगवतः शयनं वर्णितमिति उदात्तालंकारः। एतच्च प्रस्तुतस्य माहात्म्यातिशयसंसूचकत्वात् लोकातिगामिविभूतिवर्णनरूपमेवेति दण्डिना न अत्र पृथक्तया लक्षितम् इति ध्येयम्।।३००।।

विवृति

इति समाहितम्।।

उदात्तलक्षणमाह–

आशयस्य चित्तस्य विभूतेरैश्वर्यस्य वाऽविद्यमानोत्तरमनन्याधिकं यन्महत्त्वं तदुदात्ताभिधान[मलङ्कारमा]हुः।।

उदात्तं लक्षयति–**आशयस्येति।** आशयस्य मनसः, विभूतेः ऐश्वर्यस्य वा, यत् अनुत्तमं अत्यतिशयं महत्त्वं तत् उदात्तम्।।

उदात्तालङ्कारमाह–**आशयस्येति।** आशयः चित्तवृत्तिः। चित्तगतं सम्पद्गतं वा (यत्) निस्सीमोत्कर्षं महत्त्वं तत् उदात्तम्।।३००।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पूर्वत्राशयमाहात्म्यमत्राभ्युदयगौरवम्।
सुव्यञ्जितमिति व्यक्तमुदात्तद्वयमप्यदः॥३०१॥

रत्नश्री

पूर्वत्र गुरोरित्यादौ प्रयोगे आशयस्य चित्तस्य माहात्म्यमत्युदात्तत्वमुक्तरूपम्। अत्रा[न]न्तरे रत्नभित्तिष्वित्यादौ अभ्युदयस्य विभूतेर्गौरवं माहात्म्यमुक्तरूपं सुव्यञ्जितमाख्यात-मितीदृशमिति वा हेतोरदस्तदुदात्तयोर्द्वयमपि नैकम्। आशयोपात्तं च व्यक्तं परिस्फुटमभवदिति॥

॥ इत्युदात्तम् ॥

अपह्नुतिमधिकृत्याह–

हृदयङ्गमा

आशयमहत्त्वे उदाहरति, गुरोरिति। –यः रावणस्य शिरश्छेदः एव कार्य्यं, तस्य भारः तस्मिन्नपि, अविक्लवः अव्याकुलः, स राघवः गुरोः पितुः, शासनं राज्यत्यागपूर्वकवनगमनादेशम्, अत्येतुम अतिक्रमितुं, न शशाक। (अत्र रावण बधरूपासाध्यसाधनक्षमस्य तादृशगुरुनिदेशवर्त्तित्वेन अलौकिकं माहात्म्यं प्रतीयते इत्युदात्तत्वम्)॥३०१॥

प्रभा

महाशयत्ववर्णनरूपमुदात्तमुदाहरति–**गुरोरिति।** यो राघवः रावणस्य त्रिभुवनैकवीरस्य राक्षसाविपस्य शिरसामुच्छेदरूपं यत् कार्यम् तस्य भारः कार्यगुरुता तस्मिन् अपि अविक्लवः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अव्याकुलः स गुरोः पितुः शासनं राज्यत्यागपूर्वकवनगमन-रूपामाज्ञाम् अत्येतुं अतिक्रमितुम् न शशाक। अत्र रावणवधरूपमहाकार्यकरणसमर्थोपि राघवो यद् राज्यभ्रंशकरं गुरुनिदेशमत्येतुं न शशाक। तेन अस्य लोकसीमातिवर्ति महाशयत्वं प्रतीयते इति उदात्तालंकारः।।३०१।।

विवृति

गुरोर्दशरथस्य पितुः शासनं आज्ञामत्येतुमुल्लङ्घयितुं स राघवो रामो न शशाक। कथंभूत इत्याह—यो....ऽविक्लबः। यदार्य(यःईदृश)स्स धीर एव।।

मानसोदात्तं दर्शयति—**गुरोरिति।** मातुः सपत्न्याः वचनमात्रात् देवेन्द्रपदोपमं राज्यं त्यक्तवान् इति मानसौदात्त्यम्। गुरुवचनं अत्येतुं औदात्त्यादेव न शशाक इत्येतत् प्रकटयति—**यः इति।।**

उदाहरणम्—**गुरोरिति।** त्रैलोक्यविजेतू रावणस्य विजयक्षमोऽपि पितृवचनपरिपालनपरः तृणय राज्यं मन्यमानो वनं गतः इति आशयस्य महत्त्वम्।।३०१।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अपह्नुतिरपह्नुत्य किञ्चिदन्यार्थदर्शनम्।
न पञ्चेषुः स्मरस्तस्य सहस्रं पत्रिणामिति॥३०२॥

रत्नश्री

किञ्चिद्वस्तुरूपमपह्नुत्य निराकृत्य नेदमिति, अन्यस्यार्थस्य धर्मरूपस्य वा दर्शनं विधानं यदित्यनूद्य सापह्नुतिरित्यभिधीयते। तामुदाहरति- [80b] स्मरः कामः पञ्चेषवोऽस्येति पञ्चेषुर्न भवतीति। इषूणां पञ्चत्वं धर्मोऽत्रापह्नूयते। न स्मर इषवो वा। यदाह-तस्य स्मरस्य पत्रिणामिषूणां सम्बन्धि सहस्रं सहस्त्रसंख्यता। अन्यथा कथं भुवनत्रयं जयेदिति। अन्यस्य सहस्त्रसंख्यालक्षणस्यार्थस्य धर्मान्तरस्य दर्शनमितीदृशी धर्मापह्नतिरवसेयेति॥

हृदयङ्गमा

विभूतिमहत्त्वे उदारहरति, रत्नभित्तिष्विति। -आञ्जनेयेन अञ्जनासुतेन हनूमता, कृच्छ्रात् अतिकष्टेन, बहुपर्य्यालोचनया इत्यर्थः, रत्नभित्तिषु सङ्क्रान्तैः प्रतिफलितैः, प्रतिविम्बानां शतैः वृतः लङ्केश्वरः रावणः, तत्त्वतः ज्ञातः ईदृशैश्वर्य्यशाली नास्तीति अयमेव लङ्केश्वर इति विदित इत्यर्थः। (अत्र लङ्केश्वरस्य तादृशैश्वर्य्यमहत्त्वकीर्त्तनमेव उदात्तालङ्कार इति)॥३०२॥

प्रभा

विभूतिमहत्त्वरूपमुदात्तमुदाहरति-**रत्नेति।** आञ्जनेयेन अञ्जनासूनुना हनुमता रत्नभित्तिषु रत्नखचितभित्तिषु संक्रान्तैः प्रतिफलितैः प्रतिबिम्बशतैः स्वीयप्रतिबिम्बानां शतैर्वृतः लङ्केश्वरः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लङ्काधिपो रावणः कृच्छ्रात् कष्टेन ज्ञातः। प्रतिबिम्बशतवृतत्वं कृच्छ्रतया ज्ञानस्य हेतुः। अत्र प्रतिबिम्बग्राहिरत्नखचितभित्तिवर्णनेन राक्षसराजस्यालौकिकविभूतिमत्त्वं प्रतीयते इत्युदात्तोलंकारः।।३०२।।

विवृति

वृतो वेष्टितो लङ्केश्वरो दशाननः अञ्जनाया अपत्यमाञ्जनेयः। तेन हनुमता कृच्छ्रात् ज्ञातस्तत्वतः एतानि प्रतिबिम्बानि अयं तु रावण इति।।

रत्नेति। अनवधिकायां विभूतावेव, भवनेषु रत्नमित्तयः संभवन्ति, इति विभूतेः महत्त्वं अनेन प्रतिपाद्यते।।३०२।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चन्दनं चन्द्रिका मन्दो गन्धवाही च दक्षिणः।
सेयमग्निमयी सृष्टिः शीता किल परान् प्रति॥३०३॥

रत्नश्री

चन्दनं मलयजं चन्द्रिका ज्योत्स्ना मन्दो मृदुर्गन्धवाही पवनो दक्षिण इति यदेतत् सेयमीदृशी सृष्टिः स्त्रष्टुरग्निमयी दहनस्वभावा अस्माकम् [कृते]। परान् प्रति अन्येषां किलेयं सृष्टिः शीताह्लादकरी। किलशब्देन श्रुतगम्यतां शीततायाः सूचयति। दुष्टताया एवानुभवगम्यत्वात्। विरहविप्लुतचित्तः कश्चित्कामुकः कथयतीति॥

केयमपह्नुतिरित्याह–

हृदयङ्गमा

द्वैविध्यमुपसंहरति, पूर्वत्रेति। –पूर्वत्र गुरोरित्युदाहरणे, आशयस्य माहात्म्यम्, अत्र रत्नभित्तिष्वित्युदाहरणे, अभ्युदयस्य गौरवं सुव्यञ्जितं सुप्रतीतमिति अदोऽपि उदात्तद्वयं प्रोक्तम्, उभयत्रापि वैचित्र्यस्य सद्भावादिति भावः। (अत्र "प्रोक्तम्" इत्यत्र "व्यक्तम्" इति पाठान्तरं, तत्र स्फुटं प्रतीयमानमित्यर्थः)॥३०३॥

प्रभा

उदात्तमुपसंहरति–**पूर्वत्रेति।** पूर्वत्र गुरोः शासनम् इत्युदाहरणे आशयस्य राममनोवृत्तेर्माहात्म्यम् अलौकिकमहत्त्वम्। अत्र रत्नभित्तिषु इत्युदाहरणे अभ्युदयस्य संपदभ्युदयस्य गौरवं महत्त्वं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुव्यञ्जितं स्पष्टं प्रकटीकृतम्। इति हेतोः। अदः एतद् उदात्तद्वयं प्रोक्तम् अस्माभिरिति शेषः। अयं भावः। विषयद्वैविध्येन वैचित्र्यस्य द्वैविध्याद् द्विप्रकारः स दर्शित इति।।३०३।।

विवृति

पूर्वत्र 'गुरोः शासनमत्येतु' मित्यादौ आशयस्य माहात्म्यं मनसो महत्त्वं अत्राभ्युदयगौरवं रत्नभित्तिषु संक्रान्तैरित्यत्र रावणेश्वरस्य...गौरवं सुव्यञ्जितं प्रकटीकृतमिति व्यक्तमुदात्तद्वयमप्यदः उदाहृतम्।।

श्लोकद्वयमेतव्याकरोति **पूर्वत्रेति**।।३०३।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शैशिर्यमभ्युपेत्यैव परेष्वात्मनि कामिना।
औष्ण्यप्रदर्शनात्तस्य सैषा विषयनिह्नु तिः॥३०४॥

रत्नश्री

तस्य चन्दनादेर्वस्तुनः परेष्वन्येषु स्वस्थेषु विषये शैशिर्यं शैत्यमभ्युपेत्याग्निकृत्यापह्नुत्या एवात्मनि विषये केनचित् कामिना वियुक्तेन औष्ण्यस्य चन्दनादिगतस्य प्रदर्शनादुद्भावनात्कारणात् सैषा तादृशी विषयापह्नुतिः। विषये क्वचिद्वस्तुरूपापह्नुतेः, न सर्वत्रेति॥

हृदयङ्गमा

अपह्नुतिं निरूपयति, अपह्नुतिरिति। –किञ्चित् किमपि, प्रकृतस्य गुणक्रियादिकमिति भावः, अपह्नुत्य अपलप्य, अन्यस्य अर्थस्य अप्रकृतधर्म्मान्तरस्य, दर्शनं व्यवस्थापनं, सत्यतया निर्द्धारणम् इति यावत्, अपह्नुतिः। (अत्र प्रकृतधर्मापह्नवेन धर्मान्तरारोपणं, तत्त्वापह्नवरूपके प्रकृतधर्मिनिषेधेन धर्म्यन्तरारोप इत्यनयोर्भेदः दर्शित एव तत्त्वापह्नवरूपके। येषां मते तत्त्वापह्नवरूपकम् इति रूपकभेदो नास्ति, तन्मते तु उभयत्राप्यपह्नुतिः। अतः एवोक्तं, –"यत्र प्रकृतमुपमेयं कथञ्चित् शब्दतोऽर्थतो वा निषिध्य तत्सदृशाप्रकृतार्थताद्रूप्येण वर्ण्यते सा अपह्नुतिः" इति। इह अपह्नुत्य इत्यनेन रूपकसामान्यादस्य भेदो दर्शितः। तत्र तु मुखे चन्द्रताद्रूप्यवर्णनं न मुखनिषेधपूर्वकमिति। एवञ्च उत्प्रेक्षाऽतिशयोक्त्यादावपि निषेधाभावादस्माद्भेदः इत्यवगन्तव्यम्)। उदाहरति, नेति।– स्मरः कामः, पञ्चेषुर्न, तन्मात्रेषुभिः समग्रजगतामेतादृशपीड़नासम्भवादिति भावः, तस्य पत्रिणां सहस्त्रम्, अस्तीति शेषः। (अत्र स्मरस्य पञ्चेषुत्वधर्मं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रतिषिध्य सहस्त्रेषुत्वरूपधर्मान्तरारोपरूपापह्नुतिः। केचित्तु, –"सादृस्यस्थले एव अपह्नुतिः" इत्याहुः। तन्मते 'न पञ्चेषुः' इत्यादौ नापह्नुतिः सादृश्याभावात्, किन्तु 'प्रकृतस्य यदन्यत्वम्' इत्येवंरूपातिशयोक्तिरिति बोध्यम्)।।३०४।।

प्रभा

अपह्नुतिं संलक्ष्योदाहरति–**अपह्नुतिरिति।** किंचित् किमपि प्रकृतस्य गुणक्रियादिरूपं धर्मम् अपह्नुत्य अपलप्य असत्यतया निरूप्येत्यर्थः। अन्यार्थास्य धर्मान्तररूपारोप्यमाणार्थस्य। दर्शनं सत्यत्वेन कथनम्। अपह्नुतिः तन्नामालंकारः।

नैतन्मुखमिदं पद्मं न नेत्रे भ्रमराविमौ।
एतानि केसराण्येव नैता दन्तार्चिषस्तव।।

इति तत्त्वापह्नवरूपकविषयपरिहारार्थं किंचिदित्यस्य गुणाक्रियादिरूपोर्थः स्वीक्रियते। तथा च प्रकृतं धर्मिणं निषिध्य धर्म्यन्तरारोपस्तत्त्वापह्नवरूपकम् गुणक्रियादिरूपं धर्ममपलप्य धर्मान्तरारोपे अपह्नुतिरित्यनयोर्भेदः। अन्ये तु तत्त्वापह्नवरूपकं नैव मन्यन्ते। तेषां मते किंचिदपह्नुत्य कस्यचित् प्रदर्शनम् अपह्नुतिरलंकारः। अपह्नुत्य इत्यनेन रूपकातिशयोक्त्योर्व्युदासः। तत्र कस्यचिन्निशेधाभावात्। किंचिदपह्नुत्य इत्येतावन्मात्रोक्तौ आक्षेपालंकारेतिव्याप्तिः। तन्निरासाय अन्यत् साध्यत इति। संदेहे संशयः अत्र तु निश्चय इति ततो भेदः। उत्प्रेक्षायां संभावना अत्र तु आहार्यारोप इत्युभयोर्भेदः। इयं च द्विविधा शाब्दी आर्थी चेति। यत्र नञादिशब्दैः प्रकृतनिषेधस्तत्र शाब्दी। कपटार्थकपरिणामार्थक-शब्दोपादाने मयट्प्रत्ययान्तोपादाने चार्थी। आर्थ्या अन्येपि विविधाः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रकाराः सन्ति ते उदाहरणतः स्फुटीभविष्यन्ति। तत्र कपटार्थशब्दोपादाने यथा–उपवनसहकारोद्भासिभृङ्गच्छलेन प्रतिविशिखमनेनोट्टङ्कितं कालंकूटम् इति। एवं–धूमं दधत् प्रकटलाञ्छनकैतवेन इति। मयटा यथा–तारामयास्तत्र च फेनभङ्गा इति। एवमेव–

अमुष्मिल्लावण्यामृतसरसि नूनं मृगदृशः
स्मरः शर्वल्पुष्टः पृथुजघनभागे निपतितः।
यदङ्गाङ्गाराणां प्रशमपिशुना नाभिकुहरे
शिखा धूमस्येयं परिणमति रोमावलिवपुः।। इति।

अत्र वपुःशब्देन रोमावलिनिषेधः। आचार्यदण्डिनो मते एतान्युदाहरणानि तत्त्वापह्नवरूपकस्य ज्ञेयानि। धर्मिणि धर्म्यन्तरारोपात्। उदाहरणं दर्शयति–न पञ्चेति। स्मरः पञ्चेषुः पञ्चसंख्यापरिमितबाणो न। पञ्चेषुभिः सकलविश्वस्येदृश-पीडाजननासंभवात्। अतस्तस्य पत्रिणां बाणानां सहस्त्रं सहस्त्रसंख्यात्वमस्तीति शेषः। अत्र स्मरस्य पञ्चेषुत्वधर्मं प्रतिषिध्य सहस्त्रेषुरूपधर्मान्तरारोपाद् अपह्नुतिः।।३०४।।

विवृति

इत्युदात्तम्।।

अपह्नुतिलक्षणमाह–

अपह्नुतिरिति लक्ष्यनिर्देशः। अपह्नुत्य किञ्चिदन्यार्थदर्शनमिति लक्षणनिर्देशः। किञ्चित्प्रसिद्धं वस्तु अपह्नुत्य अपलप्य ततोऽन्यस्यार्थस्य यद्दर्शनं प्रकाशनं साऽपह्नुतिरलंक्रिया।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तामुदाहरति–

स्मरबाणानां पञ्चत्वसंख्यामपह्नुत्य सहस्त्रसंख्याप्रदर्शनात् (अपह्नुतिः)।।

अपह्नुतिं लक्षयति–**अपह्नुतिरिति।** साधर्म्यापह्नुतिः वैधर्म्यापह्नुतिः इति अपह्नुतिः द्वेधा। तत्र साधर्म्यापह्नुतिः नियतविषयः। अनियत विषयश्च इति द्विधा। तत्र अनियतविषयं दर्शयति–**नेति।।**

अपह्नुत्यलङ्कारमाह–अपह्नुतिरिति। लोकप्रसिद्ध किञ्चिद् अपोह्य लोकप्रसिद्धस्य कस्यचिदर्थस्य प्रकाशनम् अपह्नुतिः इति यावत्। उदाहरति–नेति। कामस्य हि उन्मादन–तापन–शोषण–स्तम्भन– संमोहनात्मानः सायकाः पञ्चैव इति लोकप्रसिद्धम्। तेषां पञ्चसंख्याविशिष्टतया [?]प्रकाशनात् असौ संख्यापह्नुतिः।।३०४।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अमृतस्यन्दिकिरणश्चन्द्रमा नाम नो मतः।
अन्य एवायमर्थात्मा विषनिष्यन्दिदीधितिः॥३०५॥

रत्नश्री

अमृतं सुधा स्यदन्ते स्त्रवन्तीत्यमृतस्यन्दिनः किरणाः अस्येति अमृतस्यन्दिकिरणः पदार्थविशेषश्चन्द्रमा नाम नोऽस्माकं मतः प्रसिद्धः। अयं तु अन्य एवार्थात्मा पदार्थः। कुतः? विषममृतविरुद्धं, निष्यन्दमानाः क्षरन्त्यो दीधितयः किरणा अस्येति विषनिष्यन्दिनो दीधितयो यतस्तस्मात्कथमयं चन्द्रस्तद्विरुद्धलक्षण इति कश्चिद्विरही विप्लवत इति॥

इयं कतमापह्नुतिरित्याह–

प्रभा

विषयापह्नुतिमुदाहरति–**चन्दनमिति**। चन्दनं कृष्णागरुः। चन्द्रिका ज्योत्स्ना। तथा मन्दः दक्षिणश्च गन्धवाहः मलयानिल इत्यर्थः। सेयं मयि विरहिणि अग्निमयी सृष्टिरग्निवन्मां संतापयतीत्यर्थः। अतोग्निवन्मया प्रतीयते। परान् प्रति मदन्यान् प्रति शीता शीतला किलेति स्वासंमतिद्योतनार्थम्॥३०५॥

विवृति

चन्दनमित्यादिका सेयमग्निमयी सृष्टिः शीता किल परान् प्रति। शौशिर्यमभ्युपेत्यैव चन्दादीनां परेषु जनेषु सखिषु अदृष्टविरहज्वरसन्तापेषु आत्मनि पुनः कामिना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विरहव्यथातदर्थि[कदर्थि]तेनौष्ण्यप्रदर्शनात् तस्य चन्दनादेः सैषा विषयनिह्नुतिरात्मविषये चन्दनादीनां यच्छिशिरत्वं तस्यापह्नवात्।।

नियतविषयं दर्शयति—**चन्दनमिति।** परेषु शैशिर्यमभ्युपेत्य विरहिणा आत्मनि औष्ण्यप्रदर्शनात् विषयस्यैव निह्नुतिरिति नियतविषया निह्नुतिः।।

अपह्नुतिभेदं दर्शयति—**चन्दनमिति।** चन्दनादीनां शिशिरगुणः अपह्नूयते कामेन [मिना]; अग्निमयी सृष्टिः इति अन्यार्थश्च [?] क्रियते। परान् प्रति शीता किल इत्युक्त्वा स्वस्मिन् विषये तेषां औष्ण्यप्रकाशनात् विषयनिह्नुतिरियम्।।३०५।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इति चन्द्रत्वमेवेन्दोर्निवर्त्यार्थान्तरात्मना।
उक्तः स्मरार्तेनेत्येष स्वरूपापह्नुतिर्मता॥३०६॥

रत्नश्री

इत्युक्तेन विधिना इन्दोश्चन्द्रत्वममृतमयत्वं स्वरूपं निवर्त्यापह्नुत्यार्थान्तरात्मना विषरूपेणोक्तः उद्भावित इन्दुः। उक्तमित्यपि पाठः। तत्र चन्द्रत्वमुक्तं स्वरूपेण निवर्त्य रूपान्तरेणोक्तमिति योज्यम्। स्मरार्तेन कामातुरेण विरहिणा केनचिदिति हेतोः स्वरूपापह्नुतिरेषा [मता] ज्ञेया, चन्द्रस्वरूपस्या[81a]पह्नुतेरिति॥ ननूपमापह्नुतिरिह संगृहीता। सा हि कथञ्चिदन्तर्भूतोपमेष्यते। यदाहुः–

अपह्नुतिरभीष्टा च किञ्चिदन्तर्गतोपमा।
भूतार्थापह्नवादेषा क्रियते सामिधा यथा॥
[काव्यालङ्कारे ३.२१]

लक्ष्यं चेदं दत्तम्।

नेयं विरौति भृङ्गाली मदेन मुखरा मुहुः।
अयमाकृष्यमाणस्य कामस्य धनुषो ध्वनिः॥ इति।
[काव्यालङ्कारे ३.२२]

इदं त्वनीदृशमपह्नुतिलक्षणमित्याशङ्क्याह–

हृदयङ्गमा

विषयापह्नुतिमुदाहरति, चन्दनमित्यादि द्वाभ्याम्।–चन्दनं चन्द्रिका तथा मन्दः दक्षिणः गन्धवाहश्च, इयं सृष्टिः मयि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विरहिणीत्यर्थः, अग्निमयी अग्निवत् मया प्रतीयते इत्यर्थः, परान् अन्यान्, अविरहिण इत्यर्थः, प्रति सा सृष्टिः, शीता शीतला, तेशामतीव सुखकरत्वादिति भावः। अत्र कामिना परेषु शैशिर्य्यं शीतलत्वम्, अभ्युपेत्य आरोप्य, तस्यैव आत्मनि औष्णाद्यप्रकाशनात् अग्निमयत्वधर्मारोपणेन चन्दनादीनां शैत्यदाहकत्वयोर्विषयभेदस्य कीर्त्तनात्, सा इयं विषयनिह्नुतिरित्यन्वयः।।३०५।।३०६।।

प्रभा

उदाहरणं विशदयति—**शैशिर्यमिति।** अत्र कामिना परेषु स्वभिन्नेषु। चन्दनादीनां शैशिर्यं शिशिरतां शैत्यमिति यावद् अभ्युपेत्यैव अङ्गीकृत्यैव तस्य शैत्यस्य आत्मनि औष्ण्यप्रकाशनात् संतापकतया दाहारोपणात्। सेयं विषयापह्नुतिः। अयं भावः। अत्र चन्दनादीनां निषेध्यारोप्यधर्मयोः शैत्यतापकत्वरूपयोर्व्यवस्थित-विषयत्वप्रतिपादनादियं विषयापह्नुतिः। अत्र उष्णत्ववर्णनेन शैत्यनिषेधो व्यङ्ग्य इति बोध्यम्।।३०६।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उपमापह्नुतिः पूर्वमुपमास्वेव दर्शिता।
इत्यपह्नुतिभेदानां लक्ष्यो लक्ष्येषु विस्तरः॥३०७॥

रत्नश्री

उपमापह्नुतिरीदृशी पूर्वमुपमाविकल्पेष्वेव दर्शिता अन्तर्भाविता।

न जातु शक्तिरिन्दोस्ते मुखेन प्रतिगर्जितुम्।

कलङ्किनो जड़स्येति प्रतिषेधोपमैव सा॥

[२.३४]

इति संगृहीता। तन्नास्याः पृथग्लक्षणं लक्ष्यं चोच्यते। इति कथितपथानुसारेण अपह्नुतेर्भेदानां विकल्पानां विस्तरः प्रपञ्चो लक्ष्यो द्रष्टव्यः। लक्ष्येषु प्रयोगेषु सर्गबन्धादिषु स्वयं चैते प्रयोक्तव्याः। तद्यथा–

जगदेतत् प्रियासर्वं न जगन्नाम किञ्चन।

तथापि चित्तसन्तोषं नासादयसि न प्रियाम्॥

सर्वापह्नुतिः।

प्रिया नैवेयमन्यैव काचिदाभाति भामिनी।

न हि सा निरनुक्रोशमेवं निरनुषेवते॥

हेत्वपह्नुतिः।

न स्तनद्वयमेतत्ते भारः कोऽप्येष दुर्वहः।

कथं प्राणिमि तन्वङ्गि! भृशमेतेन ताम्यसि॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चटुप्रधानापह्नुतिः।

एवमन्येऽप्यपह्नुतिभेदाः कल्पनीया इति।।

।। इत्यपह्नुतिः ।।

क्रमप्राप्तं श्लिष्टं लक्ष्यति–

प्रभा

स्वरूपापह्नुतिं दर्शयति–**अमृतेति।** चन्द्रमाः अमृतस्यन्दिनः किरणाः यस्य तादृशः सः। नामतः केवलं संज्ञात्वेन न तु अर्थवत्त्वेन मतः। अयं भावः। चन्द्रमा इत्यस्य योगार्थः चन्दयति अमृतस्यन्दिकिरणैराह्लादयति इति चन्द्रः। स्फायितञ्चि इति चदिधातो रक्प्रत्ययः। चन्द्रः सन् मस्यति परिणमते इति चन्द्रमाः। अथवा चन्द्रम् अमृतं तदिव मीयते असौ इति चन्द्रमाः। एवं च चन्द्रमस्शब्दस्य यौगिकार्थ आल्हादकरूपः। स तु प्रसिद्धचन्द्रमसि नास्ति। विरहिणो मम संतापकत्वात्। अतो विधौ चन्द्रमः शब्दः केवलरूढिबलान् मण्डपकुशलादिवद् बोद्धव्यः। न तु कुम्भकारादिवद् यौगिकः। एवं चन्द्रमसोमृतस्यन्दिकिरणैराह्लादकत्वं निषिध्य आरोप्यार्थं दर्शयति–**अन्य इति।** अयं चद्रन्माः। अन्यः अर्थात्मा पदार्थस्वरूपः। आह्लादकभिन्नधर्मविशिष्ट इत्यर्थः। किं धर्मविशिष्ट इत्याह **विषेति।** विषनिष्यन्दिन्यः दीधितयः किरणा यस्य तादृशः। एवं चात्र धर्मनिषेधपूर्वकधर्मान्तरारोपादपह्नुतिः।।३०७।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्लिष्टमिष्टमनेकार्थमेकरूपान्वितं वचः।
तदभिन्नपदं भिन्नपदप्रायमिति द्विधा॥३०८॥

रत्नश्री

यद् वचो वचनमनेको भिन्नोऽर्थोऽभिधेयं यस्येत्यनेकार्थम्। एकेन समानेन रूपेण शब्दस्वभावेन अन्वितं युक्तं सरूपम् इत्यनूद्य श्लिष्टं तदिष्टं स्मर्यत इति विधीयते। तच्चैवं लक्षणं श्लिष्टं द्विधा प्रकारद्वयेन भिद्यते। कथम्? अभिन्नमेकं पदं सुबन्ततिङन्तरूपं यत्र तदभिन्नपदमविकृतशब्दं भिन्नमनेकम्, पदं भङ्गेन योजनात्, प्रायमधिकं यत्र तद् भिन्नपदप्रायम्। तेन वा प्रायमधिकं किञ्चिदभिन्नमिति प्रायोग्रहणेन सूचयति। अनेन रूपेण द्विधेति प्रकृतम्॥

उदाहरन्नाह–

हृदयङ्गमा

स्वरूपापह्नुतिमाह, अमृतेत्यादि द्वाभ्याम्। –चन्द्रमाः अमृतस्यन्दिनः किरणा यस्य सः, नामतः नाम्नैव, सुधांशुरिति संज्ञामात्रबोधाय इत्यर्थः, न तु अर्थत इति भावः मतः ख्यातः, तस्य अमृतस्यन्दिकिरणैराह्लादकत्वं विरहिणामनुभवविरुद्धत्वेन तत्त्वतो नास्ति, सन्तापकरत्वेन तेषामसहनीयत्वादिति भावः। स्वरूपनिषेधपूर्वकमारोप्यं निर्दिशति, अन्य एवायमिति। –अर्थात्मा तादृशविशेषणविशिष्टस्य चन्द्रमा इति पदस्य शक्तिप्रतिपाद्यार्थभूतः, अयं चन्द्रमाः, अन्य एव तादृशार्थभिन्न एव, चन्दति आह्लादयतीति व्युत्पत्तिलभ्यार्थात् अन्यपदार्थ एवेत्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(यथा, मण्डपादिशब्दा व्युत्पत्तिलभ्येषु मण्डपानकर्त्तृरूपेषु अर्थेषु अशक्ता गृहादिरूपार्थवाचकास्तद्वदिति भावः) तदाऽसौ किंस्वरूप इत्यपेक्षायामाह, विषनिष्यन्दिदीधितिरिति। –विषनिष्यन्दिन्यो दौधितयो यस्य तथोक्तः। (अत्र चन्द्रस्य विषनिष्यन्दिकिरणत्व-धर्म्मारोपणम् अमृतस्यन्दिकिरणत्वधर्म्मनिषेधपूर्वकमिति धर्म्मिनिषेधपूर्व्वकधर्म्यन्तरारोपाभावात् न तत्त्वापह्नवरूपकप्रसङ्ग इति बोध्यम्)। लक्षणं सङ्गमयति, इतीति। –इति प्रागुक्तरूपेण, स्मरार्त्तेन विरहिणा, इन्दौ चन्द्रत्वम् आह्लादकत्वस्वरूपं, निवर्त्य निषिध्य, अपह्नुत्य इत्यर्थः, अर्थान्तरात्मता वस्त्वन्तरस्वरूपत्वं, विषनिष्यन्दिकिरणात्मकत्वमित्यर्थः, उक्ता आरोपिता, इति अतः, एषा स्वरूपापह्नुतिः स्वरूपस्य स्वाभाविकधर्म्मस्य अपह्नवपूर्व्विकेयमपह्नुतिरिति व्युत्पत्त्यर्थः, मता।।३०७।।३०८।।

प्रभा

उदाहरणं विशदयति–**इतीति।** केनचित् स्मरार्तेन मदनपीडितेन। इति एवं प्रकारेण इन्दौ चन्द्रत्वं आह्लादकस्वरूपत्वम् निवर्त्य निषिध्य। अर्थान्तरात्मता विषनिष्यन्दिदीधितिस्वरूपवत्ता उक्ता आरोपिता। अत एषा स्वरूपापह्नुतिर्बोद्धव्या। स्वं रूप्यते अनेन इति स्वरूपं नैसर्गिकगुणक्रियादिधर्मः। तन्निषेधपूर्विकेयमिति स्वरूपापह्नुतिः।।३०८।।

विवृति

अमृतं स्यन्दन्तेऽमृतस्यन्दिनः किरणा यस्य स किल नाम चन्द्रमाः इति नाऽस्माकं मतः। अन्य एवायमर्थात्मा चन्द्रादन्य एवायमर्थः। अर्थ एव अर्थात्मा अर्थस्वभावो वा। किं भूतः। विषं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निष्यन्दन्ते विषनिष्यन्दिन्यो दीधितयो यस्यासौ विषनिष्यन्ददीधितिः इत्येषा स्वरूपापह्नुतिर्मता। चन्द्रस्वरूपममृतस्यन्दिकिरणत्वम्। त.... प्यहि [तथा हि चदि]धात्वर्थः। 'चदी दीप्तिह्लादनयोः'। दीप्तिं ह्लादनं च यः करोति स चन्द्रः। अयं पुनः [र्वि]षमुत्सृजति। तेनायं चन्द्रो न भवतीति स्मरार्तेनोक्तमिति।।

वैधर्म्यापह्नुतिश्च द्वेधा–विरुद्धकार्यकरणात् सादृश्याच्च। तत्र विरुद्धकार्यकरणवैधर्म्यापह्नुतिं दर्शयति–**अमृतेति**।।

स्वरूपापह्नुतेरुदाहरणमाह–अमृतेति। व्याचष्टे–**इतीति**। विषयस्वरूपापह्नवयोः अयं भेदः। चन्दनं चन्द्रिकेत्यत्र चन्दनादिगतस्य स्पर्शेन्द्रियविषयभूतस्य शैत्यस्य कामेन[?] निह्नवः ; अन्यत्र सुधास्यन्दिकिरणत्वं नाम चन्द्रमसः स्वरूपं अपह्नुतम् इति स्वरूपापह्नवः।।३०७–३०८।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

असावुदयमारूढः कान्तिमान् रक्तमण्डलः।
राजा हरति लोकस्य हृदयं मृदुभिः करैः॥३०९॥

रत्नश्री

असावयं राजा चन्द्रो नृपतिश्च। तत्र चन्द्रस्तावदुदयं पर्वतमारूढः। नृपतिस्तूदयमभ्युदयं राज्यरूपमारूढः प्राप्तः। चन्द्रः कान्तिमान् सौम्यः। नृपतिः कान्तिमानभिरूपः। चन्द्रो रक्तमरुणमुद[81b]यावस्थाभावित्वान्मण्डलं बिम्बमस्येति रक्तमण्डलः। नृपतिस्तु रक्तमनुरक्तं स्निग्धं मण्डलममात्यादिप्रकृतिवृन्दं यस्येति रक्तमण्डलः। लोकस्य हृदयं जनस्य मनः प्रीतियोगेन हरति रञ्जयति। चन्द्रो मृदुभिः शीतैः करैः किरणैर्हरति। नृपतिस्तु मृदुभिरनुद्वेजनीयैः करैरुचितषड्भागादिस्वभावैः हरति। इति श्लिष्टमभिन्नपदं भङ्गेन विना यथावस्थानमुभयत्र पदयोजनादिति॥

हृदयङ्गमा

उपमाऽपह्नुतिरिति। —उपमायाः सादृश्यस्य, अपह्नुतिः उपमाऽपह्नुतिः साम्यनिषेधपुरःसरतदतिशयस्थापनात्मिकेत्यर्थः, पूर्वम् उपमासु उपमालङ्कारभेदेषु एव, प्रतिषेधोपमायामित्यर्थः, दर्शिता प्रतिषेधोपमाख्यया वर्णिता इत्यर्थः, इति उक्तरूपायाः, अपह्नुत्याः भेदानां विस्तरः लक्ष्येषु यथायथं लभ्येषु उदाहरणेषु, लक्ष्यः अनुसन्धेय इत्यर्थः। (अत्र च अन्यैरुक्ताः कतिपये भेदा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यथा, –अपह्नवपूर्व्वकः आरोपः इत्येकः, आरोपपूर्व्वकोऽपह्नव इति द्वितीयः, छलादिशब्दैरसत्यताप्रतिपादकैर्वा अपह्नवनिर्देशः तृतीयः, इति त्रिविधाः भेदाः ज्ञातव्याः। तत्र आद्यो यथा, –"पूर्णेन्दोः परिपोषकान्तवपुषः स्फारप्रभाभास्वरं, नेदं मण्डलमभ्युदेति गगनाभोगे जिगीषोर्जगत्। मारस्योच्छ्रितमातपत्रमधुना पाण्डुप्रदोषश्रिया, मानोन्नद्धजनाभिमानदलनोद्योगैकहेवाकिनः।।" इति। द्वितीयो यथा, –"विलसदमरनारीनेत्रनीलाब्जखण्डा न्यधिवसति सदा यः संयमाधः कृतानि। न तु रुचिरकलापे वर्त्तते यो मयूरे, वितरतु स कुमारो ब्रह्मचर्य्यश्रियं वः।।" तृतीयो यथा, –"उद्भ्रान्तोज्झितगेहगुर्जरबधू–कम्पाकुलोच्चैः कुच प्रेङ्खोलामल–हारवल्लिविगलन्मुक्ताफलच्छद्मना। सार्द्धं तद्रिपुभिस्तदीययशसां शून्ये मरौ धावतां, भ्रष्टं राजमृगाङ्क! कुन्दमुकुलस्थूलैः श्रमाम्भः–कणैः।।" "शून्ये" इत्यत्र "मन्ये" इति पाठे सापह्नवोत्प्रेक्षा इत्यपि भेदः। तथा मालारूपाऽपि सम्भवति। एवं एकं निषिध्य बहुनामारोपे अपरा च। किञ्च तत्त्वोक्त्या भ्रान्तिवारणे भ्रान्तापह्नुतिरपि; यदाह जयदेवः, –"भ्रान्तापह्नुतिरन्यस्य शङ्कायां भ्रान्तिवारणे। तापं करोति सोत्कण्ठं ज्वरः किं न सखि! स्मरः?"।। इति। यत्तु, –"अन्यत्र तस्यारोपार्थः पर्य्यस्तापह्नुतिस्तु सा। नायं सुधांशुः किं तर्हि सुधांशुः प्रेयसीमुखम।" इति; तत्राहुः, –"प्रकृतं यन्निषिध्यान्यत् साध्यते सा त्वपह्नुतिः" इत्यपह्नुतिसमान्यलक्षणायोगान्नायमपह्नुतिः, किन्तूपमेयोपमानतावच्छेदकयोः सामानाधिकरण्यस्य भासमान–त्वाद्रूपकमेव। एवमन्येऽपि भेदा ग्रन्थबाहुल्यभिया नोदाहृताः इति दिक्)।।३०९।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रभा

अपह्नुतिमुपसंहरति—**उपमेति।** उपमायाः सादृश्यस्य अपह्नुतिरुपमापह्नुतिः। सा पूर्वमुपमासु उपमालंकारभेदेषु दर्शिता। प्रतिषेधोपमाख्यया दर्शिता इत्यर्थः। तदुदाहरणं हि—

न जातु शक्तिरिन्दोस्ते मुखेन प्रतिगर्जितुम्।
कलङ्किनो जडस्येति प्रतिषेधोपमैव सा।। इति।

अत्र हि चन्द्रप्रतियोगिकं सादृश्यं प्रतिषिध्य सादृश्यमूलगुणातिशयस्थापनमार्थम्। अत इयमुपमापह्नुतिः। अत्र औपम्यमूलभूतगुणातिशयसंस्थापिकेयमपह्नुतिः औपम्यचारुताया विकासयित्री इति तदङ्गभूता। औपम्यचारुता तु प्रधाना इति उपमाभेदे तस्याः परिगणनमिति ज्ञेयम्। तत्त्वापह्नवरूपकं तु अपह्नुतेर्भिन्नविषयमिति पूर्वं दर्शितमेव। अन्ये केचन उपमापह्नुतिरित्यत्र उपमाशब्देन उपमारूपकयोरनतिभेदाद् रूपकं गृह्णन्ति। तथा च उपमारूपकं नाम तत्त्वापह्नवरूपकम् उपमासु रूपकभेदेषु दर्शितमिति अर्थं दर्शयन्ति। तद्रहस्यं तु अपह्नुतौ आर्थ आरोप न युक्तः शाब्दारोपे एव चमत्कृतेर्भानाद् इति स्यात्। परमस्मिन् पक्षेपि उपमाशब्दस्य रूपकार्थो न सरसः। इति उभयत्रापि किंचिद्वैकल्यं दृश्यते इति सुधीभिर्विचारणीयम्। इति अनया दिशा अपह्नुतिभेदानां विस्तरो लक्ष्येषु उदाहरणविशेषेषु लक्ष्यः स्वयमूहनीयः। उपमापह्नुतितत्त्वापह्नुतिवद् अलंकारान्तरोत्पत्तिहेतवोपह्नूतिभेदा अवगन्तव्याः। तत्र उत्प्रेक्षापह्नुतिर्यथा—

अश्रुच्छलेन सुदृशो हुतपावकधूमकलुषाक्ष्याः।
अप्राप्य मानमङ्गे विगलति लावण्यपूर इव।। इति।।
एवमन्येपि प्रकारा बोध्या इति प्रेमचन्द्रशर्माणः।।३०९।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विवृति

[उप]मापह्नुतिरित्यादि सुबोधम्।।

सादृश्यवैधर्म्यापह्नुतिः पूर्वमेव रूपके दर्शिता इत्याह–**उपमेति।** उपमाऽपह्नुतिः सादृश्यापह्नुतिः। उपमासु रूपकेषु इत्यर्थः ; उपमारूपकयोः अनतिभेदात्। अपह्नुतिमुपसंहरति–**इतीति।।**

उपमेति। उपमायाः अपह्नुतिः उपमापह्नुतिः ; लुप्तोपमाया द्योतकादेः अपह्नवः इत्यभिप्रायः। शशाङ्कवदने इत्यत्र द्योतकसामान्यलोपः दृष्ट एव। अपह्नुतिभेदाः बहवो दृश्यन्ते, ते लक्ष्येषु द्रष्टव्याः इत्याह **इतीति**।।३०९।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दोषाकरेण सम्बन्धन्नक्षत्रपथवर्तिना।
राज्ञा प्रदोषो मामित्थमप्रियं किं न बाधते॥३१०॥

रत्नश्री

प्रदोषो रजनीमुखम्, प्रकृष्टोऽधिको दोषो लोभादिरस्येति प्रदोषश्च कश्चित् पुरुषो विवक्षितः। दोषा रात्रिराकर आश्रयस्तत्र दर्शनात्। यस्य दोषाकर इति तत्सन्निधौ दृष्टेः, दोषाकरेण चन्द्रेण, दोषाणां क्रोर्यादीनामाकरः स्थानं तेन नृपेण। नक्षत्रपथे व्योम्नि वर्तते नक्षत्रपथवर्तिना चन्द्रेण, क्षत्रस्य पन्थाः क्षत्रपथः क्षात्रो धर्मः शिष्टपालनदुष्टनिग्रहादिरूपः, न तथाऽक्षत्रपथस्तद्वर्तिना राजधर्मातिक्रमिणा नृपेण संबध्नन् सङ्गच्छमानः। मामित्थमनेन प्रकारेण अप्रियं न विद्यते प्रियाऽस्येति विरहिणं प्रदोषः क्षणदावतारः। किं कस्मात् न बाधते न तापयति? बाधत एव। अप्रियं न प्रियमप्रियं द्वेष्यं किं न बाधते नापकरोति? निगृह्णात्येव प्रदोषः प्रकृष्टदोषः पुरुषः कश्चित्। इदं भिन्नपदप्रायं श्लिष्टमुक्तेन विधिना प्रदोष इत्यादीनां भिन्नत्वाद् राज्ञा इत्यस्याभेदादिति॥

अलङ्कारान्तरगोचरः श्लेषोऽपि। स प्रागुक्त इति दर्शयन्नाह–

हृदयङ्गमा

शब्दगतमर्थगतञ्च श्लेषं लक्षयति, श्लिष्टमिति। –अनेकार्थम् अभिधया वृत्त्या युगपदनेकार्थप्रतिपादकपदवत्, एकेन अभिन्नेन, रूपेण आकारेण, अन्वितं युक्तम्, अर्थभेदात् भिन्नमपि युगपदेकप्रयत्नोच्चार्यमाणशब्दस्वरूपमिति यावत्, वचः वाक्यं, श्लिष्टं श्लेषालङ्कारयुक्तम्, इष्टं कविभिरभिलषितम्। (तथा च,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शब्दार्थयोरेकताऽवभासहेतुः सम्बन्धविशेषः श्लेषः, स चात्र शब्दयोरेकप्रयत्नोच्चार्यत्वरूपः अर्थयोस्तु एकप्रयत्नोच्चार्यमाण-शब्देन ऐककालिकत्वबोधरूपः। अन्ये तु शब्दयोर्जतुकाष्ठन्यायेन अर्थयोश्च एकवृन्तगतफलद्वयन्यायेन श्लेष इत्याहुः। यत्र अभिधया वृत्त्या शब्दस्य अनेकार्थत्वं तत्रैव श्लेषः, यत्र तु अनेकार्थसङ्केतितस्यापि शब्दस्य शक्तिसङ्कोचकानां संयोगादीनां सद्भावात् अभिधायाः सङ्कुचितत्वेन एकार्थस्यैव प्रतीतिस्तत्र न श्लेषः। अनेकार्थशब्दानामेकार्थनियन्त्रणनिदानञ्च संयोगादिकमुक्तं विश्वनाथेन, –"संयोगो विप्रयोगश्च साहचर्य्यं विरोधिता। अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः।। सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः। शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः।। यथा, –"सशङ्खचक्रो हरिः' इत्यत्र शङ्खचक्रसंयोगेन हरिशब्दो विष्णुमेवाभिधत्ते" इत्यादि। तादृशस्थले संयोगादिना एकार्थबोधनात् अभिधायां विरतायां पश्चात् व्यञ्जनया अर्थान्तरप्रतीतौ ध्वनित्वमेव न श्लेषः, अभिधया युगपदर्थद्वयप्रतीतेरभावात्; यथा, –"भद्रात्मनो दुरधिरोहतनोर्विशालवंशोन्नतेः कृतशिलीमुख-सङ्गहस्य। यस्यानुपलुप्तगतेः परवारणस्य दानाम्बुसेकसुभगः सततं करोऽभूत्।।" इत्यत्र प्रकरणेन प्रथमं प्रकृतः पुरुषमात्र एव प्रतीयते, पश्चात् व्यञ्जनया हस्तीति न श्लेषः। श्लेषे अर्थस्य अनेकत्वं क्वचित् वस्तुतः क्वचिदेकरूपत्वेऽपि सम्बन्धिभेदेन इति बोध्यम्। आद्ये तावत् शब्दश्लेषः, द्वितीये तु अर्थश्लेष इति विश्वनाथादयः। तत्र अर्थश्लेषो यथा, –"स्तोकेनोन्नतिमायाति स्तोकेनायात्य-धोगतिम्। अहो! सुसदृशी वृत्तिस्तुलाकोटेः खलस्य च।।" इति। अत्रैका एवोन्नतिरधोगतिश्च तुलाकोटि खलसम्बन्धिभेदाद्भिन्नत्वन प्रतीयते। स्वमते तु सम्बन्धिभेदेन तयोरनेकत्वात्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तद्वाचकपदयोरप्यनेकत्वमिति लक्षणसमन्वयः। दोषगुणालङ्काराणां शब्दार्थवृत्तित्वावधारणं तावदन्वयव्यतिरेकाभ्यामिति काव्यप्रकाश-कारस्याशयः, तथा हि, शब्दानां परिवृत्त्यसहत्वे शब्दवृत्तित्वं, तत्सहत्वे तु अर्थवृत्तित्वम्। अत्र "अल्पेनोन्नतिमायाति" इत्यादि प्रयोगेऽपि श्लेषनिर्वाहात् अर्थश्लेषः, तदर्थकशब्दान्तरोपादानेऽपि यत्रोभयानुगतार्थप्रतीति- स्तत्रार्थश्लेष एव इति निष्कर्षः। केचित्तु-"त्रिविधश्चायं, द्वयोः प्रकृतत्वे, द्वयोरप्रकृतत्वे, अन्यतरस्यैव प्रकृतत्वे चेति; स पुनर्द्विविधः, शब्दश्लेषः, अर्थश्लेषश्चेति। तत्र शब्दश्लेषोऽपि द्विविधः पदभेदे, तदैक्ये च; आद्यः खण्डश्लेषः ; तत्र शब्दश्लेषः शब्दालङ्कारः अर्थश्लेषस्त्वर्थालङ्कार इति काव्यप्रदीपः, द्वयमपि शब्दालङ्कार इत्यन्ये। द्वयमप्यर्थालङ्कार इति अलङ्कारसर्वस्वकारः" इत्याहुः। तत्र द्वयोः प्रकृतत्वे यथा, -"गतेषु सैन्येषु सुशर्म्महेतोः सुलब्धचिह्नः सुजयोत्तरश्रीः। हरेस्तनूजः प्रतिपन्नकालं नृपप्रियान्वेषण-तत्परोऽभूत्॥" इति। अत्र हनमदर्ज्जुनयोरुभयोरप्युभयकथायां प्रकृतत्वम्। द्वयोरप्रकृतत्वे यथा, -"आज्ञया च पितुरज्ञभिया च श्रीरहीयत महीप्रभवा द्विः। लङ्घितश्च भवता किमु न द्विर्वारिराशिरुदकाङ्कगलङ्कः॥" अत्र रामवैरिणोर्द्वयोरप्य-प्रकृतत्वम्। द्वयोः प्रकृताप्रकृतत्वे यथा, -"हिममुक्तचन्द्ररुचिरः सपद्मकः मदयन् द्विजान् जनितमीनकेतनः। अभवत् प्रसादितसुरो महोत्सवः प्रमदाजनस्य स चिराय माधवः॥" इति। अत्र भगवतो वसन्तादेश्च प्रकृताप्रकृतत्वे। शब्दार्थभेदेन द्विविधोऽप्ययं श्लेषः एकत्रापि सम्भवति, शब्दस्य नानार्थत्वे अर्थयोः श्लिष्टत्वात्, "अर्थभेदेन शब्दभेदः" इति नयेन शब्दस्यापि विभिन्नत्वस्वीकारेण शब्दयोः श्लिष्टत्वाच्च। अत्रायं विवेकः, -नानार्थकशब्दश्लेषे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शब्दस्यैव वैचित्राजनकत्वेन प्राधान्यात् शब्दालङ्कारमध्ये अस्य निरूपणमुचितमित्यपि न वाच्यं, शब्दस्यार्थद्वयप्रतीतेरेव वैचित्र्यजनकत्वेनार्थसापेक्षतया स्वतो वैचित्र्याभावतया च शब्दस्य मुख्यत्वाभावात्; अत एवार्थालङ्कारमध्ये श्लेषस्य निरूपणं कृतमिति दिक्)। तस्य अभङ्ग- सभङ्गत्वेन प्रथमं द्वैविध्यमाह, तदिति।-तत् वचः, अभिन्नपदं शक्यतावच्छेदकस्य विभिन्नत्वेऽपि एकप्रकृतिप्रत्ययसमासादिघटितत्वेन अभिन्नानि पदानि यस्मिन् तत्, तथा भिन्नानाम् अनेकप्रकृतिप्रत्ययादिघटितत्वेन विलक्षणानां पदानां प्रायो बाहुल्यं यत्र तत् तादृशम्, इति उक्तरूपेण, द्विधा द्विप्रकारम्, भवतीति शेषः। (तथा च, अभिन्नपदवाक्ये अभङ्गश्लेषः भिन्नपदवाक्ये सभङ्गश्लेष इति द्विविधत्वम्। शेषस्तु समधिकचमत्कारितया कविभिर्बाहुल्येन प्रयुज्यते इति प्रायपदाभिप्रायः। विश्वनाथस्तु वर्णप्रत्ययादिभेदेन शब्दश्लेषस्याष्टविधत्वमाह यथा, -"वर्णप्रत्ययलिङ्गानां प्रकृत्योः पदयोरपि। श्लेषात् विभक्तिवचनभाषाणामष्टधा च सः॥" इति। तत्र वर्णश्लेषो यथा, -"प्रतिकूलतामुपगते हि विधौ विफलत्वमेति बहुसाधनता। अवलम्बनाय दिनभर्त्तुरभून्न पतिष्यतः करसहस्त्रमपि॥" इत्यत्र विधाविति विधिविधुशब्दयोरि-कारोकारयोर्वर्णयोः श्लेषः। एवं प्रत्ययादिश्लेषोदाहरणानि तत्र द्रष्टव्यानि)॥३१०॥

प्रभा

इदानीं क्रमप्राप्तं श्लेषं लक्षयति-**श्लिष्टमिति।** अनेकार्थम् अभिधावृत्त्या अनेकार्थप्रतिपादकम्। एकरूपान्वितम् एकेन अर्थभेदेपि अभिन्नप्रयत्नोच्चार्येण रूपेण अन्वितं युक्तं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समानवर्णरूपमित्यर्थः। वचः वाक्यम्। श्लिष्टं अलंकारेषु श्लेषश्चारुतासंपादकतया कविभिरभिलषित इत्यर्थः। तदग्रे कथयिष्यति।

श्लेषः सर्वासु पुष्णाति प्रायो वक्रोक्तिषु श्रियम्।
भिन्नं द्विधा स्वभावोक्तिर्वक्रोक्तिश्चेति वाङ्मयम्।।
(२.३६३) इति।

श्लेषश्च एकतावभासहेतुः संबन्धविशेषः। स चात्र शद्बयोरेकप्रयत्नोच्चार्यरूपः। अर्थयोस्तु अर्थनियामकानां प्रकरणादीनामभावाद् एकप्रयत्नोच्चार्यशब्देन एककालबोध्यत्वरूपः। अन्ये तु शब्दयोर्जतुकाष्ठन्यायेन अर्थयोस्तु एकवृन्तगतफलद्वयन्यायेन श्लेष इत्याहुः। ननु अर्थभेदेन शब्दभेद इति नियमात् कथमेकस्यैव शद्बस्य अनेकार्थत्वमिति चेत् तथाविधाकारैरपरैः शब्दैः श्लिष्टतयेति निश्चिनुमः। अयं च श्लेषः शब्दपरिवृत्तिसहत्वासहत्वेन अर्थशब्दभेदेन द्विधेति अर्वाचीना मन्यन्ते। प्राचीनास्तु उभयत्रापि शब्दस्य अर्थद्वयप्रतीतिमाधायैव वैचित्र्यजनकतया प्रधानतोर्थसापेक्षतया अर्थशून्येकेवलशब्देवैचित्र्ये अलंकारत्वाभावादयमर्थालंकार एव इति जानन्ति। एतच्च अनेकार्थत्वम् अभिधावृत्त्या युगपदनेकार्थप्रतिपादकत्वम्। तच्च शक्तिसंकोचकानां संयोगादीनामभावे एव संभवति। यत्र तु संयोगादिभिरभिधाया निश्चयस्तत्र युगपदर्थद्वयप्रतीतेरभावान्न श्लेषः। तत्राप्रकृतस्यार्थसय ध्वनिरेव। संयोगादयश्चोक्ता हरिणा–

संयोगो विप्रयोगश्च साहचर्यं विरोधिता।
अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य संनिधिः।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः।
शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः।। इति।

एते संयोगादयो नानार्थेषु शब्देषु शब्दार्थस्यानवच्छेदे संदेहे तदपकरणद्वारा विशेषार्थनिर्णायका इति संक्षिप्तार्थः। तत्र संयोगादीनामुदाहरणानि सवत्सा धेनुरानीयताम् इत्यादीनि परमलघुमञ्जूषातो ज्ञेयानि। विस्तरभयान्नात्र लिख्यन्ते। अर्थस्यानेकत्वं च क्वचिद्वस्तुतः क्वचिदेकरूपत्वेपि अनेकसंबन्धित्वात्। तत्र आद्ये शब्दश्लेषो द्वितीयेर्थश्लेष इति नव्याः। अर्थश्लेषो यथा–

स्तोकेनोन्नतिमायाति स्तोकेनायात्यधोगतिम्।
अहो सुसदृशी वृत्तिस्तुलाकोटेः खलस्य च।। इति।

अत्रोन्नतिरधोगतिश्चैकैव। परं तु सा संबन्धिभेदाद् भिन्नत्वेन प्रतीयते। अत्रापि संबन्धिभेदेनोन्नत्यधोगत्योरनेकत्वात् तद्वाचकपदयोरप्यनेकत्वमिति स्वमते लक्षणसमन्वय इति प्रेमचन्द्रशर्माणः।। श्लेषस्य द्वैविध्यमाह–**तदिति।** शक्यतावच्छेदकस्य विभिन्नत्वेपि एकप्रत्ययप्रकृतिसमासघटितत्वेन अभिन्नानि पदानि यस्मिंस्तद् अभिन्नपदम्। तथा भिन्नानां प्रकृतिप्रत्ययादिभिर्भिन्नानां पदानां सुप्तिङन्तानां प्रायो बाहुल्यं यत्र तत्। तथा च अभिन्नपदवाक्ये अभङ्गश्लेषः प्रायो भिन्नपदवाक्ये च सभङ्गश्लेषः। सभङ्गश्लेष एव समधिकचमत्कारकारी इति कविभिर्विशेषतः प्रयुज्यते। अतः प्रायः पदोपादानम् इति केचित्। प्रकाशकारादयः श्लेषविशेषं शब्दश्लेषं वर्णपदलिङ्गभाषाप्रकृतिप्रत्ययविभक्तिवचनानां भेदादष्टधा मन्यन्ते। तत्र वर्णश्लेषो यथा–विधौ शिरःस्थे कुटिले कुतः श्रीरिति। अत्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विधुविधिशब्दयोरुकारेकारयोः श्लेषः। एवमादीनि प्रत्ययादि-श्लेषोदाहरणानि प्रकाशादिभ्यो ज्ञातव्यानि।।३१०।।

विवृति

इत्यपहनुतिः।।

श्लिष्टलक्षणमाह–

श्लिष्टमिष्टमिति लक्षण[क्ष्य]मनूद्यानेकार्थमिति तस्य लक्षणं विधीयते [?]अनेकार्थमेकरूपान्वितं यद्वचस्तच्छ्लिष्टम्। अभिन्नानि पदानि यस्य तदभिन्नपदं अखण्डपदमेव व्द्यर्थम्। यथा राजा राजेत्येतत्पदमखण्डमेव नृपे चन्द्रे च वर्तते। भिन्ने भिन्नानि वा पदानि पर्या[प्रायो] यस्य तद्भिन्नपदप्रायमिति द्विधा द्विप्रकारं भवति श्लिष्टम्।।

श्लिष्टं लक्षयति **श्लिष्टमिति**।।

श्लेषालङ्कारमाह **श्लिष्टमिति**। समानाकारम् अनेकार्थं वाक्यं श्लिष्टालङ्कारत्वेन अभिप्रेतम्। **तदभिन्नेति**–यत्र एकरूपेण पदेन अर्थद्वयं प्रतिपाद्यते तत् अभिन्नपदम्; यत्र भिन्नरूपेण पदेन अर्थद्वयप्रतिपत्तिः तत् भिन्नपदप्रायम्। यस्मिन् वाक्योच्चारणकाले पदं प्रतीयमानेन एकाकारेण अर्थद्वयं प्रतिपादयति तदभिन्नपदम्; यत्र तु पदं वाक्योच्चारणकाले प्रतीयमानाकारान्तरेणैव अर्थान्तरं प्रतिपादयति तत् भिन्नपदप्रायम्; इत्यर्थः।।३१०।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उपमारूपकाक्षेपव्यतिरेकादिगोचराः।
प्रागेव दर्शिताः श्लेषा दर्श्यन्ते केचनापरे॥३११॥

रत्नश्री

उपमा रूपकमाक्षेपः व्यतिरेकश्चादिर्यस्य दीपकार्थान्तरन्यासादेः स गोचरो विषयो येषां ते श्लेषाः प्रागेवोपमाप्रस्तावादिषु दर्शिताः। ततः सम्प्रति नोच्यन्ते। तत्रोपमागोचरः श्लेषः शिशिरांशुप्रतिद्वन्द्वीत्यादिना [२.२८] दर्शितः। रूपकोपघ्नः राजहंसोपभोगार्हमित्यादिना [२.८७]। आक्षेपविषयः अमृतात्मनि पद्मानामित्यादिना [२.१५९]। व्यतिरेकाश्रयः त्वं समुद्रश्च दुर्वारावित्यादिना [२.१८३]। दीपकाधिकरणो हृद्यगन्धवहा इत्यादिना [२.११३]। एवमन्येऽप्यर्थान्तरन्यासादिगोचरा द्रष्टव्याः। ये तु पूर्वं नोक्तास्ते अपरेऽन्ये केचन कियन्तो निदर्श्यन्ते प्रतिपाद्यन्त इति॥

के पुनस्त इति दर्शयन्नाह–

हृदयङ्गमा

तत्राभिन्नपदमुदाहरति, असाविति। –उदयमुन्नतिम् उदयाचलञ्च, आरूढः, कान्तिमान् कमनीयमूर्त्तिः शुभ्रकिरणश्च, रक्तमण्डलः अनुरक्तप्रकृतिः लोहितविम्बश्च, राजा नृपः शशी च, मृदुभिः अल्पैः अतीक्ष्णैश्च, शीतलैश्चैत्यर्थः, करैः राजस्वैः किरणैश्च, लोकस्य हृदयं हरति। (अत्र प्रकरणादिनियमाभावात् राजचन्द्रौ द्वावपि वाच्यौ, उदयादिपदान्यपि एकप्रकृतिप्रत्ययसाधितत्वादभिन्नानीति अभङ्गश्लेषः) ॥३११॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रभा

तत्राभिन्नपदश्लेषमुदाहरति–**असाविति।** उदयं प्रतापोन्नतिम् उदयाचलं च आरूढः। कान्तिमान् कमनीयाकृतिः तेजस्वी च रक्तमण्डलः अनुरक्तप्रकृतिमण्डलः रक्तबिम्बश्च। राजा नृपः चन्द्रश्च। मृदुभिः अनुद्वेगकरैः शीतलैश्च। करैः राजग्राह्यभागैः किरणैश्च लोकस्य हृदयं हरति चित्तमाकर्षति। अत्र प्रकरणादिनियामकाभावाद् द्वावपि नृपचन्द्रौ वाच्यौ। उदयादिपदानि च प्रकृतिप्रत्ययभेदशून्यत्वादभिन्नानि इति अभङ्गश्लेषोयम्।।३११।।

विवृति

तदुदाहरणैः स्पष्टयति–

उदयपर्वतमारूढः उदितः कान्तिमान् दीप्तिमान् रक्तं लोहितं मण्डलं वृत्तं संस्थानं यस्यासौ रक्तमण्डलः राजा चन्द्रः लोकस्य हृदयं मृदुभिः सुकुमारैः शिशिरैः किरणैर्हरति सुखयति। द्वितीयोऽर्थः। राजा नृपः लोकस्य चतुर्वर्णाश्रमलक्षणस्य हृदयं हरति। कथंभूत इत्याह। उदयोऽभ्युदयः सप्ताङ्गा राज्यावाप्तिः तमुदयमारूढः कान्तिमान् दीप्तिश्छविः प्रतापो वा दीप्तिः तद्वान् संरक्तमनुरक्तं मण्डलं पृथिवी अमात्यादयः प्रकृतयश्च यस्यासौ रक्तमण्डलः अनुरक्तप्रकृतिः मृदुभिः करैः उचितादानैः धान्यषड्भागपण्यसदृशभागहिरण्यभागधेयौरित्यभिन्नपदश्लेषः। उदयादिपदैरभिन्नैः नृपचन्द्रमसोरभिधानात्।।

अभिन्नपदं दर्शयति–**असाविति।** उदयमारूढः ऐश्वर्यं प्राप्तः कान्तिमान् प्रभाववान् रक्तमण्डलः अनुरक्तलोकः असौ राजा नृपतिः मृदुभिः लघुभिः षष्ठांशरूपैः करैः सर्वस्य हृदयं हरतीति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एकोऽर्थः। तमेव चन्द्रपरेण अर्थान्तरेण साधयति, उदयपर्वतमारूढः प्रभावान् उदयानुरक्तबिम्बः चन्द्रः शीतलैः करैः सर्वस्य हृदयं हरति इति।।

उदाहरति–**असाविति।** उदयम् उदयगिरि सम्पदं च, आरूढः कृतारोहणः प्राप्तश्च, कान्तिमान् प्रभाववान्, शोभावान् रक्तमण्डलः लोहितबिम्बः अनुरक्तराष्ट्रश्च, राजा चन्द्रः भूपश्च, मृदुभिः कोमलैः, स्वल्पैश्च, करैः रश्मिभिः बलिभिश्च। अर्थद्वयम् अभिन्नैरेव पदैः समर्थितमिति अभिन्नपदमेतत्।।३११।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अस्त्यभिन्नक्रियः कश्चिदविरुद्धक्रियोऽपरः।
विरुद्धकर्मा चास्त्यन्यः श्लेषो नियमवानपि॥३१२॥

रत्नश्री

अभिन्ना एका क्रिया यत्र स तादृशः कश्चिदस्ति श्लेषः। अविरुद्धे सहभाविन्यौ क्रिये यस्मिन् स तद्रूपोऽपरोऽन्यः कश्चिदस्ति। विरुद्धे कर्मणी क्रिये यत्र स चान्यः कश्चिदस्ति। श्लेष इति सर्वत्र सम्बध्यते। नियमोऽवधारणमस्मिन्नस्तीति नियमवानपि विद्यते कश्चित्॥

हृदयङ्गमा

भिन्नपदमुदाहरति, दोषाकरेणेति। –प्रदोषः रजनीमुखं प्रकृष्टदोषयुक्तः कश्चित् पुरुषश्च, दोषाकरेण निशाकरणे दोषस्य आकरणे च, तथा नक्षत्रपथे आकाशपथे वर्त्तते इति तथोक्तेन क्षत्रपथे क्षत्रोचिताचारे न वर्त्तमानेन च, राज्ञा चन्द्रेण नृपेण च, सम्बन्धन् संयोगं प्राप्नुवन् सन्, अप्रियम् प्रियारहितं द्वेष्यञ्च, माम् इत्थम् एवं प्रकारेण, न बाधते किम्? न पीड़यति किम्? अपि तु पीड़यत्येवेत्यर्थः, (अत्र दोषाकरेणेत्यादिपदानि दोषां रात्रिं करोतीत्यादिव्युत्पत्त्या दोषस्याकर इत्यादिव्युत्पत्त्या च प्रकृतिप्रत्ययसमासैर्भिन्नानीति सभङ्गश्लेषः। राज्ञेत्यत्र तु अभङ्गः, तदत्र सभङ्गाभङ्गश्लेष इति। विश्वनाथस्तु सभङ्गाभङ्गात्मकं तृतीयभेदमङ्गीकृत्यास्य त्रैविध्यमाह यथा,–"पुनस्त्रिधा सभङ्गोऽथाभङ्गस्तदुभयात्मकः" इति। केवलसभङ्गोदाहरणं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विश्वनाथेन दर्शितम्; यथा,–''पृथुकार्त्तस्वरपात्रं भूषितनिःशेषपरिजनं देव!। विलसत्करेणुगहनं सम्प्रति सममावयोः सदनम्।'' पृथूनां कार्त्तस्राणां स्वर्णानां, तथा पृथुकानां बालकानाम, आर्त्तस्वरस्य रोदनस्य, पात्रं, भूषिता अलङ्कृताः, भुवि उषिताश्च, निःशेषपरिजना यत्र तत्, विलसद्भिः करेणुभिः हस्तिभिः, तथा विले सीदन्ति इति विलसत्का मूषिकाः, तेषां रेणुभिश्च गहनम् इति श्लिष्टपदानां भिन्नप्रकृत्यादिकत्वात् भिन्नत्वमेवेति सभङ्गश्लेषः। तथा समासभेदेन स्वरभेदात्तद्भेदेन च शब्दभेदावश्यकत्वात्तत्र जतुकाष्ठन्यायेन शब्दयोरेव श्लिष्टत्वात् शब्दश्लेषश्च इति)।।३१२।।

प्रभा

भिन्नपदश्लेषमुदाहरति–**दोषाकरेणेति।** प्रदोषः रजनीमुखम् अथवा प्रकृष्टाः दोषाः यस्मिन् स प्रदोषः मदनः प्रकृष्टक्रोधलोभमोहादिदोषवान् नृपश्च दोषवान् कश्चित् पुरुषश्च प्राकरणिकः। दोषाकरेण दोषायाः निशायाः करः निशाकर इत्यर्थः। पक्षे दोषाणामाकरः खनिस्तेन तथा नक्षत्रपथवर्तिना नक्षत्रमार्गे आकाशे वर्तते इति तथोक्तेन। क्षत्रपथे क्षत्रोचितशौर्याद्याचारे न वर्तते तेन। राज्ञा चन्द्रमसा केनचिन्नृपविशेषण च। संबन्धन संबन्धं प्राप्नुवन् सन्। अप्रियं प्रियाविरहितं द्वेष्यं च। माम् इत्थं एवम् किं न बाधते अपि तु बाधत एव। अत्र दोषाकरादिपदानां प्रकृतिप्रत्ययभेदेन भिन्नार्थप्रतिपादकत्वात् सभङ्गश्लेषोयम्। राज्ञेत्यत्र तु अभङ्गः। अत्र सभङ्गश्लिष्टपदानां बाहुल्यात् सभङ्गश्लेषः। अत एव लक्षणे प्रायः--

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पादोपादानं सार्थकमिति ज्ञेयम्। अर्वाचीनास्तु सभङ्गाभङ्गरूपं तृतीयभेदं परिकल्प्य तस्येदमुदाहरणं मन्वते। तन्मते सभङ्गश्लेषोदाहरणं तु–

पृथुकार्तस्वरपात्रं भूषितनिः शेषपरिजनं देव।
विलसत्करेणुगहनं संप्रति सममावयोः सदनम्।। इति।

अत्र श्लिष्टानि सर्वाण्यपि पदानि सभङ्गानि इति सभङ्भाश्लेषोयम्।।३१२।।

विवृति

भिन्नपदश्लेषमुदाहरति–

दोषा रात्रिः तत्करोतीति दोषाकरो रजनीकरस्तेन सम्बध्नन् सङ्घटमानः नक्षत्राणां पन्था मार्गः आकाशं नक्षत्रपथस्तस्मिन् वर्तत इति नक्षत्रपथवर्ती (.....) यद्वा क्षत्रपथे न वर्तत इति अक्षत्रपथवर्तीति क्रियाप्रतिषेधः। समासस्तु अश्राद्धभोज्यादिवत् द्रष्टव्यः। तेन राज्ञा नृपेण क्षत्रधर्मादपसृतेनायं सम्बन्धन् प्रकृष्टदोषो यस्यासौ प्रदोषो जनो मां अप्रियमनिष्टं किं न बाधत इति भिन्नपदं दोषाकरादिपदानां भिन्नपदत्वात्।।

भिन्नप्रायं दर्शयति **दोषेति।** प्रदोषः रजनीप्रथमयामः। नक्षत्रपथवर्तिना गगनचारिणा, दोषाकरेण, रजनीकरेण राज्ञा चन्द्रेण, सम्बन्धन्, अप्रियं प्रियारहितं मां बाधते इत्येकोऽर्थः। कश्चित् क्षत्रपथातिलङ्घिना दोषाणां आकरभूतेन नृपेण सम्बद्धः सन्, अप्रियं विद्विषं मां किं न बाधते? बाधत एव।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दोषेति। दोषाकरेण दोषाणाम् आकरेण, दोषा नाम रजनी, तां कुर्वता; सम्बध्नन् अन्तरङ्गत्वेन वर्तमानः संयुक्तश्च; नक्षत्रपथवर्तिना तारापथगामिना क्षत्रियमार्गातिलङ्घिना च; राज्ञा चन्द्रेण नरेन्द्रेण च; प्रदोषः प्रकृष्टदोषः रजनीमुखं च; अप्रियम् अनिष्टं प्रियारहितं च। किं न बाधते–किमिति प्रतिषेधे–बाधत एवेत्यर्थः। वाक्योच्चारणसमये प्रतीयमानादाकारान्तरमाश्रितैः पदैः अर्थान्तरप्रतिपत्तिः इति भिन्नपदप्रायमेतत्। प्रायशब्दस्य सर्वेषु पदेषु नैष विधिः इत्यर्थः।।३१२।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नियमाक्षेपरूपोक्तिरविरोधी विरोध्यपि।
तेषां निदर्शनेष्वेव रूपव्यक्तिर्भविष्यति॥३१३॥

रत्नश्री

नियमस्याक्षेपो निषेधो रूपं स्वभावो यस्यां तथाविधोक्तिरभिधानं यत्र तादृशोऽप्यस्ति कश्चित्। नात्र विरोधोऽस्तीत्यविरोधी। सोऽप्यस्ति। विरोधोऽसङ्गतिरत्र विद्यत इति विरोधी। सोऽप्यस्ति। नामसङ्कीर्तनमात्रेण न ज्ञायन्त इत्याह-तेषां श्लेषाणामभिन्नक्रियादीनां निदर्शनेषु लक्ष्येष्वेव नाभिधानमात्रेण रूपस्य प्रतिनियतस्य लक्षणस्य व्यक्तिः प्रत्यवगमो भविष्यति। ततो यथाक्रमं निदर्श्यन्त इति॥

हृदयङ्गमा

पूर्वोदाहरणद्वये श्लेषस्य प्राधान्यं दर्शयित्वा अलङ्कारान्तराणामपि शोभाजनकत्वेनाङ्गभूतं तं दर्शयिष्यन्नाह, उपमेति।-प्रागेव उपमारूपकाक्षेपव्यतिरेकादिः गोचरो येषां तादृशाः, श्लेषाः दर्शिताः अलङ्कारान्तरनिर्वाहकतया अङ्गत्वेन निरूपिताः इत्यर्थः, अपरे केचन अपरालङ्काराङ्गभूता इत्यर्थः, दर्श्यन्ते। (अत्र उपमा च साधारणधर्मप्रयोगवती बोध्या, ततः साधारणधर्मप्रयोगे तस्याभिन्नत्वे च, -"अम्भोरुहभिवाताभ्रम्" इत्यादि-धर्मोपमाश्लेषोपमादौ अर्थश्लेषः, "बालेवोद्यानमालेयं सालकाननशोभिनी" इत्यादिसमानोपमायान्तु शब्दश्लेषः। रूपकपदमपि अत्र साधारणधर्म्मप्रयोगवत् श्लिष्टरूपकादिपरं बोध्यम्। आक्षेपश्च "अमृतात्मनि पद्मानां द्वेष्टरि स्निग्धतारके"

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इत्यादि श्लिष्टाक्षेप एव। व्यतिरेकोऽपि साधारणधर्म्मप्रयोगवानेव। आदिना समासोक्त्यर्थान्तरन्यासादीनां परिग्रहः। एवमन्यत्रापि बोध्यम्)।।३१३।।

प्रभा

प्रधानभूतं श्लेषं सप्रकारं प्रदर्श्य अलंकारान्तरस्याङ्गत्वेन तस्य चारुतासंपादकत्वं दिदर्शयिषुराह–**उपमेति।** उपमारूप-काक्षेपव्यतिरेकाद्यलंकारेषु गोचराः विषयीभूताः श्लेषाः प्रागेव तत्तदलंकारोदाहरणेषु दर्शिताः। इदानीं केचन अपरे अन्यालंकाराङ्गभूता दर्श्यन्ते। तत्र–

शिशिरांशुप्रतिद्वन्द्वि श्रीमत् सुरभिगन्धि च।
अम्भोजमिव ते वक्त्रमिति श्लेषोपमा स्मृता।

इति श्लेषोपमादौ अर्थश्लेषः। बालेवोद्यानमालेयं सालकाननशोभिनी। इति समानोपमायां शब्दश्लेषः। एवम्–

राजहंसोपभोगार्हं भ्रमरप्रार्थ्यसौरभम्।
सखि वक्त्राम्बुजमिदं तवेति श्लिष्टरूपकम्।।

इति श्लिष्टरूपके शब्दश्लेषः। तथा–

अमृतात्मनि पद्मानां द्वेष्टरि स्निग्धतारके।
मुखेन्दौ तव सत्यस्मिन्नपरेण किमिन्दुना।।

इत्याक्षेपे द्विविधः श्लेषः। साधारणधर्मप्रयोगवति व्यतिरेकेपि एवमेव श्लेषो द्रष्टव्यः। आदिना अर्थान्तरन्याससमासोक्त्यादीनां परिग्रहः।।३१३।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विवृति

श्लेषोपमा श्लिष्टरूपकं श्लेषोक्षपः श्लेषव्यतिरेकः इत्यादिविषयाः प्रागेव तेषु तेष्वलङ्कारावसरेषु दर्शिताः श्लेषाः। इदानीं दृश्य(दर्श्य)न्ते केचनापरे।।

उपमेति। उपमाद्यलङ्कारेषु तत्तदलङ्काराङ्गतया श्लेषाः दर्शिताः। इदानीं अन्ये श्लेषप्रकाराः दर्श्यन्ते।।

उपमेति। सुबोधमेतत्।।३१३।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वभावमधुराः स्निग्धाः शंसन्त्यो रागमुल्बणम्।
दृशो दूत्यश्च कर्षन्ति कान्ताभिः प्रेषिताः प्रियम्॥३१४॥

रत्नश्री

कान्ताभिर्नायिकाभिः वासकशय्याभिः प्रेषिताः प्रयुक्ता दृशो दृष्टयो दूत्यश्च निसृष्टार्थादय[:] स्वभावेनैव मधुराः सुभगा उभय्योऽपि स्निग्धाः। प्रेमरसभाविता दृशः दूत्यस्त्वपरुषाः। रागं भावमुल्बणमुदीर्णमन्तर्गतमाकारविशेषेण शंसन्त्यः सूचयन्त्यो दृशः। दूत्यस्तु रागमुल्बणं नायिकानुरक्तिमधिकां चतुरमाचक्षाणाः कर्षन्ति वशीकुर्वन्ति प्रियं वल्लभम्, यत्र प्रेषिताः। अयमभिन्नक्रियः श्लेषः, कर्षणलक्षणयैकया क्रियया दृशां दूतीनां च सम्बन्धादिति॥

प्रभा

कथयितव्यान् भेदानुद्दिशति–**अस्तीति।** सुगमम्॥३१४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मधुरा रागवर्धिन्यः कोमलाः कोकिलागिरः।
आकर्ण्यन्ते मदकलाः श्लिष्यन्ते चासितेक्षणाः॥३१५॥

रत्नश्री

असितेक्षणाः स्त्रियः कोकिलानां गिरश्च वाचः। मधुराः मनोहराः द्वय्योऽपि। रागं रक्तिभावं वर्धयन्ति रागवर्धिन्यः उभय्योऽपि। कोमलाः कोकिलागिरः श्रवणानुद्वेजनीयत्वात्, असितेक्षणास्तु सुखस्पर्शत्वात्। कोकिलागिरो मदेन समयकृतेन हर्षविशेषेण कलाः पुष्टाः। असितेक्षणास्तु मदेन मधुपानजनितेन कलाः विह्वलाः। कोकिलागिर आकर्ण्यन्ते श्रूयन्ते। असितेक्षणास्तु श्लिष्यन्ते आलिङ्ग्यन्ते। [82b]अयमविरुद्धक्रियः श्लेषः, आकर्णनश्लेषणयोः सहभावादिति॥

हृदयङ्गमा

दर्शयिष्यमाणश्लेषभेदानाह, अस्तीति द्वाभ्याम्। –कश्चित् श्लेषः, अभिन्नक्रियः, कश्चित् अविरुद्धक्रियः, अपरः विरुद्धकर्मा च, अन्यः अनियमवानपि, नियमाक्षेपरूपोक्तिः, अविरोधी तथा विरोधी अपि अस्ति, निदर्शनेषु वक्ष्यमाणेषु उदाहरणेषु एव, तेषां भेदानां, रूपं स्वरूपम्, आविर्भविष्यति प्रकाशिष्यते। (भोजराजस्तु, भिन्नपदश्लेषः भिन्नक्रियश्लेषः भिन्नकारकश्लेषः अभिन्नपदश्लेषः अभिन्नक्रियाश्लेषः अभिन्नकारकश्लेषश्च इति षड्भेदमाह; उक्तञ्च,–"पदक्रियाकारकैः स्याद्भिन्नाभिन्नैः स षड्विधः" इति)॥३१४॥३१५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रभा

नियमेति। तेषां निर्दिष्टानामेषामित्यर्थः। निदर्शनेषु उदाहरणेषु रूपं स्वरूपम् आविर्भविष्यति प्रकटीभविष्यति।।३१५।।

विवृति

तानुद्दिशति–

अति(स्ति) श्लेषः कश्चित्। अभिन्ना क्रिया यस्य सः अभिन्नक्रियः। कस्ताव(कश्चि)त्(प्रथमः)। अविरुद्धा परस्पराबाधिनी क्रिया यस्योत्यविरुद्धक्रियः। अपरो द्वितीयः। विरुद्धं कर्मास्येति विरुद्धकर्मा। कर्म क्रियोच्यते। विरुद्धक्रियस्तृतीयोऽप्यस्ति। तथाऽतिप्रसक्तस्य विधि(:) दुःख(?)प्रतिषेधफलो नियमः सोऽस्यास्तीति नियमवान् चतुर्थोऽस्ति। नियमः उक्तलक्षणस्तस्य आक्षेपो निषेधः। स रूपं यस्याः सा नियमाक्षेपरूपोक्तिः अनियमवानित्यर्थः। स च पञ्चमोऽस्ति। विरोधोऽस्यास्तीति विरोधी न विरोधी अविरोधी षष्ठः। तथा विरोधो विप्रतिषेधः सोऽस्यास्तीति विरोधी। सोऽप्यस्ति सप्तमः। तेषामभिन्नक्रियादीनां सप्तानामपि श्लेषाणां निदर्शनेषूदाहरणेष्विव रूपमाविर्भविष्यति।।

तानेव प्रकारान् उद्दिशति–**अस्तीति।** तेषां नामान्येव लक्षणानि।।३१४–३१५।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रागमादर्शयन्नेष वारुणीयोगवर्धितम्।
पराभवति घर्मांशुरङ्गजस्तु विजृम्भते॥३१६॥

रत्नश्री

एष घर्मांशुरादित्यः पराभवत्यस्तमेति। अङ्गजस्तु कामो विजृम्भते समुद्भवति। वारुण्या प्रतीच्या दिशा योगेन सङ्गमेन वर्धितमुपबृंहितं रागमरुणिमानम् आदर्शयन् धर्मांशुः पराभवतीति प्रकृतम्। अङ्गजस्तु वारुण्या मदिरया योगेन पानलक्षणेन वर्धितं रागं रतिभावमादर्शयन् विभ्रमैराविष्कुर्वन् विजृम्भत इति प्रक्रान्तम्। इयं विरुद्धक्रियः श्लेषः, पराभवविजृम्भणयोरस्तमयोदयरूपयोः परस्परविरोधात् इति॥

हृदयङ्गमा

तत्र अभिन्नक्रियमुदाहरति, वक्रा इति। –कान्ताभिः प्रेषिताः प्रक्षिप्ताः आनेतुं प्रेरिताश्च, वक्राः तिर्य्यक् निक्षिप्ताः कुटिलमार्गदर्शयित्र्यश्च, स्वभावेन मधुराः मनोहारिण्यः मिष्टभाषिण्यश्च, तथा उल्वणम् अतिप्रवृद्धं, रागं लौहित्यं प्रमानुरागञ्च, शंसन्त्यः सूचयन्त्यः प्रकाशयन्त्यश्च, दृशः नयनानि, दूत्यश्च प्रियान् कर्षन्ति आवर्जयन्ति, आकृष्य नयन्तीत्यर्थः। (अत्र कर्षन्ति इति एकस्यां क्रियायां दृशां दूतीनाञ्च श्लिष्टपदत्वेन सम्बन्धात् अभिन्नक्रियो नाम श्लेषः, स च तुल्ययोगिताऽलङ्कारस्य पोषकत्वात् तदङ्गभूत इति मन्तव्यम्। केचित्तु एकया क्रियया वाक्यद्वयस्य दीपनात् प्रधानस्य दीपकस्य अङ्गमित्याहुः)॥३१६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रभा

अभिन्नक्रियाश्लेषमुदाहरति–**वक्रा इति।** कान्ताभिः प्रियाभिः। प्रेषिताः क्षिप्ताः नायकानयनार्थं प्रेषिताश्च। वक्राः तिर्यक्प्रसारिण्यः वक्रोक्तिनिपुणाश्च। स्वभावमधुराः स्वाभाविकमनोहराः मधुरस्वभावाश्च। उल्बणम् अत्यन्तं प्ररूढम्। रांग लौहित्यम् अनुरागं च। शंसन्त्यः सूचयन्त्यः कथयन्त्यश्च। दृशः नयनानि दूत्यश्च प्रियान् कर्षन्ति आवर्जयन्ति। अत्र वक्रादिविशेषणानां श्लिष्टत्वं दृग्दूतीनां च कर्षणरूपैक-क्रियायामन्वयः। श्लेषस्य एकक्रियत्वं च स्वाश्रयीभूतविशेषणानां विशेष्ययोर्दृग्दूत्योरेककर्षणक्रियावत्त्वात् परंपरया बोध्यम्। अत्र–

विवक्षितगुणोत्कृष्टैर्यत् समीकृत्य कस्यचित्।
कीर्तनं स्तुतिनिन्दार्थं सा मता तुल्ययोगिता।।

इति वक्ष्यमाणस्वरूपायास्तुल्ययोगिताया निर्वाहकत्वादयं श्लेषस्तुल्ययोगिताङ्गभूतः। अपरे तु एकक्रियया वाक्यद्वयदीपनात् क्रियादीपकस्याङ्गभूतोयमित्याहुः।।३१६।।

विवृति

तत्राभिन्नक्रियमुदाहरति–

दृशां दूतीनां च प्रियाकर्षणमभिन्नक्रियेत्यभिन्नक्रियः। शेषमृजु।।

अभिन्नक्रियमुदाहरति–**स्निग्धा** इति। स्निग्धाः शीतलाः प्रेम वत्यश्च, स्वभावमधुराः प्रसन्ना मनोहराश्च, उल्बणं रागं शंसन्त्यः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सूचयन्त्यः कथयन्त्यश्च, प्रेषिताः अभिमुखप्रेरिता गच्छेति चोदिताश्च। दृशां दूतीनां च कर्षन्तीति एकक्रियायोगात् अभिन्नक्रियत्वम्।।

अभिन्नक्रियो यथा–अत्र कर्षन्तीति एकस्यां क्रियायां दृशां दूतीनां च एकाकारपदविशेषितानां आवेशात् अभिन्नक्रियो नाम श्लेषविशेषः।।३१६।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निस्त्रिंशत्वमसावेव धनुष्येवास्य वक्रता।
शरेष्वेव नरेन्द्रस्य मार्गणत्वं च वर्तते॥३१७॥

रत्नश्री

अस्य नरेन्द्रस्य कस्यचिन्निस्त्रिंशत्वम् असौ खड्ग एव वर्तते न म[न]सि निस्त्रिंशत्वम्। असित्वं क्रौर्यं चेति श्लिष्टम्। धनुष्येव वक्रता। न चेतसि वक्रता। नतत्वं शाठ्यं चेति श्लिष्टिः। शरेषु बाणेष्वेव मार्गणत्वं नात्मनि। मार्गणत्वं शरत्वं याचकत्वं चेति श्लिष्यते। अयं नियमवान् श्लेषः। असावेवेत्यवधारणप्रयोगादिति॥

हृदयङ्गमा

अविरुद्धक्रियमुदाहरति, मधुरा इति।–मधुराः मनोहारिण्यः माधुर्य्याख्यस्वाभाविकाङ्गनालङ्कारवत्यश्च; (माधुर्य्यलक्षणन्तु उक्तं यथा, –"सर्वावस्थाविशेषेषु माधुर्य्यं रमणीयता" इति) रागवर्द्धिन्यः उद्दीपकत्वात् प्रणयाविष्करणाच्च अनुरागं वर्द्धयन्त्यः, कोमलाः सुखश्रवाः मृद्वङ्ग्यश्च, तथा मदकलाः वसन्तागमनजनितहर्षेण मधुरास्फुटाः सौभाग्यादिजनितगर्वेण मृदुमन्दभाषिण्यश्च; (मदलक्षणन्तूक्तं यथा, –"मदो विकारः सौभाग्ययौवनाद्यवलेपजः" इति) तथा आसितेक्षणा आसिते उपवेशिते, अन्तः प्रमोदजननात् निश्चलीकृते इति यावत्, ईक्षणे नयने याभिस्ताः, सर्वोऽपि मधुरं शब्दमाकर्णयन् निश्चलाक्षो भवतीति भावः, कोकिलानां गिरः वाचः, आकर्ण्यन्ते श्रूयन्ते, तथा कोकिलागिरः कोकिलानां गिर इव गिरः यासां ताः मधुरभाषिण्य इत्यर्थः, असितेक्षणाः नीलोत्पललोचनाः हरिणचक्षुषः इति वा,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्लिष्यन्ते च आलिङ्ग्यन्ते च, कामिभिरिति शेषः। (अत्र आकर्ण्यन्ते श्लिष्यन्ते च इति क्रियापदद्वितयस्य प्राधान्यतः समुच्चयेन उपात्तस्य मधुरा इत्यादिभिः श्लिष्टैः पदैः कोकिलागिरः इति अभितेक्षणाः इति वा विशेष्यैकपदवर्जं पर्य्यायतः सम्बन्धो भवति। स च परस्परमविरुद्धः इति अविरुद्धक्रियोऽयमभङ्गश्लेषः पूर्ववत् तुल्ययोगितामेव पुष्णातीति तदङ्गम्। भोजस्तु विभिन्नक्रिययोर्भिन्नर्थैकरूपाणां पदार्थानामुपश्लेषात् भिन्नक्रिय-श्लेषोऽयमित्याह)।।३१७।।

प्रभा

अविरुद्धक्रियाश्लेषमुदाहरति—**मधुरेति।** कोकिलागिर आकर्ण्यन्ते। असितेक्षणाश्च श्लिष्यन्ते। उभे अपि श्लिष्टविशेषणैर्वर्णयति। मधुराः स्वरमाधुर्यशालिन्यो माधुर्याख्यनायिकालंकारयुक्ताश्च। माधुर्यं च—सर्वावस्थाविशेषेषु माधुर्यं रमणीयता। इत्युक्तप्रकारकम्। रागवर्धिन्यः उद्दीपकत्वेन प्रणयाविष्कारेण च अनुरागं वर्धयन्त्यः। कोमलाः कर्णमधुरा मृदुगात्र्यश्च। मदकला वसन्तप्रारम्भे मदोन्मत्ताः सौभाग्याद्यवलेपविकारवत्यश्च। उक्तं च मदलक्षणं यथा—मदो विकारः सौभाग्ययौवनाद्यवलेपज इति। अत्राकर्णनाश्लेषण-क्रिययोरेककालीनत्वसंभवेनाविरोधः। श्लेषस्य अविरुद्धक्रिया-संबन्धश्च स्वाश्रयविशेषणविशेष्ययोः कोकिलालापासितेक्षणयोः कर्मत्वेन संबन्धात् तत्संबन्धेन परंपरया बोध्यः। अत्रापि श्लेषस्य तुल्ययोगिताङ्गत्वं ज्ञेयम्।।३१७।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विवृति

अविरुद्धक्रियमुदाहरति–

मधुरा रागवर्धिन्यः कोमलाः कोकिलानां गिरः मदकलाः आकर्ण्यन्ते। तथा श्लिष्यन्ते चासितेक्षणाः कामिन्यः। कथंभूता इत्याह–मधुराः माधुर्यगुणयुक्ताः रागवर्धनशीलाः कोमलाः अपरुषाः मदेन कला व्याप्ताः कोकिलानामिव गीश्शब्दो यासां ताः कोकिलागिर इति कोकिलगिरामसितेक्षणानां चाविरुद्धे आकर्णनालिङ्गने क्रिये इत्यविरुद्धक्रियः।।

अविरुद्धक्रियाद्वयं दर्शयति–**मधुरा इति।** मधुराः श्रुतिसुभगाः, रागवर्धिन्यः स्मरोद्दीपनकर्यः ; कोमलाः मृदवः, असितेक्षणाः निश्चलोकृतेक्षणाः, कोकिलानां गिरः आकर्ण्यन्ते। मधुराः मनोहराः, रागवर्धिन्यः स्वप्रेम्णा रागोद्दीपिन्यः, कोमलाः मृद्वङ्ग्यः, कोकिलासदृशगिरः असितेक्षणाः तरुण्यः आश्लिष्यन्ते। आकर्ण्यन्ते श्लिष्यन्ते इति क्रिये अविरुद्धे।।

भिन्नक्रियो यथा–**मधुरा इति।** अत्र आकर्ण्यन्ते श्लिष्यन्ते च इति क्रियापदद्वयस्य प्राधान्यतः समुच्चयेन उपात्तस्य मधुराः इत्यादिश्लिष्टपदैः कोकिलागिरः इति असितेक्षणाः इत्यपि विशेष्यैकपदवर्जं पर्यायतः सम्बन्धो भवतीति भिन्नक्रियो नाम श्लेषविशेषः।।३१७।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पद्मानामेव दण्डेषु कण्टक य त।
अथवा दृश्यते रागिमिथुनालिङ्गनेष्वपि॥३१८॥

रत्नश्री

देव! त्वयि रक्षति जगतीं पद्मानां [एव] दण्डेषु नालेषु कण्टको दृश्यते, न राज्ये। कण्टकः कार्कश्यलक्षणः, पद्मदण्डेषु राजविपक्षश्चेति श्लिष्टत्वात्। अयं नियम आक्षिप्यते। अथवा कथम् नियम्यते? यतो रागिणां वा मिथुनानि स्त्रीपुंसयुग्मलक्षणानि तेषामन्योन्यालिङ्गनेष्वपि विषये[षु]कण्टकः रागजनितपुलकरूपो दृश्यते। तत्कथमेवमवधार्यत इति नियमाक्षेपरूपोक्तिरयं श्लेष इति॥

हृदयङ्गमा

विरुद्धक्रियाद्वयश्लेषमुदाहरति, रागमिति।–एष घर्मांशुः सूर्य्यः, वारुण्याः पश्चिमाशायाः सुरायाश्च, योगेन समाश्रयेण पानेन च, वर्द्धितं रागं लौहित्यम् अनुरागञ्च, आदर्शयन् प्रकटयन्, तिरोभवति अस्तं गच्छति, अङ्गजस्तु कामस्तु, विजृम्भते उद्योतते। (अत्र तिरोभवनजृम्भणक्रिये परस्परं विरुद्धे इति विरुद्धक्रियश्लेषस्तथैव तुल्ययोगितां परिपुष्णातीति तदङ्गम्)॥३१८॥

प्रभा

विरुद्धक्रियं श्लेषमुदाहरति–**रागेति।** एषः पुरो दृश्यमानः। घर्मांशुः सूर्यस्तिरोभवति अस्ताचलं गच्छति। अङ्गजस्तु मदनस्तु विजृम्भते उद्योतते। उभौ अपि श्लिष्टविशेषणेन वर्णयति–**रागमिति।** वारुणी पश्चिमदिक् तस्या योगेन संबन्धेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वर्धितं स्फीतम् रागं लौहित्यम् आदर्शयन्। पक्षे वारुणी मदिरा तस्या योगः सेवनं तेन वर्धितम् रागं अनुरागम् आदर्शयन्। अत्र तिरोभवनविजृम्भणक्रिये परस्परविरुद्धे। श्लेषस्य तत्र संबन्धः पूर्ववत् परंपरया ज्ञेयः। अत्र तुल्ययोगितालंकारः प्रधानतया वर्तते।।३१८।।

विवृति

विरुद्धक्रियमुदाहरति–

एष घर्मांशुरादित्यः पराभवमिति (मेति। अथ वा पराभवति) तिरोधत्ते अस्तमुपयाति। किं कुर्वन् रागं रक्ततामादर्शयन्। पराभवविजृम्भणक्रिययोर्विरुद्धत्वात् विरुद्धकर्मा।।

विरुद्धक्रियमुदाहरति–**रागमिति।** वारुणीयोगवर्धितं प्रतीचीसम्बन्धवर्धितं, रागं लौहित्यं, आदर्शयन् धर्मांशुः तिरोभवति। तस्मिन् काले वारुणीयोगवर्धितं मधुपानवर्धितं, रागं रतेषु इच्छाम्, आदर्शयन् जनयन्, अङ्गजो विजृम्भते। तिरोभवति विजृम्भते इति क्रिये विरुद्धे।।

विरुद्धकर्मा यथा–**रागमिति।** अत्र विरुद्धक्रियत्वं नाम वारुणीयोगवर्धितस्य रागस्य प्रदर्शने तुल्येऽपि, सूर्यलक्षणस्य वस्तुनः तिरोभवनं स्मरलक्षणस्य तु विजृम्भणम्, इति विरद्धस्य क्रियाद्वयस्य दर्शनात् विरुद्धकर्मा नाम श्लेषविशेषः। रागो वर्णविशेषः कामश्च, वारुणी दिक् सुरा च।।३१८।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महीभृद्भूरिकटकस्तेजस्वी नियतोदयः।
दक्षः प्रजापतिश्चासीत् स्वामी शक्तिधरश्च सः॥३१९।

रत्नश्री

स विवक्षितः कश्चिन्महीभृत्पर्वतः राजा च, भूरयो महान्तः कटकाः सानवो यस्य पर्वतस्य। भूरिर्विशालः कटकः स्कन्धावारः हस्ताभरणविशेषो वा यस्य स भूरिकटको राजा। तेजस्वी रविः प्रभावविशेषयुक्तश्च नियतः प्रतिदिनमुदयः प्रभावलक्षणो यस्य स नियतोदयो रविः, नियतः स्थिरः उदयो राज्यरूपो यस्य स नियतोदयो राजा। दक्षो नाम प्रजापतिर्विधाता कश्चित्। राजा च दक्षः शूरः प्रजानां लोकानां च [83a] पतिः अधिपः स्वामी कार्त्तिकेयः प्रभुश्च, शक्तिः आयुधविशेषः तां धारयतीति शक्तिधरः स्कन्दः। शक्तिमुत्साहमन्त्रप्रभावरूपां धारयतीति शक्तिधरो राजा। आसीदभूत्। अयमविरोधी श्लेषः। महीभृद्भूरिकट-कत्वादीनामुभयत्राप्यव्याहतेरिति।।

हृदयङ्गमा

नियमवन्तं श्लेषमुदाहरति, निस्त्रिंशत्वमिति। –अस्य नरेन्द्रस्य निस्त्रिंशत्वं निर्गतस्त्रिंशतोऽङ्गुलिभ्य इति व्युत्पत्त्या त्रिंशदङ्गुल्यधिकपरिमाणवत्त्वं निर्दयत्वञ्च, ("अथ निस्त्रिंशः खड्गे ना निर्दये त्रिषु" इति मेदिनी) अमौ खड्गे एव, न तु हृदये इति भावः, तस्य खड्गाद्यस्त्रे त्रिंशदङ्गलाधिकपरिमाणत्वमासीत् हृदये निर्दयत्वं नामीदिति समुदितार्थः, वक्रता कौटिल्यं प्रतिकूलता च, धनुष्येव, न व्यवहारे इति भावः, धनुष्येव कौटिल्यं न तु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लोकव्यवहारे प्रतिकूलत्वमिति निष्कर्षः ; मार्गणत्वं बाणत्वं याचकत्वञ्च, शरेषु एव, न तु आत्मनि इति भावः, वर्त्तते इति सवत्रान्वेतव्यम्। (अत्र प्रत्येकमेवकारेण निस्त्रिंशत्वादिपदानां द्वितीयार्थाः व्यवच्छिद्येषु निषिद्धतया प्रतीयन्ते इति पदानामनेकार्थवत्त्वात् श्लेषः, स च एवकारेण नियमद्योतनात् नियमवान्। इह परिसङ्ख्याऽलङ्कार एव प्रधानं तदङ्गभूतश्च श्लेषः इति बोध्यम्। परिसङ्ख्यालङ्कारश्च ग्रन्थकृता अनुक्तः परं वैचित्र्यसद्भावात् अपरैरुक्तोऽपि स्वीकार्य्यः ; उक्तञ्च विश्वनाथेन, –"प्रश्नादप्रश्नतो वाऽपि कथितात् वस्तुनो भवेत्। तादृगन्यव्यपोहश्चेच्छाब्द आर्थोऽथवा तदा।। परिसङ्ख्या–" इति। आर्थपरिसङ्ख्यायाम् एवकाराभावेऽपि अन्यव्यवच्छेदरूपनियमः सामर्थ्यादेव प्रतीयते यथा, –"यस्मिंश्च राजनि जितजगति परिपालयति महीं, चित्रकर्म्मसु वर्णसङ्कराः, चापेषु गुणच्छेदाः" इत्यादि; अत्र चित्रकर्मस्वेव वर्णानां नीलपीतादीनां सङ्कराः मिश्रणानि, न तु प्रजासु वर्णानां ब्राह्मणादीनां सङ्करा इति स्फुटम् अर्थद्वयस्य नियमस्य च प्रतीयमानत्वात् नियमश्लेषार्थपरिसङ्ख्यायोरङ्गाङ्गिभावेनोपपत्तिरवगन्तव्या। न च "विधिरत्यन्तमप्राप्ते नियमः पाक्षिके सति। अत्र चान्यत्र च प्राप्ते परिसङ्ख्येति गीयते।।" इत्यनेन नियमपरिसङ्ख्ययोर्भेदप्रतीतेः कथमनयोः नियमपरिसङ्ख्ययोरेकत्रसमावेश इति वाच्यम्? मतेऽस्मिन् परिसङ्ख्याया अन्यव्यपोहमात्रप्रतीतिरूपार्थत्वात् व्यपोहस्यात्र स्फुटं प्रतीयमानत्वाच्च। वैयाकरणनये एव तादृग्लक्षणनियमपरिसङ्ख्ययोर्भेदाङ्गीकारे न कश्चिद्दोष इति बोध्यम्)।।३१९।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रभा

सनियमश्लेषमाह–**निस्त्रिंशत्वमिति।** अस्य नरेन्द्रस्य। असौ खड्गे एव नतु मनसि। निःस्त्रिंशत्वम् निर्गतः त्रिंशतः अङ्गुलिभ्यः इति निस्त्रिंशः त्रिंशदङ्गुल्यधिकपरिमाणत्वम् निर्दयत्वम् च धनुष्येव वक्रता आकर्षणेन असरलता प्रतिकूलता च मार्गणत्वं शरत्वं याचकत्वं च। शरेषु एव न तु प्रजासु। वर्तते इति सर्वत्रान्वेतव्यम्। अत्र प्रतिवाक्यं एवकारेण द्वितीयार्थानां व्यवच्छिन्नत्वाद् अयं नियमवानर्थश्लेषः। अत्र–अनेन च परिसंख्यायाः परिपोषः। ग्रन्थकृता अस्वीकृतापि परिसंख्या स्फुटवैचित्र्यादङ्गीकार्येति टीकाकाराः। वयं तु नियमश्लेषेणैव तस्याः सर्वस्य विषयस्याक्रमणात् किं परिसंख्येति नामान्तराश्रयणे प्रयोजनमस्तीति न जानीमः। दर्श्यन्ते केचनापरे इति अङ्गाङ्गिरूपस्य उभयस्यापि श्लेषस्य दर्शनं प्रतिज्ञातमवबोद्धव्यम्। तथा चात्र आचार्यमतेन अङ्गी श्लेष एव न परिसंख्याङ्गभूत इति विचारणीयम्।।३१९।।

विवृति

नियमवन्तं श्लेषमुदाहरति–

खड्ग एवास्य राज्ञो निस्त्रिंशत्वं नान्यत्र; निस्त्रिंशः क्रूर उच्यते; धनुष्येव वक्रता नान्यत्र; वक्रस्वभावता कुटिलता। शरेष्वेव मार्गणत्वं नान्यत्र; मार्गणत्वं याचकत्वं व्यवस्थितमिति नियमवान् श्लेषः।।

नियमश्लेषं दर्शयति–निस्त्रिंशत्वमिति। अस्य नरेन्द्रस्य असावेव निस्त्रिंशत्वं न परिजने; निस्त्रिंशत्वं क्रूरत्वम्। धनुष्येव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वक्रता अनृजुत्वं न मानसे कौटिल्यम्। शरेष्वेव मार्गणत्वं न वाचि फलार्थयाचनम्। निस्त्रिंशत्वादीनाम् अस्यादावेव इति.... नियमश्लेषत्वम्।।

नियमवदुदाहरणम् **निस्त्रिंशत्वमिति।** अत्र निस्त्रिंशतादि चित्तादिविषयान्तरात् निवर्त्य खड्गादावेव स्थापितम् इति नियमवान् नाम श्लेषविशेषः। निस्त्रिंशत्वं मनस्तैक्ष्ण्यम् अन्यत्र कृपाणता। वक्रता अनार्जवं कुण्डलितत्वं च। मार्गणत्वं याचकत्वं सायकत्वञ्च।।३१९।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अच्युतोऽप्यवृषोच्छेदी राजाप्यविदितक्षयः।
देवोऽप्यविबुधो जज्ञे शङ्करोऽप्यभूजङ्गवान्॥३२०॥

रत्नश्री

अच्युतो विष्णुः, न्यायभ्रंशाभावात्। स्थिरश्च। तत्र यदाऽच्युतो विष्णुस्तदा वृषस्य वृषभस्य अरिष्टनाम्नस्तेनोच्छेदाद् अवृषोच्छेदित्वं विरुद्धम्। पक्षान्तरे तु अविरुद्धम्, वृषस्य धर्मस्य राज्ञा अनुच्छेदात्। राजा चन्द्रः, नृपश्च। तत्र चन्द्रस्य अविदितः क्षयोऽनेनेत्याविदितक्षयत्वं विरुद्धम्, दक्षशापेन कृष्णपक्षे क्षीयमाणत्वात्। पक्षान्तरे तु राज्यापचयाभावादव्याघातः। देवो गतिदेवो विबुधः। सम्मतिदेवश्च राजा। तत्र गतिदेव कथमविबुधः, असुर इति विरुध्यते। सम्मतिदेवस्तु राजा, विबुधाः पण्डिता विगता यतः। न तथा अविबुधः बुधयुक्तः पण्डितमण्डलमण्डिता-स्थानमण्डपः। शङ्करस्त्रिलोचनः, शान्तिकरश्च। तत्र त्रिनेत्रः फणिधरनद्धजटाजूटः सारसनीकृतनागः कुण्डलीकृतपन्नगः कथमभुजङ्गवान् इति विरोधः। राजा तु धूर्तसंसर्गाभावाद् अभुजङ्गवानिति युज्यते। जज्ञे विदितः क्रियाविदित इति सर्वत्र सम्बन्धनीयम्। अयं विरोधी श्लेष उदाहृतः॥

॥ इति श्लेषचक्रम् ॥

विशेषोक्तिमाविष्कुर्वन्नाह–

हृदयङ्गमा

नियमाक्षेपरूपोक्तिश्लेषमुदाहरति, पद्मानामिति। –त्वयि रक्षति सति पद्मानामेव दण्डेषु नालेषु, न तु दण्डनामकोपायेषु इति भावः,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथवा रागिणः अनुरक्तस्य, मिथुनस्य स्त्रीपुंसयोः द्वन्द्वस्य, आलिङ्गनेषु अपि कण्टकः तीक्ष्णाग्रः तरोरवयवविशेषः क्षुद्रशत्रुः रोमाञ्चश्च, ("रोमाञ्चे क्षुद्रशत्रौ च तरोरङ्गे च कण्टकः" इति शाश्वतः) दृश्यते। (अत्र यद्मानामेवेति नियमस्य अथवेत्यादिना आक्षेपरूपा उक्तिरिति नियमाक्षेपरूपोक्तिश्लेषः ; स च पूर्वार्द्धे परिसङ्ख्यायाः प्राधान्यात् उभयोरेवार्द्धयोश्च एकत्र निहितकण्टकस्य वाक्यद्वयोद्दीपनेन दीपकस्य प्राधान्याच्च तदङ्गमित्यवधेयम्)॥३२०॥

प्रभा

नियमाक्षेपरूपोक्तिश्लेषमुदाहरति–**पद्मानामेवेति।** त्वयि रक्षति सति पद्मानामेव दण्डेषु कण्टकः न तु प्रजासु। कण्टकः तीक्ष्णाग्रावयवविशेषः क्षुद्रशत्रुश्च। नियमश्लेषमाक्षिपति–**अथवेति।** रागिमिथुनस्य अनुरक्तकामिनोरालिङ्गनेषु अपि कण्टकः रोमाञ्चः दृश्यते। अत्र पद्मानामेव इति सनियमश्लेषस्य अथवेत्यादिना आक्षेपः। अतो नियमाक्षेपरूपोक्तिश्लेषः। स च एकत्र निहितस्य कण्टकस्य वाक्यद्वयोद्दीपनात् प्रधानस्य दीपकस्याङ्गमिति ध्येयम्॥३२०॥

विवृति

नियमाक्षेपरूपोक्तिमुदाहरति–

पद्मानामेव नालेषु कण्टकस्त्वयि रक्षति। नान्यत्र राजाराजयोः(?) कण्टकाः सन्तीति नियमः तस्याक्षेपोऽथवा दृश्यते। रागमिथुनालिङ्गनेष्वपि कण्टको रोमहर्ष इति नियमनिषेधा(त्) नियमाक्षेपरूपोक्तिः श्लेषः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनियमश्लेषं दर्शयति–**पद्मानामिति।** पद्मानां दण्डेषु नालेषु कण्टकः तीक्ष्णाग्रः अवयवः ; रागिमिथुनालिङ्गनेषु कण्टको रोमाञ्चः। त्वयि रक्षति सति न राज्ये कण्टकः क्षुद्रशत्रुः भवति। पद्मानामेव इति कृतस्य नियमस्य भङ्गात् अयं नियमाक्षेपरूपः श्लेषः।।

नियमाक्षेपोदाहरणम्–**पद्मानामिति।** कण्टकः प्रसिद्धः, कदाचित् चोरादिः। पद्मदण्डेष्वेव नियमितकण्टकसद्भावस्य अथ वेति आक्षिप्य रागिमिथुनालिङ्गनेष्वपि सद्भावकथनात् नियमाक्षेपो नाम श्लेषः। आलिङ्गनेषु कण्टकशब्देन रोमाञ्चः अभिधीयते।।३२०।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गुणजातिक्रियादीनां यत्तु वैकल्यदर्शनम्।
विशेषदर्शनायैव सा विशेषोक्तिरिष्यते॥३२१॥

रत्नश्री

गुणश्च जातिश्च क्रिया च आदिशब्देन द्रव्यपरिग्रहः। तेषां वैकल्यस्याभावस्य दर्शनं वचनं यत्तत्। किमर्थम्? विशेषस्यातिशयस्य कस्यचित्कार्यविषयस्य दर्शनाय प्रतिपादनार्थमेव। अत एव विशेषपरत्वात् सा तल्लक्षणा विशेषोक्तिरिष्यते मनीषिभिरिति॥

तामुदाहरन्नाह–

हृदयङ्गमा

अविरोधिनमुदाहरति, महीभृदिति। –सः महीभृत् राजा, भूरिकटकः बहुस्कन्धावारः, तेजस्वी प्रतापवान्, तथा नियतोदयः सततोन्नतिशाली, दक्षः निपुणः, प्रजापतिः प्रजापालः, स्वामी प्रभुः शक्तिधरः प्रभावोत्साहमन्त्रजशक्तिसम्पन्नश्च, आसीत्। पक्षे, –महीभृत् पर्वतः, भूरिकटकः विशालनितम्बः ; तेजस्वी दीप्तिमान्, सूर्य्य इत्यर्थः, नियतोदयः प्रतिदिवसं जातोदयः ; तथा दक्षः तदाख्यो राजा च, प्रजापतिः सृष्टिकर्त्ता, स्वामी विशाखश्च, कार्त्तिकेय इत्यर्थः, ("स्वामी प्रभुविशाखयोः" इति मेदिनी) शक्तिधरः शक्त्याख्यास्त्रविशेषधारी, आसीत्। (अत्र महीभृत् तेजस्वि-दक्ष-स्वामिशब्दाः राजपक्षे विशेषणतया पक्षान्तरे च विशेष्यतया अन्वेतव्याः। महीभृदादीनां चतुर्णां ये एकैकविशेषधर्मास्ते सर्वे एकस्मिन्नेव राजनि विद्यन्ते इति वैचित्र्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बोध्यम्। किञ्च महीभृदादिश्लिष्टपदार्थानां परस्परसम्बन्धे अविरोधात् अयम् अविरोधी श्लेषः)।।३२१।।

प्रभा

अविरोधिश्लेषमुदाहरति–**महीभृदिति।** स नृपः। महीभृत् महीं बिभर्तीति महीभृत् पृथ्वीधारकः पर्वतश्च। भूरिकटकः बहुस्कन्धावारो विशालनितम्बश्च अस्ति। तथा स तेजस्वी प्रतापवान् सूर्यश्च। नियतोदयः सततोन्नतिशाली नियतोद्गमश्च। तथा दक्षः निपुणः प्रजापतिविशेषश्च। प्रजापतिः प्रजापालकः सृष्टिकर्ता च। तथा स्वामी प्रभुः कार्तिकेयश्च। शक्तिधरः प्रभावोत्साहमन्त्रशक्तिसंपन्नः आयुधविशेषवांश्च अस्ति अत्र महीभृद्, भूरिकटकः, तेजस्वी, नियतोदयः, दक्षः, प्रजापतिः, स्वामी, शक्तिधरः, इति श्लिष्टपदयुगलानामविरोधित्वाद-विरोधिश्लेषः। स एव चात्र प्रधानः।।३२१।।

विवृति

अविरोधिनं श्लेषमुदाहरति–

महीभृत् पर्वतः राजा च। भूरयः कटका(अ)धित्यका यस्य तथा भूरिकटकः। तथा तेजस्वी तेजोऽस्यास्तीत्यादित्यः। तथा तेजः प्रतापः तद्वान्। नियतोऽवश्यंभावी उदय उद्गमोऽभ्युदयश्च (यस्य)। दक्षः कुशलः प्रजानां चतुर्वर्णाश्रमलक्षणानां पतिर्नाथः। तथा दक्षः गौर्याः पिता सत्याः प्रजापतिर्नाम। स्वामी कार्तिकेयः कुमार(:) स्वामिन्निति ऐश्वर्ये निपात्यते। तेन स्वामी (शक्तिः) प्रधानमाद्या प्रकृतिः तथा शक्तिस्त्रीमुखमाधुर्य(?)तान् (तां) धारयति शक्तिधरः। तथा प्रभुमन्त्रोत्साहलक्षणास्तिस्त्रः शक्तयः ता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धारयतीति शक्तिधरः स्व[रश्च] आदि[सी]दित्यविरोधी। महीभृद्भूरिकटकादीनां विरोधाभावात्।।

अविरोधिश्लेषमुदाहरति–**महीभृदिति।** महीभृत् राजा भूरिकटकः विस्तीर्णनगरः, गिरिः विपुलनितम्बः ; तेजस्वी बलवान् नियतोदयः अभङ्गुरार्थोदयः, रश्मिमान् नियमेन उदेति; दक्षः क्षिप्रकारी प्रजापतिः प्रजापालकः। दक्षो नाम प्रजापतिषु एकः। स्वामी जगतः ईशः शक्तिधरः बलवान् शक्तिरूपायुधधरः इति विशेष्यविशेषणे परस्परानुकूले आरोप्येते इति अविरोधिश्लेषः।।

अविरोध्युदाहरणम्–**महीभृदिति।** भूरिकटकत्वादयो महीभृदादीनां अविरुद्धाः इति अविरोधी नाम श्लेषविशेषः। महीभृत् पर्वतो राजा च। भूरिकटकः अनेकसानुः अनेकमूल्यकटकः। तेजस्वी दीप्तिमान् नियतोदयः एकत्र सूर्योदयो गृह्यते, अन्यत्र व्यवस्थितसमृद्धिः ; सूर्यादीनां उदयः प्रादुर्भावः नियमेन। दक्षः समर्थः दक्षप्रजापतिः। प्रजानां अधिपः प्रजापतिः इति च केषांचित् सामान्याभिधानम्। स्वामी नाथः स्कन्दश्च। शक्तिधरः प्रभुमन्त्रोत्साहशक्तिधरः आयुधविशेषधरश्च।।३२१।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न कठोरं न वा तीक्ष्णमायुधं पुष्पधन्वनः।
तथापि जितमेवासीदमुना भुवनत्रयम्॥३२२॥

रत्नश्री

पुष्पधन्वनः कामस्यायुधं कुसुम[म]न्यद्वा तादृशं न कठोरं न कठिनम् न च अतितीक्ष्णं न च निशातं यथान्यत्, आयुधमयोमयं तेजितं खड्गादि तथाप्येवमपीति विशेषविवक्षायाम्। यदाह-अमुना पुष्यधन्वना आयुधेन वा भुवनानां स्वर्गादीनां त्रयं कृत्स्नं जगत् जितमाक्रान्तमेव नाजितमपि आसीदभवत्। [83b] अहो चित्रम्! इह काठिन्यतैक्ष्ण्यलक्षणस्यायुधत्वेन प्रसिद्धस्य निषेधेनानङ्गास्त्रस्य जगज्जैत्रस्य विशेषः कोऽप्याविष्कृतो जगज्जयकार्यविषयः। तादृशमपीदं जगद्विजयसमर्थमहो यथेदं प्रतिविशिष्टमिति॥

हृदयङ्गमा

विरोधिनमुदाहरति, अच्युत इति। –अच्युतः सत्पथादभ्रष्टः विष्णुश्च अपि, अवृषच्छेदी वृषः धर्मः वृषरूपी कंसानुचरः कश्चिदसुरश्च, तस्य छेदी न भवतीति तथोक्तः, राजा नरपतिः चन्द्रश्च अपि, अविदितः अज्ञातः, क्षयः सम्पत्तिक्षीणता रोगविशेषश्च येन तादृशः, देवः राजा अमरश्च अपि, अविबुधः विगतपण्डितः देवश्च न भवतीति तथोक्तः, शङ्करः शुभकृत् हरश्च अपि, अभुजङ्गवान् दुर्जनरहितः सर्परहितश्च, जज्ञे, स इति कर्त्तृपदमध्याहार्य्यम्। (अत्र अच्युतादिपदानां द्वितीयार्थे विष्णवादौ वृषच्छेद्यादिपदानां द्वितीयार्थस्य अभावो विरुद्ध इति विरोधवान् अयं श्लेषः विरोधाभासस्याङ्गम्)॥३२२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रभा

विरोधिश्लेषमुदाहरति–**अच्युतेति**। अच्युतः सन्मार्गाद् अभ्रष्टो विष्णुश्च। अपि अवृषच्छेदी वृषः धर्मः तन्नामासुरश्च तं न च्छिनत्तीति तथोक्तः। राजापि राजा नरपतिः चन्द्रश्च अपि। अविदितः अज्ञातः क्षयः संपत्क्षीणता राजयक्ष्मा च येन तादृशः। देवः राजा सुरश्चापि। अविबुधः विबुधः विगतपण्डितः देवश्च न भवतीति तथोक्तः। शंकरः कल्याणकरः हरश्चापि। अभुजङ्गवान् भुजङ्गः षिङ्गः सर्पश्च तद्वान् तद्विशिष्टो न भवतीति अभुजङ्गवान्। जज्ञे इति सर्वत्र वाक्येषु योजनीयम्। अत्राच्युतादिपदानां द्वितीयार्थे विष्णवादौ वृषोच्छेद्यादिद्वितीयपदार्थस्याभावो विरुद्ध इति विरोधिश्लेषोयम्। अयं च विरोधाभासस्याङ्गम्। सरस्वतीकण्ठाभरणे तु भिन्नाभिन्नकारकरूपेणास्य भेदौ प्रदर्शितौ। तत्र भिन्नकारको यथा–

गतिर्वेणी च नागेन वपुरूरू च रम्भया।
औष्ठौ पाणी प्रवालैश्च तस्यास्तुल्यत्वमाययुः।। इति।

तस्या नायिकाया गतिर्गमनं वेणी केशरचना च नागेन हस्तिना सर्पेण च समा। अत्र प्रथमार्थे नागशब्देन धर्मधर्मिणोरभेदोपचारान्नागगतिर्गृह्यते। तस्या वपुः शरीरम् ऊरुद्वयं च रम्भया अप्सरोविशेषया कदल्या च। तस्या औष्ठौ पाणी च प्रवालैः विद्रुमैः नवपल्लवैश्च तुल्यत्वमाययुः। अत्र वर्णनीययोस्तुल्यत्वं श्लेषप्रभावाल्लभ्यते। सोयमनेककर्तृत्वाद्भिन्नकारकः। अभिन्नकारकः श्लेषो यथा–

कृष्णार्जुनानुरक्तापि दृष्टिः कर्णावलम्बिनी।
याति विश्वसनीयत्वं कस्य ते कलभाषिणी।। इति।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हे कलभाषिणी मधुरवचने। तव दृष्टिः कस्य विश्वसनीयत्वं विश्वासार्हतां याति। न कस्यापि इत्यर्थः। तदेवोपपादयति–**कृष्णेति।** कृष्णा श्यामा अर्जुना श्वेता अनुरक्ता प्रान्तलोहिता च। कर्णावलम्बिनी कर्णपर्यंतगामिनी। पक्षे कृष्णे श्रीहरौ अर्जुने मध्यमपाण्डवे च अनुरक्ता अनुरागवती। कर्णपक्षपातिनी च। अतो विरुद्धपक्षद्वयाश्रितत्वात् कथं सा विश्वसनीया स्यात्। स चायमेककर्तृकत्वादभिन्नकारकः श्लेषो भवति। एवं प्रभेदविशेषा अन्येभ्य आकरग्रन्थेभ्यो बोद्धव्याः। विस्तारभियोपरम्यतेस्माभिः।।३२२।।

विवृति

विरोधिनमुदाहरति–

अच्युतोऽपि वृषं वृषभदानवमुच्छिनतीति वृषोच्छेदी न वृषोच्छेदी अवृषोच्छेदी। यः ति [कि] लाच्युतो हरिः स वृषमुच्छिनत्ति। अयं पुनः अच्युतोऽपि न वृषोच्छेदनशीलः इति विरोधाभावः [सः] द्वितीयः [अर्थः]। च्यवते स्मर[इ]ति च्युतः अकर्मकत्वात् कर्तरि क्तः। [न च्युतः] अच्युतं [तः] वृषं धर्मं नोच्छिनत्तीत्यवृषोच्छेदी। तथा चन्द्रोऽप्यविदितः अननुभूतः अस्ता[ज्ञा]तः क्षयो येनासौ अविदितक्षयः। स हि दक्ष प्रजापतिशापात् (कृष्ण?) पक्षो [क्षे?] क्षयं व्रजति। अयं पुनः राजा नृपः अविदितक्षयः। तथा देवोऽप्यविबुधः। यः किल देवः स विबुधः। देवा विबुधा उच्यन्ते। अयं पुनर्देवोऽपि इन्द्रानिलयमार्काग्निवरुणसोमवित्तेशां शैर्निर्भितत्वात् देवः तथाऽप्यविबुधः विगताः बुधाः पण्डिताः यस्मादसौ विबुधः न विबुधः अविबुधः। तथा यः किल शङ्करो हरः स भुजङ्गवान्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्पवान् [अयं पुनः शङ्कर क्षेमङ्करः तथाऽप्यभुजङ्गवान्] भुजङ्गा विटास्तस्य सन्तीति भुजङ्गवान् विटनिरतो न भवति, किं तु विशिष्टनिरत इति विरोधी।।

विरोधिश्लेषमुदाहरति–**अच्युत इति।** अच्युतः कृष्णः वृषरूपधरम् असुरं हतवान् इति अवृषच्छेदित्वं विरुद्धम्, प्रस्तुतो राजा अच्युतः स्वधर्मात् परिभ्रष्टो न भवति। राजा चन्द्रः अविदितक्षयः प्रतिमासं क्षीयमाणत्वात् अविदितक्षय इति विरुद्धम्। प्रस्तुतो लोकरञ्जको विभवक्षयानभिज्ञः। इत्यारोप्यमाणविरुद्ध-विशेषणयोगात् विरोधिश्लेषः।।

विरोध्युदाहरणमाह–**अच्युत इति।** अत्र अच्युतादीनाम् अवृषच्छेदित्वादि विरुद्धम् इति विरोधी नाम श्लेषः। अच्युतः कृष्णः वृषभान् सप्त जघान, तेन अवृषच्छेदित्वं विरुद्धम्। राजा चन्द्रः; स खलु विदितक्षय एव, आविदितक्षयत्वं विरुद्धम्। देवः सुरः, तस्य अविबुधता विरुद्धा। शङ्करो भुजगभूषणः प्रसिद्धः, अभुजङ्गता तस्य विरुद्धा। वर्णनीयपक्षे तु च्युतिरहितो धर्मानुच्छेदी रञ्जकः क्षयरहितः स्वामी बुधजनसहितः सुखकरो धूर्तरहितश्चेति। अविबुधः विगतबुधो न भवतीत्यर्थः।।३२२।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न देवकन्यका नापि गन्धर्वकुलसम्भवा।
तथाप्येषा तपोभङ्गं विधातुं वेधसोऽप्यलम्॥३२३॥

रत्नश्री

इयं देवानां कन्यका योषिन्न भवति। सम्भवत्यस्मादिति सम्भवः। गन्धर्वाणां देवविशेषाणां कुलं वंशः सम्भवः, तत्र वा सम्भूतिरस्या इति गन्धर्वकुलसम्भवा न भवति। सा हि स्त्रीजातिरत्यन्ताभिरूपा। तथापि पूर्ववत् विशेषविवक्षायाम्। यदाह–एषा स्त्री या न तज्जातिः। वेधसोऽपि येन सृष्टा, यो वा वीतरागः प्रागेवान्यस्य। तपसो विषयसंयमस्य भङ्गं निवृत्तिं विधातुं कर्तुमलं समर्था। किमिदं रूपचातुर्यम्। इह देवजात्यादे रूपोत्कर्षवत्त्वनिवृत्त्या विशेषः, मानुष्यप्येवंविधा या प्रजापतिमपि रागपरवशं करोतीति दर्शितः॥

हृदयङ्गमा

विशेषोक्तिं निरूपयति, गुणेति। –विशेषः प्रस्तुतस्य वीर्याद्यतिशयः, तस्य दर्शनायैव प्रतिपत्तये एव, गुणजातिक्रियादीनाम् (आदिपदेन द्रव्याणाञ्च) यत्तु वैकल्यदर्शनं कार्य्यसिद्धौ अनुपयोगित्वप्रतिपादनं, सा विशेषोक्तिर्नाम अलङ्कार इष्यते। (अतिशयोक्तौ प्रस्तुतस्य विशेषदर्शनसद्भावेऽपि गुणादीनां वैकल्यप्रतिपादनं नास्ति विशेषोक्तौ तदस्तीत्यनयोर्भेदः। एवकारेण विशेषदर्शनाभावे नायमलङ्कार इति ध्वनितम्। विश्वनाथादयस्तु, –"सति हेतौ फलाभावे विशेषोक्तिस्तथा द्विधा" इति लक्षणमाहुः। स्वमते तु सत्यपि हेतौ कार्य्याभाववर्णनस्थले कार्य्यकारणपौर्वापर्य्यविपर्य्ययवदतिशयोक्तिरेव इति बोध्यम्)॥३२३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रभा

क्रमप्राप्तां विशेषोक्तिं लक्षयति–**गुणजातीति।** विशेषः वर्णनीयत्वेन प्रस्तुतस्य वीर्याद्यतिशयस्तस्य दर्शनाय अवगमाय गुणजातिक्रियादीनां आदिशब्देन द्रव्याणां च यत्तु वैकल्यदर्शनं कार्यसिद्धौ निष्फलत्वप्रतिपादनम् सा विशेषोक्तिरिष्यते। विशेषाय गुणादिवैकल्योक्तित्वाद्विशेषोक्तिरिति अवयवार्थः। स च न स्वरूपनिर्धारणाय अपि तु भेदावगमायेति ज्ञेयम्। पदार्थमात्रगतवैकल्यस्यैव अस्याः स्वरूपत्वात्। अतिशयोक्तौ प्रस्तुतस्य वीर्याद्यतिशयदर्शनसद्भावेपि गुणादीनां वैकल्यं न प्रतिपाद्यते इति ततोस्या भेदः। एवकारेण विशेषदर्शनाभावे नायमलंकार इति सूच्यते। सरस्वतीकण्ठाभरणेपि एतदेव लक्षणं स्वीकृतम्। इदमेव लक्षणं च–एकगुणहानकल्पनायां साम्यदार्ढ्यं विशेषोक्तिः। (४.३.२३) इति वामनेन स्थिरीकृतम्। विशेषदर्शनायैवेत्यनेन विभावनातो भेदो दर्शितः। तत्र हि प्रधानतया कारणान्तरं स्वाभाव्यत्वं वा विभावनीयम् न प्रस्तुतस्यातिशयो वाच्यः। इह तु गुणादिप्रतिषेधेन प्रस्तुतस्यातिशयोपेक्षितः। नव्यास्तु–विशेषोक्तिरखण्डेषु कारणेषु फलावच इति विशेषोक्तिमाहुः। अत्राहुः प्रेमचन्द्रशर्माणः– नव्यास्तु सत्यपि कारणे कार्याभाव विशेषोक्तिरित्याहुः। तत्रालंकारसंज्ञानामन्वर्थतयैव प्राचीनैः प्रयुक्तत्वेन हेतुसमानाधिकरणकार्याभाववर्णने विशेषप्रतीतेरभावाद्विशेषोक्तिसंज्ञाभ्युपगमे हेतुः प्रष्टव्यः। न च विशेषो वैचित्र्यं तच्च सत्यपि कारणे कार्याभावोपनिबन्धे विद्यते एवेति विशेषोवितसंज्ञाया अन्वर्थतैवेति वाच्यम्। अलंकारमात्रस्यैव वैचित्र्यात्मकत्वेनोपमादावपि विशेषोक्तिसंज्ञायाः प्रसङ्गात्। अथ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सति हेतौ कार्याभावप्रतिपादनजन्यं स्फुटं प्रतीयमानमपि वैचित्र्यं त्वयापि कथं संज्ञान्तरेणालंकारतया न संगृहतिमिति चेन्मैवम्। तत्रास्माकमतिशयोक्तेरभ्युपगमात्। कार्यकारणपौर्वापर्यविपर्यय-वदत्राप्यतिशयोक्त्यभ्युपगमस्यौचित्यात्। तस्माद् गुणादिवैकल्य-वर्णने वर्णनीयस्य विशेषकथनमेव विशेषोक्तिरिति युक्ततरमिति।।३२३।।

विवृति

इति श्लेषचक्रम्।

विशेषोक्तिलक्षणमाह–

गुणजातिक्रियाणामादिशब्दात् द्रव्यस्य च विकलस्य भावो वैकल्यं अपरिपूर्णता तस्य दर्शनमुपन्यासः किमर्थमित्याह– विशेषदर्शनायैव विशेषपर(स्य)ख्यापनाय सा विशेषोक्तिरुच्यते अलङ्कारः।।

विशेषोक्तिं लक्षयति–**गुणेति।** गुणजातिक्रियाद्रव्याणां तत्तत्कार्यहेतूनां तत्कार्यशक्त्यतिशयद्योतनार्थं स्वरूपवैकल्यं यत् कथ्यते सा विशेषोक्तिः।।

गुणेति। आदिशब्देन द्रव्यादिवैकल्यं गृह्यते; विशेषदर्शनाय अतिशयदर्शनाय। अवधारणेन अतथारूपो व्यावर्त्यते।।३२३।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न बद्धा भ्रूकुटिर्नापि स्फुरितो दशनच्छदः।
न च रक्ताभवद् दृष्टिर्जितं च द्विषतां कुलम्॥३२४॥

रत्नश्री

केनचिद् धीरेण भ्रूकुटिर्भ्रूभङ्गः कोपजन्मा न बद्धा न रचिता। दशनच्छदश्च अधरो न स्फुरितः कोपान्न कम्पितः। दृष्टिश्च रक्ता रोषारुणा नाभवत्। तथापि च द्विषतां कुलम् अरिवर्गः जितं भग्नम्। चित्रमेतत्। अत्र भ्रुकुटीबद्धदशनच्छदस्फुरणादेः क्रियाया विगमेन निर्विकाररिपुविजयलक्षणो विशेषो दर्शित इति॥

हृदयङ्गमा

तत्र गुणवैकल्ये विशेषोक्तिमुदाहरति, नेति। –पुष्पधन्वनः आयुधम् अस्त्रं, न कठोरं न वा तीक्ष्ण, पुष्पमयतवादिति भावः, तथाऽपि अमुना भुवनत्रयं जितमेव आसीत्। (अत्र कामस्य आयुधगतकठोरत्वतीक्ष्णत्वाभावेऽपि भुवनत्रयजयवर्णनेन तस्य वीर्य्योत्कर्षरूपविशेषप्रदर्शनात् आयुधस्य कठोरत्वतीक्ष्णत्वरूपयोः गुणयोर्वैकल्यप्रतिपादनाच्च गुणवैकल्यरूपा विशेषोक्तिः। नन्वत्र भुवनजये कठोरतीक्ष्णास्त्रस्यैव प्रसिद्धहेतुत्वस्वीकारे तदभावेऽपि कामकर्त्तृकतज्जये कारणान्तरं स्वाभाविकत्वं वा कल्पनीयं, ततश्च विभावनाऽपि स्यादिति न वाच्यं. विभावनायां गूढ़कारणस्य स्वाभाविकत्वस्य वा विभावने तात्पर्य्यमस्ति, अत्र तु उपकरणमन्तरेण कार्य्यनिष्पादकतया वर्णनीयस्य उत्कर्षप्रतिपादने तात्पर्य्यमित्यनयोर्भेदः)॥३२४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रभा

तत्र गुणवैकल्यविशेषोक्तिं दर्शयति–**न कठोरमिति।** पुष्पधन्वनो मदनस्य आयुधं अस्त्रं न कठोरं न वा तीक्ष्णं निशितम्।

अरविन्दमशोकं च चूतं च नवमल्लिका।
नीलोत्पलं च पञ्चैते पञ्चबाणस्य सायकाः।।

इति पुष्पमयत्वादिति भावः। तथापि अमुना कामेन भुवनत्रयं जितमेवासीत्। अत्र मदनस्य वीर्यातिशयप्रदर्शनाय तदस्त्रस्य काठिण्यादिगुणवैकल्योक्तिरिति विशेषोक्तिः। नात्र कारणान्तरविभावनायां स्वाभाविकत्वविभावनायां वा तात्पर्यमतो न विभावनाप्रसक्तिः। एवं च विनोपकरणं क्रियानिष्पादकतया कर्तुरुत्कर्षप्रतिपादनं उपकरणगतकठोरतीक्ष्णगुणवैकल्येन प्रदर्शित-मिति गुणवैकल्यविशेषोक्तिरियम्।।३२४।।

विवृति

तां उदाहरति–

न क(ठो)रं नवा तीक्ष्णमायुधं पुष्पधन्वनः। अनेन मन्मथबाणानां कठोरता तैक्ष्ण्यं (इति) यदायुधगुणद्वयं तस्य वैकल्यमुक्तम्। यद्यप्येतस्यायुधमेवंविधं तथाप्यमुना मन्मथेन जगत्त्रयं जितमेव न(ना)जितमिति अत्यन्तायोगव्यवच्छेदं दर्शयति। क्रियया सहैवकारः प्रयुक्तः। विशेषदर्शनमेव[वं] स्मरस्य विशेषोक्तिरिति गुणवैकल्यं दर्शितम्।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गुणवैकल्यं दर्शयति–**नेति**। कठोरत्वतैक्ष्ण्यविरहितेनापि अस्त्रेण शूरस्य त्रिभुवनजयकार्ये शक्त्यतिशयो दर्शितः।।

गुणवैकल्यं यथा–**नेति**। आयुधेन कठोरत्वतीक्ष्णत्वविकलेन पुष्पधन्वा त्रीण्यपि जगन्ति जितवान् इति तस्य प्रभावातिशयः प्रतीयते। सेयं गुणवैकल्यवती विशेषोक्तिः।।३२४।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न रथा न च मातङ्गा न हया न च पत्तयः।
स्त्रीणामपाङ्गदृष्ट्यैव जीयते जगतां त्रयम्॥३२५॥

रत्नश्री

रथाः स्यन्दना न सन्ति। न मातङ्गा हस्तिनः सन्ति। न च हया अश्वाः। नापि पत्तयः पदातयः। चतुरङ्गमनीकमिदं जयोपकरणम्। तथापि स्त्रीणामपाङ्गदृष्टया कटाक्षेणैव केवलं जगतां त्रयं त्रिभुवनं जीयते वशीक्रियते। अत्र रथादिलक्षणद्रव्याभावेन जगत्त्रयविजयलक्षणो विशेषः स्त्रीकटाक्षस्याविष्कृत इति॥

विशेषोक्तेर्विकल्पान्तरं दर्शयन्नाह–

हृदयङ्गमा

जातिवैकल्ये विशेषोक्तिं दर्शयति, नेति। –एषा देवकन्यका न, गन्धर्वकुलसम्भवाऽपि न, तथाऽपि वेधसः ब्रह्मणोऽपि, तपोभङ्गं विधातुम् अलं शक्ता। (अत्र देवत्वगन्धर्वत्वरूपजातिनैरपेक्ष्येण तपोभङ्गसामर्थ्यवर्णनात् नायिकायाः मनोमोहित्वातिशयरूपविशेषः प्रतिपादित इति जातिवैकल्ये विशेषोक्तिः)॥३२५॥

प्रभा

जातिवैकल्यै विशेषोक्तिं दर्शयति–**न देवेति।** एषा देवकन्यका न। गन्धर्वकुलसंभवा गन्धर्ववंशजापि न। तथापि वेधसः ब्रह्मणोपि तपोभङ्गं विधातुम् अलं समर्था। अत्र देवत्वगन्धर्वत्वजातिनैरपेक्ष्येण ब्रह्मणोपि तपोभङ्ग सामर्थ्यवर्णनेन नायिकाया रूपतिशयः प्रतिशय प्रतीयते। देव्यो गन्धर्व्यश्च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तपोभङ्गविधानसमर्था इति पुराणप्रसिद्धिः। अत्र वर्णनीयाया जातिवैकल्येन विशेषो दर्शित इति जातिवैकल्यविशेषोक्तिः।।३२५।।

विवृति

न देवकन्यकेत्यादिना देवादिजातिवैकल्यं प्रदर्श्यते। तथाऽप्येषा तपोभङ्गं विधातुं वेधसोऽप्यलम् इति विशेषदर्शनम्। जातिवैकल्यविशेषोक्तिरियम्।।

जातिवैकल्यकार्यातिशयं दर्शयति–**नेति।** देवादिजाति-वैकल्येऽपि कस्याश्चिद्वेधसोऽपि तपोभङ्गकरणं कार्यातिशयः।।

जातिवैकल्यं यथा–**नेति।** अत्र देवकन्यकात्वादिप्रकृष्टजाति-वैकल्येऽपि वेधसोऽपि तपोभङ्गम् इयं विधत्ते इति वर्णनीयायाः रूपातिशयः प्रतीयते। इयं जातिवैकल्यवती विशेषोक्तिः।।३२५।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एकचक्रो रथो यन्ता विकलो विषमा हयाः।
आक्रामत्येव तेजस्वी तथाप्यर्को जगत्त्रयम्॥३२६॥

रत्नश्री

एकं चक्रमस्येत्येकचक्रो रथः। कथं वहति? यन्ता सारथिश्चारुणलक्षणः अङ्गविकलः। कथं कर्मण्यः? हया रथ्याश्च विषमाः सप्त। कथं धौरेयाः? तथाप्यर्कः तेजस्वी प्रतापविशेषयुक्तो यतस्तस्मात् जगतां त्रयमाक्रामत्यभिभवति। तेजस्तत्रनिमित्तमिति॥

[केयं] विशेषोक्तिरित्याह–

हृदयङ्गमा

क्रियावैकल्ये विशेषोक्तिं दर्शयति, नेति। –भ्रुकुटिः न वद्धा, दशनच्छदः अधरोऽपि, न स्फुरितः न कम्पितः, दृष्टिश्च न रक्ता अभवत्, तथाऽपि द्विषतां शत्रूणां, बलं जितञ्च। (अत्र बन्धनं स्फुरणञ्च क्रिया, रक्तत्वं गुणः, तेषाञ्च वैकल्यप्रतिपादनं वर्णनीयस्य वीरस्य उत्कर्षद्योतनाय, अतोऽत्र क्रियागुणवैकल्ये विशेषोक्त्योः सङ्करः)॥३२६॥

प्रभा

क्रियावैकल्यविशेषोक्तिं दर्शयति–**न बद्धेति।** भ्रुकुटिः भ्रूभङ्गः। न बद्धा। दशनच्छदः अधरो न स्फुरितः। दृष्टिरपि रक्ता ताम्रा नाभवत्। तथापि हे वीर त्वया द्विषतां अरीणां कुलं जितम्। बलमिति पाठे शत्रुसैन्यं जितमित्यर्थः। अत्र बन्धनादयः क्रियाः। तद्वैकल्येन शत्रुजयो वर्णितः। तेन लीलया शत्रुजयो विहित इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विशेषः स्फुटीभूतः। अतः क्रियावैकल्यविशेषोक्तिरियम्। अत्र केचित्–बन्धनं स्फुरणं च क्रिया रक्तत्वं तु गुणः। अतः क्रियागुणवैकल्ययोरत्र संकरः। शुद्धक्रियावैकल्योदाहरणं तु–

नोपभोगो न वा दानं बन्धूनां भरणं न वा।
तथापि गुरुतां धत्ते नृणां संरक्षितं धनम्।। इति।
अत्रोपभोगादिक्रियामात्रवैकल्यमिति वदन्ति।।३२६।।

विवृति

न बद्धा भ्रुकुटिरित्यादिना क्रियावैकल्यं प्रदर्श्य(ते)।।

नेति। भ्रुकुटिबन्धादिक्रियावैकल्येऽपि भूपेन द्विषतां कुलम् हतम् इति कार्यातिशयः।।

क्रियावैकल्येन यथा–**नेति।** भ्रूमङ्गादेः क्रियायाः वैकल्येऽपि द्विषन्तो विजिताः इति वर्णनीयस्य प्रतापातिशयः प्रतीयते। सेयं क्रियावैकल्यवती विशेषोक्तिः।।३२६।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सैषा हेतुविशेषोक्तिस्तेजस्वीति विशेषणात्।
अयमेव क्रमोऽन्येषां भेदानामपि कल्पने॥३२७॥

रत्नश्री

सैषा अनन्तरोक्ता तादृशी हेतुविशेषोक्तिर्नाम विज्ञायते। कुतः? तेजस्वीत्यर्क [84a]स्य विशेषणाद्धेतुरूपात्। तेजस्वित्वात् जगत्त्रयमाक्रामतीति। इमामवान्तरभेदविकल्पनादिशमतिदिशन्नाह– अयमित्यादि। अयमेवानन्तरोक्तः क्रमो न्यायः हेत्वपेक्षया हेतुविशेषोक्तिरित्येवंजातीयः अन्येषामपि भेदानां विशेषोक्तिविकल्पानां कल्पने प्रयोगेऽनुगन्तव्यः। ते चैवं कल्पनीयाः–

न विषं विषमं किञ्चिन्न च पाशोऽस्ति तादृशः।
मूर्च्छयन्ति मृगाक्षीणां बध्नन्ति [च] दृशो जगत्॥
अविरुद्धक्रियाविशेषोक्तिः॥
न शस्त्रं निशितं किञ्चित्तादृशं नापि चामृतम्।
स्त्रीणां कोपः प्रसादश्च हन्ति जीवयति क्षणम्॥
विरुद्धक्रियाविशेषोक्तिः॥
न किञ्चिन्मार्दवं तन्वि! स्तनयोर्न च नम्रता।
तथापि च तथैताभ्यां जनोऽयमतिरज्यते॥
चाटुविशेषोक्तिः॥
दिशा अनया अन्येप्यूहनीया विकल्पा इति॥
॥ इति विशेषोक्तिचक्रम् ॥
तुल्ययोगितां योजयन्नाह–

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हृदयङ्गमा

द्रव्यवैकल्ये विशेषोक्तिं दर्शयति, नेति। –स्त्रीणां रथा न, मातङ्गाश्च न, हया न, पत्तयश्च न, जगत्त्रयजयाय सन्ति इति शेषः, तथाऽपि अपाङ्गदृष्ट्या एव केवलं कटाक्षेणैव, जगतां त्रयं जीयते। (अत्र रथादीनां द्रव्याणां वैकल्यप्रतिपादनरूपा विशेषोक्तिः)।।३२७।।

प्रभा

द्रव्यवैकल्यविशेषोक्तिं दर्शयति–**न रथा इति।** न रथा न च मातङ्गाः हस्तिनः। न हयाः अश्वाः। न च पत्तयः पदातयः। एवम् हस्त्यश्वरथपादातं सेनाङ्गं स्याच्चतुर्विधम् इति चतुरङ्गबलविमुक्तयापि स्त्रीणां अपाङ्गदृष्ट्यैव तिर्यक्कटाक्षेणैव जगतां त्रयं जीयते। अत्र रथादिजयसाधनद्रव्याणामभावेपि जगत्त्रयविजयः केवलया दृशा विहितः। तेन च दृशां मोहनसामर्थ्यविशेषः प्रतीयत इति द्रव्यवैकल्यविशेषोक्तिः।।३२७।।

विवृति

'स्त्रीणामपाङ्गदृष्ट्यैव जीयते जगतां त्रयमि' त्यनेन जगत्त्रयजयातिशयप्रदर्शनात् द्रव्यवैकल्यविशेषोक्तिरुक्ता।।

नेति। रथादिद्रव्यवैकल्येऽपि स्त्रीणां अपाङ्गदृष्ट्यैव जगतां त्रयं जीयते इती कार्यातिशयः।।

द्रव्यवैकल्येन यथा–**नेति।** अत्र रथादिद्रव्यवैकल्येऽपि स्त्रीणाम् अपाङ्गालोकनं त्रीण्यपि जगन्ति विजयते इति द्रव्यवैकल्ययवती विशेषोक्तिः।।३२७।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विवक्षितगुणोत्कृष्टैर्यत् समीकृत्य कस्यचित्।
कीर्तनं स्तुतिनिन्दार्थं सा मता तुल्ययोगिता॥३२८॥

रत्नश्री

विवक्षितः प्रतिपादयितुमिष्टः कश्चिद्गुणो धर्मः साधुरसाधुर्वा तेनोत्कृष्टैरधिमात्रैः प्रसिद्धैः कैश्चिद्वस्तुभिः सह समीकृत्य वस्तुतोऽसाम्येऽपि तथाभावमारोप्य कस्यचिदर्थस्य पुरुषादेः कीर्तनमाख्यानम्। किमर्थम्? स्तुतिः प्रशंसा निन्दा जुगुप्सा चार्थः प्रयोजनं यस्मिन् कीर्तने तत्तथा समीकृतस्य स्तुत्यर्थं निन्दार्थं वा, सा तल्लक्षणा तुल्ययोगिता स्मृता। तेन गुणेन तादृशां तुल्ययोगिताप्रतिपादनात्, तादर्थ्येन तुल्ययोगिता तथाविधोक्तिरिति॥

तामुदाहरन्नाह–

हृदयङ्गमा

गुणादिवैकल्येन विशेषोक्तेर्भेदान् लक्षयित्वा आदिपदसूचितानां प्रकारान्तरेणापि सम्भाव्यमानानां भेदानां दिग्दर्शनार्थं हेतुविशेषोक्तिं दर्शयति, एकचक्र इति। –रथः एकचक्रः, यन्ता सारथिः, विकलः अङ्गहीनः, अनूरुत्वादिति भावः, हयाः अश्वाः, विषमाः अयुग्माः, सप्तसङ्ख्यकत्वादिति भावः, तथाऽपि अर्कः सूर्य्यः नभस्तलम् अतिविस्तीर्णमाकाशमार्गम्, आक्रामति एव, यतः सः तेजस्वीत्यन्वयः। (अनयेषामपि सुदूरप्रयाणे बहुचक्ररथस्य अविकलाङ्गसारथेः युग्महयानाञ्च आवश्यकत्वं दृश्यते, सूर्य्यस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तन्नैरपेक्ष्येणापि चिकीर्षितसिद्धिः इति सूर्य्यस्योत्कषातिशयः, तत्र हेतुः तेजस्वीति, तेजस्विनः हि स्वार्थसिद्धौ सहायं नापेक्षन्ते। ततश्च अत्र तेजस्वीति विशेषणेन वर्णनीयस्य सूर्य्यस्य विशेषप्रतिपादनात् रथादिगतबहुचक्रत्वादिधर्माणां वैकल्यस्य गम्यमानत्वाच्च हेतुविशेषोक्तिरियम्। "नभस्तलम्" इत्यत्र "जगत्त्रयम्" इति पाठो न सम्यक्, पातालादौ सूर्य्यगतेः प्रसिद्धत्वाभावात्)।।३२८।।

प्रभा

हेतुविशेषोक्तिं दर्शयति–**एकचक्र इति।** रथः एकचक्रः यन्ता सारथिः विकलः चरणविकलः। अश्वाः विषमाः सप्तसंख्याका इत्यर्थः। सप्ताश्वा नव दन्तिनः इति सप्ताश्वानां राजतन्त्रे निषेध इति रत्नदर्पणव्याख्यायां रत्नेश्वरः। तथापि तेजस्वी अर्कः रविर्नभस्तलं विस्तीर्णमाकाशम् आक्रामति। अत्र रथादिद्रव्याणामङ्गवैकल्येन द्रव्यवैकल्यम्। तत्प्रतिपादनेन विकलसाधनोपि रविर्जगत्त्रयमाक्रामतीति विशेषसामर्थ्यदर्शनाद् विशेषोक्तिः। तत्र च तेजस्वीति हेतुबोधकपदविन्यासेन न तेजस्विनोङ्गीकृतार्थसाधने उपकरणपरतन्त्रा भवन्तीति विशेषस्य परिपोषो भवति इति हेतुविशेषोक्तिरियम्। भोजराजस्तु न रथा न च मातङ्गा इति द्रव्यवैकल्यविशेषोक्तिरेकचक्रो रथो यन्तेति वैकल्यवद्द्रव्यविशेषोक्तिरिति भेदद्वयं कल्पयति। तथैव अवैकल्ययदर्शनेनापि क्वचिदप्युपपद्यते इति जातिगुणक्रिया-दीनामवैकल्येपि क्वचिदियं भवतीति मत्वा उदाहरति–

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अयं तया रथक्षोभादंसेनांसो निपीडितः।
एकः कृती शरीरेस्मिञ् शेषमङ्गं भुवो भरः।।

अत्र तया स्पृष्टोंसः पुण्यवान् तया चास्पृष्टं शेषमङ्गं मे निरर्थकम् इति योयमवैकल्यदर्शनेपि विशेषस्तेनैषा हेतुमत्यपि हेतुमता विशेष्यमाणा यथोक्ता विशेषोक्तिर्भवतीत्याह।।३२८।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यमः कुबेरो वरुणः सहस्त्राक्षो भवानपि।
विभ्रत्यनन्यविषयां लोकपाल इति श्रुतिम्॥३२९॥

रत्नश्री

यमो दक्षिणस्या दिशः पतिः। कुवेर उत्तरस्याः। [वरुणः पश्चिमायाः] सहस्त्राक्षः शक्रः प्राच्याः। भवानपि त्वं च। एते[भ्योऽन्ये] नास्या विषयः। इत्यनन्यविषयां लोकपाल, इत्येवंरूपां श्रुतिं शब्दं बिभ्रति वहन्ति, सर्वैस्तैर्लोकरक्षणात्। अत्र लोकपालत्वेन विवक्षितेन गुणेन उत्कृष्टैर्यमादिभिः समीकृत्य राज्ञः कस्यचित् कीर्तनस्मृत्यर्थमिति योजनीयम्॥

हृदयङ्गमा

सैषेति। –तेजस्वीति विशेषणात्, हेतुगर्भादिति भावः, सा एषा विशेषोक्तिः हेतुविशेषोक्तिः सहेतुका इत्यर्थः, अन्येषामपि भेदानां विशेषाणां, कल्पने अयमेव क्रमः नियमः, यथा हेत्वलङ्कारसद्भावेनास्या भेदः तथाऽन्येषामपि अलङ्काराणां सद्भावेनेति भावः॥३२९॥

प्रभा

उदाहरणं निरूपयति–**सैषेति।** तेजस्वीति विशेषणाद् हेतुगर्भविषेषणादिति भावः। एषा विशेषोक्तिः हेतुविशेषोक्तिः। अन्येषामपि भेदानां विशेषोक्तिप्रकाराणाम् अयमेव क्रमः अयमेव मार्गः। तथा च यथात्र हेत्वलंकारसंबद्धा विशेषोक्तिस्तथा-लंकारान्तरसंबद्धापि ऊहनीया। तथा च- भवन्ति यत्रौषधयो रजन्यामतैलपूराः सुरतप्रदीपाः। द्यूतं हि नाम पुरुषस्यासिंहासनं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

राज्यम्। इयं ह्यकमला लक्ष्मीः। इत्यादयो रूपकसंबद्धा विशेषोक्तयो ज्ञेयाः।।३२९।।

विवृति

एकं चक्रमस्येत्येकचक्रो रथस्तावत् इति चक्रवैकल्यम्। न च तस्य मनागपि गमनं सम्भवति। तदुक्तं 'चक्रमेकं न वर्तते' 'तर्हि ए(न ह्ये)कचक्रेण रथः प्रायाती'ति। तथा यन्ता सारथिः सोऽपि विकलः ऊरुरहितः। तथा विषमाः हयाः सप्त। इति रथादीनां वैकल्यं प्रदर्शितम्। 'आक्रमत्येव तेजस्वी तथाऽपयर्को जगत्त्रयम्।' इति हेतुविशेषोक्तिरियम्।। कुत इत्याह–तेजस्वीति विशेषणात्। तेजस्वीत्यादि आ(स्वित्वादा)क्रामतीति तेजो जगत्त्रयाक्रमणहेतुः न सामग्री। यु(उ)क्तमन्यैरपि–'क्रियासिद्धिः सत्त्वे वसति महतां नोपकरणे'। अयमेव क्रमोऽन्येषामनुक्तानां भेदानां वि(मपि) कल्पने।।

एकेति। एतव्द्याचष्टे–**सैषेति।।**

द्रव्यस्य अङ्गादिवैकल्येन यथा–**एकेति।** अत्र रथादीनां अवयवादिवैकल्येऽपि जगत्त्रयजयेन सवितुः अनुभावातिशयः प्रतीयत इति द्रव्याङ्गादिवैकल्यवती विशेषोक्तिः। तेजोविशिष्टस्य सूर्यलक्षणस्य द्रव्यस्य अनुभावप्रदर्शनार्थं रथाद्यवयववैकल्यकथनात् हेतुविशेषोक्तिश्च। इदमाह–**सैषेति।** उक्तेन प्रकारेण परेऽपि विशेषोक्तिभेदा द्रष्टव्याः।।३२८–३२९।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सङ्गतानि मृगाक्षीणां तडिद्विलसितानि च।
क्षणद्वयं न तिष्ठन्ति घनारब्धान्यपि स्वयम्॥३३०॥

रत्नश्री

मृगाक्षीणां सङ्गतानि प्रेमाणि त[डि]तां विद्युतां विलसितानि च यथायोगं घनैर्मेघैरारब्धानि घनं निरन्तरमारब्धान्यपि। किं पुनरन्यानि? स्वयमात्मना प्रकृतिचापल्यात्, न तु कारणवैगुण्येन घनारब्धत्वात् क्षणद्वयमपि द्वाव[84b]पि क्षणौ न तिष्ठन्ति। किं पुनश्चिरम्? यदि परमेकं क्षणं तिष्ठन्ति। इह विवक्षितेन गुणेन क्षणमात्रास्थायित्वेनोत्कृष्टैः प्रतीतैस्तड़िद्विलसितैः समीकृत्य स्त्रीप्रेम्णामतिचपलतया निन्दार्थं कीर्तनमिति लक्षणं योजनीयम्॥

॥ इति तुल्ययोगिताचक्रम् ॥

विरोधं निदर्शयन्नाह–

हृदयङ्गमा

तुल्ययोगितां निरूपयति, विवक्षितेति।–विवक्षिताः प्रस्तुतगतत्वेन वक्तुम् इष्टाः ये गुणाः तैरुत्कृष्टैः विख्यातैः, अप्रस्तुतैरिति शेषः, समीकृत्य तुल्यपक्षीकृत्य, कस्यचित् प्रस्तुतस्य, स्तुतिनिन्दार्थं स्तुत्यर्थं निन्दार्थं वा, यत् कीर्त्तनं सा तुल्ययोगिता तुल्यानां प्राकरणिकाप्राकरणिकनिबन्धन-सादृश्यवतां, योगिता स्तुतिनिन्दार्थम् एक धर्म्मानवयित्वं यत्र सा तुल्ययोगितानामालङ्कारः, मता कथिता इत्यन्वयः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(विवक्षितगुणोत्कृष्टैरिति बहुत्वमविवक्षितं, द्वाभ्यामेकेन वा समीकरणेऽपि अस्याः सद्भावादिति बोध्यम्। दीपके वाक्यान्तरीयपदस्य अनुषङ्गादिना वाक्यान्तरार्थोद्दीपकत्वम्, इह तु स्तुतिनिन्दार्थसमीकरणमित्यनयोर्भेदः। उपमायां प्रस्तुतस्य गुणोत्कृष्टेन साम्यं, तच्च वाच्यं व्यङ्ग्यं वा इति नियमादिह स्तुतिनिन्दार्थं समीकरणे व्यङ्ग्यसाम्ये कथं नोपमा इत्यपि न वाच्यम, आलङ्कारिकैः व्यञ्जनाया वृत्तित्वस्वीकारात् उपमायां व्यङ्ग्यस्यापि साम्यस्य प्रतीतिः शाब्दीति ज्ञेया, व्यञ्जनया उपस्थितस्यापि सादृश्यस्य वृत्तिवेद्यत्वेन शाब्दबोधाभ्युपगमात्; इह तु सर्वेषां समकक्षतया शाब्दबोधविषयत्वात् पर्य्यवसाने सादृश्यप्रतीतिरित्यनयोर्भेदः। तथा च विवक्षितगुणशालित्वेन अप्रस्तुतैः सह प्रस्तुतस्य समकक्षतया तादृग्गुणवत्त्वकीर्त्तनेन स्तुतिर्निन्दा वा तुल्ययोगितेति निष्कर्षः। विवक्षितगुणोत्कृष्टैरप्रस्तुतैरेव तुल्ययोगिता इति तु न नियमः, प्रस्तुतेन प्रस्तुतसमीकरणेऽप्यस्याः सद्भावदर्शनात्; यथा,–"कटाक्षा मदुरालापा विलासास्ते च ते शुभे!। जगज्जये प्रवृत्तस्य कन्दर्पस्य महद्बलम्।।" इत्यत्र कटाक्षादयः सर्वेऽपि प्रस्तुताः। नव्यास्तु–प्राकरणिकानामप्राकरणिकानां वा एकधर्मान्वयित्वं तुल्ययोगितेत्याहुः, तथा चोक्तं, –"प्रकृतानां तादृक्त्वे भिन्नानां वाऽपि तुल्ययोगित्वे" इति। न च प्रस्तुताप्रस्तुतयोरेकधर्म्मसम्बन्धेन तुल्ययोगितास्वीकारे दीपकस्य विषयपरिहारः स्यादिति वाच्यम्; स्वमते वाक्यान्तरीयपदस्यानुषङ्गादिना वाक्यान्तरार्थोद्दीपकत्वस्यैव दीपकालङ्कारत्वादिति बोध्यम्)।।३३०।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रभा

क्रमप्राप्तां तुल्ययोगितां लक्षयति–**विवक्षितेति।** विवक्षिताः प्रस्तुतगतत्वेन वक्तुमिष्टा ये गुणास्तैरुत्कृष्टा अधिका ये तैः सह। स्तुतिनिन्दार्थः स्तुत्यर्थं निन्दार्थं वा। कस्यचित् प्रस्तुत्यस्य स्तुत्यस्य वा तैर्गुणैः समीकृत्य यत् कीर्तनं कथनम्। सा तुल्ययोगिता मता इति अन्वयः। अत्र बहुमचनमविवक्षितम्। द्वाभ्यामेकेन वा समीकरणेपि अस्याः सद्भावात्। तथा विवक्षितगुणोत्कृष्टैर-प्रस्तुतैरेवेति न नियमः।

कटाक्षा मधुरालापा विलासारते च ते शुभे।
जगज्जये प्रवृत्तस्य कन्दर्पस्य महद्बलम्।।

इत्यत्र कटाक्षालापविलासादीनां प्रस्तुतत्वे तस्याः सद्भावात्। प्रस्तुतयोरेव अप्रस्तुतयोरेव वा एकधर्माभिसंबन्धे तुल्योगिता प्रस्तुताप्रस्तुतयोरेकधर्माभिसंबन्धे दीपकमिति अर्वाचीनमतं न दण्डिनोभिमतम्। धर्माभिसंबन्धरूपवैचित्र्यस्य सर्वत्र तुल्यत्वात्। एवं तर्हि दीपकं निर्विषयं स्यादिति चेन्न। अस्मन्मते वाक्यान्तरीयपदस्यानुषङ्गादिना स्वार्थद्वारा वाक्यान्तरार्थोद्दीप-कत्वस्यैव दीपकालंकारत्वात्। तदुक्तम्–

जातिक्रियागुणद्रव्यवाचिनैकत्रवर्तिना।
सर्ववाक्योपकारश्चेत् तदाहुर्दीपकं यथा।। (२.९७) इति।

अनेनैव लक्षणेन दीपकसंज्ञाया अन्वर्थता भवति। वामनोपि–विशिष्टेन साम्यार्थमेककालक्रियायोगस्तुल्ययोगिता (४.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३२६) इति सूत्रेणेदमेव लक्षणमङ्गीकरोति। भोजराजोपि तथैव। उपमायां वाच्यार्थस्य व्यङ्ग्यार्थस्य वा साम्यप्रतीतिः शाब्दी। इह तु सर्वेषां समकक्षतया शाब्दबोधविषयत्वात् पर्यवसाने सादृश्यप्रतीतिरित्यनयोर्भेदः।

दिवो जागर्ति रक्षायै पुलोमारिर्भुवो भवान्।
असुरास्तेन हन्यन्ते सावलेपास्त्वया नृपाः।।

इत्यादितुल्ययोगोपमायामपि (२.४९) व्यञ्जनयोपस्थितस्यापि सादृश्यस्य वृत्तिवेद्यत्वेन शाब्दबोधाभ्युपगमात्। व्यञ्जनाया वृत्तित्वं च सर्वालंकारिकसंमतम्। तुल्ययोगितायां तु साम्यं न वृत्तिवेद्यं किंतु पर्यवसानगम्यम्। तेन नोभयोः संमर्दः। एवं च विवक्षितगुणशालित्वेन अप्रस्तुतैः सह प्रस्तुतस्य स्तुतिनिन्दार्थं तादृशगुणान्वयित्वकीर्तनेन या प्रशंसा निन्दा वा सा तुल्ययोगिता। केचित्तु तुल्ययोगितायां स्तुतिनिन्दयोः प्राधान्यम् सादृश्यं तु उपसर्जनीभूतम् तुल्ययोगोपमायां तु सादृश्यं प्रधानम् इति ततोस्या भेद इति मन्यन्ते।।३३०।।

विवृति

इति विशेषोक्तिचक्रम्।।

तुल्ययोगितालक्षणमाह–

विवक्षितः वक्तुमिष्टः गुणानामुत्कर्षः आधिक्यं येषां ते (विवक्षित) गुणोत्कर्षाः तैः सह समीकृत्य समतां आपाद्य यत्कीर्तन कस्यचित्। किमर्थमित्याह स्तुतिनिन्दार्थं स्तुत्यर्थं निन्दार्थं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

च सा स्मृता तुल्योगिता। तुल्यैः सदृशैः योगः एककार्येऽभिसम्बन्धः तुल्यानां वा योगः तुल्ययोगः स एषामस्ति ते तुल्ययोगिनः तेषां भावः तुल्ययोगिता।।

तुल्ययोगितां लक्षयति–**विवक्षितेति**।।

तुल्ययोगितालङ्कारमाह–**विवक्षितेतिवक्तुमिष्टस्य** गुण-[स्य]ाश्रयतया प्रसिद्धैः समीकृत्य कस्यचित् अप्रसिद्धस्य कीर्तनं स्तुतिनिन्दासिद्ध्यर्थं तुल्ययोगिता।।३३०।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विरुद्धानां पदार्थानां यत्र संसर्गदर्शनम्।
विरोधसाधनायैव स विरोधः स्मृतो यथा॥३३१॥

रत्नश्री

विरुद्धानामन्योन्यप्रतिद्वन्द्विनां पदार्थानां क्रियागुणादीनां संसर्गस्य सन्निधेः दर्शनमवगमो यत्रोक्तिप्रकारे। किमर्थम्? विरोधस्य विप्रतिषेधस्य साधनाय सविशेषं प्रत्यायनार्थमेव। अत एव विरोधप्रधानत्वात् स उक्तिविशेषः विरोध इति स्मृतः कथ्यते कविभिः। यथेत्युदाहरति॥

हृदयङ्गमा

तत्र स्तुतावुदाहरति, यम इति। –यमः कुबेरः वरुणः सहस्त्राक्षः इन्द्रः, तथा भवानपि अनन्यविषयाम् अनन्यसक्तां, लोकपाल इति श्रुतिम् आख्यां, बिभ्रति। (अत्र लोकपालत्वरूपो गुणः प्रस्तुते राज्ञि विवक्षितः, तेन च गुणेन उत्कृष्टैः यमादिभिः सह समकक्षतया कीर्त्तनेन स्तुतिरूपा तुल्ययोगिता)॥३३१॥

प्रभा

तत्र स्तुतितुल्ययोगितामुदाहरति–**यम इति।** यमः कुबेरः वरुणः सहस्त्राक्षः इन्द्रस्तथा भवान् अनन्यविषयां अनन्यगामिनीं लोकपाल इत्याकारां श्रुतिं ख्यातिं बिभ्रति धारयन्ति। अत्र लोकपालत्वरूपो गुणः प्रस्तुतनृपे विवक्षितः। तेन च गुणेनोत्कृष्टैर्यमादिभिः समानताख्यापनेन राज्ञः स्तुतिः। अतः स्तुतिरूपा तुल्ययोगिता॥३३१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विवृति

तामुदाहरति–

यमादिभिर्लोकपालनं प्रति विवक्षितगुणोत्कर्षे [र्षै] राज्ञः कस्यचित् समतामापादयति। स्तुत्यर्थमेतत्। भवांश्च लोकं पालयन्ती (ती) ति लोकपाला[ल] इति [श्रुति]रभिधानं नाम तद्भवतोऽपि समानमेव। अविद्यमानो युष्मव्यतिरेकेणान्योपि [?] विषयोऽभिधेयो यस्याः साऽनन्यविषया श्रुतिः तां बिभ्रति दधतीति स्तुत्यर्थकीर्तनम्।।

स्तुत्यर्थां तुल्ययोगितां दर्शयति **यम** इति।।

उदाहरति **यम** इति। अत्र यमादयः पञ्च भवन्तो लोकपालाः इत्युक्ते, अनुक्तमपि तुल्ययोगितयैव कस्यचित् लोकपालैः सादृश्यं प्रतीयते, इति तुल्ययोगिता स्तुत्यर्था।।३३१।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कूजितं राजहंसानां वर्धते मदमञ्जुलम्।
क्षीयते च मयूराणां रुतमुत्क्रान्तसौष्ठवम्॥३३२॥

रत्नश्री

अरुणचरणचञ्चवो हंसविशेषा राजहंसाः। तेषां कूजितम् निनदः मदेन सामयिकेन हर्षोत्कर्षेण मञ्जुलं मधुरं वर्धते विजृम्भते। मयूराणां च रुतं कूजितं पुनरुत्क्रान्तमपगतं सौष्ठवमुत्कर्षो यतः, तत् क्षीयते निवर्तते। वृद्धिक्षययोः क्रियापदार्थयोः विरुद्धयोर्मिथः संसर्गस्यैकत्र सन्निधेर्दर्शनमिति लक्षणं योज्यम्॥

हृदयङ्गमा

निन्दायामुदाहरति, सङ्गतानीति। –मृगाक्षीणां सङ्गतानि सङ्गमाः, तड़िद्विलसितानि च स्वयं स्वस्यानुरागेणैव, न तु अन्यप्रेरणया इति भावः, घनारब्धानि घनं निविड़ं, गाढ़ं यथा तथा इत्यर्थः, अन्यत्र–घनैर्मेघैः, आरब्धानि अपि, क्षणद्वयं द्विक्षणमपि, न तिष्ठन्ति, क्षणमात्रस्थायित्वात्तेषामिति भावः। (अत्र क्षणस्थायित्वरूपो गुणो वर्णनीये मृगाक्षीसङ्गमे विवक्षितः, तेन च अप्रस्तुततड़िद्विलसितस्य समकक्षतया वर्णनेन निन्दाप्रतीयमाना तुल्ययोगिता, सा च घनारब्धानीति श्लेषानुप्राणिततया समधिकां चारुतां पुष्णातीति बोध्यम्)॥३३२॥

प्रभा

निन्दातुल्ययोगितामुदाहरति–**संगतानीति।** मृगाक्षीणां संगतानि समागमाः। तथा तडिद्विलसितानि विद्युदुन्मेषितानि च। स्वयम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वस्यानुरागेण। ताभिर्घनारब्धान्यपि घनं निबिडं निरन्तरभावस्तेन आरब्धानि अनुष्ठितान्यपि। पक्षे घनैः मेघैः स्वयम् आरब्धानि अपि। क्षणद्वयं क्षणादूर्ध्वमपरमपि क्षणं न तिष्ठन्ति कुतो दीर्घकालावस्थानमिति भावः। अत्र प्रसिद्धचपलस्वभावया विद्युता सह स्त्रीणां संगमस्य चपलता समकक्षीकृत्योच्यते। तेन च निन्दावगमः स्पष्टो भवति। अतो निन्दातुल्ययोगिता। सा चात्र घनारब्धानि इति श्लेषानुप्राणितया समधिकचमत्कारं भजते। सरस्वतीकण्ठाभरणे–

अन्ये सुखनिमित्ते च दुःखहेतौ च वस्तुनि।
स्तुतिनिन्दार्थमेवाहुस्तुल्यत्वे तुल्ययोगिताम्।। (४.५५)

इति मतान्तरेण तुल्ययोगिता लक्षितास्ति। तत्र स्तुत्यर्थाया उदाहरणं यथा–

आहूतस्याभिषेकाय विसृष्टस्य वनाय च।
न मया लक्षितस्तस्य स्वल्पोप्याकारविभ्रमः।।

अत्र रामस्य राज्याभिषेकवनगमनयोः पितुरादेशेन तुल्यरूपतया स्तुतिः प्रतीयते इति स्तुतिरूपा तुल्ययोगिता। निन्दार्था यथा–

यश्च निम्बं परशुना यश्चैनं मधुसर्पिषा।
यश्चैनं गन्धमाल्याभ्यां सर्वस्य कटुरेव सः।।

अत्र यः परशुना छिनत्ति योमुं मधुसर्पिषा सिञ्चति यो वा गन्धमाल्याभ्यामर्चति तं प्रति तुल्यमेव निम्बस्य कटुत्वम् इति समासोक्त्या तदुपमेयस्य निन्दा प्रतीयते इति निन्दार्था तुल्ययोगितेयम्। विस्तरस्तु तत एव द्रष्टव्यः।।३३२।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विवृति

इदानीं निन्दार्थमाह–

(सं)गतानि सङ्ख्या [सख्यानि] मृगाक्षीणां तथा तद्धि (टि)तां विद्युतां विधासि[लसितानि] च क्षणद्वयं क्षणादूर्ध्वं न तिष्ठन्ति। विद्युद्विलसितानि घनैर्मेघैरारब्धानि मृगाक्षीणां सङ्ग(त)ानि घनं गाढमारब्धानि स्वयमिति विद्युद्विलसितेन सह स्त्रीसङ्गतस्य समतापादनं निन्दार्थामिति तुल्ययोगिता।।

निन्दार्थां तुल्ययोगितां दर्शयति–**सङ्गतानीति।।**

निन्दार्थामुदाहरति–**सङ्गतानीति।** अत्र चञ्चलतया प्रसिद्धैः क्षणद्युतिभिः समीकृत्य मृगीदृशां सङ्गतानि निन्दार्थम् अभिहितानि। सेयं निन्दार्थतुल्ययोगिता।।३३२।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रावृषेण्यैर्जलधरैरम्बरं दुर्दिनायते।
रागेण पुनराक्रान्तं जायते जगतां मनः॥३३३॥

रत्नश्री

जलधरैः प्रावृषि भवैः कारणैः अम्बरमाकाशं दुर्दिनायते भिन्नाङ्गं जायते। जगतां मनः पुनस्तै रेव रागेण रतिभावेनाक्रान्तं विषयीकृतं रक्तं जायते। अत्र दुर्दिनत्वरक्तत्वयोर्विरागरागरूपयोः गुणपदार्थयोः विरोधप्रतिपत्तिरिति लक्षणं योज्यम्॥

हृदयङ्गमा

विरोधं लक्षयति, विरुद्धानामिति। –विशेषस्य प्रस्तुतगतोत्कर्षस्य, दर्शनाय प्रतिपादनाय एव, विरुद्धानां परस्परविरोधिनां, विरुद्धानां पदार्थानां सम्बन्धस्य तत्त्वतोऽसम्भवात् विरुद्धानामित्यस्य वास्तवविरोधाभावेऽपि प्रमुखे एव विरुद्धत्वेन आभासमानानामित्यर्थः, सामानाधिकरण्यशून्यानामिति यावत्; (अत एवोक्तं यथा, –"अविरोधेऽपि विरोधो यत्रोक्तः स्याद्विरोधः सः" इति) पदार्थानां जातिगुणकर्म्मद्रव्याणाम् इत्यर्थः, यत्र वैचित्र्ये, संसर्गदर्शनं सम्बन्धप्रतिपादनं, सामानाधिकरण्य-कीर्त्तनमित्यर्थः, सः विरोधः स्मृतः। यथेति उदाहरणार्थम्। (तथा च प्रस्तुतोत्कर्षप्रतिपत्तये आपाततः विरुद्धत्वेन प्रतीयमानानां पदार्थानां सामानाधिकरण्यप्रतिपादनरूपं वैचित्र्यं विरोध इति निष्कर्षः। स च जात्यादिभिर्जातेरिति चतुर्विधः, गुणादिभिर्गुणस्येति त्रिविधः, क्रियाद्रव्याभ्यां क्रियाया इति द्विविधः, द्रव्यस्य द्रव्येणेति एकविध इति मिलित्वा दशविधः अन्यैरुक्तो बोद्धव्यः। विरोधार्थकस्य अपिशब्दादेः सत्त्वे विरोधः शाब्दः, अन्यथा त्वार्थः इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

केचिद्वदन्ति। तेषामयमभिप्रायः, –"सुप्तोऽपि प्रबुद्धः" इत्यत्र यथा सुप्तत्ववदभिन्नश्च प्रबुद्धत्वंवान् इति बोधः व्युत्पत्तिवैचित्र्याच्च सुप्तत्वादेः प्रतियोगितया विरोधे आश्रयत्वादिना च पदार्थान्तरे अन्वयो न विरुद्धः, इहापि तथैव। "कुसुमानि शराश्चन्द्रो बाड़वो दुःखिते हृदि" इत्यादौ कथं विरोधस्यालङ्कारत्वम्, आरोपसत्त्वेन रूपकस्यैव सम्भवात्, अन्यथा रूपकस्थलेऽपि विरोधस्यैवालङ्कारत्वप्रसङ्गात् इत्यपि न वाच्यं, रूपकस्थले उपमाननिष्ठासाधारणगुणानामुपमेयगतत्वेन तत्प्रतिपत्त्यर्थं तन्निर्वाहकरारोपस्यैव चमत्कारकत्वं, न तु विरोधस्य, तेन विवक्षितार्थानुपादानात्। कुसुमानि इत्यादौ तु कुसुमानामपि दुःखजनकत्वप्रयुक्त एव चमत्कारो विवक्षितः, विरहिण्यवस्थादीनामत्यद्भुतस्यैव विवक्षितत्वात्, तस्य च विरोधेनैवोपपादनात्। अतः सत्त्वामात्रेण नारोपस्यालङ्कारतेति विश्वेश्वरपण्डितपादानां समाधानादिति दिक्)।।३३३।।

प्रभा

अथ विरोधं लक्षयति–**विरुद्धानामिति।** विशेषस्य प्रस्तुतगतोत्कर्षस्य दर्शनाय प्रतिपादनायैव विरुद्धानां परस्परैः सहानवस्थानवतां परस्परसामानाधिकरण्यशून्यानामित्यर्थः। पदार्थानां यत्र वैचित्र्ये संसर्गदर्शनं सहावस्थानं समानाधिकरण्यप्रतिपादनमित्यर्थः स विरोधमूलत्वा-द्विरोधालंकारः स्मृतः। यथेति उदाहरणोपन्यासाय। तत्र प्ररूढविरोधो दोषाय अप्ररूढश्चालंकाराय। प्ररोहश्च बाधबुद्ध्यानभिभूतत्वम्। बाधबुद्ध्याभिभूतत्वं च अप्ररोहः। तथा च विरुद्धानां नाम वस्तुतो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विरोधाभावेपि मुखतो विरुद्धत्वेन प्रतिभासमानानाम् इत्यर्थः। तदुक्तं प्रकाशकृता–विरोधः सोविरोधेपि विरूद्धत्वेन यद्वच इति। पदार्थानां जातिगुणक्रियाद्रव्याणाम्। तेषु जात्या जातिगुणक्रिया-द्रव्यैश्चतुर्भिर्विरोधो गुणस्य गुणक्रियाद्रव्यैस्त्रिभिः क्रियायाः क्रियाद्रव्याभ्याम् द्रव्यस्य द्रव्येणेति प्रकाशोक्तदशप्रकारो विरोधो ज्ञेयः। अयं शब्दश्लेषनिबन्धश्चेद्विरोधाभास उच्यते। इति प्रेमचन्द्रशर्माणः। वामनस्तु विरुद्धाभासत्वं विरोध इति सूत्रयित्वा (४.३.१२)

पीतं पानमिदं त्वयाद्य दयिते मत्तं ममेदं मनः
पत्राली तव कुङ्कुमेन रचिता रक्ता वयं मानिनि।
त्वं तुङ्गस्तनभारमन्थरगतिर्गात्रेषु मे वेपथु-
रत्वन्मध्ये तनुता ममाधृतिरहो प्रेम्णो विचित्रा गतिः।।

इत्युदाजहार। एष च अपिशब्दप्रयोगे वाच्योन्यथा व्यङ्ग्यः।।३३३।।

विवृति

इति तुल्ययोगिता।।

विरोधलक्षणमाह–

द्वि(वि?)विधो हि विरोधो भावानां सहानवस्थानलक्षणः परस्परपरिहारस्थितिर्नाम। इह यथासम्भवं ग्राह्यः। तेन आलिङ्गिता विरुद्धाः। तेषां पदार्थानां जातिगुणक्रियाद्रव्याणां संसर्गदर्शनं संसर्गस्य संयोगसमवायादेव (देर्यद्)दर्शनं उपलब्धिः स विरोधो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नामालङ्कारः। किमर्थं पुनर्विरुद्धानां सम्पद[पदा]र्थानां संसर्गदर्शनमित्यत्राह–विशेषदर्शनायैव। विशेषोऽसाधारणो धर्मो व्यतिरेकस्तदर्थमेव। यथेत्युदाहरति।।

विरोधोक्तिं लक्षयति–**विरुद्धानामिति।** विरुद्धानां क्रियार्थानां गुणानां संसर्गप्रकारः[?] विरोधदर्शनायैव विरोधप्रतिभासायैव, विरोधः।।

विरोधालङ्कारमाह–**विरुद्धानामिति।** विरुद्धानां ससंर्गाभावात् संसृष्टवद्वदता स(–वदवभास)मानतैव उपचारवृत्त्या संसर्ग इत्युच्यते। विरोधदर्शनाय इत्यत्रापि उपचारेण विरोधाभासः प्रतिपाद्यते। उक्तं च वामनादिभिः विरुद्धाभासत्वं विरोधः' इति। अवधारणेन आत्यन्तिकविरोधो निवर्त्यते। यदाश्रयो विरोधाभासः स विरोधः इति तत्रापि उपचारः।।३३३।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तनुमध्यं पृथुश्रोणि रक्तौष्ठमसितेक्षणम्।
नतनाभि वपुः स्त्रीणां कं न हन्त्युन्नतस्तनम्॥३३४॥

रत्नश्री

तनु कृशं मध्यम्। पृथुर्महीयसी श्रोणिः नितम्बो रक्तश्चौष्ठोऽधरः। असितं कृष्णमीक्षणमक्षि। नता निम्ना नाभिः। उन्नतौ स्तनौ यत्र तादृशं स्त्रीणां वपुः शरीरं कं नाम नरं [न] हन्ति चक्षुःप्रीतिमनःसङ्गादिक्रमेण दशमीं दशां कं न नयति? सर्वमेतादृशं जनं हन्ति। अत्र तनुमध्यपृथुश्रोणिप्रभृतीनां शरीरावयवद्रव्याणां परस्परविरोधिनां संसर्गदर्शनमिति लक्षणं योजनीयम्॥

हृदयङ्गमा

कूजितमिति। –राजहंसानां मदमञ्जुलं मदमनोहरं, कूजितं वर्द्धते वृद्धिं गच्छति, मयूराणाञ्ज रुतं केकाध्वनिः, उत्क्रान्तं सौष्ठवं मनोहारित्वं यस्मात् तादृशं सत्, क्षीयते। (अत्र एकस्मिन्नेव कूजिते रुते च शब्दरूपे कर्त्तरि विरुद्धयोरपि वृद्धिक्षयक्रिययोः संसर्गः विरोधः, सम्बन्धिभेदेन च तत्प्रशमनम्। अनेन वर्णनीये शरत्काले एकजातीययोरपि बलाबलकारित्वेन वैशिष्ट्यं प्रतीयते इति विरोधालङ्कारत्वमस्य)॥३३४॥

प्रभा

तत्रादौ क्रियाविरोधमुदाहरति–**कूजितमिति।** राजहंसानां मदमञ्जुलं मदेन मनोरमं कूजितं वर्धते। मयूराणाम् उत्क्रान्तम् अपगतं सौष्ठवं मनौहारित्वं यस्मात् तत् तादृशं कूजितं क्षीयते ह्रासमेति। अत्रैकस्मिन् शब्दरूपे कर्तरि विरुद्धयोर्वृद्धिक्षय-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रूपक्रिययोः संबन्धप्रतिपादनेन विरोधः संबन्धिभेदेन शब्दयोर्भिन्नत्वेन तत्प्रशमः। तेन च एवंविधवृद्धिक्षयकारितया शरत्कालस्य माहात्म्यं स्फुटं प्रतीयते इति अलंकारतास्य।।३३४।।

विवृति

उत्क्रान्तं गतं सौष्ठवमस्येति। अनेन शरत्समये हंसमयूराणां कुजितरुतयोर्वर्धनक्षययोर्विधिन्यो(नो)स्संसर्गो दर्शित इति विरोधालङ्कारः।।

कूजितमिति। अत्र वृद्धिक्षययोः क्रिययोः विरुद्धा[रोधा]भासः।।

उदाहरणानि–**कूजितमिति।** ऋतुसन्धिवशेन जायमान(ना)-कालविशेषव्यवस्थितोल्लासयोः हंसमयूरालापयोः संसृष्टिः विरोधाभासं जनयतीति; सहानवस्थानलक्षणो विरोध एषः।।३३४।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मृणालबाहु रम्भोरु पद्मोत्पलमुखेक्षणम्।
अपि ते रूपमस्माकं तन्वि! तापाय कल्पते॥३३५॥

रत्नश्री

मृणालवद्बाहू रम्भा कदली तद्वदूरू पद्ममिव मुखमुत्पलवदीक्षणे यत्र तत्तादृशमत्यन्तशीतवस्तुसरूपमपि रूपं ते तव सम्बन्धि तन्वि! तापाय तप्त्यर्थमस्माकं कल्पते [85a] भवति। किमिदं विरुद्धम्? अत्र शीतगुणस्य तद्वतो वा द्रव्यस्य बाहुप्रभृतेः तत्समुदायस्य वा रूपस्य शरीरद्रव्यस्य तापेनोष्णताकारिकर्मणा सह विरोध इति द्रष्टव्यम्॥

हृदयङ्गमा

प्रावृषेण्यैरिति। –प्रावृषेण्यैः वार्षिकैः, वर्षाकालिकैरिति यावत्, जलधरैः अम्बरम् आकाशं, दुर्दिनायते आच्छन्नं भवति, श्यामलं भवतीत्यर्थः, जगतां मनः पुनः रागेण अनुरागेण लौहित्येन च, आक्रान्तं जायते। (अत्र अनुरागस्य लौहित्येनाभेदारोपात् श्यामलत्वलौहित्ययोरेकजलधरसम्भवत्वरूपसंसर्गकीर्त्तनं विरोधः, तस्य श्लेषेण प्रशमनम्। अनेन च प्रस्तुतस्य वर्षासमयस्य वैशिष्ट्यं प्रतीयते)॥३३५॥

प्रभा

वस्तुगतगुणविरोधं दर्शयति–**प्रावृषेण्यैरिति।** प्रावृषेण्यैः प्रावृषि भवैर्जलधरैरम्बरं दुर्दिनायते श्यामलं भवतीत्यर्थः। जगतां जगति स्थितानां जनानां मनः रागेण अनुरागेण लौहित्येन च आक्रान्तं व्याप्तम् जायते। अत्रानुरागस्य लौहित्येनाध्यवसानात्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्यामत्वलौहित्यगुणयोरेकजलधरसंभवरूपसंसर्गकीर्तनं विरोधः। तस्य अनुरागरूपार्थान्तरेण परिहारः। तेन च वर्षासमयस्य विशेषः प्रतीयते इति वस्तुगतगुणविरोधोयं ज्ञेयः।।३३५।।

विवृति

प्रावृषि भवः[ाः] प्रावृषेण्य[ाः] तैर्जलधरैः कृत्वाऽम्बरं आकाशं दुर्दिनायते दुर्दिनं करोति। सुदिनदुर्दिननीहारेत्यादिना क्यङ्। रागेण पुनराक्रान्तं व्याप्तं जायते जगतां मनः। दुर्दिनगगन[राग]योः परस्परविरुद्धयोः ससंगदर्शनाद्विरोधः।।

प्रावृषेण्यैरिति। दुर्दिनशब्देन श्यामत्वं लक्ष्यते। अत्र श्यामत्वरक्तत्वयोः विरोधः।।

प्रावृषेण्यैरिति। समवायिकारणस्य हि कार्येण सह अवस्थानं दृश्यते। तत्कारणान्तरेऽपि उपचारादारोप्यमाणं समवायिकारण-भावस्य जलधरस्य कार्यभूतस्य रागस्य च सहानवस्थानं विरोधाभासः। इति सहानवस्थानलक्षणो विरोधः। पूर्वत्र तु कार्यद्वयस्य। अत्र कार्यकारणयोः इति भेदः।।३३५।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उद्यानमारुतोद्धूताश्चूतचम्पकरेणवः।
उदश्रयन्ति पान्थानामस्पृशन्तोऽपि लोचने॥३३६॥

रत्नश्री

उद्यानेषु मारुतैरुद्धूताश्चूतानां चम्पकानां च रेणवः पौष्पाः परागाः। पान्थानां विरहिणां लोचनमस्पृशन्तोऽपि दूर एव दृश्यमाना उदश्रयन्ति। उदस्त्रवन्तीत्यपि पठ्यते। उभयत्रापि रोदयन्तीत्यर्थः। तच्च विरुद्धम्। स्पृशतामेव रेणूनां नयनजलोद्गमनिमित्तत्वात्। कथमस्पृशन्त उदश्रयन्ति? अत्र स्पर्शनिषेधोदश्रयणयोः क्रिययोर्विरोध इति द्रष्टव्यम्। कूजितमित्यादेः [२.३३२] अस्य च को विशेषः। उभयत्रापि क्रियाविरोधात्। तत्र भिन्नाधिकरणयोः क्रिययोर्विरोधः। इह त्वभिन्नाधिकरणयोरिति महान् विशेषः। अन्यत्राप्येवंप्रकारत्वाद्विशेषस्थितेरिति॥

हृदयङ्गमा

तनुमध्यमिति। –स्त्रीणां तनुमध्यं, पृथुश्रोणि विशालनितम्बं, रक्तौष्ठम्, असितेक्षणं कृष्णनयनं, नतनाभि गभीरनाभि, तथा उन्नतस्तनं वपुः कं जनं, न हन्ति? न तापयति? अपि तु सर्वमेवेत्यर्थः। (अत्र तनुत्वपृथुत्वयोः रक्तत्वासितत्वयोः नतत्वोन्नतत्वयोर्गुणयोर्विरोधेन प्रस्तुतानां स्त्रीणां वैचित्र्यं प्रतीयते, आश्रयभेदाच्च तेषां विरोधपरिहारः)॥३३६॥

प्रभा

अवयवगतगुणविरोधं दर्शयति–**तनुमध्यमिति।** स्त्रीणां कामिनीनाम्। तनुमध्यं कृशावलग्नम्। पृथुश्रोणि विशालनितम्बम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रक्तौष्ठम् असितेक्षणं कृष्णनयनम्। नतनाभि निम्ननाभि। उन्नतस्तनं रङ्कुचम्। वपुः कं पुरुषं न हन्ति न पीडयति। सर्वमेव पीडयतीत्यर्थः। अत्र तनुत्वविशालत्वयो रक्तत्वासितत्वयो-र्नतत्वोन्नतत्वयोर्गुणयोर्विरोधः। आश्रयीभूतावयवभेदेन च परिहारः। तेन वर्णनीयाया नायिकाया विशेषः प्रतीयते। अतोवयवगतगुणविरोधायेम्। केचित्तु बहूनां गुणयुग्मानां विरोधोपन्यासे वैचित्र्यातिशय इति ज्ञापनाय तादृशगुणविरोधप्रदर्शनायैतदुहारणमिति मन्यन्ते।।३३६।।

विवृति

अनेनैकत्रैव स्त्रीशरीरे तनुत्वपृथुत्वयोः रक्तत्वकृष्णत्वयोः नतत्वोन्नतत्वयोरन्योन्यविरुद्धयोः संसर्गदर्शनाद्विरोधः।।

तन्विति। अत्र तनुत्वादीनां पृथुत्वादीनामेकद्रव्याश्रयेण विरोधाभासः इति गुणनिबन्धनः प्रागुक्तविरोधः।।३३६।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृष्णार्जुनानुरक्ताऽपि दृष्टिः कर्णावलम्बिनी।
याति विश्वसनीयत्वं कस्य ते कलभाषिणी॥३३७॥

रत्नश्री

कलभाषिणि! ते दृष्टिः कस्य नाम विश्वसनीयत्वम् विस्त्रब्धतां याति? न कस्यचित्। कुतः? यतः कृष्णे नारायणे कृष्णायां द्रौपद्यां वा अर्जुने धनञ्जये चानुरक्ता सती कर्णं तद्विपक्षमङ्गराजमवलम्बते भजते, तस्माद्विरुद्धपक्षपातिनी कथमियं विश्वास्या खलेति शब्दच्छलेन विरोधः प्रतीयते। वस्तुतस्तु दृष्टिः कृष्णा श्यामा कचिदर्जुना धवला अनुरक्ता ताम्रा च स्निग्धा वा कर्णं च श्रुतिपथमायातत्वादवलम्बत इत्यविरोधः। श्लेषानुविद्धोऽयमीदृशो विरोधः प्रतिपत्तव्य इति॥

विरोधमुपसं[हरति]–

इत्यनेकप्रकारोऽयमलङ्कारः प्रतायते।

इति कथितेन क्रमेणायं विरोधोऽलङ्कारोऽनेको विचित्रः प्रकारो विकल्पोऽस्येति अनेकप्रकारः प्रतायते प्रसरति प्रतीयते लक्ष्यते वा।

अपरोऽपि प्रकारः कश्चिदुदाह्रियते–

सद्वयोऽप्यद्वयः सोऽयमुन्मुखोऽप्यनताननः।

कर्कशोऽपि मृदुस्पर्शः स्तनभारो मृगीदृशाम्॥ इति।

॥ इति विरोधचक्रम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हृदयङ्गमा

मृणालेति। –हे तन्वि! मृणालवत् शीतलौ बाहू यत्र तत्, रम्भे इव ऊरू यत्र तत्, पद्ममिव उत्पले इव च मुखम् इक्षणे च यत्र तादृशमपि, ते रूपम् अस्माकं तापाय कल्पते। (अत्र पूर्वोक्ते उपमितिगर्भबहुव्रीहौ शीतलत्वादिकं गुणः, तस्य च तापक्रियया विरोधः। मृणाले एव बाहू यत्र इत्यादिरूपकसमासे तु मृणालत्वरम्भात्वादिभिर्जातिभिस्तापक्रियायाः विरोधः। वक्तु-र्विरहित्वेन च तस्य परिहारः)।।३३७।।

प्रभा

विषमविरोधमुदाहरति–**मृणालेति।** हे तन्वि ते रूपम् मृणालमिव शीतले बाहू यस्य तत्। रम्भा कदली तत्सदृशौ ऊरू यस्य तत्। पद्ममिव उत्पले इव च मुखम् ईक्षणे च क्रमेण यस्य तत्। एतादृशशीतलवस्तुतुल्यमपि अस्माकं तापाय संतापाय कल्पते। विरहिण उक्तिरियम्। अत्र कारणगुणाः कार्यगुणानारभन्ते इति न्यायवित्समयानुरोधेन शीतलरूपात् कारणात् शीतलं कार्यं भवितुमर्हति न तु संताप इति विषमविरोधः। समवायिकारणे स नियमो न तु निमित्तकारणे इति परिहारः। अनेन च नायिकायाः सौन्दर्यातिशयो वर्णितो भवति इति विषमविरोधालंकार।।३३७।।

विवृति

मृणालप्रभृतीनां निसर्गशिशिराणां तापकरणं विरुद्धामिति विरोधः। शेषभृजु।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मृणालेति। कारणगुणप्रक्रमेण कार्ये गुणारम्भः इति हि प्रसिद्धिः। अत्र मृणालादित्वेन रूपितैः अवयवैः उपेतस्य शैत्यगुणाश्रयकारणभूतस्य रूपस्य विसदृशं कार्यं स्वविषये जातमिति कामिना व्याहृतत्वात् विरोधाभासः। इति विसदृशकार्यकारणलक्षणो विरोधः।।३३७।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अप्रस्तुतस्तोत्रमादर्शयन्नाह–

अप्रस्तुतप्रशंसा स्यादप्रक्रान्तेषु या स्तुतिः॥३३८॥

रत्नश्री

अप्रक्रान्ते तु अप्रकृत एव बहिस्तत्त्वेन कस्मिंश्चिद्वस्तुनि बुद्धिस्थे विषये या स्तुतिः संराधनमित्यनूद्य सा अप्रस्तुतप्रशंसा स्यादिति विधीयते, यदुद्देशेऽप्रस्तुतस्तोत्रमुक्तम्। अप्रक्रान्तेप्सित-स्तुतिरिति पाठेऽप्रक्रान्तस्येप्सितस्येष्टस्य वस्तुनः कस्यचिदप्रक्रान्ता वा तद्विषयत्वात्। स्तुतिरिति [85b] व्याख्येयं शेषं समानम्॥

तामुदाहरन्नाह–

हृदयङ्गमा

क्रियायाः भावाभिमाने विरोधं दर्शयित्वा अभावाभिमाने विरोधं दर्शयति, उद्यानेति। –उद्यानमारुतेन उपवनवायुना, उद्धूताः चूतचम्पकानां रेणवः परागाः, पान्थानां पथिकानां, लोचने नेत्रे, अस्पृशन्तोऽपि उदश्रयन्ति उद्गतवाष्पे कुर्वन्ति, विरहित्वादिति भावः। (अत्र अस्पृशनतोऽपि इति स्पर्शनाभावेन उदश्रयणक्रियायाः विरोधः, तत्परिहारश्च परागाणामुद्दीपकत्वादिति अभावाभिमाने क्रियागतोऽयं विरोधः)॥३३८॥

प्रभा

असंगतिविरोधमुदाहरति–**उद्यानेति।** उद्यानमारुतेनोद्धूता-श्चूतानाम् आम्राणां चम्पकानां च रेणवः परागाः। पान्थानां पथिकानाम् लोचने अस्पृशन्तोपि उदश्रयन्ति उद्गतबाष्पे कुर्वन्ति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत्र स्पर्शनाभावेपि वाष्पोद्गम इति परस्परमसंगतेरयमसंगतिर्नाम विरोधः। तत्प्रशमनं च स परागाणामुद्दीपिकतयेति ज्ञेयम्। अनेन च नायकस्योत्कण्ठातिशयः सूच्यते।।३३८।।

विवृति

चूतचम्पकतरूणां पुष्पाणीति तस्यावयव इत्यागतस्याणः फले लुगित्य(त्र)पुष्पाच्चेति वक्तव्यमिति लुक्। तेन चूतचम्पकरेणव इति गम्यन्तो (सम्यगेव)। पान्थानां लोचने उद्रताश्रु कुर्वन्ति दर्शयन्ति(उदश्रयन्ति) (अ) स्पृशन्तोऽपि दर्शनपथवर्तिनोऽपि पान्थाः(न्) अश्रु विमोचयन्तीत्यस्पृशतामश्रुविमोचनकारित्वं (त्वात्) विरोधः।।

उद्यानेति। पांसूनां स्पर्शनद्वारा वाष्पजनकत्वं स्वभावः। अत्रं उद्यानचम्पकरेणवः स्पर्शराहित्येऽपि पान्थैर्बाष्पहेतवः इति विरोधाभासः। स्वभावविरोधलक्षणलक्षणो विरोध एषः।।३३८।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुखं जीवन्ति हरिणा वनेष्वपरसेविनः।
जलैरयत्नसुलभैस्तृणदर्भाङ्कुरादिभिः॥३३९॥

रत्नश्री

जलैर्दर्भाङ्कुरैस्तृणोद्रमैः। आदिशब्देन तरुपल्लवादि-भिरर्थैरुपकरणैर्वा अयत्नेन सेवापरिक्लेशादि[राहित्येन] सुलभैः [सुख]प्राप्यैरकृच्छ्राधिगतैरमृतायमानैरपरमन्यं कञ्चिदसेवमानाः परचित्ताराधनदुःखानभिज्ञाः स्वाधीनवृत्तयः सुखं निरा कुलं [हरिणाः] वनेषु जीवन्ति। अपि नाम तादृशी वृत्तिरस्माकमपि स्यात्? प्रतिपक्षपातः खलु प्रजायते। तादृशीं कल्याणीं वृत्तिं कल्पयतो हरिणेषु ईर्ष्या लक्ष्यत इति॥

हृदयङ्गमा

कृष्णेति। –हे कलभाषिणि। मधुरवादिनि। ते दृष्टिः कृष्णार्जुनानुरक्ता अपि अर्जुने पार्थे अनुरक्ता कृष्णा द्रौपद्यपि, तद्रूपापीत्यर्थः, यद्वा,–कृष्णे कृष्णवर्णे, अर्जुने अनुरक्ता, कृष्णे अर्जुने च अनुरक्ता इति वा, कर्णावलम्बिनी राधेयपक्षपातिनी, पक्षे, – कृष्णा असिता, कनिनिकायां: समन्तात् अवस्थितमण्डलस्य कृष्णत्वादिति भावः, तथा अर्जुना धवला, कृष्णमण्डलं परितः अवस्थितभागस्य शुक्लत्वादिति भावः, तथा अनुपश्चात्, प्रान्तभागे इत्यर्थः, रक्ता रक्तवर्णा, पक्षेऽस्मिन् अपि–शब्दः चार्थे, तथा कर्णावलम्बिनी अपि आकर्णविश्रान्तेति च; कस्य विश्वसनीयत्वं याति? न कस्यापि, न कोऽपि ते दृष्टिं विश्वसितीत्यर्थः। (अत्र कृष्णारूपद्रव्यस्य राधेयावलम्बनमिति क्रियाया आपाततः प्रतीयमानोऽपि विरोधः श्लेषेण शाम्यति इति विरोधालङ्कारः,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किञ्च विरोधोत्पत्तौ श्लेषस्य हेतुत्वमपि एतेन दर्शितं, तेन विना तस्यानुत्थानात् ; ततश्च नानयोः सङ्करः, सङ्करश्च स्वहेतुबलाल्लब्धसत्ताकयोरलङ्कारयोर्भवति; तेन यो यसय हेतुत्वं भजते तेन सह तस्य सङ्करो न युक्तः। उक्तञ्च, –"न च विरोधोत्पत्तिहेतौ श्लेषस्य विरोधेन सह अङ्गाङ्गिसङ्करः" इति। अत एव श्लेषमिश्रत्वेनास्य वैचित्र्यमित्युक्तं, यथा,– "सन्निहितबालान्धकारा भास्वन्मूर्त्तिश्च" इत्यादौ विरोधिनोर्द्वयोरपि श्लिष्टत्वम्। "कुपतिमपि कलत्रवल्लभम्" इत्यादौ एकस्य श्लिष्टत्वम् विविक्तविषयत्वञ्च दर्शितमेव इत्यवगन्तव्यम्)।।३३९।।

प्रभा

श्लेषमूलं विरोधमुदाहरति–**कृष्णार्जुनेति।** हे कलभाषिणि मधुरवचने। ते दृष्टिः कृष्णार्जुनयोरनुरक्तापि कर्णावलम्बिनी राधेयानुसारिणी। कृष्णा असिता अर्जुना श्वेता अनुरक्ता प्रान्तप्रदेशे आरक्तापि कर्णावलम्बिनी कर्णप्रान्ताश्रयिणी। कस्य विश्वसनीयत्वं याति। विरुद्धपक्षद्वयाश्रयणादिति भावः। इति द्वितीयार्थः। अत्र कृष्णार्जुनानुरक्तायाः कर्णावलम्बनं विरुद्धमिति क्रियाविरोधः। द्वितीयार्थेन तत्परिहारः। अयं च विरोधः श्लेषमूलक इति श्लेषविरोधः। तेन दृष्टेः सौन्दर्यं प्रतीयते।।३३९।।

विवृति

दृश्यतेऽनयेति दृष्टिः। करणसाधनः क्तिन् दृक्शक्त्यधिष्ठानं चक्षुः कृष्णा कृष्णवर्णा श्वेतार्जुनेति अनुरक्ता ताम्र(ा) कृष्णाव (च) सा अर्जुनाव(च) सा अनुरक्ता च सा कृष्णार्जुना(नु)रक्तेति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विशेषणसमासः। कर्णं श्रवणमवलम्बते इति कर्णावलम्बिनी कर्णान्तविश्रान्ता। सा कस्य हे कलभाषिणि मधुराभिधायिनि विश्वसनीयत्वं याति। विरोधः पुनः कृष्णो वासुदेवोऽर्जुनः पार्थः तयोरनुक्ताऽपि कर्णं राधेयं तयोर्विपक्षभूतं आलम्बते। तदा (?) न विश्वासयोग्या स्यादिति।।

कृष्णेति। अत्र विरुद्धपक्षपातित्वं विरोधः ; कृष्णपार्थयोः रक्ता या श्रूयते सा कर्णपक्षपातिनी न भवेत्। कृष्णा धवला रक्ता च कर्णान्तायता च दृष्टिः इति श्लेषोपहितो विरोधः।।

कृष्णेति। अत्र श्लेषद्वारेण विरोधाभासः इति श्लेषानुविद्धो विरोध एषः।।३३९।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सेयमप्रस्तुतैवात्र मृगवृत्तिः प्रशस्यते।
राजानुवर्तनक्लेशनिर्विण्णेन मनस्विना॥३४०॥

रत्नश्री

सेयमनन्तरोक्ता मृगाणां वृत्तिरयत्नसुलभजलदर्भाङ्कुररूपा जीविका, वर्तन्ते जीवन्त्यनयेति कृत्वा। अप्रस्तुता अप्रकान्तैव न प्रस्तुतापि तादृशप्रकरणाभावात्। प्रशस्यते संराध्यते अत्र प्रयोगे केनचिद् राज्ञोऽनुवर्तनम् सेवा तदेव क्लेशः दुःखरूपत्वात्। ततो निर्विण्णेनातिविरक्तेन मनस्विनोदात्तेन केनचित्ततोऽप्रस्तुतापीयमीदृग्विषया [स्तुतिः] काव्यशोभाकरत्वादलङ्कारः। अयमपरोऽत्र उदाह्रियते–

सुखिनस्ते महात्मानः संतोषपरिभाविताः।
सुखाभासैः परिक्लेशैर्वर्जितात्मपरिग्रहैः॥
इत्थमप्रक्रमेणैवमनिवृत्तिः प्रशस्यते।
धनार्जनादिसंक्लेशनिर्वेदवशवर्तिना॥

समासोक्तेरियं कथं भेद्यते, उभयत्राप्यन्यदभिप्रेत्यावान्तराभिधानात्? तत्र सदृशम एवार्थान्तरमभिधीयते। इह तु विसदृशमिति महान् भेदः। विसदृशात् कथमर्थान्तर प्रतीतिरिति चेत्? सदृशादपि कथम्? अर्थप्रकरणादेरिति चेदिहाप्येवमस्तु। तत्र तादृशी प्रतीतिरिहेदृशीति न किञ्चिद्विरुध्यते। अन्ये त्विह प्रशस्यमेवाभिधीयते। तत्र तु निन्द्यमपीति विशेषं व्याचक्षते। तथैकान्तिको भेदोऽनयोर्निदर्शितः स्यादिति॥

॥ इत्यप्रस्तुतस्तोत्रम् ॥

व्याजस्तुतिमाधकृत्याह–

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हृदयङ्गमा

इतीति। –इति एवम्प्रकारेण, अयम् अलङ्कारः विरोधः इत्यर्थः, अनेकप्रकारः बहुविधः, प्रतीयते। (बहुविधत्वञ्चास्य दर्शितमेव (३३३) सङ्ख्याकश्लोकस्य टीकायाम्। तत्र जातेः जात्या विरोधो यथा,–"यस्याकर्णनमात्रतोऽपि भवतोऽवस्थेयमीदृग्विधा, येनाङ्गे मलयानिलोऽपि भवति प्रायः करीषानलः। हंहो! मानस! वालिश! प्रतिपथं प्रत्याशमुद्ग्रीविकां, कुर्वन्तं नयनातिथिं पुनरहो! कर्त्तुं किमाकाङ्क्षसि?"।। इति। अत्र द्वितीयपादे वायुत्ववह्नित्वजात्योर्विरोधः। एवमन्यदपि ज्ञेयम्। "प्रतीयते" इत्यत्र "अतिशोभते" इत्यपि पाठः)।।–

इदानीम् अप्रस्तुतप्रशंसां लक्षयति, अप्रस्तुतेति। –अप्रक्रान्तेषु, अपस्तुतेषु (अप्रक्रान्तेषु इति षष्ठ्यर्थे सप्तमी बोध्या, बहुवचनमविवक्षितं, द्वयोरेकस्य वा अप्रस्तुतत्वेऽपि अस्याः सम्भवात्)। या स्तुतिः, प्रस्तुतस्य निन्दार्थमित्यध्यहार्य्यम्; सा अप्रस्तुतप्रशंसा स्यात्। (तथा च,–अप्रस्तुतस्तवेन प्रस्तुतस्य निन्दासूचनमप्रस्तुतप्रशंसा इति लक्षणम्। "अप्रक्रान्तेप्सितस्तुतिः" इति पाठान्तरं, तत्र अप्रक्रान्तस्य अप्रस्तुतस्य, ईप्सिता अभिमता स्तुतिरिति स एवार्थः। अत्र केचिदाहुः, –अप्रक्रान्तेन अप्रस्तुतवर्णनेन ईप्सितस्य प्रस्तुतस्य स्तुतिर्वर्णनम् अप्रस्तुतप्रशंसा इत्येवमर्थे कृते अप्रस्तुतार्थप्रोक्त्या प्रस्तुतार्थप्रतीतौ अप्रस्तुतप्रशंसेति नवीनोक्ताप्रस्तुतप्रशंसालक्षणेनास्य सङ्गतिः स्यादिति। तदसङ्गतमेव प्रतिभाति, ग्रन्थकृता तु तादृशस्थले समासोक्तिरेवाङ्गीक्रियते; यथा, –"वस्तु किञ्चिदभिप्रेत्य तत्तुल्यस्यान्यवस्तुनः। उक्तिः सङ्क्षेपरूपत्वात् सा समासोक्तिरिष्यते।।" इति इत्थञ्च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अप्रस्तुतवर्णनेन प्रस्तुतप्रतीतौ समासोक्तिः, प्रस्तुतनिन्देच्छया अप्रस्तुतप्रशंसनमेवाप्रस्तुतप्रशंसेति निष्कर्षः, तेन च संज्ञाया अन्वर्थताऽपि सिद्धा। अत एवोक्तं भोजराजेनापि, –"अप्रस्तुतप्रशंसा स्यादस्तोतव्यस्य या स्तुतिः। कुतोऽपि हेतोर्वाच्या च प्रत्येतव्या च सोच्यते।।" इति। नव्यास्तु अप्रस्तुतवाच्यात् प्रस्तुतप्रतीतौ अप्रस्तुतप्रशंसा, प्रस्तुतार्थप्रोक्त्या अप्रस्तुतार्थप्रतीतौ समासोक्तिरिति विषयविभागेन अलङ्कारद्वयमाहुः। तत्र अप्रस्तुतप्रशंसायाः पञ्च भेदाश्च दृश्यन्ते; यदुक्तं विश्वनाथेन, –"क्वचिद्विशेषः सामान्यात् सामान्यं वा विशेषतः। कार्य्यान्निमित्तं कार्य्यञ्च हेतोरथ समात् समम्।। अप्रस्तुतात् प्रस्तुतञ्चेद्गम्यते पञ्चधा ततः। अप्रस्तुतप्रशंसा स्यात्–।।" इति। यच्च केनचिदुक्तं, –"प्रस्तुतेन प्रस्तुतस्य द्योतने प्रस्तुताङ्कुरः। किं भृङ्ग! सत्यां मालत्यां केतकीकण्टकेच्छया?"।। इति। अत्र वाच्यव्यङ्ग्यवृत्तान्तयोर्द्वयोरपि प्रकृत्वेन समासोक्त्यप्रस्तुतप्रशंसाभ्यामतिरिक्तत्वस्य स्फुटत्वात् प्रस्तुताङ्कुरालङ्कार इति, तत्तु न सम्यक्; यतो हि प्रियेण सह विहरन्त्या उक्तौ भृङ्गोऽपि प्रकृत एव, न च भृङ्गसम्बोधनानुपपत्त्या प्रियमात्राभिप्रायेणैवेयमुक्तिरिति वाच्यम, अचेतनेऽप्यामन्त्रणदर्शनेन तदविरोधात्। एवञ्च प्रकृतेन वाच्येन भृङ्गोपालम्भेन पत्न्याः कुलबध्वाः सौन्दर्य्यादिगुणशालिन्याः सत्त्वे क्रूरजनपरिवृतायां सर्वस्वापहरणसङ्कल्पदुरासदायां कण्टकाकुलकेतकीकल्पायां वेश्यायां समागमेन किम् इत्युपालम्भो द्योत्यते इति नालङ्कारत्वमस्य; अप्रस्तुतप्रशंसायाम् अप्रस्तुतत्वेन वाच्यार्थस्यावर्णनीयतया तत्राभिधायां विरतायां वाच्यार्थेनाक्षेपात् प्रसतुतार्थव्यक्तिः ; इह तु वाच्यार्थस्यापि प्रस्तुतत्वेन तत्रैव पर्य्यवसानसम्भवेऽपि वस्तुसौन्दर्य्यबलेनाभिमतार्थव्यक्तिरिति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ध्वनिरेव। रसगङ्गाधरकृतस्तु अत्राप्यप्रस्तुतप्रशंसैव भवति न पुनरलङ्कारान्तरकल्पनं, किञ्चिदुक्तिवैचित्र्येण तत्कल्पने अलङ्कारानन्त्यप्रसङ्गात्। न च तल्लक्षणानाक्रान्तत्वात् कथमेतदिति वाच्यम्; न ह्यप्रस्तुतत्वं सर्वथा प्रस्तावराहित्यं विवक्षितं, किन्तु मुख्यतात्पर्य्यविषयीभूतार्थातिरिक्तत्वम्। इदञ्च सर्वथैवाप्रस्तुते प्रस्तुतेऽपि मुख्यतात्पर्य्याविषयीभूते च समानमेव, अतो भृङ्गादेस्तत्र सत्तामात्रेण प्रकृतत्वेऽपि मुख्यतात्पर्य्यस्य नायिकाद्युपलम्भ एव सत्त्वादप्रस्तुतेन प्रस्तुतप्रतीतिरिति तल्लक्षणाक्रान्तत्वं स्पष्टमेव इत्याहुः)।।३४०।।

प्रभा

विरोधमुपसंहरति–**इत्यनेकेति**। एवमयलंकारः अनेकविधः प्रतीतिविषयो भवति। तथा च भोजराजेन ग्रथितविरोध उदाहृतोस्ति यथा–

दिग्वासा यदि तत् किमस्य धनुषा शस्त्रस्य किं भस्मना
भस्मस्याथ किमङ्गना यदि च सा कामं परिद्वेष्टि किम्।
इत्यन्योन्यविरुद्धचेष्टितमिदं पश्यन्निजस्वामिनो
भृङ्गी सान्द्रशिरावनद्धपरुषं धत्तेस्थिशेषं वपुः।।२९० पत्रे इति।

अत्र दिग्वासस्त्वादीनामुत्तरोत्तरग्रथनादन्योन्यासंगतादयं ग्रथितनामा विरोधभेदः। अधिकविरोधो यथा–

एको दाशरथिः कामं यातुधानाः सहस्त्रशः।
ते तु यावन्त एवाजौ तावद्वा ददृशे स तैः।। इति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत्रैकस्य दाशरथेरनेकसंख्यैर्यातुधानैर्यत् समरकर्म तत्र तैरस्य तावद्वा दृश्यमानत्वेनैकसंख्याविरुद्धमाधिक्यं गम्यते। इत्ययमधिकाख्यो विरोध इति। विस्तरस्तु भोजप्रणीते सरस्वतीकण्ठाभरणे द्रष्टव्यः।। उत्तरार्धेन अप्रस्तुतप्रशंसा लक्षयति–**अप्रस्तुतेति।** अप्रक्रान्तेषु षष्ठ्यर्थे सप्तमी। अप्रस्तुतानामित्यर्थः। या स्तुतिः प्रस्तुतस्य निन्दार्थमिति शेषः। सा अप्रस्तुतप्रशंसा। अप्रक्रान्तेषु इति बहुवचनमविवक्षितम्। तेन द्वयोरेकस्य वा अप्रस्तुतस्य स्तुतावपि एषा भवति। अप्रक्रान्तेप्सितस्तुतिरिति पाठे अप्रस्तुतस्य ईप्सिता प्रस्तुतनिन्दार्थमभीष्टा स्तुतिरिति स एवार्थः। नव्यास्तु अप्रस्तुताद् वाच्यात् प्रस्तुतप्रतीतौ अप्रस्तुतंप्रशंसा प्रस्तुताद् वाच्याद् अप्रस्तुतप्रतीतौ समासोक्तिरिति विषयविभागेनालंकारद्वयमाहुः। अयमाचार्यदण्डी तु अप्रस्तुताद्वाच्यात् प्रस्तुतस्य प्रतीतौ समासोक्तिः, अप्रस्तुतप्रशंसया प्रस्तुतस्य निन्दा अप्रस्तुतप्रशंसा इति विषयविभागेनालंकारद्वयं स्वीकरोति। आचार्यमते अप्रस्तुतप्रशंसेति संज्ञाया अन्वर्थता भवति। अन्ये तु समासोक्तौ वाच्यव्यङ्ग्ययोरुपमानोपमेयभावः, अप्रस्तुतप्रशंसायां तु व्यङ्ग्यार्थस्य निन्दा इति भेदं दर्शयन्ति। तदपरे न सहन्ते। यतः सुखं जीवन्ति हरिणा इत्युदाहरणे वयमधन्या इति वैधर्म्येण औपम्यमस्तीति सोयं समासोक्तिविषयः स्यात्। सेयमप्रस्तुतैवात्र मृगवृत्तिः प्रशस्यते इति ग्रन्थकर्त्रा कृतेनोदाहरणविवरणेन संज्ञाया अन्वर्थताङ्गीकारे ग्रन्थकर्तुः स्वारस्यं दृश्यते। तथा च अप्रस्तुतप्रशंसायामप्रस्तुतस्य प्रशंसैवापेक्षिता भवति। न तु उक्तिमात्रे सा भवितुमर्हति इति निष्कर्षः।।३४०।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विवृति

इदानीं प्रकृतमुपसंहरन्नाह–

इत्यनेकप्रकारोयमलङ्कारो विरोधः प्रतायते विस्तार्यते। 'तनोतेर्यकी'–ति नकारस्यात्वम्।।

उपसंहरति–इतीति।।

इति विरोधालङ्कारः।

अप्रस्तुतस्तोत्रमलङ्कारं निर्दिशति–

अप्रस्तुतमिति लक्ष्यनिर्देशः अप्रक्रान्ताऽपि(?) या स्तुतिरिति लक्षणनिर्देशः।।

अप्रस्तुतप्रशंसा लक्षयति–अप्रस्तुतेति।।३४०।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यदि निन्दन्निव स्तौति व्याजस्तुतिरसौ मता।
दोषाभासा गुणा एव लभन्ते ह्यत्र सन्निधिम्॥३४१॥

रत्नश्री

निन्दन्निव दोषमाचक्षाण इव स्तौति गुणं भाषते यदि चेत्, असावेवंलक्षणा व्याजस्तुतिर्मता इष्टा। कथमत्र गुणाः प्रतीयन्ते? यतस्तुतिरियं गुणाविष्क्रियालक्षणा स्यादिति ब्रवीति। हिर्यस्मादर्थे। यदत्रोक्तिविशेषे दोषवदाभासन्ते प्रतिभान्ति तादृशपदोपादाना-देर्दोषाभासा गुणा एव शौर्यादयो न दोषोऽपि कश्चित्। अत एव लेश[86a]स्तुतेरियं भिद्यते। तत्र हि दोषे गुणः कश्चिदेव प्रती[य]ते। यदुक्तम्–

दोषाभासो गुणः कोऽपि दर्शितश्चाटुकारिता।

[2.200]

इति। सन्निधिमवस्थानं लभन्ते प्रतीयन्त इति यावत्। अत्र व्याजस्तुतौ। ततः स्तुतिरेवेयम् सर्वथा [न] निन्दा काचिदपीति॥

तामुदाहरन्नाह–

प्रभा

अप्रस्तुतप्रशंसामुदाहरति–**सुखमिति।** अपरसेविनः परसेवाविमुखाः। हरिणा अयत्नसुलभैः सुखसाध्यैस्तृण-दर्भाङ्कुरादिभिरन्नैः भोज्यैर्वनेषु सुखं जीवन्ति। सेवानिर्विण्णस्योक्तिरियम्॥३४१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तापसेनापि रामेण जितेयं भूतधारिणी।
त्वया राज्ञापि सैवेयं जिता मा भून्मदस्तव॥३४२॥

रत्नश्री

रामेण दाशरथिना भार्गवेण वा तापसेन चतुरङ्गबलहीनेन तपस्विनापि। अ[नादरं] सूचयत्यपिशब्दः। कथञ्चिदनुगृहीतमुनिरूपेण जन्मान्तरोपात्ततपः-प्रभावयोगाद्वा। तापसेनेति श्लिष्टम्। अत एवेयं श्लेषानुगतैव प्रवर्तते। यद्वक्ष्यति-इति श्लेषानुविद्धानामित्यादि[२.३४५]। इयं भूतधारिणी पृथिवी जिता आक्रान्ता। त्वया तु चतुरङ्गबलपरिवारिणा राज्ञा नराधिपेनापि सता। नातःपरमिहाधिकं पदम् अस्तीत्यपिशब्देन सूचयति। सैवेयं जिता तापसेन जिता एव। नान्या तदहमजयं पृथिवीमिति मदोऽहङ्कारस्तव मा भूत्। कोऽत्र विशेष इति चेत्-निन्दनेन च। महानुभावेन जितसमस्तमहीमण्डलेन सकलनरेन्द्रचूड़ामणिना गुणारामेण रामेण समीकृत्य परया स्तुत्या संयोजितो राजा कश्चिदिति व्याजस्तुतिरीदृशी सुतरां रमणीयेति॥

हृदयङ्गमा

अप्रस्तुतप्रशंसा दर्शयति, सुखमित्यादि। –अपरसेविनः न परान् सेवन्ते इति तादृशाः, परसेवानभिज्ञा इत्यर्थः, स्वाधीना इति यावत्, हरिणाः वनेषु अयत्नसुलभैः अनायासलभ्यैरित्यर्थः, तृणदर्भाङ्कुरादिभिः अन्नैः सुखं जीवन्ति। (परसेविनो वयं सदैव प्रभूपरितोषव्याकुलमानसा दुःखेनैव जीवाम इति ध्वनिः। "अन्नैः" इत्यत्र "अर्थैः" "तृण" इत्यत्र "जल" इति च पाठान्तरम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रभुसेवाविरक्तस्य भृत्यस्योक्तिरियम्)। अत्र राजानुवर्त्तने राजसेवायां, यः क्लेशः तेन निर्विणेन प्राप्तनिर्वेदेन, मनस्विना केनचित् प्रशस्तमनसा, इयम् अप्रस्तुता एव सा मृगवृत्तिः प्रशस्यते। (इति अप्रस्तुतप्रशंसा अप्रस्तुतस्य मृगस्य स्तुत्या स्वस्य निन्दासूचनात्। एवकारेण अप्रस्तुतप्रस्तुतयोरुभयोः प्रशंसायां नायमलङ्कार इति सूचितम्; तेन, –"याते मय्यचिरान्निदाघ-मिहिरज्वालाशतैः शुष्कतां, गन्ता कं प्रति पान्थसन्ततिरसौ सन्तापमालाकुला। इत्थं यस्य निरन्तराधिपटलैर्नित्यं वपुः क्षीयते, धन्यं जीवनमस्य मार्गसरसो धिग्वारिधीनां जनुः॥" इत्यत्र अप्रस्तुतस्य मार्गसरसः प्रस्तुतस्य च दातुः प्रशंसेति नाप्रस्तुतप्रशंसा किन्तु समासोक्तिरेव)॥३४१॥३४२॥

प्रभा

उदाहरणं संगमयति–**सेयमिति**। अत्र एतदुदाहरणे राजानुवर्तनक्लेश-निर्विण्णेन सेवायाः श्ववृत्तित्वादिति भावः। तदुक्तं मनुना–सेवा श्ववृत्तिराख्याता तस्मात् तां परिवर्जयेद् इति। मनस्विना सेयम् अप्रस्तुतैव मृगवृत्तिः प्रशस्यते। एवकारेण प्रस्तुताप्रस्तुतयोः प्रशंसायां नायमलंकार इति गम्यते। तथाहि–

याते मय्यचिरान्निदाघमिहिरज्वालाशतैः शुष्कतां
गन्ता कं प्रति पान्थसंततिरसौ संतापमालाकुला।
इत्थं यस्य निरन्तराधिपटलैर्नित्यं वपुः क्षीयते
धन्यं जीवनमस्य मार्गसरसो धिग् वारिधीनां जनुः॥

अत्राप्रस्तुतस्य मार्गसरस प्रस्तुतस्य दातुश्च प्रशंसा इति नेयमप्रस्तुतप्रशंसा किंतु समासोक्तिरेव॥३४२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विवृति

तदुदाहरति–

स्वयं विवृणोति

सेयमप्रस्तुतैवाप्रक्रान्तैवात्र मृगाणां रुरुप्रभृतीनां प्राणयात्रा प्रशस्यते। केनापि सेवानिर्विण्णेन सेवोद्विग्नेन मनस्वि[नाम]नोऽभिमानः मानिनेति।।

उदाहरति–**सुखमिति**। एतद्व्याचष्टे–**सेति**।।३४१–३४२।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुंसः पुराणादाच्छिद्य श्रीस्त्वया परिभुज्यते।
राजन्निक्ष्वाकुवंश्यस्य किमिदं तव युज्यते॥३४३॥

रत्नश्री

पुराणाज्जीर्णादकिञ्चित्करात् पुंसः पुरुषात् कुतश्चित्, पुराणाञ्च पुंसो विष्णोरिति श्लिष्टम्। आच्छिद्यापहृत्य श्रीरभ्युदयो राज्यश्रीश्च देवतेति श्लिष्टम्। त्वया परिभुज्यते निषेव्यते। तदिदमीदृशं कर्म परदाराच्छेदरूपं तवेक्ष्वाकुवंश्यस्य तद्भवस्य मनुकुलजन्मनः। इक्ष्वाकुवंशस्येत्यपि पठ्यते। तत्रेक्ष्वाकूणां ते वा वंशोऽस्येत्यन्यपदार्थः। यदुपज्ञेयं वणाश्रमाचारस्थितिलक्षणा लोकयात्रा प्रवर्तते। किं युज्यते? नैवेदं युक्तं तवेदृशवंशसम्भवस्येत्यर्थः। राजन्नित्यामन्त्र्यते। इह पुराणादकिञ्चित्करात्पुंसः श्रीः सम्पत् आच्छिद्यते इति निन्द्यत एव। पुराणात् पुंसो विष्णोः श्रीः विभूतिर्देवतेति च श्लिष्टा। आच्छिद्यते। तामपि पुरुषोत्तमा[दा]क्रम्याकृष्यत इति वीर्योत्कर्षाविष्कृतेः स्तूयत एव कश्चिन्नृपतिः। तदियं सर्वथा श्लेषमुपजीवतीति॥

हृदयङ्गमा

सम्प्रति व्याजस्तुतिं निर्दिशति, यदीति। —यदीति यदित्यर्थे, निन्दन् इव यत् स्तौति असौ व्याजस्तुतिः स्मृता; अत्र दोषा इव आभासन्ते आपाततः प्रतीयन्ते इति दोषाभासाः, गुणा एव वस्तुतः गुणत्वेनैवेत्यर्थः, सन्निधिं लभन्ते गुणस्वरूपेणैव परिणामन्तीत्यर्थः। (निन्दन्निव स्तौतीत्यत्र स्तुवन्निव निन्दतीत्यपि प्रत्ययविपरिणामेनान्वेतव्यं, वैचित्र्यसाम्यात् वैचित्र्यस्यैवालङ्कारत्वादिति नवीनानां मतमत्रानुसरणीयमिति केचित्। ते च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निन्दायाः स्तुतौ पर्य्यवसाने स्तुतेर्वा निन्दायां तात्पर्य्ये व्याजस्तुतिमङ्गीकुर्वन्ति। स्वमतेऽपि तदेवादरणीयं, व्याजस्तुतिपदस्य व्याजेन स्तुतिर्व्याजरूपा वा स्तुतिरिति व्युत्पत्तेः। उक्तञ्चालङ्कारकौस्तुभे, –"व्याजस्तुतिर्विपर्य्ययपर्य्यवसाने अस्तुतिस्तुत्योः" इति। इत्थञ्च निन्द्यत्ववद्विषयकत्वं स्तुत्यत्ववद्विषयकत्वञ्च स्तुतिनिन्दयोर्व्याजत्वमिति प्राचामाशयः, तदेव चोक्तालङ्कारप्रवृत्तिनिमित्तम्; तथा च, व्याजेन निन्दाव्याजेन स्तुतिः स्तुतिव्याजेन च निन्दा व्याजस्तुतिरिति निष्कर्षः। उक्तञ्च प्रकाशकारेण, –"व्याजस्तुतिर्मुखे निन्दा स्तुतिर्वा रूढ़िरन्यथा" इति। उदाहृतञ्च तेनैव स्तुत्या निन्दायां यथा, –"हे हेलाजितबोधिसत्त्व। वचसां किं विस्तरैस्तोयधे! नास्ति त्वत्सदृशः परः परहिताधाने गृहीतव्रतः। तृष्यत्पान्थजनोपकारघटनावैमुख्य-लब्धायशो–भारप्रोद्वहने करोषि कृपया साहायकं यन्मरोः।।" इति। अत्र समुद्रस्य स्तुतिव्याजेन निन्दाप्रतिपादनं चारुताऽतिशयं पुष्णाति। केचित्तु अन्यनिन्दास्तुतिभ्यामन्यस्तुतिनिन्दावगतावपि अयं दृश्यते इत्याहुः, तत्रोदाहरणं यथा,–"यद्वक्रं मुहुरीक्षसे न धनिनां ब्रूषे न चाटून्मृषा, नैषां गर्ववचः शृणोषि न च तान् प्रत्याशया धावसि। काले वालतृणानि खादसि परं निद्रासि निद्रागमे, तन्मे ब्रूहि कुरङ्ग! कुत्र भवता किं नाम तप्तं तपः?"।। इति। अत्र हरिणस्तुत्या राजसेवानिर्विणस्यात्मनो निन्दा व्यज्यते। स्वमते तु यस्यैव निन्दा तस्यैव स्तुतिप्रतीतौ सम्भवति न त्वन्यथा। यत्तु केचिदाहुः,–"अप्रस्तुतप्रशंसायामप्रस्तुतेन प्रस्तुतार्थप्रतीतिमात्रं न तु प्रकृताप्रकृतयोः निन्दास्तुतिस्वरूपनियमः, अत्र स्तुत्या निन्दाभिव्यक्तिनियमात्, किञ्चैवं सम्मतस्थलेऽप्यप्रस्तुताभ्यां स्तुतिनिन्दाभ्यां प्रस्तुतनिन्दास्तुतिप्रतीतिरित्यप्रस्तुतप्रशंसैव स्यात्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इति व्याजस्तुतेरुच्छेदापत्तिः। स्तुतिनिन्दाप्रतीतिनियमरूपविशेषाद-तिरेकस्तूभयत्रापि समानः। अतः अन्नरयत्नसुलभैरित्यादौ व्याजस्तुतिरेव युक्ता इति'' तच्चिन्त्यम्। अप्रस्तुतेन प्रस्तुतप्रतिपत्तिमात्रमप्रस्तुतप्रशंसास्वरूपं, तच्चोक्तस्थलेऽप्यबाधित-मेवेति पर्य्यालोचनीयम्)।।३४३।।

प्रभा

व्याजस्तुतिं लक्षयति–**यदीति।** यदीति यदर्थेव्ययम्। निन्दन्निव यत् स्तौति असौ व्याजस्तुतिः स्मृता। व्याजेन निन्दाछलेन व्यञ्जनया। प्रतीयमाना रतुतिर्व्याजरतुतिरिति अवयवार्थः। अत्र इवशब्देन निन्दाया वास्तवत्वं निराकृतम्। अत्र दोषाभासाः दोषा इव आभास्यमाना न तु स्वरूपतो दोषाः। एतादृशा गुणा एव संनिधिं सांनिध्यं समुपवेशमित्यर्थः। लभन्ते प्राप्नुवन्ति। निन्दन्निव स्तौतीति स्तुवन्निव निन्दति इत्यस्याप्युपलक्षकम्। तथा च निन्दाव्याजेन स्तुतिः स्तुतिव्याजेन निन्दा च व्याजस्तुतिरिति पर्यवसितम्। उभयत्र वैचित्र्यस्य समानत्वात्। द्वितीयप्रभेदे व्याजरूपा स्तुतिरिति समासः। उक्तं च प्रकाशकारेण–व्याजस्तुतिर्मुखे निन्दा स्तुतिर्वा रूढिरन्यथा। इति। निन्दया स्तुतेरुदाहरणानि अग्रे मूल एव दर्शितानि। स्तुत्या निन्दायास्तु प्रकाशे–

हे हेलाजितबोधिसत्त्व वचसां किं विस्तरैस्तोयधे
नास्ति त्वत्सदृशः परः परहिताधाने गृहीतव्रतः।
तृष्यत्पान्थपरोपकारघटनावैमुख्यलब्धायशो-
भारप्रोद्वहने करोषि कृपया साहाय्यकं यन्मरोः।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इति। अत्र समुद्रस्य स्तुत्या निन्दाप्रतिपादनं चमत्कारं दर्शयति इति व्याजस्तुतिः।।३४३।।

विवृति

इति अप्रस्तुतप्रशंसा।

व्याजस्तुतिलक्षणमाह–

निन्दां कुर्वन्निव न तु परमार्थेन निन्दन् यदि कश्चित् कमपि स्तौति तदा निन्दास्तुतिरिति स्मृता आचार्यैः। दोषवदाभासन्ते दोषाभासाः न तु परमार्थेन दोषाः किं तु गुणा एवास्या व्याजस्तुतौ सन्निधिं लभन्ते।।

व्याजस्तुतिं लक्षयति–यदीति।।३४३।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भुजङ्गभोगसंसक्ता कलत्रं तव मेदिनी।
अहङ्कारः परां कोटिमारोहति कुतस्तव॥३४४॥

रत्नश्री

तव कलत्रं भार्यां [86b] कलत्रमिव कलत्रं मेदिनी, पालनादिना। मेदिनी पृथिवी जघन्यजातीया च स्त्री। भुजङ्गशब्देनात्र श्लेषः, फणधरो धूर्तश्च विवक्षित इति श्लिष्टम्। तस्य भोगः यथाक्रमं कामः संभोगश्चेति पुनः श्लिष्टम्। तत्र संसक्ता व्यवस्थिता तेन सा ध्रियते इति श्रुतेः। निरता चेत्युभयत्र योज्यम्। यत एवं तत् कुतः कस्मादुत्कर्षादहंकारः अहमत्राधिक इत्यभिमानः तव परां कोटिमधिमात्रतामारोहति? न युक्तमित्यमहङ्कर्तुं तवेति। निन्देव स्तुतिरियमखिलमहीतलाधि[पत्य]वर्णनलक्षणा अत्र लक्ष्यत इति॥

अपरे अप्येवं श्लेषानुगता विकल्पा द्रष्टव्या इति निगमयन्नाह–

हृदयङ्गमा

व्याजस्तुतिमुदाहरति, तापसेनेति। –रामेण परशुरामेण, तापसेनापि जयसाधनसामग्रीरहितेनापीति भावः, इयं भूतधारिणी पृथ्वी, जिता, त्वया राज्ञाऽपि प्रभूतजयसाधनसामग्रीमताऽपि, सैव इयं पृथ्वी, न त्वतिरिक्ता इति भावः, जिता, अतः तव मदः गर्वः, मा भूत। (अत्र प्रस्तुतस्य राज्ञः आपाततः निन्दा प्रतीयते एव, परं साक्षात् भगवदंशावतारेण परशुरामेण महादेवप्रसादलब्धपरशुना या पृथ्वी जिता, त्वया मानवेनापि सा जितेति पर्य्यवसानात् महती

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्तुतिर्गम्यते इति व्याजस्तुतिर्नामालङ्कारः। नन्वत्र तापसरामादिवस्तुनः अप्रस्तुततया तत्स्तुत्या प्रस्तुतस्य राज्ञः निन्दाप्रतीतेरत्र कथं नाप्रस्तुतप्रशंसेति न वाच्यं, तत्राप्रस्तुतस्य प्रशंसनं प्रस्तुतस्य च निन्दनं पर्य्यवसानस्थायि पृथग्रूपेणावस्थितञ्च, इह तु प्रस्तुतस्यापाततो निन्दा प्रतीयते पर्य्यवसाने तु स्तुतिरिति स्तुतिनिन्दयोरेकधर्म्मत्वमित्यनयोर्भेदत्व-स्याङ्गीकारात्। किञ्च तत्र प्रस्तुतस्य गम्यत्वमिह तु वाच्यत्वमिति दिक्)॥३४४॥

प्रभा

व्याजस्तुतिमुदाहरति—**तापसेनेति।** तापसेन तपस्विना चतुरङ्गसैन्यशून्येनेति ध्वनिः। रामेण परशुरामेण इयं भूतधारिणी पृथ्वी जिता। त्वया राज्ञापि चतुरङ्गसाधनसंपन्नेनापि सैवेयं तावती एव न तु अधिका जिता। अतः पृथ्वीजये तव मदः गर्वो मा भूत् मा भवतु। अत्र साधनशून्येन रामेण जिताया भूमेः साधनसंपन्नेन विहितो जयो न प्रस्तुतस्य राज्ञः स्तुतये इति आपाततो निन्दा प्रतीयते। तया च निन्दया भगवदवतारभूतेन महादेवाल्लब्धपरशुना भार्गवेण या पृथ्वी जिता सा तावती एव त्वया मानवेन जिता इति महती स्तुतिर्गम्यते इति व्याजस्तुतिः॥३४४॥

विवृति

तामुदाहरति—

तापसेनापि रामेण जितेयं भूतधारिणी पृथ्वी। त्वया राज्ञाऽपि सता सैव जिता नाधिकेति मत्वा मा भून्मदो गर्वस्तव॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उदाहरति–**तापसेनेति।** परशुरामेण यावती भूमिः जिता सा सर्वा त्वया जिता इति प्रशंसा।।

उदाहरति–**तापसेनेति।** चतुरङ्गबलशून्येनापि रामेण विजिता भूतधारिणी। चतुरङ्गबलयुक्तेनापि राज्ञा सैव जिता। इति निन्दामुखेन वर्णनीयस्य महीयसा रामेण साम्योपपादनं स्तुतिः भवति इति व्याजस्तुतिः।।३४४।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इति श्लेषानुविद्धानामन्येषां चोपलक्ष्यताम्।
व्याजस्तुतिप्रकाराणामपर्यन्तः प्रविस्तरः॥३४५॥

रत्नश्री

इति कथितेन पथा श्लेषेणोक्त[रू]पेणानुविद्धानां युक्तानां व्याजस्तुतेः प्रकाराणां विकल्पानामन्येषां च शेषाणामपि प्रविस्तरः प्रपञ्चोऽपर्यन्तः अपरिमितः प्रयोगेषु लक्ष्यतां द्रष्टव्यः। इह तु दिङ्मात्रं दर्शितम्। विकल्पाः केचिदपरे निदर्श्यन्ते–

बिभर्ति सकलामुर्वीमुरगः स्वपदच्युतः।
भवानासाद्य साम्राज्यं राजन् किमभिमन्यसे॥
मायावशेन लोकोऽयमावर्जितमतिस्त्वया।
त्वद्यशोमुखरः कृष्णचरितः किं चिकित्ससे
श्रुतिः कुवलयं धत्ते लीलया हरिणीदृशाम्।
विक्रमेण भवानेतन्महता किं तव स्मयः॥ इति।

॥ इति व्याजस्तुतिः ॥

निदर्शनमुपदर्शयन्नाह–

हृदयङ्गमा

अलङ्कारान्तरमिश्रणेनास्या वैचित्र्याधिक्यमिति श्लेषमिश्रितां व्याजस्तुतिं दर्शयन् शब्दार्थगतत्वेन श्लेषस्य द्वैविध्यात् प्रथमम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अर्थश्लेषमूलां व्याजस्तुतिं दर्शयति, पुंस इति।-(इक्ष्वाकुवंशधरं कमपि नृपतिं प्रति कस्यचित् चाटुकारस्योक्तिरियम्) हे राजन्। त्वया पुराणात् आद्यात् वृद्धाच्च, पुंसः आच्छिद्य आकृष्य, श्रीर्लक्ष्मीः सम्पत्तिश्च, परिभुज्यते, इक्ष्वाकुवंशस्य इक्ष्वाकुवंशीयस्य, तव इदं किं युज्यते? (आदिपुरुषादाच्छिन्नायाः लक्ष्म्याः सम्भोगः इक्ष्वाकुवंशीयस्य तव न योग्य इति निन्दया अतिप्रभूतास्ते सम्पद इति स्तुतिर्गम्यते। अत्र पुराणपदे श्रीपदे च अर्थगतश्लेषवशात् समधिकचारुता स्फुटं प्रतीयते इति बोध्यम्)।।३४५।।

प्रभा

अलंकारान्तरसंबद्धेयं चमत्कारातिशया भवतीति अर्थश्लेषमूलां तामुदाहरति-**पुंस इति।** हे राजन् त्वया पुराणाद् आद्यात्। जरठाच्चेति ध्वनिः। पुंसः श्रीः लक्ष्मीः संपच्च। आच्छिद्य आकृष्य परिभुज्यते। इक्ष्वाकुवंश्यस्य यत्र रामादयः परदारान् मातृवदपश्यन् तादृशवंश्यस्य तादृशवंशोत्पन्नस्येत्यर्थः। तव इदं श्रियोपहरणं किं युज्यते। आदिपुरुषादाकृष्टाया लक्ष्म्याः परिभोग इक्ष्वाकुवंश्यस्य ते न समुचित इति व्याजस्तुतिः। अत्र पुराणपदे श्रीपदे च श्लेषः। स चार्थः पर्यायसहत्वात्। अतोर्थश्लेषमूलेयं व्याजस्तुतिः।।३४५।।

विवृति

पुंसः पुरावृत्तादाच्छिद्य (श्री)स्तु (स्त्व)या परिभुज्यते। हे राजन् इक्ष्वाकुवंशस्य किमिदं तव युज्यते। वृद्धान् (त्)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुंसोऽपहृत्य तत्(प)त्न्युपभोगो दोषवदाभासते। न च तथा यतः पुंसः पुराणाद्धरेराच्छिद्य स्त्री(श्री)परिग्रहः शौर्यतिशयव्यावर्णनमिति निन्दास्तुतिः।।

पुंस इति। पुरुषोत्तम इव त्वयि लक्ष्मीः आसक्ता इति स्तुतिः। उदाहरणद्वयं व्याप्तिप्रदर्शनार्थम्।।

पुंस इति। परदारापहारलक्षणनिन्दाव्याजेन वर्णनीयविषयायाः स्तुतेः विहितत्वात् व्याजस्तुतिः।।३४५।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अर्थान्तरप्रवृत्तेन किञ्चित्तत्सदृशं फलम्।
सदसद्वा निदर्श्येत यदि तत् स्यान्निदर्शनम्॥३४६॥

रत्नश्री

अर्थान्तरे निदर्श्यापेक्षया अन्यस्मिन् क्वचिदुचिते कार्ये प्रवृत्तेन तत्साधयता केनचिद्वस्तुना हेतुभूतेन कर्तृभूतेन तेनार्थान्तरेण सदृशं तुल्यं फल किञ्चित् सदिष्टमसद् अनिष्टं वा निदर्श्येत प्रतिपाद्येत यदि, तदेवंलक्षणं निदर्शनं स्यादिति विधीयते। अर्थान्तरस्य वृत्तेनेत्यपि पाठः। तत्रार्थान्तरस्य कस्यचिद्वृत्तेन कर्मणा सदृशमिति व्याख्येयम्। शेषं समानम्॥

उदाहरन्नाह–

हृदयङ्गमा

शब्दश्लेषमूलामुदाहरति, भुजङ्गेति। –भुजङ्गानां भोगाः शरीराणि, तैः संसक्ता, अन्यत्र, –भुजङ्गानां जाराणां, भोगे संसक्ता, मेदिनी तव कलत्रं पाल्या भार्य्या च, तथाऽपि कुतः तव अहङ्कारः परां कोटिम् आरोहति? (अत्र भुजङ्गादिशब्दानामनेकार्थत्वात् शब्दश्लेषमूला व्याजस्तुतिरियम्) ॥३४६॥

प्रभा

शब्दश्लेषमूलामुदाहरति–**भुजङ्गेति।** तव कलत्रं भार्या। परिपाल्या च मेदिनी। भुजंगाः विटाः सर्पाश्च तेषां भोगाः उपभोगाः फटाश्च तत्र संसक्ता अनुरक्ता। पक्षे तैः संसक्ता आवृता। एवं स्थिते तव अहंकारः परां कोटिं कुत आरोहति। अत्र निन्दया त्वं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सार्वभौमोसीति प्रतीयते इति व्याजस्तुतिः। सा च भुजंगादिशब्दानामनेकार्थत्वात् शब्दश्लेषमूला।।३४६।।

विवृति

भुजङ्गो विटस्तस्य भोगो मुहुरास(से)वा भुजङ्गभोगः तस्मिन् संसक्ते (क्ता) मेदिनी तव कलत्रं पत्नी ततोऽहङ्कारः परां कोटिमारोहतु कथं तवेति दोषवदवभाति। न च तथा यतो भुजङ्गो नागराजः शेषस्तस्य भोगाः सहस्त्रसंख्याः फणाः भुजङ्गभोगाः तेषु संसक्ता उपरि स्थिता या मेदिनी सा तव कलत्रमिति निन्दास्तुतिः।।

श्लेषानुविद्धव्याजस्तुतिं दर्शयति–भुजङ्गेति। त्वद्भुजः शेषधृतामखिलां भुवं विभर्ति इति स्तुतिः।।

भुजङ्गेति। धूर्तभोगनिरता मेदिनी तव भार्या इति निन्दाव्याजेन शेषशिरसा धार्यमाणा भूतधात्री तव कुटुम्बिनी इति स्तुतिः व्याजस्तुतिः। एषा श्लेषायत्ता ज्ञातव्या।।३४६।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उदयन्नेव सविता पद्मेष्वर्पयति श्रियम्।
विभावयितुमृद्धीनां फलं सुहृदनुग्रहम्॥३४७॥

रत्नश्री

सविता रविरुदयन्नेवोदयमासादयन्नेव पद्मेषु श्रियं विकाशरूपामर्पयति निधत्ते। उदयपूर्वकेण पद्मविकाशेनार्थान्तरेण सदृशं फलं निदर्शयति-सुहृदामाश्रितान मनुग्रहमुपकारं नाम फल[87a]कार्यमृद्धीनामभ्युदयानां विभावयितुं दर्शयितुमिति सत्फलमिदं निदर्शितं सुहृदनुग्रहस्याभीक्ष्णत्वादि[ति]॥

असत्फलं निदर्शयन्नाह–

हृदयङ्गमा

व्याजस्तुतिमुपसंहरति, इतीति।–इति उक्तरूपाणां, श्लेषानुविद्धानां तथा अन्येषाञ्च अन्यालङ्कारमूलानाञ्च, व्याजस्तुतिप्रकाराणाम् अपर्य्यन्तस्तु अशेषः पुनः, विस्तरः उपलक्ष्यतां ज्ञायताम्। (एतेनालङ्कारान्तरमङ्कीर्णत्वेन बहवो भेदाः सम्भवन्तीति प्रतीयते। तत्र ममासोक्तिसङ्कीर्णा यथा, –"उग्रग्राहमुदन्वतो जलमतिक्रामत्यनालम्बने, व्योम्नि भ्राम्यति दुर्गमं क्षितिभृतां मूर्द्धानमारोहति। व्याप्तं याति विषाकुलैरहिकुलैः पातालमेकाकिनी, कीर्त्तिस्ते मदनाभिराम! कृतकं मन्ये भयं योषिताम्॥" अत्र कीर्त्तौ स्वैरिणीव्यवहाराश्रयप्रतीत्युल्लासित-निन्दायाः स्तुतिपर्य्यवसायितया समासोक्तिसङ्कीर्णा। अन्य निन्दास्तुतिभ्यामन्यस्तुतिनिन्दावगतावपि अयं दृश्यते यथा, –"कस्त्वं वानर। रामराजभवने लेखार्थसंवाहको, यातः कुत्र पुरा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गतः स हनुमान् निर्दग्धलङ्कापुरः। बद्धो राक्षससूनुनेति बहुशः सन्ताड़ितस्तर्जितः, स व्रीड़ात्तपराभवो वनमृगः कुत्रेति न ज्ञायते।।'' इति। अत्र हनूमन्निन्दया वानरान्तरस्तुत्यभिव्यक्तिः)।।३४७।।

प्रभा

व्याजोक्तिमुपसंहरति–**इतीति।** इति एवंप्रकारेण श्लेषानुविद्धानां श्लेषसंबद्धानाम्। तथा अन्येषां अन्यालंकारसंबद्धानाम्। व्याजस्तुतिप्रकाराणां व्याजस्तुतेः प्रकाराणां प्रभेदानां विस्तरः अपर्यन्तः सीमाशून्यः। अतः सः स्वबुद्ध्यैवोपलक्ष्यताम् अवगम्यताम्। न सर्वः कथयितुं पार्यते इति भावः।।३४७।।

विवृति

इति श्लेषानुविद्धानां श्लेषालङ्कारसङ्गिनामुभयार्थवाचिनामन्येषामप्येवंप्रकाराणामपर्यन्तोऽत्र व्याजस्तुतावलङ्कारे विस्तरः प्रपञ्चः।।

व्याजस्तुतिमुपसंहरति–**इतीति।।**

अनेन प्रकारेण श्लेषानुविद्धा बहवो व्याजस्तुतिप्रकारा ज्ञातव्या इत्याह–**इतीति**।।३४७।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

याति चन्द्रांशुभिः स्पृष्टा ध्वान्तराजिः पराभवम्।
सद्यो राजविरुद्धानां सूचयन्तो दुरन्तताम्॥३४८॥

रत्नश्री

चन्द्रस्यांशुभिः स्पृष्टा भिन्ना ध्वान्तस्य तमसो राजिः संघातः पराभवं निधनं याति पराभूयत इति यावत्। सद्यस्तत्क्षणम्। किं कुर्वती? राजा चन्द्रो नृपतिश्चेति श्लिष्टम्। तेन विरुद्धानां केषाञ्चित् दुष्टो विपद्रूपोऽ[न्तोऽ]वसानं यस्य तद्भावस्तत्ताम् अनर्थनिष्ठतां सूचयन्तीति। राजविरोधहेतुकमसत्फलमेतद् दर्शितम् पराभवस्यानिष्टत्वात्॥

॥ इतिं निदर्शनचक्रम् ॥

सहोक्तिं परिवृत्तिं च प्रतिपादयन्नाह–

हृदयङ्गमा

सम्प्रति निदर्शनं लक्षयति, अर्थान्तरेति। –अर्थान्तरे निदर्शनीयादन्यस्मिन् कार्य्यान्तरे, प्रवृत्तेन उद्युक्तेन केनचित्, यदि तत्सदृशं तस्य अर्थान्तरस्य सदृशं, सत् उत्कृष्टम्, असत् अपकृष्टं वा, किञ्चित् फलं निदर्श्येत प्रदर्श्येत, तन्निदर्शनं निदर्शनालङ्कारः, स्यात्। ("यदि" इत्यत्र "यत्तु" इति "निदर्शनम्" इत्यत्र "निदर्शना" इत्यपि पाठः। नव्यास्तु यत्र पदार्थयोर्वाक्यार्थयोर्वा अन्योऽन्यमेकवाक्यतया अन्वयबोधाजनकयोरुपमानोपमेयभावं कल्पयित्वैव अन्वयबोधपर्य्यवसानं भवति सा निदर्शना इत्येका,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथा यत्र च कार्य्यकारणयोः क्रियया हेतुहेतुमद्भावे प्रतिपादिते उत्तरवाक्यार्थः पूर्ववाक्यार्थप्रतिपाद्यसामान्यकार्य्यकारणभावे दृष्टान्ततया पर्य्यवस्यति सा द्वितीया निदर्शनेत्याहुः। साऽपि पदार्थवाक्यार्थवृत्तिभेदात् द्विविधा, तत्र पदार्थवृत्तिनिदर्शना यथा, –"अव्यात् स वो यस्य निसर्गवक्रः स्पृशत्यधिज्यस्मरचापलीलाम्। जटापिनद्धोरगराजरत्नमरीचिलीढ़ोभयकोटिरिन्दुः।।" अत्र स्मरचापसम्बन्धिन्या लीलाया वस्त्वन्तरभूतेनेन्दुना स्पर्शनमसम्भवल्लीलासदृशीं लीलामवगमयतीत्यदूरविप्रकर्षात् प्रतिविम्बकल्पनम्। वाक्यार्थवृत्तिर्यथा, –"त्वत्पादनखरत्नानां यदलक्तकमार्जनम्। इदं श्रीखण्डलेपेव पाण्डुरीकरणं विधोः।।" इति। तत्रापि क्वचित् सम्भवन्नेव वस्तुसम्बन्धः सामर्थ्यात् विम्बप्रतिविम्बभावं कल्पयति सा सम्भवद्वस्तुसम्बन्धा। क्वचित पुनरन्वयबाधादसम्भवता वस्तुसम्बन्धेन प्रतिविम्बनमाक्षिप्यते सा असम्भवद्वस्तुसम्बन्धा इति द्विविधा। यथोक्तं दर्पणकृता, –"सम्भवन् वस्तुसम्बन्धोऽसम्भवन् वाऽपि कुत्रचित्। यत्र विम्बानुविम्बत्वं बोधयेत् सा निदर्शना।।" इति। तत्र द्वितीया प्रागुक्तोदाहरणरूपा; आद्या पुनः,–"कोऽत्र भूमिवलये" इत्यदि विश्वनाथदर्शितरूपा। अन्ये तु नवीनोक्तः द्वितीयो निदर्शनाप्रकारः उपमायामन्तर्भवतीति ग्रन्थकृता नोक्तः, प्रथमस्तु प्रकारः ग्रन्थकृता अङ्गीकृत एवेत्याहुः। अत्र केचित् ललितमप्यलङ्कारान्तरमिच्छन्ति यथा, –"प्रस्तुते वर्णवाक्यार्थे प्रतिविम्बस्य वर्णनम्। ललितं निर्गते नीरे सेतुमेषा चिकीर्षति।।" इति। अत्र ललितमिति लक्ष्योक्तिः, पूर्वार्द्धं लक्षणं, निर्गते इत्याद्युदाहरणम्। इयं हि दाक्षिण्यादुपागते नायके प्रतिनिवृत्य नायिकान्तरासक्ते सति तदानयनाय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रेषयितुकामां नायिकां प्रति सख्या उक्तिः। तत्र च प्रस्तुतवाक्यार्थमपहाय तत्सदृशनीरनिर्गमनोत्तरकालिक-सेतुबन्धकारणद्वारा तत्प्रतिविम्बरूपार्थः उक्तः। न हीयमप्रस्तुतप्रशंसा, प्रस्तुतधर्म्मिकत्वात्। नापि समासोक्तिः, प्रस्तुतवृत्तान्तेनाप्रस्तुतवृत्तान्तप्रतीतेरेव तद्विषयकत्वात्; अत्र च अप्रकृतेन प्रकृतवृत्तान्तप्रतीतेः। नापि निदर्शना, प्रस्तुताप्रस्तुतवृत्तान्तयोः शब्दोपात्तयोरैक्यसमारोपे एव तदभ्युपगमात्; अतः सर्वालङ्कारविलक्षणमिदं ललितमित्याहुः इति)।।३४८।।

प्रभा

निदर्शनं लक्षयति–**अर्थान्तरेति।** निदर्शनीयादन्यस्मिन् कार्यान्तरे प्रवृत्तेन केनचित्। किंचित् किमपि तस्य अर्थान्तरस्य सदृशम् सत् उत्तमम् असद् अपकृष्टं वा फलं निदर्श्येत प्रदर्श्येत यदि इति यदर्थे तन् निदर्शनम् तन्नामकालंकारः। निदर्शना इति संज्ञायाः स्त्रीत्वं बहुभिरङ्गीकृतमस्ति नव्यानां मतेन इयं संभवद्वस्तुसंबन्धनिबन्धना निदर्शना। असंभवन्नपि वस्तुसंबन्धो यत्र सादृश्यं दर्शयति तत्रापि असंभवद्वस्तुनिदर्शना तथाचोक्तं प्रकाशे–अभवन्वस्तुसंबन्ध उपमापरिकल्पक इति। परे तु अयं द्वितीयः प्रकार उपमायामेवान्तर्भवतीति न ग्रन्थकर्त्रा दर्शित इत्याहुः।।३४८।।

विवृति

इति व्याजस्तुतिः।

निदर्शनालङ्कारमाह–

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अर्थान्तरे प्रमेयान्तरे प्रवृत्तेन कविना किञ्चित् किमपि तत्सदृशमिति दिशता (दर्शिता)र्थान्तरानुरूपं फलं सत् शोभनं असद्वा तद्विपरीतं वा यदि प्रदर्श्यते तदा तन्निदर्शनमित्यलङ्कारः स्यात्।।

निदर्शनं लक्षयति–**अर्थेति।** एकमर्थविशेषं वर्णयता तत्सदृशं अभ्युदयरूपमनर्थरूपं वा यदि निर्दिश्यते तन्निदर्शनम्।।३४८।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सहोक्तिः सहभावस्य कथनं गुणकर्मणाम्।
अर्थानां यो विनिमयः परिवृत्तिस्तु सा यथा॥३४९॥

रत्नश्री

गुणानां कर्मणां च सम्बन्धिनः सहभावस्य युगपत् सत्तायाः कथनं प्रतिपादनं यदित्यनूद्य सहोक्तिः सा विज्ञेयेति विधीयते। अर्थानां गुणक्रियादीनां विनिमयो व्यत्ययः इत्यनूद्य परिवृत्तिर्विधीयते। यथेत्युदाहरति॥

हृदयङ्गमा

सत्फलनिदर्शनं दर्शयति, उदयन्निति। –एषः सविता सूर्य्यः उदयन् उद्गच्छन् उन्नतिं प्राप्नुवंश्च, ऋद्धीनां फलं सुहृदनुग्रहं विभावयितुं सत्याम् ऋद्धौ सुहृदामानुकूल्यं कार्य्यमिति ज्ञापयितुं, पद्मेषु श्रियम् अर्पयति। (अत्र पद्मेषु श्रीदानप्रवृत्तेन उदयशालिना सूर्य्येण सुहृदुपकाररूपमुदयफलं किञ्चित् निदर्श्यते इति फलञ्चात्र उत्कृष्टमेव)॥३४९॥

प्रभा

सत्फलनिदर्शनं दर्शयति–**उदयन्निति।** एष सविता उदयन् उद्गच्छन् उन्नतिं प्राप्नुवंश्च। ऋद्धीनां संपत्तीनाम्। फलं सुहृदनुग्रहं बन्धूपकरणम्। इति विभावयितुं ज्ञापयितुं पद्मेषु श्रियम् अर्पयति। अत्र पद्मेषु श्रीप्रदानोन्मुखेन उदयशालिना सवित्रा सुहृदनुग्रहरूपमुदयफलं निदर्श्यते। तच्च उत्कृष्टत्वात् सद्रूपमिति सत्फलनिदर्शनमिदम्॥३४९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विवृति

तमुदाहरति–

सविता आदित्यः उदयमासदयन्नेव पद्मेषु श्रियमर्पयति एतानि मदमभ्युदयमभिलषन्तीति। किं कुर्वन्निस्याह–

ऋद्धीनां सम्पदां फलं विभावयितुं जनेभ्य इति वाक्यशेषः। कथंभूतमृद्धीनां फलं विभावयितुमिति प्रश्ने सत्याह सुहृदनुग्रहं सुहृदो मित्राणि अनुगृह्यन्तेऽनेनेति सुहृदनुग्रहः(म्?)तदिति। तदुक्तमन्यैरपि 'लक्ष्म्या लक्ष्मी तां लोके विकासिन्या विकसन्त्या(?)। बन्धुभिश्च सुहृद्भिश्च विस्त्रब्धं या न भुज्यते'। इति सदुदाहृतम्।।

सन्निदर्शनं दर्शयति–**उदयन्निति।।**

उदाहरति–**उदयन्निति।** समर्थेन सुहृदां अनुग्रहः कर्तव्यः इत्येतत्, अर्थान्तरप्रवृत्तेन निदर्शितं किञ्चित् तत्सदृशं फलम्। सूर्यः अभ्युदयमानः सुहृत्सु पद्मेषु श्रियं अर्पयतीति प्रक्रान्तसदृशस्य फलस्य प्रदर्शनात् उक्तलक्षणं निदर्शनमेतत्।।३४९।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सह दीर्घा मम श्वासैरिमाः संप्रति रात्रयः।
पाण्डुराश्च ममैवाङ्गैः सह ताश्चन्द्रभूषणाः॥३५०॥

रत्नश्री

संप्रति विरहातुरस्य मम श्वासैर्निश्वसितैः सह दीर्घा आयता इमा रात्रयो वर्तन्ते। ममैवाङ्गैरवयवैर्विरहविधुरैः सह पाण्डुराश्चन्द्रो भूषणमासामिति चन्द्रभूषणाः। पाण्डुरत्वे निमित्तमिदमुक्तम्। अत्र दै[र्घ्य]स्य पाण्डुरत्वस्य चोभयसम्बन्धिनः सहभाव उक्तः। निश्वासा रात्रयश्च दीर्घा अङ्गानि रात्रयश्च पाण्डुरा युगपद्भवन्तीति॥

हृदयङ्गमा

असत्फलनिदर्शनं दर्शयति, यातीति। –चन्द्रस्य अंशुभिः स्पृष्टा ध्वान्तराजी राजविरुद्धानां नृपतिप्रतिकूलानां चन्द्रप्रतिकूलानाञ्च, सद्यः दुरन्ततां दुःखजनकमवसानं, सूचयन्ती प्रकटयन्ती सती, पराभवं नाशं, याति। (अत्र राज्ञः विरुद्धाचरणशीलः कश्चित् यथा राजपुरुषैः दुःखप्रददण्डविधानपूर्वकं पराभूयते तथा आलोकापसारणेन राज्ञः चन्द्रस्य प्रतिपक्षभूता ध्वान्तराजी अपि चन्द्राशुनेति गम्यसादृश्यप्रतीत्यनन्तरं चन्द्राशुपरिभूयमाणा तमस्ततिः राजविरोधिनां परिणामदुःखं लभमाना पराभवरूपमपकृष्टं फलं प्राप्नोतीति असत्फलस्य निदर्शनादयम् असत्फलरूपः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निदर्शनभेदः। "सूचयन्ती" इत्यत्र "दर्शयन्ती" इति पाठान्तरम्। भोजराजस्त्विह वर्त्तमानकाललक्षण शतृप्रत्ययेन सद्य इति तद्धितेन च समकालमेव दृष्टान्तदार्ष्टान्तिकयोः शब्दतः ऋजूक्तैव उक्तत्वादिदमृजुसमं निदर्शनमित्याह)।।३५०।।

प्रभा

असत्फलं निदर्शनमुदाहरति–**यातीति।** चन्द्रांशुभिः स्पृष्टा ध्वान्तराजी तमःपङ्क्तिः। राजविरुद्धानां नृपतिप्रतिकूलानां चन्द्रविरुद्धानां च दुरन्ततां दुःखावसानं सूचयन्ती पराभवं विनाशं याति। अत्र चन्द्रमरीचिभिः परिभूयमाना तमस्ततिः राजद्रोहिणि दुरन्ततारूपमपकृष्टं फलं निदर्शयति इति असत्फलनिदर्शनमिदम्। अभवन्वस्तुसंबन्धनिबन्धनाया निदर्शनाया उदाहरणानि प्रकाशादौ द्रष्टव्यानि।।३५०।।

विवृति

असदुदाहरति–

चन्द्रकिरणैः स्पृष्टान्धकारततिर्याति पराभवम्। किं कुर्वतीत्याह–

राजा चन्द्रो नृपश्चोच्यते। (ते) नान्येषामापि राजापथ्यकारिणां एवं विध एव विपाकः कटुरिति निदर्शनम्।।

असन्निदर्शनं लक्षयति–**यातीति।** राजविरुद्धानामिति श्लेषानुविद्धम्।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यातीति। अत्र राजविरोधो न कर्तव्यः इति अर्थान्तरे प्रवृत्तेन, चन्द्रांशुभिः स्पृष्टा ध्वान्तराजो पराभवं यातीति, पराभवे तस्य राजशब्दवाच्यचन्द्रविरोधः कारणत्वेन अभिहितः। इति श्लेषमुखेन प्रक्रान्तसदृशस्य फलस्य प्रदर्शनात् उक्तलक्षणं निदर्शनमेतत्। श्लेषमुखेनापि निदर्शनं प्रतिपाद्यमिति यावत्।।३५०।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वर्धते सह पान्थानां मूर्छया चूतमञ्जरी।
पतन्ति च समं तेषामसुभिर्मलयानिलाः॥३५१॥

रत्नश्री

पान्थानां वियोगिनां मूर्च्छया मोहनतया सह [चूतस्य] मञ्जरी सहकारकलिका वर्धते। तेषां पान्थानामसुभिः प्राणैः समं सह मलयानिलाः दक्षिणमरुतः पतन्ति च। अत्र वर्धनयोः पतनयोश्च उभयाधारयोः क्रिययोः सहभावोऽमिहितः। सहजचित्रहेतुगर्भा चेयं सहोक्तिरिति॥

हृदयङ्गमा

सहोक्त्यलङ्कारं लक्ष्यति, सहोक्तिरिति। –गुणकर्मणां गुणानां क्रियाणाञ्च इत्यर्थः, (कर्मशब्देनात्र क्रियेति बोध्यं, बहुवचनेन द्रव्यादीनां परिग्रहः) सहभावेन कथंन सहादिपदसन्निधानात् धर्म्मवाचकपदस्य विशेष्यविशेषणोभयान्वितार्थकत्वेनोक्तिरित्यर्थः, सहोक्तिः, उभयनिष्ठधर्म्मस्य सहैवोक्तिर्यत्र इति व्युत्पत्तेरिति भावः। (ततश्च सम्बन्धिभेदेन भिन्नयोरपि गुणयोः क्रिययोः द्रव्ययोरन्ययोर्वा सहार्थशक्त्या एकेन वाचकेन यदेककालीनतया प्रतिपादनं सा सहोक्तिरिति लक्षणम्। एतदेवोक्तं दर्पणकारेण यथा, –"सहार्थस्य बलादेकं यत्र स्याद्वाचकं द्वयोः। सा सहोक्तिः मूलभूतातिशयोक्तिर्यदा भवेत्॥" इति। सा च वैचित्र्यावहा अतिशयोक्तिमूला च चेत् तदैवालङ्कारतां भजते नान्यथा। तथा हि,–"लक्ष्मणेन समं रामः काननं गहनं ययौ" इत्यत्र ययाविति एकेन पदेन सहार्थबलात् उभयोर्गमनक्रिययोः प्रतिपादनेऽपि अतिशयोक्त्यभावात् वैचित्र्याभावाच्च नायमलङ्कारः। केचित्तु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सहोक्तेरतिशयोक्तिमूलकत्वं नाङ्गीकुर्वन्ति, उपमानेनोपमेयनिगरण-मेवातिशयोक्तिः, निगरणमात्रन्तु न तथा, अतोऽत्रातिशयोक्ति-विषयाभावात् सहोक्तिरेव इत्याहुः। अन्ये तु धर्म्मयोरभेदाध्यवसानमूलत्वस्थले एव सहोक्तिर्भवितुमर्हति, कार्य्यकारणयोः पौर्वापर्य्यविपर्य्ययात्मकातिशयोक्तिमूलभेदस्तु प्राचीनोक्तो न युक्तः, तत्रातिशयोक्तेरेवालङ्कारत्वसम्भवात् इत्याहुः। तथा हि, –"तव कोपोऽरिनाशश्च जायते युगपन्नृप!" इत्यतिशयोक्तापेक्षया "तव कोपोऽरिनाशश्च सहैव नृप! जायते" इति सहोक्तौ विच्छित्तिविशेषाननुभवात्, तस्यैव चालङ्कारपार्थक्यव्यवस्थापकत्वात्। न चैवं धर्म्मयोरभेदाध्य-वसानस्थलेऽप्यतिशयोक्तिसत्त्वात् कथं पार्थक्यमिति सहोक्त्युच्छेद इति वाच्यं, तत्राभेदाध्यवसायस्य सहोक्त्युपस्कारकत्वेन गुणतया सहोक्तितिरस्काराभावात्। पौर्वापर्य्यविपर्य्ययस्थले च सहोक्तेरेवाति-शयोक्त्युपस्थापकत्वेन वैषम्यात्। तुल्ययोगितायां सर्वत्र धर्म्मान्वय एकरूपेण भवति, इह तु गुणप्रधानभावेन; किञ्चात्र धर्म्मिणां गुणादिभिरन्वयो युगपत् भवति तत्र न तथेत्यनयोर्भेद इति)॥–

पद्यार्द्धेन सहोक्तिलक्षणं समाप्य तदुदाहरणदर्शनात् प्रागेव पद्यार्द्धपूरणार्थं परिवृत्तिलक्षणमाह, अर्थानामिति। –अर्थानां वस्तूनां, यः विनिमयः किञ्चित् त्वक्त्वा कस्यचिदादानं, सा तु परिवृत्तिः स्मृता। (सा त्रिधा, क्वचित् समेन समस्य, क्वचित् अधिकेन न्यूनस्य, क्वचित् न्यूनेन अधिकस्य इति। उक्तञ्च, –"समन्यूनाधिकानां समाधिकन्यूनैर्विनिमयः परिवृत्तिः" इति। अत्रापि वैचित्र्यस्य आवश्यकत्वं बोध्यम्। भोजदेवस्तु व्यत्ययमपि परिवृत्तिमाह। यथा,–"व्यत्यया वस्तुनोर्यस्तु या वा विनिमयो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मिथः'' इति। व्यत्ययस्तु एकस्थानात् कस्यचित् वस्तुनः अन्यत्र स्थापनम्। यथा,–''कुमुदवनमपश्रि श्रीमदम्भोजषण्डम्'' इत्यादि)।।३५१।।

प्रभा

सहोक्तिं लक्षयति–**सहोक्तिरिति।** गुणकर्मणाम् कर्मशब्दोत्र क्रियावाची। बहुवचनेन द्रव्यादीनां संग्रहः। तथा च गुणक्रियादीनां सहभावेन साहित्येन कथनं सहोक्तिः। संबन्धिभेदेन भिन्नयोरपि गुणयोः क्रिययोर्वा सहार्थस्य सामर्थ्येन एकेन वाचकेन यद् एककालीनतया प्रतिपादनं सा सहोक्तिरिति भावः। तदुक्तं प्रकाशकृता–सा सहोक्तिः सहार्थस्य बलादेकं द्विवाचकम् इति। अत्राप्यलंकारसामान्यलक्षणप्राप्तं हृद्यत्वमपेक्ष्यते एव। तच्च हृद्यत्वमत्र अतिशयोक्तिमूलकत्वेनाभिप्रेतम् तेन पुत्रेण सहागतः पिता इत्यत्र नालंकारः। अत्र धर्मिणां गुणक्रियादिभिर्युग्पदन्वयः, तुल्ययोगितायां तु धर्मिभिः सह इति ततो भेदः। इदमत्रावधेयम्। यत्र सहयुक्तेप्रधाने इति सूत्रेण सहार्थयोगे अप्रधाने तृतीया तत्रैवायमलंकारः गुणप्रधानभावावच्छिन्नयोः शब्दार्थमर्यादया एकधर्मसंबन्धस्य तत्रैवावस्थितेः। अतः शशिना च निशा निशया च शशी शशिना निशया च विभाति नभः। इत्यादौ नायमलंकारः। अत्र हेतौ इति सूत्रेण हेत्वर्थे तृतीया। तथा च हेतुभूतेन शशिना निशा शोभते इति वाक्यार्थः। एवं पूर्वार्धेन सहोक्तिं लक्षयित्वा उत्तरार्धेन परिवृत्त्यलंकारं लक्षयति–**अर्थानामिति।** अर्थानां वस्तूनाम्। यो विनिमयः प्रतिदानम्। सा परिवृत्तिः स्मृता। इयं हि परिवृत्तिः समेन समस्य अधिकेन न्यूनस्य न्यूनेन चाधिकरय इति त्रिप्रकारा भवति। अत्र विनिमयः कविप्रतिभाकल्पित एवापेक्ष्यते।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रैव चमत्कारात्। तेन क्रीणन्ति यत्र मुक्ताभिर्बदराण्यपि बालिकाः इत्यत्र नेयम्। विनिमयश्च केनचिद्दत्तेन स्वकीयेन वस्तुना परकीयस्य वस्तुन आदानम्। तेन किमित्यपास्याभरणानि यौवने धृतं त्वया वार्धकशोभि वल्कलम्। इत्यत्र नायमलंकारः। भोजराजस्तु नैतदनुमन्यते। स च व्यत्ययेपि परिवृत्तिं स्वीकरोति। तदाह–

व्यत्ययो वस्तुनोर्यस्तु यो वा विनिमयो मिथः।
परिवृत्तिरिहोक्ता सा काव्यालंकारलक्षणे।। (३.२९) इति।

व्यत्ययो नाम एकस्थानास्थितस्य वस्तुनः स्थानान्तरप्राप्तिः। यथा–

कुमुदवनमपश्रि श्रीमदम्भोजखण्डं
त्यजति मुदमुलूकः प्रीतिमांश्चक्रवाकः।
उदयमहिमरश्मिर्याति चास्तं हिमांशु-
र्हतविधिलसितानां ही विचित्रो विपाकः।।

इति सरस्वतीकण्ठाभरणादौ द्रष्टव्यम्।।३५१।।

विवृति

इति निदर्शनचक्रम्।

सहोक्तिलक्षणमाह–

गुणा रूपादयो द्रव्याश्रयाः निर्गुणाः। कर्माणि उत्क्षेपणादीनि शास्त्रे परिभाषितानि वैशेषिक(कैः)। लोकिकाश्च गुणाः कान्तिशोभादयः। कर्माणि च क्रियाः। तेषामिहोभयेषां सम्भवतो ग्रहणम्। गुणानां कर्मणां च सहभावस्य यत् कथनं सा सहोक्तिरिष्यते। परिवृत्तेर्लक्षणं करोति अर्थानां (यो) विनिमयः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परिवृत्तिस्तु सा। अर्थादीनां द्रव्यादीनां यो विनिमयः प्रतिदानं परिवृत्तिस्तु सा। यथेत्युदाहरणम्।।

सहोक्तिपरिवृत्ती लक्षयति–**सहेति।** गुणस्य कर्मणो गुणकर्मणोर्वा द्वयोः सहभावकथनं सहोक्तिः।।

सहेति। किञ्चित् दत्त्वा ततः तत्सदृशस्य कस्यचित् आदानं विनिमयः। सहभावस्य कथनं गुणकर्मणाम्–इत्यस्य गुणक्रियाणां कर्त्रादिभिः सहभावकथनमित्यर्थः।।३५१।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कोकिलालापसुभगाः सुगन्धिवनवायवः।
यान्ति सार्धं जनानन्दैर्वृद्धिं सुरभिवासराः॥३५२॥

रत्नश्री

कोकिलानामालापैः सुभगा मनोहराः सुगन्धयो वनवायवो येषामिति सुगन्धिवनवायवः सुरभेर्वसन्तस्य वासरा दिवसा जानानामानन्दैः प्रीतिभिः सार्धं सह वृद्धिं यान्ति। वर्धन्त इति यावत्। अत्रोभयाधिकरणयोर्वर्धनक्रिययोः सहभावो दर्शितः। इयमभिन्न[क्रिया]। क्रियान्तरात्तु भिन्नक्रिया इत्यनयोर्भेदः प्रतिपत्तव्य इति॥

सहोक्तिमुप[संहरति]–

इत्युदाहृतयो दत्ताः सहोक्तेरत्र काश्चन।

इत्युक्तेन विधिना [87b] सहोक्तेरुदाहृतयः प्रयोगाः काश्चन कतिपये न सर्वा, दत्ता दर्शिताः अत्र शास्त्रे। शेषाः प्रयोगाः सुलक्षणीयाः॥

॥ इति सहोक्तिः ॥

हृदयङ्गमा

तत्र प्रथमोक्तां सहोक्तिं लक्षयन् गुणसहोक्तिं दर्शयति, सहेति। –सम्प्रति बन्धुविरहसमये इत्यर्थः, इमा रात्रयः मम श्वासैः सह दीर्घाः, विरहकालिकनिशायाः दुःखबहुलत्वेन क्लेशक्षेपणीयत्वात् तथा प्रतीतिः, न तु वास्तवदीर्घा इति भावः, चन्द्रभूषणाः ताश्च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रात्रयः, ममैव अङ्गैः सह पाण्डुराः। (पाण्डुरत्वे हेतुः ज्योत्स्ना, चन्द्रभूषणा इत्यनेन च तत्प्रतीते रित्यभिप्रायः। विरहिण्या उक्तिरियम्। अत्र दीर्घत्वं पाण्डुरत्वं गुणपदार्थौ वस्तुतो भिन्नावपि सहार्थबलात् एककालीनतया उक्तौ इति गुणगतेयं सहोक्तिः। न च "आविर्भवति नारीणां वयः पर्य्यस्तशैशवम्। सहैव विविधैः पुंसामङ्गजोन्मादविभ्रमैः।।" इति पूर्वोक्तकार्य्यसहजचित्र-हेतूदाहरणेऽपि क्रिययोः सहभावोऽस्ति तदनयोरभेद एव इति वाच्यं, सहभावसाधारण्येऽपि कार्य्यकारणभावस्यैव चित्रनियामकत्वात्, अत्र तु दीर्घश्वासदीर्घरात्र्योर्न कार्य्यकारणभावः, द्वयोरपि प्रियवियोगजन्यत्वात् इति बोध्यम्)।।३५२।।

प्रभा

प्रथमोद्दिष्टां सहोक्तिमुदाहरति—**सहेति।** संप्रति विरहावस्थायाम् इमाः रात्रयः मम श्वासैः सह दीर्घाः। ताश्चन्द्रभूषणाः सज्योत्स्नाका इत्यर्थः। रात्रयो ममैवाङ्गैः सह पाण्डुराः। विरहिण्या उक्तिरियम्। अत्र दीर्घत्वं पाण्डुरत्वं च गुणौ तौ तु संबन्धिभेदाद् भिन्नावपि सहार्थबलादेकेनैव पदेन कथितौ। तत्र च प्रथमान्तपदस्य साक्षादन्वयस्तृतीयान्तपदस्य सहशब्दार्थान्वयबलादिति ज्ञेयम्। अत्र रात्रिश्वासाङ्गानां गुणसंबन्धे सहभावाद् गुणसहोक्तिरियम्। सहभावसाधारण्येपि यत्र कार्यकारणभावस्य वैचित्र्यं तत्र कार्यसहजचित्रहेतुरलंकारः। यत्र तु कार्यकारणभावं विना सहभावस्तत्र सहोक्तिरित्युभयोर्विषयभेदः। अत्र रात्रिश्वासादीनां न कार्यकारणभावः। द्वयोरपि विरहजन्यत्वादिति दिक्।।३५२।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विवृति

तत्र सहोक्तिमुदाहरति–

इमा रात्रयो दीर्घ(र्घा)मदा[दी]यैः श्वासैः सहेत्यत्र रात्रीणां श्वासानां च दैर्ध्यस्य सहभावाभिधानात् सहोक्तिः। एवं सर्वत्र योज्यमुत्तरत्रापि।

न केवलं मम श्वासैः सहेमा रात्रयो दीर्घाः। तथा–

चन्द्राभरणं (णानां) निशानामङ्गानां च पाण्डुरत्वस्य सहाभिधानात् सहोक्तिः।।

गुणसहोक्तिं दर्शयति–**सहेति।।**

अत्र रात्रयो दीर्घाः पाण्डुराश्च इति दीर्घपाण्डुरगुणयोः श्वासैः अङ्गैश्च समावेशो दृश्यत इति सहोक्तिः।।३५२।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परिवृत्तिं निदर्शयन्नाह–

क्रियते परिवृत्तेश्च किञ्चिद्रूपनिरूपणम्॥३५३॥

रत्नश्री

संप्रति परिवृत्तेश्च परिवृत्तेरपि रूपस्य निरूपणं किञ्चित् संक्षिप्तं क्रियत इति॥

हृदयङ्गमा

क्रियामहोक्तिं दर्शयति, वर्द्धते इति। –पान्थानां विरहिणामित्यर्थः, मूर्च्छया सह चूतमञ्जरी वर्द्धते, मलयानिलाश्च तेषाम् असुभिः प्राणैः, समं पतन्ति गच्छन्ति। ("असुभिः" इत्यत्र "अश्रुभिः" इति "पतन्ति" इत्यत्र "वहन्ति" इति च पाठः। अत्र वर्द्धनं पतनञ्च क्रिये सहभावेनोक्ते वैचित्र्यविशेषमावहत इति क्रियासहोक्तिः। यद्यपि इह चूतमञ्जरीविकास-मलयपवनपतनाभ्यामेव पान्थानां मूर्च्छाप्राणनाशौ ध्वन्येते तथाऽपि मूर्च्छावृद्धि–चूतमञ्जरीवृद्ध्योः असुपतन–मलयानिलपतनयोश्च वसन्तजन्यत्वान्न मिथः कार्य्यकारणभावो विवक्षित इति चित्रहेतुत्वशङ्काया अनवकाशः)॥३५३॥

प्रभा

क्रियासहोक्तिं दर्शयति–**वर्धत इति।** पान्थानां प्रवासिनाम्। विरहिणां मूर्छया सह चूतमञ्जरी वर्धते। तेषामसुभिः प्राणैः समं मलयानिलाः दक्षिणवाताः पतन्ति। असुभिरित्यत्र अश्रुभिरिति पाठो दृश्यते। सोपि युक्त एव। अत्र वर्धनपतनक्रिये सहभावेन मूर्छाचूतमञ्जरीभ्यां मलयानिलासुभ्यां च संबद्धे चमत्कृतिविशेष-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मावहत इति सहोक्तिरलंकारः। अन्वयप्रकारस्तु पूर्ववदेव। अत्र च यदि मूर्छावृद्धिचूतमञ्जरीवृद्ध्योरसुपतनमलयानिलपतनयोश्च वसन्तजन्यत्वमभिप्रेतं तदा परस्परकार्यकारणभावसंबन्धाभावान्न चित्रहेतुना सांकर्यम्। यदि च चूतमञ्जरीवृद्ध्या मूर्छावृद्धिः, मलयानिलपतनेन च असुपतनमिति अभिप्रेतं तदा चित्रहेतुना सहास्य सांकर्यम् इति प्रेमचन्द्रशर्माणः। अपरे तु तादृशकार्यकारणभावस्य नैवात्र विवक्षा इति शुद्धोदाहरणमेवेत्याहुः। भोजराजस्तु इयं विविक्तक्रियासमावेशा वैसादृश्यवती सहोक्तिरित्याह।।३५३।।

विवृति

चूतमञ्जरी पथिकानां मूर्छया सह वर्धते। यथायथा सहकारतरुकुसुममञ्जरी वसन्तसमये वर्धते तथा (तथा) पथिकानां मूर्छाऽपि वर्धत इति चूतमञ्जरीमूर्छयोर्वधनक्रियायाः सहभावः।।

तेषां पञ्चा(पान्था)नां असुभिः प्राणैः सह मलयानिलाः पत(वह)तीत्यत्र मलयमारुतानां पथिकासूनां च पत(वह)नक्रियायाः सहभावः।।

क्रियासहोक्तिं दर्शयति–**वर्धते** इति।।

वर्धते इति। अत्र चूतमञ्जरी पान्थमूर्छनया सह वर्धनक्रियायां मलयानिलः असुभिः समं वहनक्रियायां, सम्बद्धौ इति क्रियोपज्ञेयं सहोक्तिः।।३५३।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शस्त्रप्रहारं ददता भुजेन तव भूभुजाम्।
चिरार्जितं हृतं तेषां यशः कुमुदपाण्डुरम्॥३५४॥

रत्नश्री

तव भुजेन भुजगराजभोगायमानेन शस्त्रैः कृपाणादिभिः प्रहारं ददता प्रयच्छता भूभुजां राज्ञाम्। पूजानुग्रहनिन्दा[घात]दानस्य दानत्वाभावात् न चतुर्थी। चिरं दीर्घमर्जितं सञ्चितं कुमुदवत् पाण्डुरं यशस्तेषां भूभुजां सम्बन्धि हृतं गृहीतम्। अत्र प्रहारेण कर्मणा यशोरूपो गुणो विनिर्मितः। इतीदृशी परिवृत्तिरनुगन्तव्या।

जगतां प्रीतिसर्वस्वं [धैर्यं मतिम]तामपि।

कटाक्षमात्रमुत्सृज्य गृह्णन्ति हरिणीदृशः॥

इत्यपरमुदाहरणम।

॥ इति परिवृत्तिः ॥

आशिषमाविष्कुर्वन्नाह–

हृदयङ्गमा

कोकिलेति। –कोकिलानाम् आलापेन रवेण, सुभगाः सुरम्याः, तथा सुगन्धिनः वनवायवः येषु तादृशाः, सुरभिवासराः वसन्तदिवसाः, जनानामानन्दैः सार्द्धं वृद्धिं यान्ति। (सहशब्दप्रयोगे एवायमलङ्कार इति भ्रमनिरासार्थं सार्द्धं-पदघटितमिदमुदाहरणम् एतेन सहार्थकशब्दान्तरोपादाने तदनुपादाने च सहार्थविहतायां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तृतीयायां सहोक्तिरिति बोध्यम्। केचित्तु यान्तीति यानक्रियायाः सहभाववत् गुणात्मिकाया वृद्धेरपि सहभावप्रतीतेः गुणक्रिययोः एकत्र समावेशरूपम् इदमुदाहरणमित्याहुः। अत्र पक्षे वृद्धेर्गुणत्वाङ्गीकारे आनन्दस्यापि तथात्वे गुणस्य गुणवृत्तित्वापातदोषः, अतः अत्र यानम् आनन्दनञ्च क्रिये सहभावेन उक्ते वैचित्र्यातिशयम् उत्पादयत इति क्रियागतेयं सहोक्तिः। अन्ये तु सुरभिवासरा इति कर्त्तृपदार्थः केवल एव जनानन्दैः सह वृद्धिप्राप्तिक्रियायां समाविष्ट इति विविक्तकर्त्तृक्रियासमावेशाख्यसहोक्तिरियम् इत्याहुः)।।३५४।।

प्रभा

कोकिलेति। सुरभिवासराः वसन्तदिवसाः। जनानन्दैः सार्धं जनप्रमोदैः सह वृद्धिं यान्ति। तान् दिवसान् वर्णयति-**कोकिलेति।** कोकिलानाम् आलापः मधुरः येषु ते। सुगन्धयः शोभनगन्धवन्तो वनवायवः दक्षिणानिला यत्र ते। सहशब्दप्रयोगे एवायमलंकार इति भ्रमनिरासाय सार्धपदोपादानेनेदमुदाहरणमिति प्रेमचन्द्रादयः। वृद्धिरूपस्य गुणस्य व्याप्तिरूपस्य कर्मणश्च तुल्यतया वचनाद् एषा गुणक्रियासहोक्तिरिति तरुणवाचस्पत्यादयः। भोजराजस्तु विविक्तकर्तृक्रियासमावेशवैसादृश्यवती इयं सहोक्तिरित्याह।।३५४।।

विवृति

कोकिलालापैः सुभगाः सुगन्धयो वनवायवो येषु ते सुरभिवासराः वसन्तसमयदिवसाः जनानन्दैः सह वृद्धिं यान्तीत्यनेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वसन्तादीनां [दिनानां] जनानन्दानां च सहभावोऽभिहित इति सहोक्तिः।।

गुणक्रियासहोक्तिं दर्शयति–**कोकिलेति।** वृद्धिरूपस्य गुणस्य व्याप्तिरूपस्य कर्मणश्च तुल्यतया वचनात् एषा गुणक्रियासहोक्तिः।।

कोकिलेति। अत्र सुरभिवासराः जनानन्दैः सह वृद्धिक्रियायामेकस्यां निविष्टा इति सहोक्तिभेदः। पूर्वस्मिन् एकस्य क्रियाद्वये निवेशः।।३५४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आशीर्नामाभिलषिते वस्तुन्याशंसनं यथा।
पातु वः परमं ज्योतिरवाङ्मनसगोचरः॥३५५॥

रत्नश्री

अभिलषिते वाञ्छिते वस्तुनि क्वचित् क्रियाविशेषे आशंसनं प्रार्थनमित्यनूद्य आशीर्नाम विज्ञायत इति विधीयते। यथेत्युदाहरति–परमं पारमार्थिकं सकलकल्पनामलविकलं ज्योतिः संवेदनं सर्वपदार्थतत्त्वप्रकाशकत्वात् वाचो मनसश्चाविकल्पत्वात् न गोचरो न विषय इत्यावाङ्भनसगोचरः। अवाङ्भन सगोचरमित्यपि पठ्यते तत्र न विद्यते वाङ्भनसयोर्गोचरो विषयभावो ग्राहकत्वमस्येति व्याख्येयम्। वो युष्मान् पातु रक्षतु। अत्राभिलषितं रक्षणमाशस्यत इति।

पायादपायतो लोकं लोकविद्रुणसागरः।
नैरात्म्याद्वयसंवित्तेर्विजितावरणद्वयः॥

इत्यपरमुदाहरणम्॥

॥ इत्याशीश्चक्रम् ॥

यत्र तेनैव तदुपमीयते स तद्धर्मः तस्यान्यत्र क्वचिदवृत्तेरनन्वयनाम अलङ्कारः। यदाहुः-

यत्र तेनैव तस्य स्यादुपमानोपमेयता।
असादृश्यविवक्षातस्तमित्याहुरनन्वयम्॥
ताम्बूलरागवलयं स्फुरद्दशनदीधिति।
इन्दीवराभनयनं तवेव वदनं तव॥

[काव्यालङ्कारे ३.४५-६]

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यत्रोपमानेन सहाभेदः, भेदश्च स्तुतिपरः परिदीप्यते ससंदेहो नामासावलङ्कारः कल्पितः। यथोक्तम्–

उपमानेन तत्त्वं च भेदं च वदतः पुनः।
ससंदेहं वचः स्तुत्यै ससंदेहं विदुर्बुधाः।।
किमयं शशी न स दिवापि राजते
कुसुमायुधो न धनुरस्य कौसुमम्।
इति विस्मयाद् विमृशतोऽपि मे मति–
स्त्वयि वीक्षिते न लभतेऽर्थनिश्चयम्।।
[काव्यालङ्कारे ३.४३-४]

अपरश्चोपमारूपकं नामालङ्कारः। तदुक्तम्–

उपमानेन तद्भावमुपमेयस्य साधयन्।
यां वदत्युपमामेतदुपमारूपकं यथा।।
समग्रगगनायाममानदण्डो रथाङ्गिनः।
पादो जयति सिद्धस्त्रीमुखेन्दुनखदर्पणः।। इति।
[काव्यालङ्कारे ३.३५-६]

त्रयमप्येतन्न संगृहीतमित्याशङ्क्य संग्रहं दर्शयन्नाह–

हृदयङ्गमा

इतीति। –इति उक्तरूपाः, सहोक्तेः, काश्चन उदाहृतयः उदाहरणानि, अत्र दत्ताः दर्शिताः, अनयैव रीत्या अन्यविधाऽपि सहोक्तिरनुसन्धेया इति भावः। (भोजस्तु विविक्तादिभेदेन अन्यानपि भेदान् दर्शितवान्; यथा, –"कर्त्रादीनां समावेशः सहान्यैर्यः क्रियादिषु। विविक्तश्चाविविक्तश्च सहोक्तिः सा निगद्यते।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वैसादृश्यवती चेयमुच्यमाना मनीषिभिः। सहेवादिप्रयोगेषु समादृश्या च दृश्यते।।'' इति। एतेषामुदाहरणानि तत्रैव द्रष्टव्यानि)।।–

प्राक् परिवृत्तिलक्षणमभिहितम्, इदानीं लक्ष्यं दर्शयितुमाह, क्रियते इति। –परिवृत्तेश्च किञ्चित् अल्पमात्रं, रूपनिदर्शनं स्वरूपप्रकाशनं, क्रियते। (एतेन ग्रन्थबाहुल्यभिया अन्ये भेदा नात्र दर्शिता इति सूचितम्। दृश्यन्ते च व्यत्ययवती विनिमयात्किका उभयवती च इति त्रिविधाः भेदाः कण्ठाभरणे; यथा, –''सा त्रिधा व्यत्ययवती तथा विनिमयात्मिका। तृतीया चोभयवती निर्दिष्टा काव्यसूरिभिः।।'' इति। त्रिधाऽपि मुख्यामुख्यभेदेन पुनः द्विधाभूय षड्विधा इत्यपि तत्रैव दृश्यते। किञ्च समन्यूनाधिकगतत्वेनापि तस्याः भेदः सम्भवति, ''परिवृत्तिर्विनिमयः समन्यूनाधिकैभवेत्'' इति विश्वनाथोक्तेः। अत्र न्यूनेनाधिकस्योदाहरणमात्रं प्रदर्श्यते इति किञ्चिदित्युक्तम्)।।३५५।।

प्रभा

सहोक्तिमुपसंहरन् परिवृत्त्युदाहरणं प्रस्तौति-**इतीति।** इति उक्तप्रकाराः। सहोक्तेः काश्चन उदाहृतयः दत्ताः। अन्याः स्वयमूहनीयाः। अस्या विस्तरः कण्ठाभरणादिषु द्रष्टव्यः।। इदानीं परिवृत्तेश्च उदाहरणेन किंचित् स्वरूपदर्शनं क्रियते।।३५५।।

विवृति

उपसंहरन्नाह–

इतीति। सहोक्तेः अनेकाः प्रकाराः ; केचिदेवंप्रकारा दर्शिताः।।३५५।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनन्वयससंदेहावुपमास्वेव दर्शितौ।
उपमारूपकं चापि रूपकेष्वेव दर्शितम्॥३५६॥

रत्नश्री

अनन्वयश्च [स]संदेहश्च द्वावप्येतौ उपमासु उपमाविकल्पेषु एव दर्शितो अन्तर्भावितौ तल्लक्षणयोगात्। तथाहि, अनन्वयस्ताव[त्–

च]न्द्रारविन्दयोः कक्ष्यामतिक्रम्य मुखं तव।

आत्मनैवाभवत्तुल्यम् [२.३७]

इत्यात्मनोपमितत्वात्, मुखस्योपमैव। न चाभेदे कथमुपमानोपमेयभाव इति शङ्कनीयम्, अनन्वयेऽतिप्रसङ्गात्। न ह्यनन्वय इति व्यपदेशान्तमात्रेणोपमानोपमेयभावस्तत्र निवर्तते, प्रतीतिविरोधात्। अथाभेदेऽपि भेदकल्पनया तद्भावः, इहाप्येवमस्तु। अत एवासाधारणोपमेयमात्मनैवोपमितेरन्यस्यानपेक्षणादन्यत्व-प्रदर्शनव्याजेन चन्द्रारविन्दाभ्यां वदनमुपमितमिति व्याचक्षते। तथा कथमसाधारणोपमेति चिन्त्यम्। ससंदेहोऽपि–

किं पद्ममन्तर्भ्रान्तालि किं ते लोलेक्षणं मुखम्।

मम दोलायते चित्तम् [२.२६]

इति संशयमुखेन व्यक्तं सादृश्यप्रतीतेः संसशयोपमैव। न च मन्तव्यम्–

किमयं शशी न स दिवापि राजते

[काव्यालङ्कारे ३.४४]

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इति [स्तुति]परो भेदो न दर्शित इति। एवं नाम कान्तिसंपन्नं मुखं यत् पद्मं तद्व्यवसीयत इति स्तुतेरपि प्रतीतेः। प्रायश्चापरा अप्युपमाः स्तुतिगर्भाः, चन्द्रादिप्रतिविशिष्टवस्तुसादृश्योद्भावनात्। न चायं तत्र[ावश्यं] स्तुतिपरो भेदः कथ्यते, अन्यथापि प्रयोगदर्शनात्। तद् यथा–

एषा किंशुकराजी राजति दावानलो ज्वलन् किमयम्।

विरहविनाशोत्पाते याता किमकालसन्ध्येयम्।। इति

अयमालोहितच्छायो मदेन मुखचन्द्रमाः।

सन्नद्धोदयरागस्य चन्द्रस्य प्रति गर्जति।।

[२.८९]

इति मुखस्य चन्द्रत्वेन रूपणात्। साम्यप्रतीतिगर्भात् रूपकेषु रूपकविकल्पेष्वेव दर्शितमन्तर्भावितम् रूपकविकल्प [88b] एव कश्चिदुपमारूपकाख्यः। यथा व्यतिरेकगर्भो रूपकविकल्पो व्यतिरेकरूपकमाख्यायते। तदेतत्त्रयं यथालक्षणमुपमारूपक-संगृहीतमिति न किञ्चित् [तिर]ष्क्रियते।।

उत्प्रेक्षावयवो नाम पृथगलङ्कारः परैरिष्यते। यदुक्तम्–

श्लिष्टस्यार्थेन संयुक्तः किञ्चिदुत्प्रेक्षायान्वितः।

रूपकार्थेन च पुनरुत्प्रेक्षावयवो यथा।।

तुल्योदयोऽवसानत्वाद्व्रतेऽस्तं प्रति भास्वति।

वासाय वासरः ल्कान्तो विशतीव तमोगुहाम्।। इति।

[काव्यालङ्कारे ३.४७-४८]

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सोऽप्युत्प्रेक्षाविशेषत्वात् उत्प्रेक्षासंगृहीत इति दर्शयन्नाह–

उत्प्रेक्षाभेद एवासावुत्प्रेक्षावयवोऽपि यः।

यः परैरुत्प्रेक्षावयवः पृथगुक्तः असौ सोऽपि चायमुत्प्रेक्षाया भेदो विशेषः कश्चित्। ततस्तत्संगृहीत एवेति नासंग्रहः कश्चित्।

हृदयङ्गमा

शस्त्रप्रहारमिति। –शस्त्रप्रहारं ददता तव भुजेन तेषां भूभुजां चिरार्जितं कुमुदपाण्डुरं यशः हृतम्। (अत्र न्यूनेन अधिकस्य ग्रहणरूपविनिमयः कृत इति परिवृत्तिरलङ्कारः। समेन समस्य अधिकेन न्यूनस्य च उदाहरणं यथा, –"दत्ता कटाक्षमेणाक्षी जग्राह हृदयं मम। मया तु हृदयं दत्त्वा गृहीती मदनज्वरः।।" अत्र प्रथमार्द्धे समेन समस्य द्वितीयार्द्धे अधिकेन न्यूनस्य विनिमयरूपपरिवृत्तिरिति दिक्)।।३५६।।

प्रभा

शस्त्रप्रहारमिति। भूभुजां नृपाणाम् शस्त्रप्रहारं ददता तव भुजेन तेषां चिरार्जितं बहुकालसंवर्धितं कुमुदपाण्डुरं यशो हृतम्। अत्र न्यूनेनाधिकस्य ग्रहणरूपो विनिमयो ज्ञेयः। एवमेव–

दत्त्वा कटाक्षमेणाक्षी जग्राह हृदयं मम।
मया तु हृदयं दत्त्वा गृहीतो मदनज्वरः।।

इत्यत्र पूर्वार्धे समेन समस्य उत्तरार्धे अधिकेन न्यूनस्य विनिमयः। व्यत्ययविनिमयवती यथा–

लोचनाधरकृताहृतरागा वासिताननविशेषितगन्धा।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वारुणी परगुणात् स्वगुणानां व्यत्ययं विनिमयं च वितेने।।

अत्र वारुण्या यदधराद्रागोपहृत्य चक्षुषोर्निक्षिप्तस्तेनेयं व्यत्ययवती। यच्च मुखामोदवासितया स्वामोदेन मुखामोदो विशेषितस्तेन विनिमयवती। इति उभयवती परिवृत्तिः। अस्या विस्तरस्तु सरस्वतीकण्ठाभरणे द्रष्टव्यः।।३५६।।

विवृति

इति सहोक्तिः।

तव भुजेन शस्त्रप्रहारमरातीनां ददता यशो हृतमिति शस्त्रप्रहारयशसोर्दानादानाभ्यां परिवर्तनं कृतमिति परिवर्तनं परिवृत्तिः।।

परिवृत्त्युदाहरणं दर्शयति–**शस्त्रेति**। सुबोधमेतत्।।३५६।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संसृष्टिं व्याचष्टे–

नानालङ्कारसंसृष्टिः संसृष्टिस्तु निगद्यते॥३५७॥

रत्नश्री

नाना अनेकस्यालङ्कारस्य संसृष्टिः संसर्गः एकत्रोक्तौ सन्निधानं संसृष्टिस्तु निगद्यते विधीयते, यदुद्देशं संकीर्णमुक्तम्। तुशब्देनैतदाह–जात्यादीनामिव नास्याः पृथग्लक्षणम्। तेषामेव तु द्वयोर्बहूनां वा संसर्गलक्षणेयमिति॥

कथमनेकस्यालङ्कारस्य एकत्रोक्तौ अवस्थानमिति सापेक्षत्व-निरपेक्षत्वरूपं प्रकारद्वयं दर्शयन्नाह–

हृदयङ्गमा

आशीरलङ्कारं निर्दिशति, आशीरिति। –अभिलषिते वस्तुनि आशंसनं प्राप्तीच्छाप्रकटनम् अथवा शुभप्रार्थनम्, आशीर्नाम अलङ्कारः। (अयमलङ्कारो वैचित्र्यविशेषावहत्वाभावान्न बहुभिरादृतः, अपरे तु शुभाशंसनेन वैचित्र्यम् अस्तीत्यांहुः। उक्तञ्च, –"आशीरिति च केषाञ्चिदलङ्कारतया मता। सौहृद्यस्याविरोधोक्तौ प्रयोगोऽस्याश्च तादृशः॥" इति। कैश्चित्तु नाट्ये एवास्याश्चमत्कारित्वात् नाट्यालङ्कारतयाऽसौ मन्यते। यथा,–"आशीराक्रन्दकपटाक्षमागर्वोद्यमाश्रया" इत्युपक्रम्य "इति नाट्यालङ्कृतयो नाट्यभूषणहेतवः" इति। लक्षणञ्चास्याः तत्कृतम् "आशीरिष्टजनाशंसा" इति। उदाह्यतञ्च यथा,–"ययातेरिव शर्मिष्ठा पत्युर्बहुमता भव। पुत्रं त्वमपि सम्राजं सेव पूरुमवाप्नुहि॥" इति। अन्ये तु प्रेयोऽलङ्कारस्य भेद

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवायमित्याहुः)। यथेति उदाहरणार्थम्। अवाङ्मनसगोचरं परमं ज्योतिः परमात्मा इत्यर्थः, ("यतो वाचो निवर्त्तन्ते अप्राप्य मनसा सह" इति श्रुतेः) वः युष्मान्, पातु रक्षतु।।३५७।।

प्रभा

आशिषं लक्षयति–**आशीर्नामेति।** अभिलषिते इष्टे वस्तुनि। आशंसनम् अभिलाषप्रकाशनम्। अथवा अभिलषिते प्रिये वस्तुनि सुहृदादिजने। आशंसनं शुभप्रार्थनम्। आशीर्नामालंकारः। वैचित्र्याभावान्नायमलंकार इति बहवो मन्यन्ते। भामहस्तु एतादृशाशंसने वैचित्र्यमङ्गीकृत्य इमामलंकारेषु गणयति। तथा चोक्तं तेन–

आशीरपि च केषांचिदलंकारतया मता।
सौहृदस्याविरोधोक्तौ प्रयोगोस्याश्च तद्यथा।।

अस्मिञ्जहीहि सुहृदि प्रणयाभ्यसूया-
माश्लिष्य गाढममुमानतमादरेण।
विन्ध्यं महानिव घनः समयेभिवर्ष-
न्नानन्दजैर्नयनवारिभिरुक्षतु त्वाम्।।

मदान्धमातङ्गविभिन्नसाला हतप्रवीरा द्रुतभीतपौराः।
त्वत्तेजसा दग्धसमस्ततेजा द्विषां पुरः पश्यतु राजलोकः।।
(३, ५४) इति।

दर्पणकारादयस्तु नाट्य एव अस्याश्चमत्कारित्वान् नाट्यालंकार एनां गणयन्ति। यदुक्तम्–आशीराक्रन्दकपटाक्षमाग-र्वोद्यमाश्रया इत्यारभ्य इति नाट्यालंकृतयो नाट्यभूषणहेतवः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(६.१९५) इत्यन्तम्। तल्लक्षणं तु–आशीरिष्टजनाशंसा इति। उदाहरणम्–

ययातेरिव शर्मिष्ठा पत्युर्बहुमता भव।
पुत्रं त्वमपि सम्राजं सेव पूरुमवाप्नुहि।। इति।

परे तु प्रेयोलंकारविशेषमिमामाहुः। यथेति उदाहरणार्थम्। अवाङ्मनसगोचरं वाङ्मनोविषयातीतम्। तदुक्तं–यतो वाचो निवर्तन्ते अप्राप्य मनसा सह। इति। परमं ज्योतिः परेश इत्यर्थः। वः युष्मान् पातु रक्षतु। अवाङ्मनसेत्यत्र अचतुरेति सूत्रेणाच् समासांतः।।३५७।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अङ्गाङ्गिभावावस्थानं सर्वेषां समकक्षता।
इत्यलङ्कारसंसृष्टेलक्षणीया द्वयी गतिः॥३५८॥

रत्नश्री

अङ्गमुपकारकम्। अङ्गि च उपकार्यम्। तयोर्भावोऽङ्गाङ्गिभावः साध्यसाधनत्वम्। तेनावस्थानं सन्निधानम्। सर्वेषां ये तत्रोपात्ताः। समा कक्षा बलं येषां तेषां भावः समकक्षता अङ्गाङ्गिभावमन्तरेण स्वातन्त्र्येणावस्थानं चेति-एवंरूपा द्वयी द्विविधा गतिव्यवस्था [लक्षणीया] द्रष्टव्या। कुत्रालङ्कारे? संसृष्ट्यलङ्कारे विषय इति॥

हृदयङ्गमा

सम्प्रति उद्देशक्रमप्राप्तानलङ्कारान् निरूप्य प्राप्तावसरतया मतान्तरोक्तानां केषाञ्चित् अलङ्काराणां स्वोक्तेष्वन्तर्भावं दर्शयति, अनन्वयेति। –अनन्वयः, –"उपमानोपमेयत्वमेकस्यैव त्वनन्वयः" इत्युक्तलक्षणः, तथा ससन्देहः, –"प्रकृते तदन्यविषया सादृश्यज्ञानजन्या या। बुद्धिर्निश्चयभिन्ना तामाचख्यः ससन्देहम्॥" इत्युक्तप्रकारः, उपमेये उपमानविषयकः संशयः ससन्देहः इति निष्कृष्टार्थः। (सन्देह इत्यप्यस्य संज्ञान्तरम्। "स्यात् स्मृतिभ्रान्तिसन्देहैस्तदेवालङ्कृतित्रयम्" इति चन्द्रालोकादिदर्शनात्)। उपमासु उपमाभेदेषु एव, दर्शितौ। (तथा च, –"चन्द्रारविन्दयोः कान्तिमतिक्रम्य मुखं तव। आत्मनैवाभवत्तुल्यमित्यसाधारणोपमा॥" इत्युक्तरूपायामसाधारणोपमायामनन्वयस्यान्तर्भावः। ननु चन्द्र इव मुखमित्यादौ मुखे चन्द्रगतधर्म्मप्रतीतिः, चन्द्र इव चन्द्र इत्यत्र तु स्वस्मिन्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वसादृश्यस्यासम्भवात् कथमुपमा इत्यपि न वाच्यं, देशकालादिभेदेन स्वस्मिन्नपि स्वभेदसत्त्वात्; अत एव वाचस्पतिमिश्रैर्भामत्यामुक्तम् "अथ यदिदमस्मिन् ब्रह्मपुरे" इत्यादिश्रुतिव्याख्यानावसरे,–"तेन तस्योपमेयत्वं रामरावणयुद्धवत्। अगत्यां भेदमारोप्य गतौ सत्यां न युज्यते।।" इति। तदपि तत्कल्पतरौ व्याख्यातं, ह्यस्तनाद्यतनत्वादिना युद्धे भेदारोपः क्रियते। "गगनं गगनाकारं सागरः सागरोपमः। रामरावणयोर्युद्धं रामरावणयोरिव।।" इत्यत्र इति। एतावता हि एवंविधस्थले भेदारोपेण उपमैव इत्यभिप्रयो लभ्यते। तथा, –"किं पद्ममन्तर्भ्रान्तालि किं ते लोलेक्षणं मुखम्। मम दोलायते चित्तमितीयं संशयोपमा।।" इत्युक्तायां संशयोपमायां ससन्देहस्य अन्तर्भावः)। उपमारूपकञ्चापि रूपकेषु रूपकभेदेषु एव, दर्शितम्। [यथा, –"इष्टं साधर्म्यवैधर्म्यदर्शनात् गौणमुख्ययोः। उपमाव्यतिरेकाख्यं रूपकद्वितयं यथा।।" इति। तस्मादेतेषां न पृथगुक्तिरिति भावः। वामनेनापि उक्तं यथा,–"उपमाजन्यं रूपकमुपमारूपकम्" (का० सू० वृ० ४ अधि० ३अ० ३२सू०) इति। उदाहृतञ्च तेनैव यथा, –"जयति चतुर्दशलोकवल्लिकन्दः" इति। केचिदिदं परम्परितरूपकमाहुः। अपरे तु उपमासहितं रूपकम् उपमारूपकं, यदुक्तम्, –"उपमानेन तद्भावमुपमेयस्य रूपयन्। यत वदत्युपमाभेदमुपमारूपकं यथा।।" इति। अस्योदाहरणं यथा, –"दिवाकरकरस्पर्शादुदयाद्रेः पयोधरात् नीलांशुकमिव प्राच्यास्तमो गलति सम्प्रति।।" अत्र नीलांशुकमिवेत्युपमया सहितमुदयाद्रेः पयोधरादिति रूपकमाचक्षते]।।३५८।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रभा

एतावता उद्देशानुरोधेन सर्वानलंकारान् सोदाहरणं व्याख्याय अन्याभिमतानां केषांचिदलंकाराणां स्वोक्तेषु अन्तर्भावं दर्शयन् स्वपरिगणनस्य न्यूनतां परिहरति–**अनन्वयेति।** तल्लक्षणमाह भामहः–

यत्र तेनैव तस्य स्यादुपमानोपमेयता।
असादृश्यविवक्षातस्तमित्याहुरनन्वयम्।। इति।

उदाहरति च–ताम्बूलरागवलयं स्फुरद्दशनदीधिति।
इन्दीवराभनयनं तवेव वदनं तव।। (३-४५, ४६) इति।

ससंदेहं लक्षयति–

उपमानेन तत्त्वं च भेदं च वदतः पुनः।
ससंदेहं वचः स्तुत्यै ससंदेहं विदुर्यथा।। (३.४२) इति।

उदाहरति च–

किमयं शशी न स दिवा विराजते
कुसुमायुधो न धनुरस्य कौसुमम्।
इति विस्मयाद्विमृशतोपि मे मति-
स्त्वयि वीक्षिते न लभतेर्थनिश्चयम्।। इति।

उपमारूपकं लक्षयति–

उपमानेन तद्भावमुपमेयस्य साधयन्।
यां वदन्त्युपमामेतदुपमारूपकं यथा।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उदाहरति–

समग्रगगनायाममानदण्डो रथाङ्गिणः।
पादो जयति सिद्धस्त्रीमुखेन्दुनवदर्पणः।। (३.३४-३५) इति।

तत्र एतेषु अलंकारेषु मध्ये अनन्वयस्य–

चन्द्रारविन्दयोः कान्तिमतिक्रम्य मुखं तव।
आत्मनैवाभवत् तुल्यमित्यसाधारणोपमा।।

इत्यसाधारणोपमायामन्तर्भावः। ससंदेहस्य च–

किं पद्ममन्तर्भ्रान्तालि किं ते लोलेक्षणं मुखम्।
मम दोलायते चित्तमितीयं संशयोपमा।।

इति संशयोपमायामन्तर्भावः। उपमारूपकस्य–

इष्टं साधर्म्यवैधर्म्यदर्शनाद्गौणमुख्ययोः।
उपमाव्यतिरेकाख्यं रूपकद्वितयं यथा।।

इति रूपकप्रभेदे एव अन्तर्भावः। तस्मादेतेषामनुक्त्या न न्यूनतास्माकमिति भावः।।३५८।।

विवृति

इति परिवृत्तिः।

आशिषोऽलङ्कारस्य लक्षणं करोति–

आशीर्नाम अभिलषिते वस्तुनि आशंसनम्। स आशीरलङ्कारः। यथेत्युदाहरति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पातु रक्षतु वो युष्मान् परमं प्रकृष्टं ज्योतिराघा(द्यो)तो ज्ञानमवाङ्मनसगोचरं वाचो मनसश्च यद्विषयो न भवति।।

आशीरिति। अप्राप्तस्य अभीष्टस्य आशंसनं आशीः। सा च अनुकूला अननुकूला इति द्विधा। अनुकूलाशीर्नाम यो यच्छास्त्रमारभते तस्य तच्छास्त्राभिद्योतकार्थाशसनम्। यथा–

'कोऽसि त्वं मे का वाऽहं ते विसृज विसृज मम वसनं मुखं किमवेक्षसे न व्यङ्गाहं जाने ही ही तव सुभग दशनवसनं प्रियादशनाङ्कितम्। या ते रुष्टा सा ते नाहं व्रज चपल हृदयनिलयां प्रसादय कामिनीम् इत्येवं कन्दर्पेणार्ताः प्रणयकलहकुपितपतीन् वदन्ति परस्त्रियः।।'

इत्यादयः अनुकूला आशिषः। शास्त्रस्याननुकूलार्थाशंसनं यथा–

'आयूंषि श्रियमारोग्यं पुत्रं मित्राणि बन्धुताम्।

ददद्भक्तिञ्च भवतु भवतामीशवन्दनम्।।' इत्यादयः।

केचित् आदौ मङ्गलशब्दयुक्तां कुर्वन्ति। तद्यथा–

'श्रियं दधतु वः शौरेर्द्वये तुल्यश्रमाः क्रमाः।

ये चादौ गोष्पदं पश्चात् त्रैलोक्यं कामतश्च ये।।' इत्यादयः। केचित् इतरोपेतामपि आशिषं प्रयुञ्जते। इतरोपेतां नमस्कारोपेतां इत्यर्थः। यथा–

'नमः शिवाय कल्याणहारिणे भोगिहारिणे।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संसारसागरोत्तारसेतवे मुक्तिहेतवे।।' इत्यादयः।

केचन वर्तमानपदेनापि आशिषमाचक्षते। यथा–

'जयति स भगवान् कृष्णः शेते यः शेषभोगशय्यायाम्।

मध्ये पयःपयोधेरपर इवाम्भोनिधिः कृष्णः।।' इत्यादयः।

एतासु मङ्गलशब्दयुक्तेतरोपेतवर्तमानपदप्रतिपाद्यासु आशीस्सु अननुकूलभेदाः द्रष्टव्याः। मङ्गलशब्दयुक्ताननुकूलाशीः यथा–

'शिवमस्तु सर्वजगतां परहितनिरता भवन्तु भूतगणाः।

दोषाः प्रयान्तु शान्तिं सर्वत्र जनः सुखी भवतु।।'

इतरोपेताननुकूलाशिषि यथा–'रागादिरोगान् सततानुषक्तान्' इत्येवमादयः। वर्तमानपदाननुकूलाशिषि यथा–

'वरगुरुरबलानां केलिदीक्षाप्रदाने

परभसुहृदनङ्गो रोहिणीवल्लभस्य।

अपि कुसुमपृषत्कैर्देवदेवस्य जेता

जयति ललितलीलानाटिकासूत्रधारः।।' इत्यादयः।

केचित् परहिताशंसनमपि निजहिताशंसनं भवतीति अशिषं प्रयुञ्जते। तद्यथा–

'प्रभातकाले युष्माकमुन्मीलयतु लोचने।

दिवाकरकरस्ताम्रः सुप्ताब्जं सरसामिव।।'

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

केचित् मङ्गलशब्द एव सर्वाशिषमाशास्ते इति मङ्गलशब्दमाशंसन्ति। यथा 'अथातो धर्मजिज्ञासा' इत्येवमादयः।।

इत्याशीः।

न वयम[नन्वनन्वयस] सन्देहोपमारूपकोत्प्रेक्षावयवाना-मलङ्काराणामत्र लक्षणा(न)भिधानात् न्यूनमलङ्कारलक्षणम्। तथा हि।

यत्र तेनैव तस्य स्यादुपमानोपमेयता।
असादृश्यविवक्षातस्तमित्याहुरनन्वयम्।।

तस्योदाहरणम्–

'ताम्बूलरागवलयस्फुरद्दशनदीधिति।
इन्दीवराभनयनं तवेव वदनं तव।।

इत्यनन्वयः।

उपमानेन तत्त्वं च भेदं च वदतः पुनः।
ससन्देहं वचः स्तुत्यै ससन्देहं विदुर्यथा।।

तस्योदाहरणम्–

किमयं शशी न स दिवा विराजते
कुसुमायुधो न धनुरस्य कौसुमम्।
इति विस्मयाद्विमृशतोऽपि मे मतिः
त्वयि धीस्थिते (वीक्षिते) न लभतेऽर्थनिश्चयम्।।

इति(स)सन्देहः। इत्येतावदन[–वन–]न्वय[स]सन्देहालङ्कारौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भामहेन पृथगुदाहृतौ यौ तावदस्मा (–वस्मा–)भिः उपमास्वेव दर्शितौ। तथा हि। अनन्वयः असाधारणोपमा। यदुक्तम्–

चन्द्रारविन्दयोः कक्ष्यामतिक्रम्य मुखं तव।
आत्मनैवाभवत्तुल्यमित्यसाधारणोपमा।।

ससन्देहोऽपि सन्देहोपमा। यदुक्तम्–

किं पद्ममन्तर्भ्रान्तालि किं ते लोलेक्षणं मुखम्।
मम दोलायते चित्तमितीयं संशयोपमा।।

संशयसन्देहयोश्च पर्यायत्वादभेदः। उपमारूपकलक्षणं यथा–

उपमानेन तद्भावमुपमेयस्य च साधयन्।
यां वदत्युपमामेतदुपमारूपकं यथा।।

तस्योदाहरणम्–

समग्रगगनायाममानदण्डो रथाङ्गिनः।
पादो जयति सिद्धस्त्रीमुखेन्दुनखदर्पणः।।

एतदप्युपमारूपकं भामहोक्तमस्माभी रूपकेष्वेव दर्शितम्। तथाहि–

इष्टं साधर्म्यवैधर्म्यदर्शनात् गौणमुख्ययोः।
उपमाव्यतिरेकाख्यं रूपकद्वितयं यथा।।

तस्योदाहरणम्–

अयमालोहितच्छायो मदेन मुखचन्द्रमाः।
सन्नद्धोदयरागस्य चन्द्रस्य प्रतिगर्जति।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतीदमुपमा[रूपकं] रूपकेष्वेव दर्शितमिति न पृथगुद्दिश्यते। भामहेनोक्तं उत्प्रेक्षावयवलक्षणं यथा–

श्लिष्टस्यार्थेन संयुक्ते किञ्चिचोत्प्रेक्षयाऽन्वितम्।
रूपकार्थेन च पुनरुत्प्रेक्षावयवो यथा।।

तुल्योदयावसानत्वात् गतेऽस्तं प्रति भास्वति।
वासाय वासरः क्लान्तो विशतीव तमोगुहाम्।। इति।।

उत्प्रेक्षावयवोऽप्युत्प्रेक्षाभेद एव। अयं चोत्प्रेक्षालङ्कारप्रपञ्च-दर्शनेनैवोदाहृत इति न पृथगस्माभिरुद्दिश्यते।।

भामहेन अनन्वयः, सन्देहः, उत्प्रेक्षावयवोऽपि च, त्रयोऽलङ्कारा दर्शिताः। तेषां उपमोत्प्रेक्षयोः अन्तर्भावः इत्याह–**अनन्वयेति।** त्वन्मुखं त्वन्मुखेन तुल्यम् इत्यनन्वयः ; सा असाधारणोपमेत्युक्ता। ससन्देहः संशयोपमेत्युक्ता। उत्प्रेक्षावयवः उत्प्रेक्षाभेद एव द्रष्टव्यः।।

अनन्वयेति। अनन्वयससन्देहौ उपमास्वेव दर्शितौ। अनन्वयशब्देन विरोध उच्यते, सन्देहशब्देन संशयः। संशयशब्दः यथार्थज्ञानव्यतिरिक्ततया सन्देहतुल्यः ; भ्रम इति यावत्। ससन्देहशब्देन संशयसहितो भ्रमः कथ्यते। उपमास्वेव इत्यत्र बहुवचनेन विरोधसंशयभ्रमाः त्रयोऽपि सूच्यन्ते। विरोधोपमायां विरोधः, संशयोपमायां संशयः, मोहोपमायां भ्रमश्च प्रदर्शितः। उपमारूपकं चापि रूपकेष्वेव दर्शितम्। उपमारूपकयोः सम्भेदो दर्शितः। **उत्प्रेक्षेति।** अत्र–

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

'अङ्गुलीभिरिव केशसञ्चयं
सन्निगृह्य तिमिरं मरीचिभिः।
कुड्मलीकृतसरोजलोचनं
चुम्बतीव रजनीमुखं शशी।।'

इतिवत् अस्माभिः अनुदाहृतेषु एवंप्रायेषु उत्प्रेक्षा वयवत्वमेव [न?] सङ्कीर्णता। तस्मात् उत्प्रेक्षावयवोऽपि उत्प्रेक्षाभेद एव। विरोधोपमादयोऽपि उपमाभेद एव। उपमारूपकं च रूपकभेद एव, न तु सङ्कीर्णमित्यभिप्रायः। भ्रमव्युदासाय एवमुक्तम्।।३५८।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आक्षिपन्त्यरविन्दानि मुग्धे! तव मुखश्रियम्।
कोशदण्डसमग्राणां किमेषामस्ति दुष्करम्॥३५९॥

रत्नश्री

मुग्धे! तव मुखस्य श्रियं शोभामरविन्दानि पद्मान्याक्षिपन्ति। त्वन्मुखसदृशानि इति यावत्। इयमुपमा। कथमेतदिति साध्यते-कोशः पद्मगर्भो धनसम्भारश्च, दण्डो नालं चतुरङ्गबलमिति च श्लिष्टम्। ताभ्यां समग्राणां पर्याप्तानामेषामरविन्दानां दुष्करम् असाध्यं कार्यं किमस्ति किञ्चित्? सर्वमेव साध्यं यत्त्वन्मुखश्रियमप्याक्षिपन्ति इत्यङ्गाङ्गिभाव[ा]वस्थानवत्याः संसृष्टेरुदाहरणमेतत्, उपमायाः साध्यत्वेनाङ्गितयावस्थानात्। [89a] कोशेत्यादेश्चार्थान्तरन्यासस्य श्लेषानुविद्धस्य साधनत्वेनाङ्गतया स्थितेरित्यलङ्कारत्रयं संसृष्टमङ्गाङ्गिभूतं वर्णितम्। उपमा अर्थान्तरन्यास इत्यलङ्कारद्वयं वा। श्लेषस्त्वर्थान्तरन्यासात्मनैव अवस्थितः, न पृथक् संख्यायत इति।

समकक्षा तु संसृष्टिः नोदाहृता। सा त्वेवं द्रष्टव्या-

स्तनोन्नता तनुः स्त्रीणां लोललोचनमाननम्।

वचांसि च मधूनीव कथयन्ति न विक्रियाम्॥ इति।

इयं जात्युपमासंसृष्टिः समकक्षेति॥

कोशदण्डेत्यादिना यद्यर्थान्तरन्यासोऽङ्गतयोपन्यस्तः किं तत्र श्लेषेण? अथ श्लेषः, स एवास्तु किमर्थान्तरन्यासेन? तदयं न

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्लेषो नार्थान्तरन्यासः शुद्धः। न चैतद्द्वयरूपा संसृष्टिरङ्गाङ्गिभावाप्रतीतेरनयोस्तदुदाहरणं चेदमुपमाया एव। [तस्याः] त्वङ्गित्वेनावसायादस्य त्वङ्गताप्रतीतेरित्यत आह–

हृदयङ्गमा

उत्प्रेक्षेति। –असौ अन्यैरुक्त इत्यर्थः, उत्प्रेक्षावयवः तन्नामालङ्कारभेदः अपि, उत्प्रेक्षाया भेदः विशेष एव। (तल्लक्षणं यथा, –"श्लिष्टेनार्थेन संस्पृष्टः किञ्चिच्चोपमयाऽन्वितः। रूपकार्थेन वा युक्त उत्प्रेक्षावयवो यथा।।" इति। तत्र श्लिष्टार्थसंस्पृष्टो यथा, –"मुक्तोत्करः सङ्कटशुक्तिमध्याद्विनिर्गतः सारसलोचनायाः। जानीमहेऽस्याः कमनीयकम्बुग्रीवाधिवासात् गुणवत्त्वमाप।।" इति। अत्र गुणवत्त्वे श्लेषः। अयञ्च श्लेषादिसङ्कीर्णोत्प्रेक्षामात्रमतो नात्र प्रयास इति भावः। एवञ्च दृष्टान्तस्योपमायां परिणामोल्लेखयोः रूपके कारणमालायाः हेतौ, तथा नव्यैः परिगृहीतानामन्येषाञ्च अलङ्काराणामनयैव रीत्या उक्तालङ्कारभेदेष्वन्तर्भावो वेदितव्य इति)।।–

अथ सङ्कीर्णं निरूपयति, नानेति।–नानालङ्काराणां बहूनामलङ्काराणां, संसृष्टिः एकत्र समावेशः, सङ्कीर्णं निगद्यते वैचित्र्यविशेषवत्तया प्राचीनैः पृथक् निरुच्यते, (यथा लौकिकानां हारकुण्डलादीनां प्रत्येकस्य यादृशौ शोभा तदपेक्षया मिथः तेषां सम्बन्धेन पृथक् शोभातिशयजनकतया चतुर्यष्टिकस्य हारस्य गोस्तन इति चतुर्विंशतियष्टिकस्य गुच्छार्द्ध इति द्वात्रिंशद्यष्टिकस्य च गुच्छ इत्यादिसंज्ञया पृथगलङ्कारत्वेन व्यपदेशः, तथा काव्यालङ्काराणामपि प्रत्येकस्य यादृशं वैचित्र्यं संङ्कीर्णस्य तदपेक्षया समधिकमिति पृथग्व्यपदेश इति भावः)।।३५९।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रभा

उत्प्रेक्षेति। उत्प्रेक्षावयवो नामालंकारः। तदाह भामहः-

श्लिष्टस्यार्थेन संयुक्तः किंचिदुत्प्रेक्षयान्वितः।
रूपकार्थेन च पुनरुत्प्रेक्षावयवो यथा।।

तुल्योदयावसानत्वाद्गतेस्तं प्रति भास्वति।
वासाय वासरः क्लान्तो विशतीव तमो गृहम्।।
(३.४७, ४८) इति।

असौ उत्प्रेक्षाभेद एव। श्लेषरूपकादिसंकीर्णा उत्प्रेक्षैव इति भावः। श्लेषोपमारूपकादिभिः प्राणिताया उत्प्रेक्षायाः प्रेमचन्द्रशर्मभिः प्रदत्तानि उदाहरणानि तत एव द्रष्टव्यानि। एवमेव दृष्टान्तस्योपमायाम् उल्लेखपरिणामयो रूपके कारणमालायाश्च हेतौ यथायथमन्तर्भावो ज्ञेयः।। संसृष्टिं लक्षयति–**नानेति।** सजातीयविजातीयविविधानामलंकाराणां संसृष्टिरेकत्र संसर्गः। संसृष्टिः तदाख्यमलंकारान्तरं निगद्यते संगमेन वैचित्र्यविशेषात् पृथक्त्वेन कथ्यते। यथा लौकिकहाराद्यलंकाराणां मिथः संसर्गेण पृथक् चारुतातिशयजनकतया गुच्छागुच्छार्धगोस्तनादिसंज्ञया पृथगलंकारत्वव्यपदेशस्तथा संकीर्णानां काव्यालंकाराणामपि पृथक् चारुताप्रत्यायकतया पृथगलंकारत्वेन संसृष्टिरिति संज्ञया व्यपदेश इति प्रेमचन्द्रशर्माणः।।३५९।।

विवृति

इदानीं सङ्कीर्णलक्षणं करोति–

सङ्कीर्णमपि [संसृष्टिरिति] लक्ष्यनिर्देशः नानालङ्कार-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संसृष्टिरिति तस्य लक्षणम्। उद्देशे सङ्कीर्णमित्यभिधाय निर्देशे संसृष्टिरित्यभिदधतो न दोषः सङ्कीर्णसंसृष्ट्योरित्ये[रे]कार्थत्वात्।।

संसृष्टिं लक्षयति–**नानेति**।।

संसृष्ट्यलङ्कारमाह–**नानेति**। अत्र तुशब्देनापि विरुद्धोपमादीनां सङ्कीर्णता निवर्त्यते।।३५९।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्लेषः सर्वासु पुष्णाति प्रायो वक्रोक्तिषु श्रियम्।
भिन्नं द्विधा स्वभावोक्तिर्वक्रोक्तिश्चेति वाङ्मयम्॥३६०॥

रत्नश्री

श्लेषोऽयमुक्तलक्षणः स्वभावोक्ति जात्यपरपर्यायां मुक्त्वा सर्वासूपमादिषु न कस्याञ्चिदेव, पदार्थस्वभावस्य यथावस्थानात्। अन्यथा तथा तथा परिकल्पनरूपासु वक्रासूक्तिषु श्रियं शोभां पुष्णात्यावहति प्रायो बाहुल्येन। क्वचिदप्रयोगादस्य प्राय इत्याह। तथा चालङ्कारा जातिवर्ज्याः सर्वे श्लेषानुगता एव प्रायः प्रागुदाहृता। जातौ वा क्वचित् प्रयोगात् प्राय इत्युक्तम्। तदयमप्यर्थान्तरन्यासः वक्रोक्तिस्वभावः श्लेषगर्भोऽङ्गतयोपन्यस्त इति। श्लेषैकदेशे एकोऽलङ्कारः। भेदविवक्षया वा अलङ्कारद्वयमिति द्रष्टव्यम्, यथोक्तं प्राक्। सर्वमिदमलङ्कारजातम् अनेनैव राशिद्वयेन व्यवहार लाघवार्थं संगृह्णन्नाह-वाङ्मयं सर्वमेतदलङ्कारजातं द्विधा, नान्यप्रकारावस्थामवतिष्ठते। कथम्? स्वभावोक्तिर्जातिः पूर्वोक्तलक्षणा यथावस्थितविचित्रपदार्थपरिदीपनरूपा, वक्रोक्तिश्च वस्तुस्वभावस्य तथातथान्यथाभिधानस्वभावा पूर्वोक्तविचित्रप्रभेदा उपमादिरुक्तिश्चेत्यनेन रूपेण द्विधेति प्रकृतम्॥

॥ इति संसृष्टिः ॥

भाविकत्वमुद्भावयन्नाह-

हृदयङ्गमा

सङ्कीर्णस्य भेदावाह, अङ्गेति। -क्वचित् अङ्गाङ्गिभावेन प्रधानगुणभावेन, अवस्थानं, क्वचित् सर्वेषां समकक्षता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तुल्यबलत्वम्, इति अलङ्कारसंसृष्टेः सङ्कीर्णालङ्कारस्य, द्वयी गतिः द्वौ भेदौ, लक्षणीया ज्ञातव्या इत्यर्थः। (अपरे तु अङ्गाङ्गिभावे सङ्करसंज्ञा समकक्षतायान्तु संसृष्टिसंज्ञेत्याहुः। तथा चोक्तं विश्वेश्वरपण्डितेन, –"संसृष्टिस्तु परस्परमनपेक्ष्य स्थितिरनेकस्य। एकमपेक्ष्यान्यस्य प्रादुर्भावे तु सङ्करः प्रोक्तः।।" इति। तत्र अङ्गाङ्गिभावसङ्करो बहूनां यथा, –"जाने युष्मत्प्रयाणे क्षितितिलक! रजोयोगदोषादशेषा, दिग्योषाः स्नान्ति सद्यस्तदरिनृपबधूनेत्रनीरापगासु। सङ्गम्य त्वत्प्रतापैः सममुषसि दधौ दोहदं देवता सा, प्राची प्रातः प्रसूते यदियमुरुमहत्खण्ड-मार्त्तण्डविम्बम्।।" अत्र रजोयोगेति श्लेषः ; दिग्योषा इति रूपकम्; जाने इत्युत्प्रेक्षा, दिशां नेत्राम्बुसंयोगार्त्तवस्नानत्व-प्रकारकसम्भावनाविरह इत्यर्थात्; प्रतापे नायकव्यवहारारोपात् समासोक्तिः ; दोहदवत्त्वहेतूक्त्या प्रातरित्यादिना वाक्यार्थहेतुकं काव्यलिङ्गम्; तत्र रूपकं श्लेषाङ्गं, दिशां स्त्रीत्वारोपं विना रजोयोगेत्यत्रार्त्तवरूपद्वितीयार्थप्रतिपत्तिविरहात्; श्लेषेण च स्नानोत्प्रेक्षा निर्वहति, आर्त्तवबोधाभावे वारिसम्बन्धे स्नानत्वप्रकारिकायाः सम्भावनाया अनुपपत्तेः। एवं दिशां स्त्रीत्वारोपः प्रतापस्य नायकव्यवहारविषयप्रतीतिरूपसमासोक्ति-समुत्थापकः, काव्यलिङ्गमपि तदुत्थाप्यमेव, दिशां स्त्रीत्वं विना गर्भजनकतायाः प्रतिपादयितुमशक्यत्वात्। एवमन्येषामन्योऽन्य-सापेक्षत्वादङ्गाङ्गिभावरूपः सङ्करः इति दिक्)।।३६०।।

प्रभा

संसृष्टेर्भेदान् दर्शयति–**अङ्गाङ्गिभावमिति।** अङ्गाङ्गिभावेन गौणप्रधानभावेन अवस्थानम् अवस्थितिः। तथा सर्वेषां समकक्षता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तुल्यबलता। अङ्गाङ्गिभावं विना समप्राधान्येन अवस्थानम् इत्यपरा। इति एवंप्रकारा अलंकारसंसृष्टेः द्वयी गतिः भेदद्वयं लक्षणीयं ज्ञेयम्। अत्र परे एकानुप्रवेशे संदिग्धत्वे अङ्गाङ्गित्वे च संसृष्टेः संकरसंज्ञा समकक्षायां तु संसृष्टिसंज्ञा इति आहुः।।३६०।।

विवृति

तस्यालङ्कारस्य संसृष्टेर्द्वौ भेदौ भवतः। तथा हि। अङ्गाङ्गिभावेनावस्थानमेकस्याङ्गभावोऽपरस्याङ्गिभावः गुणप्रधान-भावस्तेन अवस्थानम्। तथा सर्वेषामलङ्काराणां समकक्ष्यता नैकस्यापि गुणप्रधानभावः किं तु सर्वेषामेकत्रोपात्तानामलङ्काराणां स्वतन्त्रता।।

अलङ्कारसंसृष्टिद्वैविध्यमाह—अङ्गेति।।३६०।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भाविकत्वमिति प्राहुः प्रबन्धविषयं गुणम्।
भावः कवेरभिप्रायः काव्येष्वासिद्धि यः स्थितः॥३६१॥

रत्नश्री

प्रबन्धः पद्यगद्यमिश्रात्मकस्त्रिविधः सन्तानः प्रबध्यते विरच्यतेऽसाविति। स विषयो यस्य स प्रबन्धविषयः काव्यसमुदायगोचरः। नैकदेशाधिकरणं तं प्रबन्धविषयं गुणं वि[89b]शेषम्। अनुवादोऽयं भाविकत्वमिति। भाविकं नाम स्वार्थिकत्वादस्य विधेः। प्राहुरामनन्ति सूरय इति विधिः। सोऽपि न ज्ञायते कीदृशोऽसौ प्रबन्धविषयो गुणः यदनुवादेन भाविकत्वं विहितमिति तं प्रभवतः स्वरूपतश्च दर्शयन्नाह–भाव इत्यादि। कवेः प्रबन्धकर्तुरभिप्रायः प्रबन्धनिर्वाहकः प्रयत्नविशेषो विकल्पात्मकः। यदाह–काव्येषु प्रबन्धेषु साध्येषु साधनरूपेण आसिद्धि प्रथमतः प्रभृति प्रबन्धविषयां सिद्धिं समाप्तिमधिकृत्य यः स्थितः तत्त्वव्यापकः स तादृशो भावस्तावत् प्रभवस्तस्य गुणस्य। अत एवासौ प्रबन्धविषयः। प्रबन्धसाधकभावसन्ता[ना]नुवर्तित्वात्, न प्रादेशिकः। ततश्च सर्वालङ्कार[ाश्रय] भूतोऽसावादिमध्यान्तेषु प्रबन्धमनुवर्तते। एवं प्रभवतस्तावदुक्तः असौ गुण इति॥

सम्प्रति स्वरूपतस्तं विभजन्नाह–

हृदयङ्गमा

अङ्गाङ्गिभावसङ्कीर्णमुदाहरति, आक्षिपन्तीति। –हे मुग्धे! अरविन्दानि तव मुखश्रियम् आक्षिपन्ति तिरस्कुर्वन्ति, जिगौषन्तीत्यर्थः, तथा हि, कोषदण्डसमग्राणां कोषो धनसमूहः कुद्मलश्च, दण्डः चतुर्थोपायः नालञ्च, ताभ्यां समग्राणां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पूर्णानामित्यर्थः, एषां दुष्करं किम् अस्ति? (अत्र श्लेषः अर्थान्तरन्यासस्याङ्गम्, अर्थान्तरन्यासश्च पूर्वार्द्धस्थिताया उपमाया इत्यङ्गाङ्गिभावो बोध्यः)।।३६१।।

प्रभा

अङ्गाङ्गिभावसृष्टिमुदाहरति–**आक्षिपन्तीति।** हे मुग्धे तव मुखश्रियं वदनलक्ष्मीम्। अरविन्दानी आक्षिपन्ति तिरस्कुर्वन्ति। आक्षिपधातु- स्त्रौपम्यद्योतकः। तदुक्तं पूर्वम्–आक्रोशत्यवजानाति कदर्थयति निन्दति। उपमायामिमे प्रोक्ता इति। तथा चात्रोपमालंकारः। स च प्रधानः। कोषः धनराशिः कुड्मलश्च, दण्डः सामादिषु चतुर्थोपायो नालश्च ताभ्यां समग्राणां पूर्णानाम् एषां दुष्करं किम् अस्ति। अत्र श्लेषानुप्राणितहेत्वलंकार उपमाया अङ्गमिति केचित्। श्लेषानुप्राणितार्थान्तरन्यासस्तदङ्गमिति अपरे। द्वितीयार्थे च चतुर्थचरणे न किंचिदिह दुष्करम् इति पाठः समीचीनः। अन्यथा एषां कमलानां तत्कर्तृकमुखाक्षेपस्य समर्थनं दुर्घटं स्यात्। एकस्यैव समर्थ्यसमर्थकत्वायोगात्। तथा चात्र श्लेषानुविद्धोर्थान्तरन्यास उपमाया अङ्गम्। उपमा च प्रधाना इति अङ्गाङ्गिभावसंसृष्टिः।।३६१।।

विवृति

तदुदाहरति–

इत्युपमा।

कोशो द्रव्यं दण्डश्चतुरङ्गबलं ताभ्यां समग्राणां परिपूर्णानां किं दुष्करमरविन्दानास्ये[मे]षाम्। अरविन्दानां च कोशो मकरन्दास्पन्दं [दं] गर्भः। दण्डो नालमिति शे[श्ले]षः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न च [नु] खल्वर्थे षष्ठी प्रतिषिद्धा। ततः कर्तरि तृतीयायां किमेभिर्दुष्करमिति भवितव्यमिति चेन्न। कर्तृकारक[का]विवक्षायां शेषषष्ठीत्यदोषः। पूर्वोक्तार्थसमर्थनपरत्वादर्थान्तरन्यासोऽयमिति संसृष्टिः।।

la ÑVenqkgjfrµ **आक्षिपन्तीति।** मुग्धे अरविन्दानि ते मुखश्रियं आक्षिपन्तीत्युपमा, कोशदण्डसमग्राणामेषां किं दुष्करम् इत्यत्र अर्थान्तरन्यासश्च समकक्ष्यौ। कोशदण्डसमग्राणां इत्यत्र मुकुलनालसनाथानां इत्यर्थः, सधनबहुबलानां इत्यर्थश्च श्लिष्टौ। बलवतां किं दुष्करमस्तीति श्लेषः अर्थान्तरन्यासस्य अङ्गभावेन अवतिष्ठते। ननु एषां दुष्करमित्यत्र कर्तरि षष्ठी न प्राप्नोति, 'न लोकाव्यय–' इति प्रतिषेधात् इति चेत्, नेयं कर्तरि षष्ठी, येन प्रतिषेधः स्यात्; किं तु अत्र सम्बन्धमात्रे षष्ठी, एषां सम्बन्धि कृत्यं किं दुष्करम् इति। अत्र सा श्लेषस्य अङ्गभावं द्योतयति।।

उदाहरत्ति–**आक्षिपन्तीति।** अत्र श्लेषोपसर्जनः अर्थान्तरन्यासः। भवन्ति च अरविन्दानि कोशदण्डसमग्राणि; तेन तेषां न किञ्चिदशक्यम्। इति श्लेषद्वारेण अर्थं समर्थयन्तं अर्थान्तरन्यासं प्रति प्रस्तुतसाध्यवस्तुविशेषकतया स्थिताया उपमायाः अङ्गिभावो ज्ञायते। समकक्ष्यताया अपि उदाहरणमन्यत्र द्रष्टव्यम्। तच्च ईदृशम्–

लिम्पतीव तमोङ्गानि वर्षतीवाञ्जनं नभः।
असत्पुरुषसेवेव दृष्टिर्निष्फलतां गता।।
अत्र उत्प्रेक्षाया उपमायाश्च समकक्ष्यतैव।।३६१।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परस्परोपकारित्वं सर्वेषां वस्तुपर्वणाम्।
विशेषणानां व्यर्थानामक्रिया स्थानवर्णना॥३६२॥

हृदयङ्गमा

समकक्षतायां सङ्कीर्णं निदर्शयति, लिम्पतीति। –तमः अङ्गानि लिम्पतीव, नभः अञ्जनं वर्षतीव, दृष्टिः असत्पुरुषस्यनीचस्य, सेवेव विफलतां गता। (अत्र पूर्वार्द्धे उत्प्रेक्षायाः उत्तरार्द्धे उपमायाश्च निरपेक्षतया परस्परं प्राधान्येनावस्थानात् समकक्षतेति बोध्यम्॥ यथा वा बहूनाम्, –"एतैरेव यदा गजेन्द्रमलिनैराध्मातलम्बोदरैर्गर्जद्भिः सतड़िद्बलाकशबलैर्मेघैः सशल्यं मनः। तत् किं प्रोषितभर्त्तृबध्यपटहो हा हा हताशो वकः, प्राविड् प्राविड़िति ब्रवीति शठधीः क्षारं क्षते प्रक्षिपन्॥" अत्र गजेन्द्रमलिनेत्युपमा, बध्यपटह इति रूपकं, क्षारं क्षते प्रक्षिपन् इति निदर्शना एतेषाञ्च निरपेक्षाणामेव सत्त्वात् समकक्षता–सङ्कीर्णभेदः, मतान्तरोक्तः संसृष्टिभेदो वा बोध्यः। नव्यास्तु यत्र कस्यचिदलङ्कारस्य साधकम् अन्यस्य च बाधकं नास्ति तत्रान्यतमनिर्णयाभावात् सन्देहसङ्करास्यमपरमपि सङ्कीर्णभेदमङ्गीकुर्वन्ति; तदुक्तं विश्वेश्वरपण्डितेन, –"साधकबाधकमानाभावाच्चैकस्य निर्णयाभावे" इति। यथा,–"नयनानन्ददायीन्दोर्विम्बमेतत् प्रसीदति। अधुनाऽपि निरुद्धाशमपि जीर्णमिदं तमः॥" अत्र हि कामोद्दीपककालस्य भङ्ग्यन्तरेण प्रतिपादनात् किं पर्यायोक्तम्? किं वा इन्दुविम्बेन मुखस्य निगीर्णत्वादतिशयोक्तिः? आहोस्वित् एतदिति मुखं निर्दिश्य तस्येन्द्विम्बेन सहाभेदवर्णनाद्रूपकम्? यद्वा प्रदोषवर्णने चन्द्रविम्बस्य प्रकृतत्वेन साम्यविशेषणसाम्यान्मुख-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रतीत्या समासोक्तिः? उत मुखवर्णने प्रकृते अप्रस्तुतस्य चन्द्रस्यैव वर्णनादप्रस्तुतप्रशंसेति सन्देहः। तथा नवीनोक्तः अपरश्च सङ्करभेदः "एकपदाच्छब्दार्थालङ्कृत्योरवगतावन्यः" इत्युक्तलक्षणः एकाश्रयप्रवेशरूपोऽवगन्तव्यः। यथा,–"स्पष्टोल्लसत्किरण-केसरसूर्य्यविम्ब विस्तीर्णकर्णिकमथो दिवसारविन्दम्। श्लिष्टाष्ट-दिग्दलकपालमुखावतार बद्धान्धकारमधुपावलि सञ्चुकोच।।" अत्रैकपदानुप्रविष्टौ रूपकानुप्रासौ। ततश्च सङ्करस्य त्रिविधत्वमिति समाधानं नवीनानाम्। उक्तञ्च विश्वनाथेन, –"अङ्गाङ्गित्वेऽलङ्कृतीनां तद्वदेकाश्रयस्थितौ। सन्दिग्धत्वे च भवति सङ्करस्त्रिविधः पुनः।।" इति। स्वमते तु द्विविधभेदेष्वेव सन्देहैकाश्रयानुप्रवेशयोः प्रवेशात् पृथग्भेदो न दर्शित इति)।।३६२।।

प्रभा

समकक्षतासंसृष्टिमुदाहरति–**लिम्पतीति।** कृष्णपक्षप्रदोष-वर्णनमेतत्। तमः अङ्गानि लिम्पतीव। नभः अञ्जनं वर्षतीव। असत्पुरुषसेवेव नीचजनसेवेव दृष्टिर्निष्फलतां वस्तुनिरीक्षणा-सामर्थ्यं वैफल्यम् प्राप्ता। अत्र पूर्वार्धे उत्प्रेक्षाद्वयम्। उत्तरार्धे उपमा। तासां परस्परनिरपेक्षतयावस्थानात् समकक्षसंसृष्ट्यलंकारः। अयं विभिन्नाश्रयगतः। एकाश्रयगतो यथा–कुरवका रवकारणतां ययुरिति। अत्र रवकारवका इति वकारवकार इति च यमकयोः। एवम्–संसारध्वान्तविंध्वसहंसः, कंसनिषूदन इत्यत्र रूपकानुप्रासयोश्च एकत्र समकक्षतयावस्थानम्। मुखचन्द्रः शोभते इत्यत्र साधकबाधकाभावादुपमारूपकयोरेकाश्रयगता संदेहसंसृष्टिः।।३६२।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विवृति

(श्लेषः)सर्वासूपमादिषु वक्रोक्तिषु मध्ये श्रियं शोभां पुष्णाति। तदेव सर्वं वाङ्मयं द्विधा भिन्नं द्विप्रकारं भवति [स्वभावोक्तिः वक्रोक्तिश्चेति]।।

श्लेष इति। स्वव्या(स्वभावा)ख्यानव्यतिरिक्ता सर्वा अलंकृतिः वक्रोक्तिः इति उच्यते।।

श्लेष इति। श्लेषो न केवलं अर्थान्तरन्यास एव, सर्वासु वक्रोक्तिष्वपि श्रियं जनयति। वाङ्मयस्य द्वैविध्यं दर्शयति भिन्नमिति। स्वभावोक्तिः आद्यालङ्कारः ; वक्रोक्तिशब्देन उपमादयः सङ्कीर्णपर्यन्ता अलङ्कारा उच्यन्ते।।३६२।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्यक्तिरुक्तिक्रमवशाद्गम्भीरस्यापि वस्तुनः।
भावायत्तमिदं सर्वमिति तद्गाविकं विदुः॥३६३॥

रत्नश्री

वस्तुनः प्रबन्धार्थस्य समुदायस्य पर्वाण्येव यथा नगरवर्णनादयः। वस्तुनि च तानि पर्वाणीति वा। वस्तुपर्वणां काव्यार्थसंघातसन्धीनाम् अङ्गानि समुदायपर्वणामिव परस्परस्योपकारित्वमन्योन्याङ्गाङ्गिभावेन सापेक्षाणामवस्थानम्। न तु स्वतन्त्राणामयःशलाकानामिव परस्परासंघट्टनम्। तथाभावातिरेके प्रबन्धो नारभ्येत। ततश्च कथमस्य प्रबन्धविषयता गुणस्य? प्रबन्धविषयं च यावत् किञ्चिद् विशेष्यं सम्भवति तत्र यानि विशेषणानि तेषां विशेषणानामुपाधीनां व्यर्थानां विगतोऽर्थः प्रयोजनं प्रस्तुते क्वचिदुपयोगो येषां यतो वा तेषां प्रकृतानुपयोगिनां कार्ये विवक्षिते क्वचिदङ्गभावमभजताम् अक्रिया तादृशं कञ्चिदर्थमनपेक्ष्य विशेषणमित्येवाप्रयोगः। किं तु सार्थकानां प्रकृते क्वचिद् कथञ्चित् उपयोगिनामेव क्रिया कस्यचिद्वस्तुनो यात्रादेः [?] स्थाने समुपनतेऽवसरे प्राप्तकालं वर्णनम्। तादृशं हि वर्णनमतिशोभते। यदाह भारविः—

मुखरतावसरे हि विराजते

[किरातार्जुनीये ५.१६]

इति। न त्वप्राप्तावसरं वर्णयितव्यमित्येवं ज्ञेयम्। अत्र क्वचिदस्थाने वर्णनं तस्य सौभाग्योपहतत्वाद् गम्भीरस्यापि दुर्बोधस्य न केवलमविषयस्य वस्तुनः धर्मादिरूपस्यार्थस्य प्रस्तावोपनतस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्यक्तिः सुखप्रतिपत्तिः। कृताया उक्तेः प्रतिपादनस्य क्रमः प्रकारस्तादृशः करतलाम[50a]लकवत् अर्थप्रकाशनकौशल-स्वभावः तस्य वशात् सामर्थ्यात्। अत्र च सर्वत्र भाव एव सत्कवीनां प्रमाणम्। स हि सर्वमीदृशमुचितं विचिनोति, तद्विपर्ययं तु दुर्भगं न स्पृशति, यदाह- भावायत्तमिदं सर्वम्। इतीदमनन्तरोक्तं सर्वं वस्तु पूर्व[व]दुपकारादिलक्षणं विशेषचतुष्टयं भावे प्रबन्धव्यापिनि उचितानुचितविवेकवेधसि मनसि कवेरायत्तं प्रतिबद्धम्, तत्कार्यत्वादिति हेतोः। तत्सर्वमनन्तरोक्तं विदुर्विदन्ति तद्विदः कवयः।

ननु जात्यादिकमपि भाविकमेव, न हि तस्यापि विना भावेन अभिनिवृत्तिः। तत्किमिदमेव भाविकम्? उच्यते-पद्येऽप्येवम्। तथापि यो भाव[:] प्राबन्धिको विशिष्टः, तदायत्तमिह भाविकमभिप्रेतम्। अत एवोक्तम्-काव्येष्वासिद्धि यः स्थितः [२. ३६१] इति, जात्यादिकं तु प्रादेशिकभावाधीनम्। न हि प्रबन्धानुवर्तिना एकेन भावेन जात्यादिकं जन्यते प्रतिदेशमन्योन्यभावाभिनिवर्त्यत्वात् तस्य। तस्मात् तदन्वर्थैस्तैस्तैर-भिधानैर्यथोक्तेन विधिना व्यवह्रियते न भाविकमिति।।

।। इति भाविकम् ।।

ये काव्यधर्माः शास्त्रान्तरे स[न्ध्य]ङ्गादि[शब्द]व्यवहृताः त इह तल्लक्षणयोगादलङ्कारेषु संगृहीता इति दर्शयन्नाह-

हृदयङ्गमा

श्लेषस्य बहुषु सद्भावं दर्शयति, श्लेष इति। -श्लेषः प्रायः बाहुल्येन, सर्वासु वक्रोक्तिषु वचनभङ्गिरूपासु अलङ्कृतिषु, श्रियं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शोभां, पुष्णाति। वक्रोक्तिषु इत्येनेन तद्भिन्नमपि काव्यमस्तीति प्रतीयते, अन्यथा सर्वपदेनैव सिद्धेरित्यलङ्कारगतं काव्स्य भेदद्वयं दर्शयितुमाह, भिन्नमिति। –वाङ्मयं काव्यं, स्वभावोक्तिर्जात्यादीनां यथावत् स्वभाववर्णनरूपा, स्वभावाख्यानाद्यलङ्कारवदित्यर्थः, तथा वक्रोक्तिश्च भणितिभङ्ग्यात्मकोपमाद्यलङ्कारवच्च, इति भेदद्वयात्, द्विधा भिन्नं द्विविधं, स्वभावोक्तिमत् वक्रोक्तिमच्चेति भावः।।३६३।।

प्रभा

श्लेषस्य बह्वलंकारव्याप्तिं कथयति–**श्लेष इति।** श्लेषः प्रायः सर्वासु वक्रोक्तिषु भणतिभङ्गीरूपालंकारेषु श्रियं शोभां पुष्णाति। वक्रोक्तिषु इत्युक्त्या तत्समानकक्षां स्वभावोक्तिं स्मृत्वा काव्यवाङ्मयस्य द्वैविध्यं निर्दिशति–**भिन्नमिति।** स्वभावोक्तिः वस्तुस्वरूपवर्णनम्। वक्रोक्तिश्च सालंकारवचनम्। इति वाङ्मयं काव्यं द्विधा भिन्नम्।।३६३।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यच्च सन्ध्यङ्गवृत्त्यङ्गलक्षणाद्यागमान्तरे।
व्यावर्णितमिदं चेष्टमलङ्कारतयैव नः॥३६४॥

रत्नश्री

वक्तृणां[?] वक्तव्यान्तरसमुच्चये सन्धयो- मुखं प्रतिमुखं गर्भोऽवमर्शो निर्वहणमिति पञ्चोक्ताः तत्र उपक्षेपः परिकरः परिन्यासो विलोभनं युक्तिः प्राप्तिः समाधानं विधानं परिभावना उद्भेदः करणं भेद इति मुखाङ्गानि। विलासः परिसर्पो विधूतं तापनं नर्म नर्मद्युतिः प्रगमनं विरोधः पर्युपासनं पुष्पं वज्रमुपन्यासो वर्णसंहार इति प्रतिमुखाङ्गानि। अ[भू]ताहरणं मार्गो रूपमुदाहरणं क्रमः संग्रहोऽनुमानं [प्रार्थना] आक्षिप्तकं तोटकमधिबलमु[द्वे]गः संभ्रम इति गर्भाङ्गानि। अवपात उत्पातः सम्फेटः विद्रवः शक्तिः व्यवसायः प्रसादो द्युतिः खेदो निषेधो विरोध आदानं छलनं प्ररोचनेत्यवमर्शाङ्गानि। सन्धिर्निरोधो ग्रथनं निर्णयः परिभाषणं द्युतिः प्रसाद आनन्दः समय उपगूहनं भाषणं पूर्वभावः काव्यसंहारः प्रशस्तिरिति निर्वहणाङ्गानि।

वृत्तयो-भारती सात्त्वती कैशिकी आरभटी चेति चतस्त्रः। तासां प्रत्येकं चत्वार्यङ्गानि। तत्र भारत्याः प्ररोचना आमुखं वीथी शिल्पकं चेत्यङ्गचतुष्टयम्। सात्वत्या उत्थापकः परिवर्तकः संलापकः संघात्यश्चेति। कैशिक्या [नर्म] नर्मस्फिञ्जो नर्मस्फोटो नर्मगर्भश्चेति। आरभट्याः संक्षिप्तकोऽवपातो वस्तूत्थापनं संफेटश्चेत्यङ्गचतुष्टयम्।

लक्षणानि-भूषणमक्षरसंघातः शोभा उदाहरणं हेतुः संशयः दृष्टान्तः प्राप्तिः [अभि]प्रायो निदर्शनं निरुक्तकं सिद्धिः विशेषणं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गुणातिपातोऽतिशयः तुल्यतर्कः पादोच्चयो दृष्टान्तमुपदिष्टं विचारो विपर्ययो भ्रंशोऽनुनयो माला दाक्षिण्यं गर्हणमर्थापत्तिः प्रसिद्धिः पृच्छा सारूप्यं मनोरथो लेशः संक्षोभो गुणकीर्तनमनुक्तसिद्धिः प्रियवचनमिति षट्त्रिंशदुक्तानि।

एषां तु स्वरूपमिह विस्तरभयादनधिकाराच्च न निर्दिश्यते। तदागमान्तरादेवानुगन्तव्यम्। तदेतदादिर्यस्यान्यस्यापि तादृशस्य लास्याङ्गवीथ्यङ्गादेस्तत्तथा [व्या]वर्णितमधिकारे विस्तरेण अनेकधा चर्चितम्। आगमान्तरेऽन्यस्मिन् शास्त्रे भरतादौ। इदं च सर्वं न केवलं पूर्वोक्तम्। काव्यशोभाकरत्वेन तल्लक्षणयोगादलङ्करणाद् वा अलङ्कार इत्येव। न सन्ध्यङ्गादित्वेन काव्यार्थत्वेन वा पृथगलङ्कारात्। काव्यशोभाकरं हि तथा तादृशं कथमलङ्कारतामतिक्रामेत्? इष्टमनुगतमस्माकं क्रियाकल्प [एतदितिस्वी]क्रियताम्। अतस्तादृशं सर्वमलङ्कारसंगृहीतमिति। नाससंग्रहः कश्चिदिहेति भावः। अत एव वक्ष्यति–

संक्षिप्य विस्तरमनन्तमलंक्रियाणाम् [२.३६५]

इति। न च काव्यशरीरालङ्कारव्यतिरिक्तः कश्चित् काव्यधर्मः सम्भवति यस्ताभ्याम् असंगृहीतः स्यात्। तदिह यथालक्षणमाभ्यां संगृहीतमिति न किञ्चित् क्षीयते।।

एवं यथाप्रतिज्ञातमलङ्कार[बाहुल्य]वर्जं पूर्वाचार्योपदर्शित-परिमितालङ्कारविकल्पबीजप्रतिसंस्करणं सम्पाद्य निगयमयन्नाह–

हृदयङ्गमा

इदानीं सर्वालङ्कारसङ्ग्राहकं भाविकं निरूपयति, तदिति। –प्रबन्धा महाकाव्यनाटकाख्यायिकादयः, तद्विषयं तद्गतं, गुणं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चमत्कारजनकधर्म्मविशेषं, तत् अलङ्कारेषु प्रसिद्धं, भाविकं तदाख्यमलङ्कारम्, इति प्राहुः। (चमत्कारकधर्म्मविशेषाणां केषाञ्चित् स्वभावाख्यानाद्यलङ्कारनाम्ना अभिहितं, तथाविधान्यनन्तानि च सन्ति, तत्तन्नाम्ना वक्तुमशक्यान्येव, ततश्च प्रबन्धगतमेकमेव वैचित्र्यं भाविकमिति नाम्ना अभिहितमिति भावः)। भाविकनामव्युत्पत्तिं दर्शयितुमाह, भाव इति। –कवेरभिप्रायः भावः, तत्सम्बन्धितया भाविकमित्यन्वर्थसंज्ञा बोद्धव्या, स च भावः काव्येषु आसिद्धि समाप्तिपर्यन्तं, संस्थितः। (एतेनास्य अन्यालङ्कारवत् न केवलं पदवाक्यगतत्वं, किन्तु महावाक्यघटितप्रबन्धगतत्वमपीति बोध्यम्)।।३६४।।

प्रभा

अथ सर्वालंकारसंग्राहकं भाविकं लक्षयति–**तद्भाविकमिति।** प्रबन्धा महाकाव्यनाटकाख्यायिकादयस्तद्विषयं तद्गतं गुणं चमत्काराधायकधर्मविशेषम्। तत् प्रसिद्धम्। भाविकं तन्नामालंकार इति प्राहुः। संज्ञार्थं विशदयति **भावः इति।** कवेरभिप्रायः भावः। स च भावः काव्येषु आसिद्धि समाप्तिपर्यन्तम्। संस्थितः। तेन चास्यालंकारस्य न केवलं पदवाक्यगतत्वम् अपि तु प्रबन्धगतत्वमपीति बोध्यम्। प्रकाशकाराः–प्रत्यक्षा इव यद्भावाः क्रियन्ते भूतभाविनः। तद्भाविकम् इति लक्षयामासुः। तत्र संज्ञार्थानुगामीति ज्ञेयम्।।३६४।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वाचामतीत्य विषयं परिवर्तमाना-
नभ्यास एव विवरीतुमलं विशेषान्॥३६५॥

रत्नश्री

पन्थाः स एष विवृतः परिमाणवृत्त्या
संक्षिप्य विस्तरमनन्तमलंक्रियाणाम्।

स इति प्रक्रान्तः एषोऽयं निगम्यमानः। स इति वा पूर्वं प्रतिज्ञातः एष प्रसाधितः। स एष पन्था लक्ष्यलक्षणविकल्परूपो मार्गः। कस्य? अलंक्रियाणाम्। अलङ्काराणां जात्यादीनां सम्बन्धी विवृतः प्रतिसंस्कृतः। अस्माभिरिति गम्यते। गम्यमानाथस्य च शब्दस्य प्रयोगं प्रति कामचार [91a] इत्युक्तम्। जात्यादयोऽलङ्काराः सामान्यविशेषलक्ष्यलक्षणप्रभेदतः प्रतिपादिता इति यावत्। कथं पुनरनन्ता अलङ्काराः प्रतिपादयितुं शक्या इत्याशङ्का। यदुक्तम्–

ते चाद्यापि विकल्प्यन्ते कस्तान् कार्त्स्न्येन वक्ष्यति।
किं तु बीजं विकल्पानां पूर्वाचार्यैः प्रदर्शितम्।
तदेव प्रतिसंस्कर्तुमयमस्मत्परिश्रमः॥

[२.१-२]

तदेवानुसरन्नाह-परिमाणेत्यादि। अलंक्रियाणामलङ्काराणां विस्तरं प्रपञ्चं लक्ष्यलक्षणविकल्पात्मकम्, अनन्तमपरिमितं संक्षिप्य संगृह्य

काव्यशोभाकरान् धर्मानलङ्कारान् प्रचक्षते [२.१]

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इति सकलविकल्पव्यापकेन सामान्यलक्षणेन सास्नादि-मत्त्वेनेवानन्तं गोप्रभेदं निःशेषं संगृह्य। परिमाणस्य परिमितेर्वृत्त्या सद्भावेन पञ्चत्रिंशदलङ्काररूपेण परिमाणीकृत्य परि[माप्य] इति। यावत्। विवृत इति प्रकृतम्। न चैतद् व्याहतमाशङ्कनीयम्। यद्यपरिमितोऽलङ्कारविस्तरः कथमिह परिमित उक्त इति? योऽसावपरिमितोऽलङ्कारविस्तरोऽनुक्तो वर्तते स एवालङ्कारविस्तरः परिमित उक्तस्तज्जातीयत्वादित्यविरोधः। वस्तुतस्तु योऽनुक्तोऽलङ्कारविस्तरोऽपरिमितः सोऽन्यएव। यस्त्वयमुक्तः परिमितो विस्तरः सोऽप्यन्य एव। यदि पुनरेतावानलङ्कारविस्तरः, तदा अनन्ता अलङ्कारा इति विरुद्ध्येत, परिमितत्वादस्य विस्तरस्य। [अत्रो]क्तालङ्कार- विस्तरस्याभ्यासानुसारेण तस्याप्य[नुक्ता]-लङ्कारविस्तरस्यावगमसम्भवादनन्तोऽलङ्कारविस्तरोऽयं परिमाण-वृत्त्या विवृत इत्युक्तम्। यदाह-वाचामित्यादि। ये विशेषालङ्कारा वाचां गिरां विषयं गोचरमतीत्यातिक्रम्य वर्तन्ते, तान् वाचां विषयमतीत्य परिवर्तमानान् वस्तुतो विद्यमानान् इह चानुक्तानिति यावत्। अभ्यासः यथोक्तालङ्कारानुसारी स्वयं काव्यप्रयोगविषयोऽभियोग एव यथावत् कवीनाम्, नान्यत् किञ्चित् विवरीतुं प्रयोगद्वारेण प्रकाशयितुमलं समर्थः। एतन्मार्गानुसारेण हि प्रयोगाभ्यासवतां कवीनां स्वयमेवोक्तिविशेषलक्षणास्तेऽलङ्काराः प्रयोगपथमुप[पद्य]न्ते। ततश्चायमेव मार्गस्तेषाम् अप्यवगमोपाय इत्यनेनैव ते संगृहीताः। अत एवोक्तम्- संक्षिप्य विस्तरमनन्तमलंक्रियाणां स एष पन्थाः प्रकाशित इति। तस्मादशेषालङ्कारविषयं परिज्ञानमिच्छ[द्भिर]य पन्था यथावदभ्यसनीय इति।।

।। दण्डिकाव्यलक्षणटीकायां रत्नश्रीनाम्नि
द्वितीयोऽर्थालङ्कारपरिच्छेदः।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हृदयङ्गमा

कवेरभिप्रेतान् कतिचित् प्रबन्धगतगुणान् दर्शयति, परस्परेत्यादि। –सर्वेषां वस्तूनाम् आधिकारिकेतिवृत्तानां, पर्वणां तदुपयोगिनां प्रासङ्गिकेतिवृत्तानाञ्च, परस्परोपकारित्वं, कवेरभिप्रेतमिति शेषः। (उक्तञ्च नखकुट्टेन,–"इदं पुनर्वस्तु बुधैर्द्विविधं परिकल्पाते। आधिकारिकमेकं स्यात् प्रासङ्गिकमथापरम्।।" इति। यथा रामायणे रामचरितम् आधिकारिकं, सुग्रीवादिचरितं प्रासङ्गिकं, तयोश्च अङ्गाङ्गिभावेन परस्परोपकारित्वम्। महाकाव्यादावपि नगरार्णवशैलगजतुरगादि-वर्णनस्य साक्षात् परम्परया वा प्रधानोपकारित्वं दृश्यते। एवमन्यत्रापि साक्षात् परम्परया वा वेदितव्यम्) तथा व्यर्थानां प्रकृतानुपयोगिनां, विशेषणानाम् अक्रिया अननुष्ठानम्, अप्रयोग इत्यर्थः, साभिप्रायविशेषणोपन्यास इति भावः, (अयञ्च परिकरालङ्कार इति प्रकाशकारः, यथा,–"विशेषणैर्यत् साकूतैरुक्तिः परिकरस्तु सः" इति) तथा स्थानानां प्रकृतोपयोगिविषयाणां, वर्णना; किञ्च, उक्तिक्रमः वचनपरिपाटी, तद्बलात् तद्वशात्, तदीयप्रतिपादकतासामर्थ्यादित्यर्थः, गम्भीरस्यापि वस्तुनः निगूढ़स्यापि अर्थस्य, व्यक्तिः प्रस्फुटत्वं, या हि नव्यैरलङ्कारभेदरूपेण निर्दिष्टेति भावः, तत् इदं सर्वं भावायत्तम् अभिप्रायाधीनम्, इति भावायत्तत्वाद्धेतोः, भाविकं विदुः, आलङ्कारिका इति शेषः। (भावः कवेरभिप्रायः अस्त्यस्य इति विषयत्वाख्यसम्बन्धपरषष्ठीसमर्थात् ठन्-प्रत्ययसिद्धत्वेन तादृशार्थलाभादिति भावः। यद्वा, –कविगतो भावः आशयः श्रोतरि प्रतिविम्बत्वेन अस्तीति भाविकम्। यद्वा, –भावः भावना वा, पुनः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुनश्चेतसि निवेशनं, सोऽत्रास्ति इति च व्युत्पत्त्यर्थो दृश्यते। भूतानां भाविनाञ्च पदार्थानां यल्लौकिकप्रत्यक्षविषयत्वं तद्भाविकमिति केचित्। भूतस्य भविष्यतो वा अद्भुतपदार्थस्य प्रत्यक्षायमाणत्वं भाविकमिति विश्वनाथः। अन्ये तु, –"प्रत्यक्षा इव यत्रार्थाः दृश्यन्ते भूतभाविनः। अत्यद्भुताः स्यात्तद्वाचामनाकुल्येन भाविकम्।।"इत्याहुः। तत्रोदाहरणं यथा, –"मुनिर्जयति योगीन्द्रो महात्मा कुम्भसम्भवः। येनैकचुलुके दृष्टौ दिव्यौ तौ मत्स्यकच्छपौ।।" अत्र वर्णनीयस्य वर्णनावशादेव प्रत्यक्षायमाणत्वम्। क्वचित् प्रत्यक्षायमाणस्यैव वर्णनं यथा, –"अनातपत्रोऽप्ययमत्र लक्ष्यते सितातपत्रैरिव सर्वतो वृतः। अचामरोऽप्येष सदैव वीज्यते विलासबालव्यजनेन कोऽप्ययम्।।" इति)।।३६५।।३६६।।

यच्चेति।–किञ्चेति चार्थः। सन्धयः मुखादयः पञ्च, तदङ्गानि उपक्षेपादीनि चतुःषष्टिप्रकाराणि, वृत्तयः कौशिकीत्यादयश्चतस्त्रः, तदङ्गानि नर्मादीनि षोड़श, लक्षणानि भूषणादीनि षट्त्रिंशत्प्रकाराणि, (आदिपदेन नाट्यालङ्कारादीनां ग्रहणं, ते च आशीरादयस्त्रयस्त्रिंशत्, वीथ्यङ्गानि उद्घात्यकादीनि त्रयोदश, लास्याङ्गानि गेयादीनि दश) एतत् सर्वं यत् आगमान्तरे ग्रन्थान्तरे, व्यावर्णितं नाट्यशोभाकरत्वेन विशेषेण व्याख्यातम्, इदञ्च तदिदं सर्वं, नः अस्माकम्, अलङ्कारतयैव इष्टम् अभिलषितम्, अलङ्कारनाम्नैव कथितमित्यर्थः, तेषाञ्च यथायथमुक्तेष्वलङ्कारेष्वन्तर्भाव इति भावः।।३६७।।

परिच्छेदमिमम् उपसंहरति, पन्था इति।–अलङ्क्रियाणां स्वभावोक्त्याद्यलङ्कारणाम्, अनन्तं अशेषं, विस्तरं प्रपञ्चं, संहृत्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सङ्गृह्य, परिमाणवृत्त्या परिमितत्वेन, अनन्तत्वात् साकल्येन वक्तुमशक्यतया शीर्षग्रहणन्यायेनेति भावः, एषः सः प्रसिद्धः, पन्था मार्गः, विवृतः। अनेनैव पथा अनुसरणे अपरेऽपि ज्ञातव्या इत्याह, वाचामिति। –वाचां विषयम् अतीत्य परिवर्त्तमानान् अतिप्रभूततया वक्तुमशक्यानित्यर्थः, विशेषान् तान् भेदान्, विवरीतुं प्रकाशयितुम्, अभ्यास एव अस्यैव मार्गस्य पुनः पुनरालोचनमेव, अलं शक्तः, सङ्क्षिप्तस्यापि अस्य मार्गस्य पुनः पुनरभ्यासेनैव अपरेऽपि वेदितव्या इति भावः। ("एषः" इत्यत्र "एव" इति पुस्तकान्तरे पाठः, तत्र पन्था एव इत्यर्थः)।।३६८।।

इति श्रीजीवानन्दविद्यासागरभट्टाचार्यविरचितायां

काव्यादर्शटीकायां द्वितीयः परिच्छेदः।

प्रभा

कवेरभिप्रायविषयीभूतान् कांश्चित् प्रबन्धधर्मान् कथयति– **परस्परोपकारित्वमिति।** सर्वेषां वस्तुपर्वणाम् आधिकारिकेति– वृत्तानि वस्तूनि प्राकरणिकेतिवृत्तानि पर्वाणि। तदाह धनंजयः– वस्तु द्विधा। तत्राधिकारिकं मुख्यमङ्गं प्रासङ्गिकं विदुः इति। यथा रामायणे रामसीतावृत्तान्तः आधिकारिकम्। सुग्रीवबिभीषणादि– वृत्तान्तः प्रासङ्गिकम्। सर्वेषां तेषां परस्परोपकारित्वम्। कवेरभिप्रेतनगरसरित्समुद्रादिवर्णनम् अस्तोदयषड्ऋतुवर्णनं च परंपरया साक्षाद्वा प्रधानमुपकरोति इति ज्ञेयम्। तथा व्यर्थानां प्रकृतार्थापरिपोषकाणां विशेषणानाम्। अक्रिया अविधानम् अप्रयोग इत्यर्थः। अयं परिकरालंकार इति प्रकाशकारादयः। अपरे तु अपुष्टत्वदोषाभावोयम्, नायमलंकार इत्याहुः। तथा स्थानानां प्रकृतोपयुक्तानां विषयाणां वर्णनां। इयमपि कवेरभिप्रायविषयः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतेषां सर्वेषां तद्भाविकं विदुरिति अग्रिमश्लोकस्थपदेन अन्वयः।।३६५।।

व्यक्तिरिति। उक्तिक्रमबलाद् वचनोपन्यासानुक्रमसामर्थ्यात्। गम्भीरस्यापि गूढस्यापि वस्तुनः अर्थस्य व्यक्तिः अभिव्यक्तिः। इदं सर्वं भावायत्तं कवेरभिप्रायविषयम्। इति भावायत्तत्वात् तद्भाविकं विदुः।।३६६।।

यच्चेति। सन्धयः—मुखप्रतिमुखे गर्भः सावमर्शोथ संहृतिः इति पञ्च। तेषामङ्गानि—उपेक्षपः परिकरः परिन्यासो विलोभनम्। इत्यादीनि चतुःषष्टिसंख्याकानि। वृत्तयः—

शृङ्गारे कैशिकी वीरे सात्वत्यारभटी पुनः।
रसे रौद्रे च बीभत्से वृत्तिः सर्वत्र भारती।।

इति नियतस्थानाश्चतस्त्रः। तासामङ्गानि—नर्मतत्स्फूर्जतस्फोटतद्गर्भैश्चतुरङ्गिका। इत्यादीनि षोडश। लक्षणानि भूषणाक्षरसंघातादीनि षट्त्रिंशत्। आदिना नाट्यालंकारादीनां ग्रहणम्। एतत् सर्वमागमान्तरे भरतमुनिप्रणीतनाट्यशास्त्रे व्यावर्णितम् विस्तारेण कथितम्। तदिदं सर्वं नः अलंकारतयैवेष्टम्। तत्र केषांचित् स्वभावाख्यानादौ अन्तर्भावः केषांचिद् भाविके इति यथायथं विषयानुरोधेन ज्ञातव्यम्।।३६७।।

अलंकाराणां विस्तारं निवेदयन्नुपसंहरति—**पन्थाः स एष इति।** अलंक्रियाणां एतावत्पर्यन्तं विवृतानां स्वभावाख्यानाद्यलंकाराणाम्। अनन्तं मर्यादाशून्यम्। विस्तरं प्रभेदविस्तारम्। संहृत्य कार्त्स्न्येन वक्तुमशक्यतया संक्षेपेण प्रकटभेदं संगृह्य। परिमाणवृत्त्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परिमितत्वेन। स एष पन्थाः विवृतः अलंकारमार्गो दर्शित इत्यर्थः। अनेन मार्गेण कृतः सतताभ्यास एव अन्यान् प्रभेदान् दर्शयिष्यतीति कथयति–**वाचामिति।** वाचां विषयम् अतीत्य परिवर्तमानान् वागगोचरत्वेन कथयितुमशक्यान् इत्यर्थः। एतादृशान् विशेषान् अलंकारप्रभेदान् विवरीतुं विशदीकर्तुम् अभ्यास एव काव्याभ्यास एव अलं समर्थः। पुनः पुनरालोचनेन ते ज्ञातव्या इत्यर्थः। इति शम्।।३६८।।

इति श्रीवैराजक्षेत्रवासिभी रड्डीकुलावतंसैर्बाल-कृष्णाचार्यतनुजै रङ्गाचार्यसूरिभिः विरचितायां काव्यादर्शव्याख्यायां प्रभाख्यायां द्वितीयः परिच्छेदः।।

विवृति

(भाविकं लक्षयति)–

(आचार्याः भाविकत्वमिति) (भाविका) लङ्कारलक्षण-निरूपणार्थमाहुः। प्रबन्धविषयं गुणम्। भावे भवो भावादागतो वा भाविकस्तस्य भावो भा[विकत्वं]....(प्रब)न्धो विषयो गोचरो यस्यासौ प्रबन्धविषयो यो गुणः कवेस्तद्भाविकवित्वमित्युच्यते। अथ भावः क इत्याह–भावः कवेरभिप्रायः कवेः काव्यस्य कर्तुर्यद(योऽ)भिप्रायः स भाव इत्युच्यते क्वेत्याह शास्त्रेषु [?]काव्यादिषु। स किमन्त इत्याह–आसिद्धिर्यः[यः] स्थितः। आदित आरभ्य समाप्तिपर्यन्तः कवेर्योऽभिप्रायः तद्भाविकत्वम्। स भाविकोऽलङ्कार उच्यते।

एतदेवोक्तं भामहेनापि–

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भाविकत्वं पुनः प्राहुः प्रबन्धविषयं गुणम्।
प्रत्यक्षा इव दृश्यन्ते यत्रार्था भूतभाविनः।। इति।।

तथा न केवलं प्रबन्धविषयं गुणमेव भाविकत्वमाहुः। किं तु परस्परोपकारित्वं च वस्तुपर्वणां सर्वेषां यत्तच्च भाविकत्वमाहुराचार्याः। किं ना(कविनाऽ)भिधित्सितं त(ता क)था वस्तुशब्देनोच्यते। तस्य वस्तुनः पर्वाणि पर्वाणीव पर्वाणि कथावयवास्तेषामन्योन्योपकारकत्वम्। तथा विशेषणानां व्यर्थानां विरुद्धार्थानां विगतार्थानां वाऽक्रिया अकरणमप्रयोगो भाविकत्वम्। तथा स्थानवर्णना स्थाने उचिते प्रस्ताव एव परो (परं) न तु पुनर(क)स्मादेव कस्यचिद्वास्तवस्य [अवास्तवस्य वा]स्तवः। एतच्च भाविकत्वम्। तथा व्यक्तिरर्थव्यक्तिः। उक्तिक्रमबलात् उच्यते अनयेत्युक्तिस्तस्याः क्रमः परिपाटी तस्य बलं अभिधानवृत्तिः तस्मादुक्तिक्रमबलात् गम्भीरस्यापि कथावस्तुनो व्यक्तिः स्पष्टीकरणम्। एतत्सर्वं भावायतं कवेरभिप्रायायत्तामिति हेतोस्तद्भाविकत्वं (कं) विदुः।।

भाविकं लक्षयति–**भाविकं तमिति।** भावः कवेः अभिप्रायः ; तेन निर्वृत्तं प्रबन्धव्याप्तं गुणं भाविकं प्राहुः। काव्योपात्तानां भूधरादिवर्णनानां परस्परानुकूलत्वम्, अकिञ्चित्करस्य विशेषणस्य अकरणम्, अपेक्षितस्थाने विशेष-करणम्, गम्भीरस्य अर्थस्य श्लेषेण प्रकाशनम्–उपलक्षणमेतत्; लक्ष्मीश्रीशब्दादिबन्धचिह्नम् इत्यादि सर्वं भाविकं विदुः।।

भाविकं तमिति। काव्यशरीरगोचरधर्माः कवेः अभिप्रायाधीनाः। भाविकालङ्कारस्तु महाकाव्येष्वेव नियमेनाव-स्थितः।।३६३–३६५।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथा अत्यल्पमिदमुक्तम्। किं च–

यच्चागमान्तरे काव्यलक्षणादलङ्कारभावात् [गोचरात्] शास्त्रादन्य आगमः आगमान्तरं भरतशास्त्रं तस्मिन्नागमान्तरे यच्च यच्च (वृत्ति) प्र(वृ)त्त्यङ्गम(सन्धि) सन्ध्य(ङ्ग)लक्षणादि व्यावर्णितं भरतमुनिना तच्चेह काव्यालङ्कारे अस्माकमिष्टम्। अलङ्कारतया (इति वि)शेषः। वृत्तिप्र(वृ)त्यङ्गसलिल-(न्धि)सन्ध्यङ्गानि भरतशास्त्रादेवावगन्तव्यम् (यानि)।।

किमियन्त एव अलङ्काराः ? नेत्याह–यदिति। ये मुखं, प्रतिमुखं, गर्भः, अवमर्शः, निर्वहणं, इति पञ्च सन्धयः ; तेषां उपक्षेपपरिकरादीनि अङ्गानि; कैशिकी, आरमटी, सात्वती, भारती इति चतस्त्रो वृत्तयः ; तासाम् अङ्गानि नर्मतत्स्फिञ्जतत्स्फोटादीनि। लक्षणं विभूषणं च अक्षरसंहतिश्च। आगमान्तरे भरते।।

तदुपपादयति यदिति। आगमान्तरे लक्षणान्तरे–मुखं, प्रतिमुखं, गर्भः, अवमर्शः, उपसंहारः, इत्येते सन्धयः ; उपक्षेपादीनि गर्भसन्ध्यङ्गानि, अपवादादीनि अवमर्शसन्ध्यङ्गानि, सन्ध्यादीनि, सनध्यङ्गानि; कैशिकी आरभटी, सात्त्वती, भारती चेति चतस्त्रो वृ नर्मनर्मस्फिञ्जनर्म- स्फोप्टनर्मगर्भाः कैशिक्यङ्गानि; संक्षिप्तकः, अवपातः, त्थापनं, संस्फोटः, इति आरभट्यङ्गानि; उत्थापिकः, परिवर्तकः, संघात इति सात्वत्यङ्गानि; प्ररोचना, प्रस्तावना, वीथी, प्रहसनम् इति भारत्यङ्गानि आदिशब्देन पताकादीनि गृह्यन्ते। तत् अलङ्कारतया इष्टम् इत्यर्थः। च–शब्देन शास्त्रान्तरसिद्धः रसविषये वृत्तिनियमोऽपि भूषणतया ग्राह्यः इत्यर्थः। वृत्तिनियमोऽपि एवम्–

श्रृङ्गारे चैव हास्ये च वृत्तिः स्यात् कैशिकी तथा।
सात्वती चापि विज्ञेया वीराद्भुतरसाश्रया।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रौद्रे भयानके चैव वृत्तिरारभटी भवेत्।
बीभत्से करुणे चैव भारती वृत्तिरिष्यते।।३६६।।

इदानीं प्रकृतमुपसंहरन्नाह–

अलङ्काराणां पन्था मार्गो वैदर्भगौडीयभेदभिन्नः स एव चिरन्तनैराचार्यैरुक्तोऽस्माभिर्विवृतः श्लेषप्रसादादिरूपेण। तथा स एव पन्थाः उपमादीनां भाविकपर्यन्तानामलंक्रियाणां विवृतः। कथं विवृतः इत्याह–संक्षिप्त(प्य) विस्तर(रं) व्यासमनन्त(म)पर्यन्तं प्रतिकविस्थितं संहृत्य। तदुक्तम्–

इक्षुक्षीरगुडादीनां माधुर्यस्यान्तरं महत्।
तथाऽपि न तदाख्यातुं सरस्वत्याऽपि शक्यते।।

कया विवृत इत्याह–परिमाणवृत्त्या। परिमाणमियत्ता। तथा हि–वैदर्भमार्गस्य दश प्राणाः अर्थालङ्काराश्चोपमादयो नापरे इति। ये पुनः प्रतिपुरुषाभिप्रायभिन्ना विशेषा वाचां विषयं गोचरमतीत्य अतिक्रम्य स्थिता अवाग्गोचरास्तान् विशेषान् विवरीतुमभ्यास एवालं समर्थो न पुनराचार्योपदेशः। तदुक्तम्–

'बहुशो बहुशो(लो?)पायं कालेन बहुनास्य (थ?) च।
गच्छन्त्यह्य(भ्या?)सतस्तस्य गुणदोषाः प्रकाशताम्।।

इति दण्डिकृतालङ्कारस्य

टीकायां

वादिजङ्घालविरचितायां

द्वितीयः परिच्छेदः समाप्तः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पन्था इति। उपमारूपकाक्षेपादिदर्शितप्रपञ्चन्यायेन अन्येष्वपि अलङ्कारेषु अन्तर्भेदाः ऊहनीयाः। तल्लक्षणाभ्यास एव तान् विवृणोति।।

इति तरुणवाचस्पतिकृतायां काव्यादर्शटीकायां

द्वितीयः परिच्छेदः।

एते स्थूलरूपा एव दर्शिताः ; सूक्ष्माः पुनरलङ्काराः अभ्यासवशेन ज्ञायन्ते इतीदमाह—पन्था इति। उक्तेषु लक्षणान्तरेषु दर्शितानामन्येषाम् अन्तर्भावः इति यावत्।

इति दण्ड्यलङ्कारव्याख्याने हृदयङ्गमे अर्थालङ्कारविभागो नाम

द्वितीयः परिच्छेदः।

Acc. 39960
31160
NEPAL SANSKRIT UNIVERSITY LIBRARY
पुस्तकालय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ALL MAHAPURANAS

Text with Shloka Index & Introduction

Agni Mahapurana
664 pp 450.00

Bhagavata Mahapurana-
4vols 2304 pp Set 1500.00

Bhavishya Mahapurana
3vols 1400 pp Set 1200.00

Brahma Mahapurana
728 pp 450.00

Devi Bhagavata Mahapurana
1154 pp 800.00

Ganesha Purana
832 pp 1993 450.00

Garuda Mahapurana
668 pp 400.00

Harivansha Purana
मूल, हिन्दी अनुवाद तथा श्लोकानुक्रमणी सहित
1802 pp 2vols set 900.00

Kurma Mahapuran
298 pp 300.00

Linga Mahapurana
774 pp 400.00

Markandeya Mahapurana
मूल, हिन्दी अनुवाद तथा श्लोकानुक्रमणी सहित
828 pp 450.00

Narada Mahapurana
932 pp 600.00

Padma Mahapurana
2381pp 4vols set 1600.00

Shiva Mahapurana
1504 pp 2vols set 900.00

Shiva Mahapurana (Small Type)
412 pp 400.00

Skanda Mahapurana
5600 pp 8 vols set 4000.00

Skanda Mahapurana (small type)
1452 pp 3vols set 1500.00

Vamana Mahapurana
472 pp 400.00

Vayu Mahapurana
540 pp 400.00

Vishnudharmottara Mahapurana
1246 pp 900.00

Vishnu Mahapurana-with two commentaries
680 pp 500.00

विष्णुमहापुराण
मूल, हिन्दी अनुवाद तथा श्लोकानुक्रमणी संहित
—डा० श्रद्धा शुक्ला
2 vols Press

Maha Bhagavat Devipurana
Press

Ekamara Purana
490 pp 150.00

Kalki Purana
316pp 120.00

Kuber Purana (Text With Study) Press

Narasimha Purana
380 pp 100.00

Saura Purana
290 pp 100.00

Srimadbhargavopapuranam
—Brijesh Kumar Shukla
pp 348 Rs. 124.00

Vasuki Purana
260 pp 100.00

Ashtadasha Purana Darpana Contents of 18 Puranas
432 pp 180.00

PURANAS WITH TEXT, TRANS & NOTES IN ENGLISH VERSWISE

Vishnu Purana—*H.H. Wilson*
1065 pp 2 vols Set 500.00

Matsya Purana—*N.S. Singh*
1252 pp 2 vols 500.00

Narasimha Purana —*Dr.S.Jena*
750 pp 400.00

Kalika Purana
Prof. Biswanarayan Shastri
1770 pp 3vols set 900.00

NAG PUBLISHERS
11/A (UA) Jawahar Nagar, Delhi - 110007 (INDIA)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu